इत्यादि तीन दोहे, और परमात्मप्रकाशशास्त्रके फलके कथनकी मुख्यताकर तथा गर्वके त्यागकी मुख्यताकर 'लक्खण छंद' इत्यादि तीन दोहे हैं। इस प्रकार चूलिकाके अंतमें चौबीस दोहोंमे सात स्थल कहे गये हैं। इस तरह तीन महा अधिकारोंमें अंतर स्थल अनेक है। एक तो इस प्रकार पातनिका कही, अथवा अन्य तरह कथनकर दूसरी पातनिका कहते हैं—पहले अधिकारमें बहिरात्मा, अंतरात्मा और परमात्माके कथनकी मुख्यताकर क्षेपकोंको छोड़कर एकसौ तेईस दोहे कहे हैं। उनमेंसे 'जे जाया' इत्यादि पच्चीस दोहा पर्यंत तीन प्रकार आत्माके कथनका पीठिका व्याख्यान, 'जेहउ णिम्मलु' इत्यादि चौबीस दोहा पर्यंत सामान्यवर्णन, 'अप्पा जोइय सव्वगउ' इत्यादि तेतालीस दोहा पर्यंत विशेष वर्णन और 'अप्पा संजमु' इत्यादि इकतीस दोहा पर्यंत चूलिका व्याख्यान है। इस तरह अंतर अधिकारों सहित पहला महाधिकार कहा। इसके बाद मोक्ष, मोक्षफल और मोक्षमार्गके स्वरूपके कथनकी मुख्यताकर क्षेपकोंके सिवाय दोसौ चौदह दोहा पर्यंत दूसरा महाधिकार है। उसमें 'सिरि गुरु' इत्यादि तीस दोहा पर्यंत पीठिकाव्याख्यान, 'जो भत्तउ' इत्यादि छत्तीस दोहा पर्यंत सामान्यवर्णन और 'सुद्धह संजमु' इत्यादि एकतालीस दोहा पर्यंत विशेषवर्णन है, उसके बाद 'उक्तं च' को छोड़कर एक सौ सात दोहा पर्यंत अभेदरत्नत्रयकी मुख्यताकर चूलिका व्याख्यान है। इस तरह दूसरी पातनिका जाननी चाहिये।

अब प्रथम पातनिकाके अभिप्रायसे व्याख्यान किया जाता है, उसमें ग्रंथकर्ता श्रीयोगीन्द्राचार्य ग्रंथके आदिमे मंगलके लिये इष्टदेवता श्रीभगवान्‌को नमस्कार करते हुए एक दोहा छंद कहते

जे जाया झाणग्गियएँ कम्म-कलंक डहेवि ।
णिच्च-णिरंजण-णाण-मय ते परमप्प णवेवि ॥१॥

ये जाता ध्यानाग्निना कर्मकलङ्कान् दग्ध्वा ।
नित्यनिरञ्जनज्ञानमयास्तान् परमात्मनः नत्वा ॥१॥

जे जाया **ये केचन कर्तारो महात्मानो जाता उत्पन्नाः । केन कारणभूतेन ।** झाणग्गियए **ध्यानाग्निना । किं कृत्वा पूर्वम् ।** कम्मकलंक डहेवि **कर्मकलङ्कमलान् दग्ध्वा भस्मीकृत्वा । कथंभूताः जाताः ।** णिच्चणिरंजणणाणमय **नित्यनिरञ्जनज्ञान-मयाः** ते परमप्प णवेवि **तान्परमात्मनः कर्मतापन्नान्नत्वा प्रणम्येति तात्पर्यार्थव्याख्यानं समुदायकथनं संपिण्डितार्थनिरूपणमुपोद्घातः संग्रहवाक्यं वार्तिकमिति यावत् । इतो विशेषः । तद्यथा–ये जाता उत्पन्ना मेघपटलविनिर्गतदिनकरकिरणप्रभावात्कर्मपटलवि-घटनसमये सकलविमलकेवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपेण लोकालोकप्रकाशनसमर्थेन सर्वप्रकारोपादेयभूतेन कार्यसमयसाररूपपरिणताः । कया नयविवक्षया जाताः सिद्ध-पर्यायपरिणतिव्यक्तरूपतया धातुपाषाणे सुवर्णपर्यायपरिणति-व्यक्तिवत् । तथा चोक्तं** पञ्चास्तिकाये**—पर्यायार्थिकनयेन "अभूवपुव्वो हवदि सिद्धो", द्रव्यार्थिकनयेन पुनः शक्त्यपेक्षया पूर्वमेव शुद्धबुद्धैकस्वभावस्तिष्ठति धातुपाषाणे सुवर्णशक्तिवत् ।** तथा चोक्तं

हैं—[**ये**] जो भगवान् [**ध्यानाग्निना**] ध्यानरूपी अग्निसे [**कर्मकलङ्कान्**] पहले कर्मरूपी मैलोंको [**दग्ध्वा**] भस्म करके [**नित्यनिरञ्जनज्ञानमयाः जाताः**] नित्य, निरंजन और ज्ञानमयी सिद्ध परमात्मा हुए है, [**तान्**] उन [**परमात्मनः**] सिद्धोंको [**नत्वा**] नमस्कार करके मैं परमात्मप्रकाशका व्याख्यान करता हूँ। यह संक्षेप व्याख्यान किया। इसके बाद **विशेष व्याख्यान** करते हैं—जैसे मेघ-पटलसे बाहर निकली हुई सूर्यकी किरणोंकी प्रभा प्रबल होती है, उसी तरह कर्मरूप मेघ-समूहके विलय होनेपर अत्यंत निर्मल केवलज्ञानादि अनंतचतुष्टयकी प्रगटतास्वरूप परमात्मा परिणत हुए हैं। अनंतचतुष्टय अर्थात् अनंतज्ञान, अनंतदर्शन, अनंतसुख, अनंतवीर्य ये अनंतचतुष्टय सब प्रकार अंगीकार करने योग्य है, तथा लोकालोकके प्रकाशनको समर्थ हैं। जब सिद्धपरमेष्ठी अनंतचतुष्टयरूप परिणमे, तब कार्य-समयसार हुए। अंतरात्म अवस्थामे कारण-समयसार थे। जब कार्यसमयसार हुए तब सिद्धपर्याय परिणतिकी प्रगटता रूपकर शुद्ध परमात्मा हुए। जैसे सोना अन्य धातुके मिलापसे रहित हुआ, अपने सोलहवानरूप प्रगट होता है, उसी तरह कर्म-कलंक रहित सिद्धपर्यायरूप परिणमे। तथा **पंचास्तिकाय** ग्रंथमें भी कहा है—जो पर्यायार्थिकनयकर 'अभूदपुव्वो हवदि सिद्धो' अर्थात् जो पहले सिद्धपर्याय कभी नही पाई थी, वह कर्म-कलंकके विनाशसे पाई। यह पर्यायार्थिकनयकी मुख्यतासे कथन है, और द्रव्यार्थिकनयकर शक्तिकी अपेक्षा यह जीव सदा ही शुद्ध बुद्ध (ज्ञान) स्वभाव तिष्ठता है। जैसे धातु पाषाणके मेलमें भी शक्तिरूप सुवर्ण मौजूद ही है, क्योंकि सुवर्ण-शक्ति सुवर्णमें सदा ही रहती है, जब परवस्तुका संयोग दूर हो जाता है, तब वह व्यक्तिरूप होता है। सारांश यह है कि शक्तिरूप तो पहले ही था, लेकिन व्यक्तिरूप सिद्धपर्याय पाने

द्रव्यसंग्रहे—शुद्धद्रव्यार्थिकनयेन "सव्वे सुद्धा हु सुद्धणया" सर्वे जीवाः शुद्धबुद्धैकस्वभावाः। केन जाताः। ध्यानाग्निना करणभूतेन ध्यानशब्देन आगमापेक्षया वीतरागनिर्विकल्पशुक्लध्यानम्, अध्यात्मापेक्षया वीतरागनिर्विकल्परूपातीतध्यानम्। तथा चोक्तम्—"पदस्थं मन्त्रवाक्यस्थं पिण्डस्थं स्वात्मचिन्तनम्। रूपस्थं सर्वचिद्रूपं रूपातीतं निरञ्जनम् ॥" तच्च ध्यानं वस्तुवृत्त्या शुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसमुत्पन्नवीतरागपरमानन्दसमरसीभावसुखरसास्वादरूपमिति ज्ञातव्यम्। किं कृत्वा जाताः। कर्ममलकलङ्कान् दग्ध्वा कर्ममलशब्देन द्रव्यकर्मभावकर्माणि गृह्यन्ते। पुद्गलपिण्डरूपाणि ज्ञानावरणादीन्यष्टौ द्रव्यकर्माणि, रागादिसंकल्पविकल्परूपाणि पुनर्भावकर्माणि। द्रव्यकर्मदहनमनुपचरितासद्भूतव्यवहारनयेन, भावकर्मदहनं पुनरशुद्धनिश्चयेन शुद्धनिश्चयेन बन्धमोक्षौ न स्तः। इत्थंभूतकर्ममलकलङ्कान् दग्ध्वा कथंभूता जाताः। नित्यनिरञ्जनज्ञानमयाः। क्षणिकैकान्तवादिसौगत-मतानुसारिशिष्यं प्रति द्रव्यार्थिकनयेन नित्यटङ्कोत्कीर्णज्ञायकैकस्वभावपरमात्मद्रव्यव्यवस्थापनार्थं नित्यविशेषणं कृतम्। अथ कल्पशते गते जगत् शून्यं भवति पश्चात्सदाशिवे जगत्करणविषये चिन्ता भवति तदनन्तरं मुक्तिगतानां जीवानां कर्माञ्जनसंयोगं कृत्वा संसारे पतनं करोतीति नैयायिका वदन्ति, तन्मतानुसारिशिष्यं प्रति भावकर्मद्रव्यकर्मनोकर्माञ्जन-

---

से हुआ। शुद्ध द्रव्यार्थिकनयकर सभी जीव सदा शुद्ध ही हैं। ऐसा ही द्रव्यसंग्रह मे कहा है, "सव्वे सुद्धाहु सुद्धणया' अर्थात् शुद्ध नयकर सभी जीव शक्तिरूप शुद्ध हैं और पर्यायार्थिकनयसे व्यक्तिकर शुद्ध हुए। किस कारणसे ? ध्यानाग्निना अर्थात् ध्यानरूपी अग्निकर कर्मरूपी कलंकोंको भस्म किया, तब सिद्ध परमात्मा हुए। वह ध्यान कौनसा है ? आगमकी अपेक्षा तो वीतराग निर्विकल्प शुक्लध्यान है और अध्यात्मकी अपेक्षा वीतराग निर्विकल्प रूपातीत ध्यान है। तथा दूसरी जगह भी कहा है—"पदस्थं" इत्यादि, उसका अर्थ यह है, कि णमोकारमंत्र आदिका तो ध्यान है, वह **पदस्थ** कहलाता है, पिंड (शरीर) में ठहरा हुआ जो निज आत्मा है, उसका चिंतवन वह **पिंडस्थ** है, सर्व चिद्रूप (सकल परमात्मा) जो अरहंतदेव उनका ध्यान वह **रूपस्थ** है, और निरंजन (सिद्धभगवान्) का ध्यान **रूपातीत** कहा जाता है। वस्तुके स्वभावसे विचारा जावे, तो शुद्ध आत्माका सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्ररूप अभेद रत्नत्रयमयी जो निर्विकल्प समाधि है, उससे उत्पन्न हुआ वीतराग परमानंद समरसी भाव सुखरसका आस्वाद वही जिसका स्वरूप है, ऐसा ध्यानका लक्षण जानना चाहिये। इसी ध्यानके प्रभावसे कर्मरूपी मैल वही हुआ कलंक, उनको भस्मकर सिद्ध हुए। कर्म-कलंक अर्थात् द्रव्यकर्म भावकर्म इनमेंसे जो पुद्गलपिंडरूपज्ञानावरणादि आठ कर्म वे द्रव्यकर्म हैं, और रागादिक संकल्प-विकल्प परिणाम भावकर्म कहे जाते हैं। यहाँ भावकर्मका दहन अशुद्ध निश्चयनयकर हुआ, तथा द्रव्यकर्मका दहन असद्भूत अनुपचरितव्यवहारनयकर हुआ और शुद्ध निश्चयकर तो जीवके बंध मोक्ष दोनों ही नहीं है। इस प्रकार कर्मरूपमलोंको भस्मकर जो भगवान् हुए, वे कैसे हैं ? वे भगवान् सिद्धपरमेष्ठी नित्य निरंजन ज्ञानमयी हैं। यहाँपर नित्य जो विशेषण

निषेधार्थं मुक्तजीवानां निरञ्जनविशेषणं कृतम् । मुक्तात्मनां सुप्तावस्थावद्‌बहिर्ज्ञेयविषये परिज्ञानं नास्तीति सांख्या वदन्ति, तन्मतानुसारिशिष्यं प्रति जगत्त्रयकालत्रयवर्ति-सर्वपदार्थयुगपत्परिच्छित्तिरूपकेवलज्ञानस्थापनार्थं ज्ञानमय-विशेषणं कृतमिति । तानि-त्थंभूतान् परमात्मनो नत्वा प्रणम्य नमस्कृत्येति क्रियाकारकसंबन्धः । अत्र नत्वेति शब्दरूपो वाचनिको द्रव्यनमस्कारो प्राह्योऽसद्‌भूतव्यवहारनयेन ज्ञातव्यः, केवलज्ञा-नाद्यनन्तगुणस्मरणरूपो भावनमस्कारः पुनरशुद्धनिश्चयनयेनेति, शुद्धनिश्चयनयेन वन्द्य-वन्दकभावो नास्तीति । एवं पदखण्डनारूपेण शब्दार्थः कथितः नयविभागकथनरूपेण नयार्थोऽपि भणितः, बौद्धादिमतस्वरूपकथनप्रस्तावे मतार्थोऽपि निरूपितः, एवंगुण-विशिष्टाः सिद्धा मुक्ताः सन्तीत्यागमार्थः प्रसिद्धः । अत्र नित्यनिरञ्जनज्ञानमयरूपं परमात्मद्रव्यमुपादेयमिति भावार्थः । अनेन प्रकारेण शब्दनयमतागमभावार्थो व्याख्यानकाले यथासंभवं सर्वत्र ज्ञातव्य इति ॥१॥

किया है, वह एकान्तवादी बौद्ध जो कि आत्माको नित्य नही मानता क्षणिक मानता है, उसके समझानेके लिये है। द्रव्यार्थिकनयकर आत्माको नित्य कहा है, टंकोत्कीर्ण अर्थात् टाँकीकासा घड्या सुघट ज्ञायक एकस्वभाव परम द्रव्य है। ऐसा निश्चय करानेके लिये नित्यपनेका निरूपण किया है। इसके बाद निरंजनपनेका कथन करते हैं। जो नैयायिकमती हैं वे ऐसा कहते हैं "सौ कल्पकाल चले जानेपर जगत् शून्य हो जाता है और सब जीव उस समय मुक्त हो जाते है तब सदाशिवको जगत्के करनेकी चिंता होती है। उसके बाद जो मुक्त हुए थे, उन सबके कर्मरूप अंजनका संयोग करके संसारमें पुनः डाल देता है", ऐसी नैयायिकोंकी श्रद्धा है। उनके सम्बोधनेके लिये निरंजनपनेका वर्णन किया कि भावकर्म-द्रव्यकर्म-नोकर्मरूप अंजनका संसर्ग सिद्धोंके कभी नही होता। इसीलिये सिद्धोंको निरंजन ऐसा विशेषण कहा है। अब सांख्यमती कहते हैं—"जैसे सोनेकी अवस्थामें सोते हुए पुरुष-को बाह्य पदार्थोंका ज्ञान नही होता, वैसे ही मुक्तजीवोंको बाह्य पदार्थोंका ज्ञान नहीं होता है।" ऐसे जो सिद्धदशामें ज्ञानका अभाव मानते है, उनके प्रतिबोध करनेके लिये तीन जगत् तीनकालवर्ती सब पदार्थोंका एक समयमें ही जानना है, अर्थात् जिसमें समस्त लोकालोकके जाननेकी शक्ति है, ऐसे ज्ञायकतारूप केवलज्ञानके स्थापन करनेके लिये सिद्धोंका ज्ञानमय विशेषण किया। वे भगवान् नित्य हैं, निरंजन हैं, और ज्ञानमय हैं, ऐसे सिद्धपरमात्माओंको नमस्कार करके ग्रंथका व्याख्यान करता हूँ। यह नमस्कार शब्दरूप वचन द्रव्यनमस्कार असद्भूत व्यवहारनयसे है और केवल-ज्ञानादि अनंत गुणस्मरणरूप भावनमस्कार अशुद्ध निश्चयनयसे कहा जाता है। यह द्रव्य–भावरूप नमस्कार व्यवहारनयकर साधक-दशामें कहा है, शुद्धनिश्चयनयकर वंद्य-वंदक भाव नहीं है। ऐसे पदखंडनारूप शब्दार्थ कहा और नयविभागरूप कथनकर नयार्थ भी कहा, तथा बौद्ध, नैयायिक, सांख्यादि मतके कथन करनेसे मतार्थ कहा, इस प्रकार अनंतगुणात्मक सिद्धपरमेष्ठी संसारसे मुक्त हुए हैं, यह सिद्धांतका अर्थ प्रसिद्ध ही है, और निरंजन ज्ञानमयी परमात्मद्रव्य आदरने योग्य है, उपादेय है, यह भावार्थ है, इसी तरह शब्द नय, मत, आगम, भावार्थ व्याख्यानके अवसर पर सब जगह जान लेना। ॥१॥

अथ संसारसमुद्रोत्तरणोपायभूतं वीतरागनिर्विकल्पसमाधिपोतं समारुह्य ये शिवमयनिरुपमज्ञानमया भविष्यन्त्यग्रे तानहं नमस्करोमीत्यभिप्रायं मनसि धृत्वा ग्रन्थकारः सूत्रमाह, इत्यनेन क्रमेण पातनिकास्वरूपं सर्वत्र ज्ञातव्यम्—

ते वंदउँ सिरि-सिद्ध-गण होसहिँ जे वि अणंत ।
सिवमय-णिरुवम-णाणमय परम-समाहि भजंत ।।२।।

तान् वन्दे श्रीसिद्धगणान् भविष्यन्ति येऽपि अनन्ताः ।
शिवमयनिरुपमज्ञानमयाः परमसमाधि भजन्तः ।।२।।

ते वंदउं तान् वन्दे । तान् कान् । सिरिसिद्धगण श्रीसिद्धगणान् । ये किं करिष्यन्ति । होसहिं जे वि अणंत भविष्यन्त्यग्रे येऽप्यनन्ताः । कथंभूता भविष्यन्ति । सिवमयणिरुवमणाणमय शिवमयनिरुपमज्ञानमयाः, किं भजन्तः सन्तः इत्थंभूता भविष्यन्ति । परमसमाहि भजंत रागादिविकल्परहितपरमसमाधिं भजन्तः सेवमानाः इतो विशेषः । तथाहि—तान् सिद्धगणान् कर्मतापन्नान् अहं वन्दे । कथंभूतान् । केवलज्ञानादिमोक्षलक्ष्मीसहितान् सम्यक्त्वाद्यष्टगुणविभूतिसहितान् अनन्तान् । किं करिष्यन्ति । ये वीतरागसर्वज्ञप्रणीतमार्गेण दुर्लभबोधिं लब्ध्वा भविष्यन्त्यग्रे श्रेणिकादयः । किंविशिष्टा भविष्यन्ति । शिवमयनिरुपमज्ञानमयाः । अत्र शिवशब्देन स्वशुद्धात्मभावनोत्पन्नवीतरागपरमानन्दसुखं ग्राह्यं, निरुपमशब्देन समस्तोपमानरहितं ग्राह्यं, ज्ञानशब्देन केवलज्ञानं ग्राह्यम् । किं कुर्वाणाः सन्त इत्थभूताः भविष्यन्ति । विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपामूल्यरत्नत्रयभारपूर्णं

अब संसार-समुद्रके तरनेका उपाय जो वीतराग निर्विकल्प समाधिरूप जहाज है, उसपर चढ़कर जो आगामी कालमें कल्याणमय अनुपम ज्ञानमयी होंगे, उनको मैं नमस्कार करता हूँ—['अहं'] मै [तान्] उन [सिद्धगणान्] सिद्धसमूहोंको [वन्दे] नमस्कार करता हूँ, [येऽपि] जो [अनन्ताः] आगामीकालमें अनंत [भविष्यन्ति] होंगे । कैसे होंगे ? [शिवमयनिरुपमज्ञानमयाः] परमकल्याणमय, अनुपम और ज्ञानमय होंगे । क्या करते हुए ? [परमसमाधिं] रागादि विकल्प रहित जो परमसमाधि उसको [भजन्तः] सेवते हुए । अब विशेष कहते हैं—जो सिद्ध होवेंगे, उनकी मैं वन्दना करता हूँ । कैसे होंगे, आगामी कालमे सिद्ध, केवलज्ञानादि मोक्षलक्ष्मी सहित और सम्यक्त्वादि आठ गुणों सहित अनंत होंगे । क्या करके सिद्ध होंगे ? वीतराग सर्वज्ञदेवकर प्ररूपित मार्गकर दुर्लभ ज्ञानको पाकर राजा श्रेणिक आदिकके जीव सिद्ध होंगे । पुनः कैसे होंगे ? शिव अर्थात् निज शुद्धात्माकी भावना, उसकर उपजा जो वीतराग परमानंद सुख, उस स्वरूप होंगे, समस्त उपमा रहित अनुपम होंगे, और केवलज्ञानमयी होंगे । क्या करते हुए ऐसे होंगे ? निर्मल ज्ञान दर्शनस्वभाव जो शुद्धात्मा है, उसके यथार्थ श्रद्धान-ज्ञान-आचरणरूप अमोलिक रत्नत्रयकर पूर्ण और मिथ्यात्व विषय कषायादिरूप समस्त विभावरूप जलके प्रवेशसे रहित शुद्धात्माकी

मिथ्यात्वविषयकषायादिरूपसमस्तविभावजलप्रवेशरहितं शुद्धात्मभावनोत्थसहजानन्दैकरूपसुखामृतविपरीतनरकादिदुःखरूपेण क्षारजलेन पूर्णस्य संसारसमुद्रस्य तरणोपायभूतं समाधिपोतं भजन्तः सेवमानास्तदाधारेण गच्छन्त इत्यर्थः । अत्र शिवमयनिरुपमज्ञानमयशुद्धात्मस्वरूपमुपादेयमिति भावार्थः ।। २ ।।

अथानन्तरं परमसमाध्यग्निना कर्मेन्धन होमं कुर्वाणान् वर्तमानान् सिद्धानहं नमस्करोमि—

ते हउँ वंदउँ सिद्ध-गण अच्छहिँ जे वि हवंत ।
परम-समाहि-महग्गिएँ कम्मिंधणइँ हुणंत ।। ३ ।।

तान् अहं वन्दे सिद्धगणान् तिष्ठन्ति येऽपि भवन्तः ।
परमसमाधिमहाग्निना कर्मेन्धनानि जुह्वन्तः ।। ३ ।।

ते हउं वंदउं सिद्धगण **तानहं सिद्धगणान् वन्दे । ये कथंभूताः ।** अत्थ(च्छ) हिं जे वि हवंत **इदानीं तिष्ठन्ति ये भवन्तः सन्तः । किं कुर्वाणास्तिष्ठन्ति ।** परमसमाहिमहग्गियएँ कम्मिधणइं हुणंत **परमसमाध्यग्निना कर्मेन्धनानि होमयन्तः । अतो विशेषः । तद्यथा—तान् सिद्धसमूहानहं वन्दे वीतरागनिर्विकल्पस्वसंवेदनज्ञानलक्षणपारमार्थिकसिद्धभक्त्या नमस्करोमि । ये किंविशिष्टाः । इदानीं पञ्चमहाविदेहेषु भवन्तस्तिष्ठन्ति श्रीसीमन्धरस्वामिप्रभृतयः । किं कुर्वन्तस्तिष्ठन्ति । वीतरागपरमसामायिकभावनाविनाभूतनिर्दोषपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिवैश्वानरे कर्मेन्धनाहुतिभिः कृत्वा होमं कुर्वन्त इति ।**

भावनासे उत्पन्न हुआ जो सहजानंदरूप सुखामृत, उससे विपरीत जो नारकादि दुःख वे ही हुए क्षारजल, उनकर पूर्ण इस संसाररूपी समुद्रके तरनेका उपाय जो परमसमाधिरूप जहाज उसको सेवते हुए, उसके आधारसे चलते हुए, अनत सिद्ध होंगे । इस व्याख्यानका यह भावार्थ हुआ, कि जो शिवमय अनुपम ज्ञानमय शुद्धात्मस्वरूप है वही उपादेय है ।। २ ।। आगे परमसमाधिरूप अग्नि कर्मरूप ईंधनका होम करते हुए वर्तमानकालमें महाविदेहक्षेत्रमें सीमंधरस्वामी आदि तिष्ठते हैं, उनको नमस्कार करता हूँ—[**अहं**] मैं [**तान्** [उन [**सिद्धगणान्**] सिद्ध समूहोंको [**वन्दे**] नमस्कार करता हूँ [**येऽपि**] जो [**भवन्तः तिष्ठन्ति**] वर्तमान समयमें विराज रहे है । **क्या करते हुए ?** [**परमसमाधिमहाग्निना**] परमसमाधरूप महा अग्निकर [**कर्मेन्धनानि**] कर्मरूप ईंधनको [**जुह्वन्तः**] भस्म करते हुए । अब विशेष व्याख्यान है—उन सिद्धोंको मैं वीतराग निर्विकल्पस्वसंवेदन ज्ञानरूप परमार्थ सिद्धभक्तिकर नमस्कार करता हूँ । कैसे है वे ? अब वर्तमान समयमे पंच महाविदेहक्षेत्रोंमें श्रीसीमंधरस्वामी आदि विराजमान है । क्या करते हुए ? वीतराग परमसामायिकचारित्रकी भावनाकर संयुक्त जो निर्दोष परमात्माका यथार्थ श्रद्धान-ज्ञान-आचरणरूप अभेद रत्नत्रय उस मई निर्विकल्पसमाधिरूपी अग्निमें कर्मरूप ईंधनको होम करते हुए तिष्ठ रहे हैं । इस कथनमे

अत्र शुद्धात्मद्रव्यस्योपादेयभूतस्य प्राप्त्युपायभूतत्वान्निर्विकल्पसमाधिरेवोपादेय इति भावार्थः ॥ ३ ॥

अथ पूर्वकाले शुद्धात्मस्वरूपं प्राप्य स्वसंवेदनज्ञानबलेन कर्मक्षयं कृत्वा ये सिद्धा भूत्वा निर्वाणे वसन्ति तानहं वन्दे—

ते पुणु वंदउँ सिद्ध-गण जे णिव्वाणि वसंति ।
णाणिं तिहुयणि गरुया वि भव-सायरि ण पडंति ॥ ४ ॥

तान् पुनः वन्दे सिद्धगणान् ये निर्वाणे वसन्ति ।
ज्ञानेन त्रिभुवने गुरुका अपि भवसागरे न पतन्ति ॥ ४ ॥

ते पुणु वंदउं सिद्धगण तान् पुनर्वन्दे सिद्धगणान् । किंविशिष्टान् । जे णिव्वाणि वसंति ये निर्वाणे मोक्षपदे वसन्ति तिष्ठन्ति । पुनरपि कथंभूता ये । णाणिं तिहुयणि गरुया वि भवसायरि ण पडंति ज्ञानेन त्रिभुवनगुरुका अपि भवसागरे न पतन्ति । अत ऊर्ध्वं विशेषः । तथाहि—तान् पुनर्वन्देऽहं सिद्धगणान् ये तीर्थंकरपरमदेवभरतराघवपाण्डवादयः पूर्वकाले वीतरागनिर्विकल्पस्वसंवेदनज्ञानबलेन स्वशुद्धात्मस्वरूपं प्राप्य कर्मक्षयं कृत्वेदानीं निर्वाणे तिष्ठन्ति सदापि न संशयः । तानपि कथंभूतान् । लोकालोकप्रकाशककेवलज्ञानस्वसंवेदनत्रिभुवनगुरून् । त्रैलोकया लोकनपरमात्मस्वरूपनिश्चयव्यवहारपदार्थव्यवहारनयकेवल ज्ञान प्रकाशेन गुरुकान् । लोकालोकनं परामात्मस्वरूपावलोकनं निश्चयेन पुद्गलादिपदार्थावलोकन व्यवहारनयेन केवलज्ञानप्रकाशेन समाहितस्वस्वरूपभूते निर्वाणपदे तिष्ठन्ति यतः ततस्तन्निर्वाणपदमुपादेयमिति तात्पर्यार्थः ॥ ४ ॥

अतः ऊर्ध्वं यद्यपि व्यवहारनयेन मुक्तिशिलायां तिसृन्ति शुद्धात्मनः हि सिद्धास्तथापि निश्चयनयेन शुद्धात्मस्वरूपे तिष्ठन्तीति कथयति—

शुद्धात्मद्रव्यकी प्राप्तिका उपायभूत निर्विकल्प समाधि उपादेय (आदरने योग्य) है, यह भावार्थ हुआ ॥ ३ ॥ आगे जो महामुनि होकर शुद्धात्मस्वरूपको पाके सम्यग्ज्ञानके बलसे कर्मोंका क्षयकर सिद्ध हुए निर्वाणमें बस रहे है, उनको मै बन्दता हूँ—[पुनः] फिर ['अहं'] मै [तान्] उन [सिद्धगणान्] सिद्धोंको [वन्दे] बंदता हूँ, [ये] जो [निर्वाणे] मोक्षमे [वसन्ति] तिष्ठ रहे है । कैसे हैं, वे [ज्ञानेन] ज्ञानसे [त्रिभुवने गुरुका अपि] तीनलोकमे गुरु है, तो भी [भवसागरे] संसार-समुद्रमें [न पतन्ति] नही पड़ते है ॥ भावार्थ—जो भारी होता है, वह गुरुतर होता है, और जलमें डूब जाता है, वे भगवान् त्रैलोक्यमे गुरु है, परन्तु भव-सागरमे नहीं पडते है । उन सिद्धोंको मै वंदता हूँ, जो तीर्थंकर परमदेव, तथा भरत, सगर, राघव, पांडवादिक पूर्वकालमे वीतरागनिर्विकल्प स्वसंवेदनज्ञानके बलसे निजशुद्धात्मस्वरूप पाके, कर्मोका क्षयकर, परमसमाधानरूप निर्वाण-पदमें विराज रहे है उनको मेरा नमस्कार होवे यह सारांश हुआ ॥ ४ ॥

ते पुणु वंदउँ सिद्ध-गण जे अप्पाणि वसंत।
लोयालोउ वि सयलु इहु अच्छहिँ विमलु णियंत ॥ ५ ॥

तान् पुनर्वन्दे सिद्धगणान् ये आत्मनि वसन्तः।
लोकालोकमपि सकलं इह तिष्ठन्ति विमलं पश्यन्तः ॥ ५ ॥

ते पुणु वंदउं सिद्धगण **तान् पुनर्वन्दे सिद्धगणान्**। जे अप्पाणि वसंत लोयालोउ वि सयलु इहु अत्थ (च्छ) हिं विमलु णियंत **ये आत्मनि वसन्तो लोकालोकं सततस्वरूपपदार्थं निश्चयन्त इति। इदानीं विशेषः। तद्यथा–तान् पुनरहं वन्दे सिद्धगणान् सिद्धसमूहान् वन्दे कर्मक्षयनिमित्तम्। पुनरपि कथंभूतं सिद्धस्वरूपम्। चैतन्यानन्दस्वभावं लोकालोकव्यापिसूक्ष्मपर्यायशुद्धस्वरूपं ज्ञानदर्शनोपयोगलक्षणम्। निश्चय एकीभूतव्यवहाराभावे स्वात्मनि अपि च सुखदुःखभावाभावयोरेकीकृत्य स्वसंवद्यस्वरूपे स्वयत्ने तिष्ठन्ति। उपचरितासद्भूतव्यवहारे लोकालोकावलोकनं स्वसंवेद्यं प्रतिभाति, आत्मस्वरूपकैवल्यज्ञानोपशमं यथा पुरुषार्थपदार्थदृष्टो भवति तेषां बाह्यवृत्तिनिमित्तमुत्पत्तिस्थूलसूक्ष्मपरपदार्थव्यवहारात्मानमेव जानन्ति। यदि निश्चयेन तिष्ठन्ति तर्हि परकीयसुखदुःखपरिज्ञाने सुखदुःखानुभवं प्राप्नोति, परकीयरागद्वेषहेतुपरिज्ञाने च रागद्वेषमयत्वं च प्राप्नोतीति महद्दूषणम्। अत्र यत् निश्चयेन स्वस्वरूपेऽवस्थानं भणितं तदेवोपादेयमिति भावार्थः ॥ ५ ॥**

अथ निष्कलात्मानं सिद्धपरमेष्ठिनं नत्वेदानीं तस्य सिद्धस्वरूपस्य तत्प्राप्त्युपायस्य च प्रतिपादकं सकलात्मानं नमस्करोमि—

आगे यद्यपि वे सिद्ध परमात्मा व्यवहारनयकर लोकालोकको देखते हुए मोक्षमे तिष्ठ रहे हैं, लोकके शिखर ऊपर विराजते हैं, तो भी शुद्ध निश्चयनयकर अपने स्वरूपमे ही स्थित है, उनको मै नमस्कार करता हूँ।—[**अहं**] मै [**पुनः**] फिर [**तान्**] उन [**सिद्धगणान्**] सिद्धोके समूहको [**वन्दे**] वंदना हूँ [**ये**] जो [**आत्मनि वसन्तः**] निश्चयनयकर अपने स्वरूपमे तिष्ठते हुए व्यवहारनयकर [**सकलं**] समस्त [**लोकालोकं**] लोक अलोकको [**विमलं**] सशय रहित [**पश्यन्तः**] प्रत्यक्ष देखते हुए [**तिष्ठन्ति**] ठहर रहे है ॥ **विशेष**—मै कर्मोके क्षयके निमित्त फिर उन सिद्धोंको नमस्कार करता हूँ, जो निश्चयनयकर अपने स्वरूपमे स्थित है, और व्यवहारनयकर सब लोकालोकको नि सदेहपनेसे प्रत्यक्ष देखते हैं, परंतु पदार्थोमें तन्मयी नहीं है, अपने स्वरूपमे तन्मयी है। जो परपदार्थोमे तन्मयी हो, तो परके सुख दुःखसे आप सुखी दु खी होवे, ऐसा उनमे कदाचित् नही है। व्यवहारनयकर स्थलसूक्ष्म सबको केवलज्ञानकर प्रत्यक्ष निःसदेह जानते है, किसी पदार्थसे राग द्वेष नही है। यदि रागके हेतुसे किसीको जाने, तो वे राग द्वेषमयी होवें, यह बड़ा दूषण है, इसलिये यह निश्चय हुआ कि निश्चयनयकर अपने स्वरूपमे निवास करते है परमे नही, और अपनी ज्ञायक-

१. पाठान्तरः—निश्चयन्त = निश्चयन्तस्तिष्ठति।

केवल-दंसण-णाणमय केवल-सुक्ख सहाय ।
जिणवर वंदउँ भत्तियए जेहिँ पयासिय भाव ।। ६ ।।

केवलदर्शनज्ञानमयान् केवलसुखस्वभावान् ।
जिनवरान् वन्दे भक्त्या यैः प्रकाशिता भावाः ।। ६ ।।

केवलदर्शनज्ञानमयाः केवलसुखस्वभावा ये तान् जिनवरानहं वन्दे । कया । भक्त्या । यैः किं कृतम् । प्रकाशिता भावा जीवाजीवादिपदार्था इति । इतो विशेषः । केवलज्ञानाद्यनन्तचतुष्टयस्वरूपपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयात्मकं सुखदुःखजीवितमरणलाभालाभशत्रुमित्रसमानभावनाविनाभूतवीतरागनिर्विकल्पसमाधिपूर्वं जिनोपदेशं लब्ध्वा पश्चादनन्तचतुष्टयस्वरूपा जाता ये। पुनश्च किं कृतम् । यैः अनुवादरूपेण जीवादिपदार्थाः प्रकाशिताः। विशेषेण तु कर्माभावे सति केवलज्ञानाद्यनन्तगुणस्वरूपलाभात्मको मोक्षः, शुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मको मोक्षमार्गश्च, तानहं वन्दे । अत्रार्हद्गुणस्वरूपस्वशुद्धात्मस्वरूपमेवोपादेयमिति भावार्थः ।। ६ ।।

अथानन्तरं भेदाभेदरत्नत्रयाराधकानाचार्योपाध्यायसाधून्नमस्करोमि—

जे परमप्पु णियंति मुणि परम-समाहि धरेवि ।
परमाणंदह कारणिण तिण्णि वि ते वि णवेवि ।। ७ ।।

ये परमात्मानं पश्यन्ति मुनयः परमसमाधिं धृत्वा ।
परमानन्दस्य कारणेन त्रीनपि तानपि नत्वा ।। ७ ।।

शक्तिकर सबको प्रत्यक्ष देखते है जानते हैं। जो निश्चयकर अपने स्वरूपमें निवास कहा, इसलिये वह अपना स्वरूप ही आराधने योग्य है यह भावार्थ हुआ ।। ५ ।। आगे निरंजन, निराकार, निःशरीर सिद्धपरमेष्ठीको नमस्कार करता हूँ—[**केवलदर्शनज्ञानमया**] जो केवलदर्शन और केवलज्ञानमयी हैं, [**केवलसुखस्वभावाः**] तथा जिनका केवलसुख ही स्वभाव है और [**यैः**] जिन्होंने [**भावाः**] जीवादिक सकल पदार्थ [**प्रकाशिताः**] प्रकाशित किये, उनको मै [**भक्त्या**] भक्तिसे [**वंदे**] नमस्कार करता हूँ ।। **विशेष**—केवलज्ञानादि अनंतचतुष्टयस्वरूप जो परमात्मतत्त्व है, उसके यथार्थ श्रद्धान, ज्ञान और अनुभव, इन स्वरूप अभेदरत्नत्रय वह जिनका स्वभाव है, और सुख-दुःख, जीवित-मरण, लाभ-अलाभ, शत्रु-मित्र, सबमें समान भाव होनेसे उत्पन्न हुई वीतरागनिर्विकल्प परमसमाधि उसके कहनेवाले जिनराजके उपदेशको पाकर अनंत चतुष्टयरूप हुए, तथा जिन्होंने यथार्थ जीवादि पदार्थोंका स्वरूप प्रकाशित किया तथा जो कर्मका अभाव है वह वही केवलज्ञानादि अनंतगुणरूप मोक्ष और जो शुद्धात्माका यथार्थ श्रद्धान-ज्ञान-आचरणरूप अभेदरत्नत्रय वही हुआ मोक्षमार्ग ऐसे मोक्ष और मोक्षमार्गको भी प्रगट किया, उनको मैं नमस्कार करता हूँ। इस व्याख्यानमें अरहंतदेवके केवलज्ञानादि गुणस्वरूप जो शुद्धात्मस्वरूप है, वही आराधने योग्य है, यह भावार्थ जानना ।। ६ ।।

जे परमप्पु णियंति मुणि ये केचन परमात्मानं निर्गच्छन्ति स्वसंवेदनज्ञानेन जानन्ति मुनयस्तपोधनाः । किं कृत्वा पूर्वम् । परमसमाहि धरेवि रागादिविकल्परहितं परमसमाधिं धृत्वा । केन कारणेन । परमाणंदह कारणिण निर्विकल्पसमाधिसमुत्पन्न-सदानन्दपरमसमरसीभावसुखरसास्वादनिमित्तेन तिण्णि वि ते वि णवेवि त्रीनप्याचा-र्योपाध्यायसाधून् नत्वा नमस्कृत्येत्यर्थः । अतो विशेषः । अनुपचरितासद्भूतव्यवहार-संबन्धः द्रव्यकर्मनोकर्मरहितं तथैवाशुद्धनिश्चयसंबन्धः मतिज्ञानादिविभावगुणनरनारका-दिविभावपर्यायरहितं यच्चिदानन्दैकस्वभावं शुद्धात्मतत्त्वं तदेव भूतार्थं परमार्थरूपस-मयसारशब्दवाच्यं सर्वप्रकारोपादेयभूतं तस्माच्च यदन्यत्तद्धेयमिति । चलमलिनागाढ-रहितत्वेन निश्चयश्रद्धानबुद्धिः सम्यक्त्वं तत्राचरणं परिणमनं दर्शनाचारस्तत्रैव संशय-विपर्यासानध्यवसायरहितत्वेन स्वसंवेदनज्ञानरूपेण ग्राहकबुद्धिः सम्यग्ज्ञानं तत्राचरणं परिणमनं ज्ञानाचारः, तत्रैव शुभाशुभसंकल्पविकल्परहितत्वेन नित्यानन्दमयसुखरसा-स्वादस्थिरानुभवनं च सम्यक्चारित्रं तत्राचरणं परिणमनं चारित्राचारः, तत्रैव पर-द्रव्येच्छानिरोधेन सहजानन्दैकरूपेण प्रतपनं तपश्चरणं तत्राचरणं परिणमनं तपश्चर-णाचारः, तत्रैव शुद्धात्मस्वरूपे स्वशक्त्यनवगूहनेनाचरणं परिणमनं वीर्याचार इति निश्चयपञ्चाचाराः । निःशङ्काद्यष्टगुणभेदो बाह्यदर्शनाचारः, कालविनयाद्यष्टभेदो

आगे भेदाभेदरत्नत्रयके आराधक जो आचार्य, उपाध्याय और साधु हैं, उनको मैं नमस्कार करता हूँ—[ये मुनयः] जो मुनि [परमसमाधिं] परमसमाधिको [धृत्वा] धारण करके सम्यग्ज्ञानकर [परमात्मानं] परमात्माको [पश्यन्ति] देखते हैं। किस लिए [परमानंदस्य कारणेन] रागादि विकल्प रहित परमसमाधिसे उत्पन्न हुए परम सुखके रसका अनुभव करनेके लिये [तान् अपि] उन [त्रीन् अपि] तीनों आचार्य, उपाध्याय, साधुओंको भी [नत्वा] मैं नमस्कार करके परमात्म-प्रकाशका व्याख्यान करता हूँ ॥ **विशेष**—अनुपचरित अर्थात् जो उपचरित नहीं है, इसीसे अनादि संबंध है, परंतु असद्भूत (मिथ्या) है, ऐसा व्यवहारनयकर द्रव्यकर्म, नोकर्मका संबंध होता है, उससे रहित और अशुद्ध निश्चयनयकर रागादिका संबंध है, उससे तथा मतिज्ञानादि विभावगुणके संबंधसे रहित और नर नारकादि चतुर्गतिरूप विभावपर्यायोंसे रहित ऐसा जो चिदानंदचिद्रूप एक अखंडस्वभाव शुद्धात्मतत्त्व है वही सत्य है। उसीको परमार्थरूप समयसार कहना चाहिये। वही सब प्रकार आराधने योग्य है। उससे जुदो जो परवस्तु है वह सब त्याज्य है। ऐसी दृढ़ प्रतीति चंचलता रहित निर्मल अवगाढ़ परम श्रद्धा है उसको सम्यक्त्व कहते हैं, उसका जो आचरण अर्थात् उस स्वरूप परिणमन वह **दर्शनाचार** कहा जाता है और उसी निजस्वरूपमें संशय-विमोह-विभ्रम-रहित जो स्वसंवेदनज्ञानरूप ग्राहकबुद्धि वह सम्यग्ज्ञान हुआ, उसका जो आचरण अर्थात् उसरूप परिणमन वह **ज्ञानाचार** है, उसी शुद्ध स्वरूपमें शुभ-अशुभ समस्त संकल्प विकल्प रहित जो नित्यानंदमय निज-रसका आस्वाद, निश्चल अनुभव, वह सम्यक्चारित्र है, उसका जो आचरण, उसरूप परिणमन, वह **चारित्राचार** है, उसी परमानंद स्वरूपमें परद्रव्यकी इच्छाका निरोधकर सहज आनंदरूप तप-

बाह्यज्ञानाचारः, पञ्चमहाव्रतपञ्चसमितित्रिगुप्तिनिर्ग्रन्थरूपो बाह्यचारित्राचारः, अनशनादिद्वादशभेदरूपो बाह्यतपश्चरणाचारः, बाह्यस्वशक्त्यनवगूहनरूपो बाह्यवीर्याचार इति। अयं तु व्यवहारपञ्चाचारः पारंपर्येण साधक इति। विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानबहिर्द्रव्येच्छानिवृत्तिरूपं तपश्चरणं स्वशक्त्यनवगूहनवीर्यरूपाभेदपञ्चाचाररूपात्मकं शुद्धोपयोगभावनान्तर्भूतं वीतरागनिर्विकल्पसमाधिं स्वयमाचरन्त्यन्यानाचारयन्तीति भवन्त्याचार्यास्तानहं वन्दे। पञ्चास्तिकायषड्द्रव्यसप्ततत्त्वनवपदार्थेषु मध्ये शुद्धजीवास्तिकायशुद्धजीवद्रव्यशुद्धजीवतत्त्वशुद्धजीवपदार्थसंज्ञं स्वशुद्धात्मभावमुपादेयं तस्माच्चान्यद्धेयं कथयन्ति, शुद्धात्मस्वभावसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकं निश्चयमोक्षमार्गं च ये कथयन्ति ते भवन्त्युपाध्यायास्तानहं वन्दे। शुद्धबुद्धैकस्वभावशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणतपश्चरणरूपाभेदचतुर्विधनिश्चयाराधनात्मकवीतरागनिर्विकल्पसमाधिं ये साधयन्ति ते भवन्ति साधवस्तानहं वन्दे। अत्रायमेव ते समाचरन्ति कथयन्ति साधयन्ति च वीतरागनिर्विकल्पसमाधिं तमेवोपादेयभूतस्य स्वशुद्धात्मतत्त्वस्य साधकत्वादु-

---

श्चरणस्वरूप परिणमन वह **तपश्चरणाचार** है और उसी शुद्धात्मस्वरूपमें अपनी शक्तिको प्रकटकर आचरण परिणमन वह **वीर्याचार** है। यह निश्चय पंचाचारका लक्षण कहा। अब व्यवहारका लक्षण **कहते हैं—**निःशंकितको आदि लेकर अष्ट अंगरूप बाह्यदर्शनाचार, शब्द शुद्ध, अर्थ शुद्ध आदि अष्ट प्रकार बाह्य ज्ञानाचार, पंच महाव्रत, पंच समिति, तीन गुप्तिरूप व्यवहार चारित्राचार, अनशनादि बारह तपरूप तपाचार और अपनी शक्ति प्रगटकर मुनिव्रतका आचरण यह व्यवहारवीर्याचार है। यह व्यवहार पंचाचार परम्पराय मोक्षका कारण है, और निर्मल ज्ञान-दर्शनस्वभाव जो शुद्धात्मतत्त्व उसका यथार्थ श्रद्धान, ज्ञान, आचरण तथा परद्रव्यकी इच्छाका निरोध और निजशक्तिका प्रगट करना ऐसा यह निश्चय पंचाचार साक्षात् मुक्तिका कारण है। ऐसे निश्चय व्यवहाररूप पंचाचारोंको आप आचरें और दूसरोंको आचरवावें ऐसे आचार्योंको मैं वंदता हूँ। पंचास्तिकाय, षट् द्रव्य, सप्त तत्त्व, नवपदार्थ है, उनमें निज शुद्ध जीवास्तिकाय, निजशुद्ध जीवद्रव्य, निज शुद्ध जीवतत्त्व, निज शुद्ध जीवपदार्थ, जो आप शुद्धात्मा है, वही उपादेय (ग्रहण करने योग्य) है, अन्य सब त्यागने योग्य हैं, ऐसा उपदेश करते है, तथा शुद्धात्मस्वभावका सम्यक् श्रद्धान-ज्ञान-आचरणरूप अभेद रत्नत्रय है, वही निश्चयमोक्षमार्ग है, ऐसा उपदेश शिष्योंको देते हैं, ऐसे उपाध्यायोंको मैं नमस्कार करता हूँ, और शुद्धज्ञान स्वभाव शुद्धात्मतत्त्वको आराधनारूप वीतराग[1] निर्विकल्प समाधिको जो साधते हैं, उन साधुओंको मैं वंदता हूँ। वीतराग[1] निर्विकल्प समाधिको जो आचरते है, कहते हैं, साधते हैं वे ही साधु हैं। अर्हंत, सिद्ध, आचार्य, उपाध्याय, साधु, ये ही पंचपरमेष्ठी वंदने योग्य हैं, ऐसा भावार्थ है॥७॥ ऐसे पंचपरमेष्ठीका नमस्कार करनेका मुख्यतासे श्रीयोगींद्राचार्यने परमात्मप्रकाशके

---

१. वे पाँचों परमेष्ठी भी जिस वीतरागनिर्विकल्पसमाधिको आचरते है, कहते है और साधते हैं; तथा जो उपादेयरूप निजशुद्धात्मतत्त्वकी साधनेवाली है, ऐसी निर्विकल्प समाधिको ही उपादेय जानो। (यह अर्थ संस्कृतके अनुसार किया गया है।)

पादेयं जानीहीति भावार्थः ॥ ७ ॥ इति प्रभाकर भट्टस्य **पञ्चपरमेष्ठिनमस्कार-करणमुख्यत्वेन प्रथममहाधिकारमध्ये दोहकसूत्रसप्तकं गतम्** ।

अथ प्रभाकरभट्टः **पूर्वोक्तप्रकारेण पञ्चपरमेष्ठिनो** नत्वा **पुनरिदानीं** श्रीयोगीन्द्रदेवान् **विज्ञापयति**—

भावि पणविवि पंच-गुरु सिरि-जोइंदु-जिणाउ ।
भट्टपहायरि विण्णविउ विमलु करेविणु भाउ ॥८॥

भावेन प्रणम्य पञ्चगुरून् श्रीयोगीन्दुजिनः ।
भट्टप्रभाकरेण विज्ञापितः विमलं कृत्वा भावम् ॥ ८ ॥

भावि पणविवि पंचगुरु **भावेन भावशुद्ध्या प्रणम्य । कान् । पञ्चगुरून् । पश्चात्किं कृतम्** । सिरिजोइंदुजिणाउ भट्टपहायरि विण्णविउ विमलु करेविणु भाउ **श्रीयोगीन्द्रदेवनामा** भगवान् प्रभाकरभट्टेन **कर्तृभूतेन विज्ञापितः विमलं कृत्वा भावं परिणाममिति** । अत्र प्रभाकरभट्टः शुद्धात्मतत्त्वपरिज्ञानार्थं श्रीयोगीन्द्रदेवं **भक्ति-प्रकर्षेण विज्ञापितवानित्यर्थः** ॥ ८ ॥

तद्यथा—

गउ संसारि वसंताहँ सामिय कालु अणंतु ।
पर मइँ किं पि ण पत्तु सुहु दुक्खु जि पत्तु महंतु ॥९॥

गतः संसारे वसतां स्वामिन् कालः अनन्तः ।
परं मया किमपि न प्राप्तं सुखं दुःखमेव प्राप्तं महत् ॥ ९ ॥

गउ संसारि वसंताहं सामिय कालु अणंतु **गतः संसारे वसतां तिष्ठतां हे स्वा-मिन् । कोऽसौ । कालः । कियान् । अनन्तः** । पर मइं किं पि ण पत्तु सुहु दुक्खु जि पत्तु महंतु परं **किंतु मया किमपि न प्राप्तं सुखं दुःखमेव प्राप्तं महदिति । इतो विस्तरः । तथाहि—स्वशुद्धात्मभावनासमुत्पन्नवीतरागपरमानन्दसमरसीभावरूपसुखा-**

प्रथम महाधिकारमे प्रथमस्थलमे सात दोहोंमे **प्रभाकरभट्ट** नामक अपने शिष्यको पंचपरमेष्ठीकी भक्तिका उपदेश दिया । इति पीठिका ।

अब प्रभाकरभट्ट पूर्वरीतिसे पंचपरमेष्ठीको नमस्कारकर और श्रीयोगीन्द्रदेव गुरुको नमस्कार कर श्रीगुरुसे विनती करता है—[**भावेन**] भावोंको शुद्धकर [**पञ्चगुरून्**] पंचपरमेष्ठियोंको [**प्रणम्य**] नमस्कारकर [**भट्टप्रभाकरेण**] प्रभाकरभट्ट [**भावं विमलं कृत्वा**] अपने परिणामोंको निर्मल करके [**श्रीयोगीन्द्रजिनः**] श्रीयोगीन्द्रदेवसे [**विज्ञापितः**] शुद्धात्मतत्त्वके जाननेके लिये महाभक्तिकर विनती करते हैं ॥८॥

वह विनती इस तरह है—[**हे स्वामिन्**] हे स्वामी, [**संसारे वसतां**] इस संसारमे रहते हुए हमारा [*अनंतः कालः गतः*] अनंतकाल बीत गया, [**परं**] लेकिन [**मया**] मैंने (**किमपि सुखं**) कुछ भी सुख [**न प्राप्तं**] नहीं पाया, उल्टा [**महत् दुःखं एव प्राप्तं**] महान् दुःख ही पाया है ॥ यहाँसे **विशेष** । निज शुद्धात्माकी भावनासे उत्पन्न हुआ **जो वीतराग** परम आनंद समरसीभाव

मृतविपरीतनारकादिदुःखरूपेण क्षारनीरेण पूर्णे अजरामरपदविपरीतजातिजरामरणरूपेण मकरादिजलचरसमूहेन संकीर्णे अनाकुलत्वलक्षणपारमार्थिकसुखविपरीतनानामानसादिदुःखरूपवडवानलशिखासंदीपिताभ्यन्तरे वीतरागनिर्विकल्पसमाधिविपरीतसंकल्पविकल्पजालरूपेण कल्लोलमालासमूहेन विराजिते संसारसागरे वसतां तिष्ठतां हे स्वामिन्ननन्तकालो गतः । कस्मात् । एकेन्द्रियविकलेन्द्रियपञ्चेन्द्रियसंज्ञिपर्याप्तमनुष्यत्वदेशकुलरूपेन्द्रियपटुत्वनिर्व्याध्यायुष्कवरबुद्धिसद्धर्मश्रवणग्रहणधारणश्रद्धानसंयमविषयसुखव्यावर्तनक्रोधादिकषायनिवर्तनेषु परंपरया दुर्लभेषु । कथंभूतेषु । लब्धेष्वपि तपोभावनाधर्मेषु[1] शुद्धात्मभावनालक्षण शुद्धात्मभावनाधर्मेषु शुद्धात्मभावनालक्षणस्य वीतरागनिर्विकल्पसमाधिदुर्लभत्वात् । तदपि कथम् । वीतरागनिर्विकल्पसमाधिबोधिप्रतिपक्षभूतानां मिथ्यात्वविषयकषायादिविभावपरिणामानां प्रबलत्वादिति । सम्यग्दर्शनज्ञानचारित्राणामप्राप्तप्रापणं बोधिस्तेषामेव निर्विघ्नेन भवान्तरप्रापणं समाधिरिति

है, उस रूप जो आनंदामृत उससे विपरीत नरकादिदुःखरूप क्षार(खारो)जलसे पूर्ण (भरा हुआ), अजर अमर पदसे उलटा जन्म जरा (बुढ़ापा) मरणरूपी जलचरोंके समूहसे भरा हुआ, अनाकुलता स्वरूप निश्चय सुखसे विपरीत, अनेक प्रकार आधि व्याधि दुःखरूपी वड़वानलकी शिखाकर प्रज्वलित, वीतराग निर्विकल्पसमाधिकर रहित, महान संकल्प विकल्पोंके जालरूपी कल्लोलोकी मालाओंकर विराजमान, ऐसे संसाररूपी समुद्रमे रहते हुए मुझे हे स्वामी, अनतकाल बीत गया । इस संसारमें एकेंद्रीसे दोइंद्री, तेइंद्री, चौइंद्री स्वरूप विकलत्रय पर्याय पाना दुर्लभ (कठिन) है, विकलत्रयसे पंचेंद्री, सैनी, छह पर्याप्तियोंकी संपूर्णता होना दुर्लभ है, उसमे भी मनुष्य होना अत्यंत दुर्लभ, उसमें आर्यक्षेत्र दुर्लभ, उसमेंसे उत्तम कुल ब्राह्मण, क्षत्रिय, वैश्य वण पाना कठिन है, उसमें भी सुन्दर रूप, समस्त पाँचों इन्द्रियोंकी प्रवीणता, दीर्घ आयु, बल, शरीर नीरोग, जैनधर्म इनका उत्तरोत्तर मिलना कठिन है । कभी इतनी वस्तुओंकी भी प्राप्ति हो जावे, तो भी श्रेष्ठ बुद्धि, श्रेष्ठ धर्म-श्रवण, धर्मका ग्रहण, धारण, श्रद्धान, संयम, विषय-सुखोंसे निवृत्ति, क्रोधादि कषायोंका अभाव होना अत्यंत दुर्लभ है और इन सबोंसे उत्कृष्ट शुद्धात्मभावनारूप वीतरागनिर्विकल्प समाधिका होना बहुत मुश्किल है, क्योंकि उस समाधिके शत्रु जो मिथ्यात्व, विषय, कषाय, आदिका विभाव परिणाम हैं, उनकी प्रबलता है । इसीलिये सम्यग्दर्शन ज्ञान चारित्रकी प्राप्ति नहीं होती और इनका पाना ही **बोधि** है, उस बोधिका जो निर्विघ्नपनेसे धारण वही **समाधि** है । इस तरह बोधि समाधिका लक्षण सब जगह जानना चाहिये । इस बोधि समाधिका मुझमे अभाव है, इसीलिये संसारसमुद्रमें भटकते हुए मैंने वीतराग परमानंद सुख नहीं पाया, किंतु उस सुखसे विपरीत (उल्टा) आकुलताके उत्पन्न करनेवाला नाना प्रकारका शरीरका तथा मनका दुःख ही चारों गतियोंमें भ्रमण करते हुए पाया । इस संसार-सागरमें भ्रमण करते मनुष्य-देह आदिका पाना बहुत दुर्लभ है, परंतु उसको पाकर कभी प्रमादी (आलसी) नहीं होना चाहिये । जो प्रमादी हो जाते हैं, वे संसाररूपी

---

१. पाठान्तरः—शुद्धात्मभावनालक्षण = शुद्धात्मभावनाधर्मेषु, शुद्धात्मभावनालक्षणस्य ।

बोधिसमाधिलक्षणं यथासंभवं सर्वत्र ज्ञातव्यम्। तथा चोक्तम्—"इत्यतिदुर्लभरूपां बोधिं लब्ध्वा यदि प्रमादी स्यात्। संसृतिभीमारण्ये भ्रमति वराको नरः सुचिरम् ॥" परं किंतु बोधिसमाध्यभावे पूर्वोक्तसंसारे भ्रमतापि मया शुद्धात्मसमाधिसमुत्पन्नवीतरागपरमानन्दसुखामृतं किमपि न प्राप्तं किंतु तद्विपरीतमाकुलत्वोत्पादकं विविधशारीरमानसरूपं चतुर्गतिभ्रमणसंभवं दुःखमेव प्राप्तमिति। अत्र यस्य वीतरागपरमानन्दसुखस्यालाभे भ्रमितो जोवस्तदेवोपादेयमिति भावार्थः ॥ ९ ॥

अथ यस्यैव परमात्मस्वभावस्यालाभेऽनादिकाले भ्रमितो जीवस्तमेव पृच्छति-

चउ-गइ-दुक्खहँ तत्ताहँ जो परमप्पउ कोइ।
चउ-गइ-दुक्ख-विणासयरु कहहु पसाएँ सो वि ॥१०॥

चतुर्गतिदुःखे तप्तानां यः परमात्मा कश्चित्।
चतुर्गतिदुःखविनाशकरः कथय प्रसादेन तमपि ॥१०॥

चउगइदुक्खहं तत्ताहं जो परमप्पउ कोइ **चतुर्गतिदुःखतप्तानां जीवानां यः कश्चिच्चिदानन्दैकस्वभावः परमात्मा। पुनरपि कथंभूतः।** चउगइदुक्खविणासयरु आहारभयमैथुनपरिग्रहसंज्ञारूपादिसमस्तविभावरहितानां **वीतरागनिर्विकल्पसमाधिबलेन परमात्मोत्थसहजानन्दैकसुखामृतसंतुष्टानां जीवानां चतुर्गतिदुःखविनाशकः** कहहु पसाएं सो वि हे **भगवन् तमेव परमात्मानं महाप्रसादेन कथयेति। अत्र योऽसौ परमसमाधिरतानां चतुर्गतिदुःखविनाशकः स एव सर्वप्रकारेणोपादेय इति तात्पर्यार्थः**

वनमें अनंतकाल भटकते है। ऐसा ही दूसरे ग्रंथोंमे भी कहा है—"इत्यतिदुर्लभरूपां" इत्यादि। इसका अभिप्राय ऐसा है, कि यह महान् दुर्लभ जो जैनशास्त्रका ज्ञान है, उसको पाके जो जीव प्रमादी होजाता है, वह रंक पुरुष बहुत कालतक संसाररूपी भयानक वनमें भटकता है। सारांश यह हुआ, कि वीतराग परमानंद सुखके न मिलनेसे यह जीव संसाररूपी वनमे भटक रहा है, इसलिये वीतराग परमानंदसुख ही आदर करने योग्य है ॥९॥

आगे जिस परमात्म-स्वभावके अलाभमे यह जीव अनादि कालसे भटक रहा था, उसी परमात्मस्वभावका व्याख्यान **प्रभाकरभट्ट** सुनना चाहता है—[**चतुर्गतिदुःखैः**] देवगति, मनुष्यगति, नरकगति, तिर्यंचगतियोंके दुःखोंसे [**तप्तानां**] तप्तायमान (दुःख) संसारी जीवोंके [**चतुर्गतिदुःखविनाशकरः**] चार गतियोंके दुःखोंका विनाश करनेवाले [**यः कश्चित्**] जो कोई [**परमात्मा**] चिदानंद परमात्मा है, [**तमपि**] उसको [**प्रसादेन**] कृपा करके [**कथय**] हे श्रीगुरू, तुम कहो ॥ **भावार्थ**—वह चिदानन्द शुद्ध स्वभाव परमात्मा, आहार, भय, मैथुन, परिग्रहके भेदरूप संज्ञाओंको आदि लेके समस्त विभावोंसे रहित, तथा वीतराग निर्विकल्पसमाधिके बलसे निज स्वभावकर उत्पन्न हुए परमानंद सुखामृतकर संतुष्ट हुआ है हृदय जिनका, ऐसे निकट संसारी-जीवोंके चतुर्गतिका भ्रमण दूर करनेवाला है, जन्म जरा मरणरूप दुःखका नाशक है, तथा वह परमात्मा निज स्वरूप परमसमाधिमें लीन महामुनियोंको निर्वाणका देनेवाला है, वही सब तरह ध्यान करने योग्य

॥१०॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये प्रभाकरभट्टविज्ञप्तिकथनमुख्यत्वेन दोहकसूत्रत्रयं गतम् ।

अथ प्रभाकरभट्टविज्ञापनानन्तरं श्रीयोगीन्द्रदेवास्त्रिविधात्मानं कथयन्ति--

पुणु पुणु पणविवि पंच-गुरु भावेँ चित्ति धरेवि ।
भट्टपहायर णिसुणि तुहुँ अप्पा तिविहु कहेवि (विँ ?) ॥११॥

पुनः पुनः प्रणम्य पञ्चगुरून् भावेन चित्ते धृत्वा ।
भट्ट प्रभाकर निश्रृणु त्वम् आत्मानं त्रिविधं कथयामि ॥११॥

पुणु पुणु पणविवि पंचगुरु भावें चित्ति धरेवि पुनः पुनः प्रणम्य पञ्चगुरूनहम् । किं कृत्वा । भावेन भक्तिपरिणामेन मनसि धृत्वा पश्चात् भट्टपहायर णिसुणि तुहुं अप्पा तिविहु कहेवि हे प्रभाकरभट्ट! निश्चयेन शृणु त्वं त्रिविधमात्मानं कथयाम्यहमिति । बहिरात्मान्तरात्मपरमात्मभेदेन त्रिविधात्मा भवति । अयं त्रिविधात्मा यथा त्वया पृष्टो हे प्रभाकरभट्ट तथा भेदाभेदरत्नत्रयभावनाप्रियाः परमात्मभावनोत्थवीतरागपरमानन्दसुधारसपिपासिता वीतरागनिर्विकल्पसमाधिसमुत्पन्नसुखामृत-

---

है, सो ऐसे परमात्माका स्वरूप तुम्हारे प्रसादसे मैं सुनना चाहता हूँ। इसलिये कृपाकर आप कहो। इस प्रकार प्रभाकरभट्टने श्रीयोगींद्रदेवसे विनती की ॥१०॥ इस कथनकी मुख्यतासे तीन दोहे हुए। आगे प्रभाकरभट्टकी विनती सुनकर श्रीयोगींद्रदेव तीन प्रकारकी आत्माका स्वरूप कहते हैं— [पुनः पुनः] बारम्बार [पञ्चगुरून्] पंचपरमेष्ठियोंको [प्रणम्य] नमस्कारकर और [भावेन] निर्मल भावोंकर [चित्ते] मनमें [धृत्वा] धारण करके ['अहं'] मैं [त्रिविधं] तीन प्रकारके [आत्मानं] आत्माको [कथयामि] कहता हूँ, सो [हे प्रभाकर भट्ट] हे प्रभाकरभट्ट, [त्वं] तू [निश्रृणु] निश्चयसे सुन। भावार्थ—बहिरात्मा, अन्तरात्मा, परमात्माके भेदकर आत्मा तीन तरहका है, सो हे प्रभाकरभट्ट; जैसे तूने मुझसे पूछा है, उसी तरहसे भव्योंमें महाश्रेष्ठ भरतचक्रवर्त्ती, सगरचक्रवर्त्ती, रामचंद्र, बलभद्र, पांडव तथा श्रेणिक वगैरः बड़े-बड़े राजा, जिनके भक्तिभारकर नम्रीभूत मस्तक हो गये हैं, महा विनयवाले परिवारसहित समोसरणमे आके, वीतराग सर्वज्ञ परमदेवसे सर्व आगमका प्रश्नकर, उसके बाद सब तरहसे ध्यान करने योग्य शुद्धात्माका ही स्वरूप पूछते थे। उसके उत्तरमें भगवान्ने यही कहा, कि आत्म-ज्ञानके समान दूसरा कोई सार नहीं है। भरतादि बड़े-बड़े श्रोताओंमेंसे भरतचक्रवर्तीने श्रीऋषभदेव भगवान्से पूछा, सगरचक्रवर्त्तीने श्रीअजितनाथसे, रामचंद्र बलभद्रने देशभूषण कुलभूषण केवलीसे तथा सकलभूषण केवलीसे, पांडवोंने श्रीनेमिनाथभगवान्से और राजा श्रेणिकने श्रीमहावीरस्वामीसे पूछा। कैसे हैं ये श्रोता जिनको निश्चयरत्नत्रय और व्यवहाररत्नत्रयकी भावना प्रिय है, परमात्माकी भावनासे उत्पन्न वीतराग परमानंदरूप अमृतरसके प्यासे हैं, और वीतराग निर्विकल्पसमाधिकर उत्पन्न हुआ जो सुखरूपी अमृत उससे विपरीत जो नारकादि चारो गतियोंके दुःख, उनसे भयभीत हैं, जिस तरह इन भव्य जीवोंने भगवंतसे पूछा, और भगवंतने तीन प्रकार आत्माका स्वरूप कहा, वैसे ही मैं जिनवाणीके अनुसार तुझे कहता हूँ। साराश यह हुआ, कि तीन प्रकार आत्माके स्वरूपोंसे शुद्धात्म स्वरूप जो

विपरीतनारकादिदुःखभयभीता भव्यवरपुण्डरीका भरत-सगर-राम-पाण्डव-श्रेणिकादयोऽपि वीतरागसर्वज्ञतीर्थंकरपरमदेवानां समवसरणे सपरिवारा भक्तिभरनमितोत्तमाङ्गाःसन्तः सर्वागमप्रश्नानन्तरं सर्वप्रकारोपादेयं शुद्धात्मानं पृच्छन्तीति । अत्र त्रिवि-धात्मस्वरूपमध्ये शुद्धात्मस्वरूपमुपादेयमिति भावार्थः ॥११॥

अथ त्रिविधात्मानं ज्ञात्वा बहिरात्मानं विहाय स्वसंवेदनज्ञानेन परं परमात्मानं भावय त्वमिति प्रतिपादयति—

अप्पा ति-विहु मुणेवि लहु मूढउ मेल्लहि भाउ ।
मुणि सण्णाणे णाणमउ जो परमप्प-सहाउ ॥१२॥

आत्मानं त्रिविधं मत्वा लघु मूढं मुञ्च भावम् ।
मन्यस्व स्वज्ञानेन ज्ञानमयं यः परमात्मस्वभावः ॥१२॥

अप्पा तिविहु मुणेवि लहु मूढउ मेल्लहि भाउ **हे प्रभाकरभट्ट आत्मानं त्रिविधं मत्वा लघु शीघ्रं मूढं बहिरात्मस्वरूपं भावं परिणामं मुञ्च** । मुणि सण्णाणें

निज परमात्मा वही ग्रहण करने योग्य है। जो मोक्षका मूलकारण रत्नत्रय कहा है, वह मैंने निश्चयव्यवहार दोनों तरहसे कहा है, उसमें अपने स्वरूपका श्रद्धान, स्वरूपका ज्ञान, और स्वरूपका ही आचरण यह तो निश्चयरत्नत्रय है, इसीका दूसरा नाम अभेद भी है, और देव गुरू धर्मकी श्रद्धा, नवतत्त्वोंकी श्रद्धा, आगमका ज्ञान तथा संयम भाव ये व्यवहार रत्नत्रय हैं, इसीका नाम भेदरत्नत्रय है। इनमेंसे भेदरत्नत्रय तो साधन हैं और अभेदरत्नत्रय साध्य हैं ॥ ११ ॥ आगे तीन प्रकार आत्माको जानकर बहिरात्मपना छोड़ स्वसंवेदन ज्ञानकर तू परमात्माका ध्यान कर, इसे कहते हैं—[**आत्मानं त्रिविधं मत्वा**] हे प्रभाकरभट्ट, तू आत्माको तीन प्रकारका जानकर [**मूढं भाव**] बहिरात्म स्वरूप भावको [**लघु**] शीघ्र ही [**मुञ्च**] छोड़, और [**यः**] जो [**परमात्मस्वभावः**] परमात्माका स्वभाव है, उसे [**स्वज्ञानेन**] स्वसवेदनज्ञानसे अन्तरात्मा होता हुआ [**मन्यस्व**] जान। वह स्वभाव [**ज्ञानमयः**] केवलज्ञानकर परिपूर्ण है ॥ **भावार्थ**—जो वीतराग स्वसंवेदनकर परमात्मा जाना था, वही ध्यान करने योग्य है। यहाँ शिष्यने प्रश्न किया था, जो स्वसंवेदन अर्थात् अपनेकर अपनेको अनुभवना इसमें वीतराग विशेषण क्यों कहा ? क्योंकि जो स्वसंवेदन ज्ञान होवेगा, वह तो रागरहित होवेगा ही। इसका समाधान श्रीगुरूने किया—कि विषयोंके आस्वादनसे भी उन वस्तुओंके स्वरूपका जानपना होता है, परन्तु रागभावकर दूषित है, इसलिये निजरस आस्वाद नहीं है, और वीतराग दशामें स्वरूपका यथार्थ ज्ञान होता है, आकुलता रहित होता है। तथा स्वसंवेदनज्ञान प्रथम अवस्थामें चौथे पाँचवें गुणस्थानवाले गृहस्थके भी होता है, वहाँपर सराग देखनेमें आता है, इसलिये रागसहित अवस्थाके निषेधके लिये वीतराग स्वसंवेदन ज्ञान ऐसा कहा है। रागभाव है, वह कषायरूप है, इस कारण जबतक मिथ्यादृष्टिके अनन्तानुबन्धीकषाय है, तबतक तो बहिरात्मा है, उसके तो स्वसंवेदन ज्ञान अर्थात् सम्यक्ज्ञान सर्वथा ही नहीं है, व्रत और चतुर्थ गुणस्थानमें सम्यग्दृष्टीके मिथ्यात्व तथा अनंतानुबंधीके अभाव होनेसे सम्यग्ज्ञान तो हो गया, परन्तु कषायकी तीन चौकड़ी बाकी रहनेसे द्वितीयाके चंद्रमाके समान विशेष प्रकाश नहीं होता, और श्रावकके पाँचवें गुणस्थानमें दो चौकड़ीका अभाव है, इसलिये

णाणमउ जो परमप्पसहाउ पश्चात् त्रिविधात्मपरिज्ञानानन्तरं मन्यस्व जानीहि । केन करणभूतेन । अन्तरात्मलक्षणवीतरागनिर्विकल्पस्वसंवेदनज्ञानेन । कं जानीहि । यं परमात्मस्वभावम् । किंविशिष्टम् । ज्ञानमयं केवलज्ञानेन निर्वृत्तमिति । अत्र योऽसौ स्वसंवेदनज्ञानेन परमात्मा ज्ञातः स एवोपादेय इति भावार्थः । स्वसंवेदनज्ञाने वीतरागविशेषणं किमर्थमिति पूर्वपक्षः, परिहारमाह—विषयानुभवस्वरूपस्वसंवेदनज्ञानं सरागमपि दृश्यते तन्निषेधार्थमित्यभिप्रायः ।।१२।।

अथ त्रिविधात्मसंज्ञां बहिरात्मलक्षणं च कथयति—

मूढु वियक्खणु बंभु परु अप्पा ति-विहु हवेइ ।
देहु जि अप्पा जो मुणइ सो जणु मूढु हवेइ ।।१३।।

रागभाव कुछ कम हुआ, वीतरागभाव बढ़ गया, इस कारण स्वसंवेदनज्ञान भी प्रबल हुआ, परन्तु दो चौकड़ी के रहनेसे मुनिके समान प्रकाश नहीं हुआ। मुनिके तीन चौकड़ीका अभाव है, इसलिये रागभाव तो निर्बल हो गया, तथा वीतरागभाव प्रबल हुआ, वहाँपर स्वसंवेदनज्ञानका अधिक प्रकाश हुआ, परंतु चौथी चौकड़ी बाकी है, इसलिये छट्ठे गुणस्थानवाले मुनि सरागसंयमी है। वीतरागसंयमीके जैसा प्रकाश नहीं है। सातवें गुणस्थानमे चौथी चौकड़ी मन्द हो जाती है, वहाँपर आहार-विहार क्रिया नहीं होती, ध्यानमें आरूढ़ रहते है, सातवेंसे छट्ठे गुणस्थानमे आवें, तब वहाँपर आहारादि क्रिया है, इसी प्रकार छट्ठा सातवाँ करते रहते है, वहाँपर अन्तर्मुहूर्तकाल है। आठवें गुणस्थानमें चौथी चौकड़ी अत्यन्त मन्द हो जाती है, वहाँ रागभावकी अत्यन्त क्षीणता होती है, वीतरागभाव पुष्ट होता है, स्वसंवेदनज्ञानका विशेष प्रकाश होता है, श्रेणी माडनेसे शुक्लध्यान उत्पन्न होता है। श्रेणीके दो भेद हैं, एक क्षपक, दूसरी उपशम, क्षपकश्रेणीवाले तो उसी भवसे केवलज्ञान पाकर मुक्त हो जाते हैं, और उपशमवाले आठवें नवमें दशवेंसे ग्यारहवाँ स्पर्शकर पीछे पड़ जाते हैं, सो कुछ—एक भव भी धारण करते हैं, तथा क्षपकवाले आठवेंसे नवमे गुणस्थानमे प्राप्त होते हैं, वहाँ कषायोंका सर्वथा नाश होता है, एक संज्वलनलोभ रह जाता है, अन्य सबका अभाव होनेसे वीतराग भाव अति प्रबल हो जाता है, इसलिये स्वसंवेदनज्ञानका बहुत ज्यादा प्रकाश होता है, परन्तु एक संज्वलनलोभ बाकी रहनेसे वहाँ सरागचरित्र ही कहा जाता है। दशवें गुणस्थानमे सूक्ष्मलोभ भी नही रहता, तब मोहकी अट्ठाईस प्रकृतियोंके नष्ट हो जानेसे वीतरागचारित्र की सिद्धि हो जाती है। दशवेंसे बारहवेंमे जाते है ग्यारहवें गुणस्थानका स्पर्श नही करते, वहाँ निर्मोह वीतरागीके शुक्लध्यानका दूसरा पाया (भेद) प्रगट होता है, यथाख्यातचारित्र हो जाता है। बारहवेंके अन्तमें ज्ञानावरण, दर्शनावरण, अन्तराय इन तीनोंका भी विनाश कर डाला, मोहका नाश पहले हो ही चुका था, तब चारों घातियाकर्मोंके नष्ट हो जानेसे तेरहवें गुणस्थानमे केवलज्ञान प्रगट होता है, वहाँपर ही शुद्ध परमात्मा होता है, अर्थात् उसके ज्ञानका पूर्ण प्रकाश होजाता है, निःकषाय है। वह चौथे गुणस्थानसे लेकर बारहवें गुणस्थानतक तो अन्तरात्मा है, उसके गुणस्थान प्रति चढ़ती हुई शुद्धता है, और पूर्ण शुद्धता परमात्माके है, यह साराश समझना ।।१२।।

तीन प्रकारके आत्माके भेद है, उनमेसे प्रथम बहिरात्माका लक्षण कहते हैं—[मूढः] मिथ्यात्व रागादिरूप परिणत हुआ बहिरात्मा, [विचक्षणः] वीतराग निर्विकल्प स्वसंवेदनज्ञानरूप परिणमन करता

मूढो विचक्षणो ब्रह्मा परः आत्मा त्रिविधो भवति।
देहमेव आत्मानं यो मनुते स जनो मूढो भवति ॥१३॥

मूढु वियक्खणु बंभु परु अप्पा तिविहु हवेइ मूढो **मिथ्यात्वरागादिपरिणतो बहिरात्मा, विचक्षणो वीतरागनिर्विकल्पस्वसंवेदनज्ञानपरिणतोऽन्तरात्मा, ब्रह्मा शुद्धबुद्धैकस्वभावः परमात्मा। शुद्धबुद्धस्वभावलक्षणं कथ्यते—शुद्धो रागादिरहितो बुद्धोऽनन्तज्ञानादिचतुष्टयसहित इति शुद्धबुद्धस्वभावलक्षणं सर्वत्र ज्ञातव्यम्। स च कथंभूतः ब्रह्मा। परमो भावकर्मद्रव्यकर्मनोकर्मरहितः। एवमात्मा त्रिविधो भवति।** देहु जि अप्पा जो मुणइ सो जणु मूढु हवेइ **वीतरागनिर्विकल्पसमाधिसंजातसदानन्दैकसुखामृतस्वभावमलभमानः सन् देहमेवात्मानं यो मनुते जानाति स जनो लोको मूढात्मा भवति इति। अत्र बहिरात्मा हेयस्तदपेक्षया यद्यप्यन्तरात्मोपादेयस्तथापि सर्वप्रकारोपादेयभूतपरमात्मापेक्षया स हेय इति तात्पर्यार्थः ॥१३॥**

अथ परमसमाधिस्थितः सन् देहविभिन्नं ज्ञानमयं परमात्मानं योऽसौ जानाति सोऽन्तरात्मा भवतीति निरूपयति—

देह-विभिण्णउ णाणमउ जो परमप्पु णिएइ।
परम-समाहि-परिट्ठियउ पंडिउ सो जि हवेइ ॥१४॥

देहविभिन्नं ज्ञानमयं यः परमात्मानं पश्यति।
परमसमाधिपरिस्थितः पण्डितः स एव भवति ॥१४॥

देहविभिण्णउ णाणमउ जो परमप्पु णिएइ **अनुपचरितासद्भूतव्यवहारनयेन**

हुआ अन्तरात्मा [**ब्रह्मा परः**] और शुद्ध बुद्ध स्वभाव परमात्मा अर्थात् रागादि रहित अनन्त ज्ञानादि सहित, भावद्रव्य कर्म नोकर्म रहित आत्मा इस प्रकार [**आत्मा**] आत्मा [**त्रिविधो भवति**] तीन तरहका है, अर्थात् बहिरात्मा, अन्तरात्मा, परमात्मा, ये तीन भेद हैं। इनमेंसे [**यः**] जो [**देहमेव**] देहको ही [**आत्मानं**] आत्मा [**मनुते**] मानता है, [**स जनः**] वह प्राणी [**मूढ**] बहिरात्मा [**भवति**] है, अर्थात् बहिर्मुख मिथ्यादृष्टी है॥ **भावार्थ**—जो देहको आत्मा समझता है, वह वीतराग निर्विकल्प समाधिसे उत्पन्न हुए परमानन्द सुखामृतको नहीं पाता हुआ मूर्ख है, अज्ञानी है। इन तीन प्रकारके आत्माओंमेंसे बहिरात्मा तो त्याज्य ही है--आदर योग्य नहीं है। इसकी अपेक्षा यद्यपि अन्तरात्मा अर्थात् सम्यग्दृष्टी वह उपादेय है, ता भी सब तरहसे उपादेय (ग्रहण करने योग्य) जो परमात्मा उसकी अपेक्षा वह अन्तरात्मा हेय ही है, शुद्ध परमात्मा ही ध्यान करने योग्य है, ऐसा जानना ॥१३॥

आगे परमसमाधिमें स्थित, देहसे भिन्न ज्ञानमयी (उपयोगमयी) आत्माको जो जानता है, वह अन्तरात्मा है, ऐसा कहते है—[**यः**] जो पुरुष [**परमात्मानं**] परमात्माको [**देहविभिन्नं**] शरीरसे जुदा [**ज्ञानमयं**] केवलज्ञानकर पूर्ण [**पश्यति**] जानता है, [**स एव**] वही [**परमसमाधिपरिस्थितः**] परमसमाधिमें तिष्ठता हुआ [**पंडितः**] अन्तरात्मा अर्थात् विवेकी [**भवति**] है॥ **भावार्थ**—यद्यपि

देहादभिन्नं निश्चयनयेन भिन्नं ज्ञानमयं केवलज्ञानेन निर्वृत्तं परमात्मानं योऽसौ जानाति परमसमाहिपरिट्ठियउ पंडिउ सो जि हवेइ वीतरागनिर्विकल्पसहजानन्दैकशुद्धात्मानुभूतिलक्षणपरमसमाधिस्थितः सन् पण्डितोऽन्तरात्मा विवेकी स एव भवति । "कः पण्डितो विवेकी" इति वचनात्, इति अन्तरात्मा हेयरूपो, योऽसौ परमात्मा भणितः स एव साक्षादुपादेय इति भावार्थः ॥१४॥

अथ समस्तपरद्रव्यं मुक्त्वा केवलज्ञानमयकर्मरहितशुद्धात्मा येन लब्धः स परमात्मा भवतीति कथयति—

अप्पा लद्धउ णाणमउ कम्म-विमुक्के जेण ।
मेल्लिवि सयलु वि दव्वु परु सो परु मुणहि मणेण ॥१५॥

आत्मा लब्धो ज्ञानमयः कर्मविमुक्तेन येन ।
मुक्त्वा सकलमपि द्रव्यं परं तं परं मन्यस्व मनसा ॥१५॥

अप्पा लद्धउ णाणमउ कम्मविमुक्कें जेण आत्मा लब्धः प्राप्तः । किंविशिष्टः । ज्ञानमयः केवलज्ञानेन निर्वृत्तः । कथंभूतेन सता । ज्ञानावरणादिद्रव्यकर्मभावकर्मरहितेन येन । किं कृत्वात्मा लब्धः । मेल्लिवि सयलु वि दव्वु परु सो परु मुणहि मणेण । मुक्त्वा परित्यज्य । किम् । परं द्रव्यं देहरागादिकम् । सकलं कतिसंख्योपेतं समस्तमपि । तमित्थंभूतमात्मानं परं परमात्मानमिति मन्यस्व जानीहि हे प्रभाकरभट्ट । केन कृत्वा । मायामिथ्यानिदानशल्यत्रयस्वरूपादिसमस्तविभावपरिणामरहितेन मनसेति । अत्रोक्तलक्षणपरमात्मा उपादेयो ज्ञानावरणादिसमस्तविभावरूपं

अनुपचरितासद्भूतव्यवहारनयसे अर्थात् इस जीवके परवस्तुका सम्बन्ध अनादिकालका मिथ्यारूप होनेसे व्यवहारनयकर देहमयी है, तो भी निश्चयनयकर सर्वथा देहादिकसे भिन्न है, और केवलज्ञानमयी है, ऐसा निज शुद्धात्माको वीतरागनिर्विकल्प सहजानन्द शुद्धात्माकी अनुभूतिरूप परमसमाधिमे स्थित होता हुआ जानता है, वही विवेकी अन्तरात्मा कहलाता है। वह परमात्मा ही सर्वथा आराधने योग्य है, ऐसा जानना ॥१४॥

आगे सब परद्रव्योंको छोड़कर कर्मरहित होकर जिसने अपना स्वरूप केवलज्ञानमय पा लिया है, वही परमात्मा है, ऐसा कहते हैं—[येन] जिसने [कर्मविमुक्तेन] ज्ञानावरणादि कर्मोंको नाश करके [सकलमपि परं द्रव्यं] और सब देहादिक परद्रव्योंको [मुक्त्वा] छोड़ करके [ज्ञानमयः] केवलज्ञानमयी [आत्मा] आत्मा [लब्धः] पाया है, [तं] उसको [मनसा] शुद्ध मनसे [परं] परमात्मा [मन्यस्व] जानो ॥ भावार्थ—जिसने देहादिक समस्त परद्रव्यको छोड़कर ज्ञानावरणादि द्रव्यकर्म, रागादिक भावकर्म, शरीरादि नोकर्म इन तीनोंसे रहित केवलज्ञानमयी अपने आत्माका लाभ कर लिया है, ऐसे आत्माको हे प्रभाकरभट्ट, तू माया, मिथ्या, निदानरूप शल्य वगैरह समस्त विभाव (विकार) परिणामोंसे रहित निर्मल चित्तसे परमात्मा जान, तथा केवलज्ञानादि गुणोंवाला

परद्रव्यं तु हेयमिति भावार्थः ॥१५॥ एवंविधात्मप्रतिपादकप्रथममहाधिकारमध्ये संक्षेपेण त्रिविधात्मसूचनमुख्यतया सूत्रपञ्चकं गतम् । तदनन्तरं मुक्तिगतकेवलज्ञानादिव्यक्तिरूपसिद्धजीवव्याख्यानमुख्यत्वेन दोहकसूत्रदशकं प्रारभ्यते । तद्यथा ।

लक्ष्यमलक्ष्येण धृत्वा हरिहरादिविशिष्टपुरुषा यं ध्यायन्ति तं परमात्मानं जानीहीति प्रतिपादयति––

तिहुयण-वंदिउ सिद्धि-गउ हरि-हर झायहिँ जो जि ।
लक्खु अलक्खेँ धरिवि थिरु मुणि परमप्पउ सो जि ॥१६॥

त्रिभुवनवन्दितं सिद्धिगतं हरिहरा ध्यायन्ति यमेव ।
लक्ष्यमलक्ष्येण धृत्वा स्थिरं मन्यस्व परमात्मानं तमेव ॥१६॥

तिहुयणवंदिउ सिद्धिगउ हरिहर झायहिं जो जि त्रिभुवनवन्दितं सिद्धिगतं यं केवलज्ञानादिव्यक्तिरूपं परमात्मानं हरिहरहिरण्यगर्भादयो ध्यायन्ति । किं कृत्वा पूर्वम् । लक्खु अलक्खें धरिवि थिरु लक्ष्यं संकल्परूपं चित्तम् । अलक्ष्येण वीतरागनिर्विकल्पनित्यानन्दैकस्वभावपरमात्मरूपेण धृत्वा । कथंभूतम् । स्थिरं परीषहोपसर्गैरक्षुभितं मुणि परमप्पउ सो जि तमित्थंभूतं परमात्मानं हे प्रभाकरभट्ट मन्यस्व जानीहि भावयेत्यर्थः । अत्र केवलज्ञानादिव्यक्तिरूपमुक्तिगतपरमात्मसदृशो रागादिरहितः स्वशुद्धात्मा साक्षादुपादेय इति भावार्थः ॥१६॥ संकल्पविकल्पस्वरूपं कथ्यते । तद्यथा––बहिर्द्रव्यविषये पुत्रकलत्रादिचेतनाचेतनरूपे ममेदमिति स्वरूपः संकल्पः,

---

परमात्मा ही ध्यान करने योग्य है और ज्ञानावरणादिरूप सब परवस्तु त्यागने योग्य है, ऐसा समझना चाहिये ॥१५॥ इस प्रकार जिसमें तीन तरहके आत्माका कथन है, ऐसे प्रथम महाधिकारमें त्रिविध आत्माके कथनकी मुख्यतासे तीसरे स्थलमें पाँच दोहा-सूत्र कहे । अब मुक्तिको प्राप्त हुए केवलज्ञानादिरूप सिद्ध परमात्माके व्याख्यानको मुख्यताकर दश दोहा--सूत्र कहते हैं ।

इसमें पाँच दोहोंमे जो हरिहरादिक बड़े पुरुष अपना मन स्थिरकर जिस परमात्माका ध्यान करते हैं, उसीका तू भी ध्यान कर, यह कहते हैं—[**हरिहराः**] इन्द्र, नारायण, और रुद्र वगैरः बडे बड़े पुरुष [**त्रिभुवनवंदितं**] तीन लोककर वदनीक (त्रैलोक्यनाथ) [**सिद्धिगतं**] और केवलज्ञानादि व्यक्तिरूप सिद्धपनेको प्राप्त [**यं एव**] जिस परमात्माको ही [**ध्यायंति**] ध्यावते हैं, [**लक्ष्यं**] अपने मनको [**अलक्ष्ये**] वीतराग निर्विकल्प नित्यानन्द स्वभाव परमात्मामें [**स्थिरं धृत्वा**] स्थिर करके [**तमेव**] उसीको हे प्रभाकरभट्ट, तू [**परमात्मानं**] परमात्मा [**मन्यस्व**] जान कर चितवन कर । सारांश यह है, कि केवलज्ञानादिरूप उस परमात्माके समान रागादि रहित अपने शुद्धात्माको पहचान, वही साक्षात् उपादेय है, अन्य सब संकल्प विकल्प त्यागने योग्य हैं । अब संकल्प विकल्पका स्वरूप कहते है, कि जो बाह्यवस्तु पुत्र, स्त्री, कुटुंब, बांधव, वगैरह सचेतन पदार्थ, तथा चाँदी, सोना, रत्न, मणिके आभूषण वगैरह अचेतन पदार्थ है, इन सबको अपने समझे, कि ये मेरे हैं, ऐसे

अहं सुखी दुःखीत्यादिचित्तगतो हर्षविषादादिपरिणामो विकल्प इति । एवं संकल्प-विकल्पलक्षणं सर्वत्र ज्ञातव्यम् ।

अथ नित्यनिरञ्जनज्ञानमयपरमानन्दस्वभावशान्तशिवस्वरूपं दर्शयन्नाह—

णिच्चु णिरंजणु णाणमउ परमाणंद-सहाउ ।
जो एहउ सो संतु सिउ तासु मुणिज्जहि भाउ ॥१७॥

नित्यो निरञ्जनो ज्ञानमयः परमानन्दस्वभावः ।
य ईदृशः स शान्तः शिवः तस्य मन्यस्व भावम् ॥१७॥

णिच्चु णिरंजणु णाणमउ परमाणंदसहाउ **द्रव्यार्थिकनयेन नित्योऽविनश्वरः, रागादिकर्ममलरूपाञ्जनरहितत्वान्निरञ्जनः, केवलज्ञानेन निर्वृत्तत्वात् ज्ञानमयः, शुद्धात्मभावनोत्थवीतरागानन्दपरिणतत्वात्परमानन्दस्वभावः** जो एहउ सो संतु सिउ **य इत्थंभूतः स शान्तः शिवो भवति** हे प्रभाकरभट्ट तासु मुणिज्जहि भाउ **तस्य वीतरागत्वात् शान्तस्य परमानन्दसुखमयत्वात्** शिवस्वरूपस्य त्वं जानीहि भावय । कं भावय । **शुद्धबुद्धैकस्वभावमित्यभिप्रायः ॥१७॥**

पुनश्च किंविशिष्टो भवति—

जो णिय-भाउ ण परिहरइ जो पर-भाउ ण लेइ ।
जाणइ सयलु वि णिच्चु पर सो सिउ संतु हवेइ ॥१८॥

यो निजभावं न परिहरति यः परभावं न लाति ।
जानाति सकलमपि नित्यं परं स शिवः शान्तो भवति ॥१८॥

यः कर्ता निजभावमनन्तज्ञानादिस्वभावं न परिहरति यश्च परभावं काम-क्रोधादिरूपमात्मरूपतया न गृह्णाति । पुनरपि कथंभूतः । जानाति सर्वमपि जगत्त्रय-

---

ममत्व परिणामको संकल्प जानना । तथा मैं सुखी, मैं दुःखी, इत्यादि हर्ष विषादरूप परिणाम होना वह **विकल्प है** । इस प्रकार संकल्प विकल्पका स्वरूप जानना चाहिये ॥१६॥

आगे नित्य निरंजन ज्ञानमयी परमानंदस्वभाव शांत और शिवस्वरूपका वर्णन करते हैं— [**नित्यः**] द्रव्यार्थिकनयकर अविनाशी [**निरंजनः**] रागादिक उपाधिसे रहित अथवा कर्ममलरूपी अंजनसे रहित [**ज्ञानमय**] केवलज्ञानसे परिपूर्ण और [**परमानंदस्वभाव**] शुद्धात्म भावना कर उत्पन्न हुए वीतराग परमानंदकर परिणत है, [**यः ईदृशः**] जो ऐसा है, [**सः**] वही [**शांतः शिव**] शांतरूप और शिवस्वरूप है, [**तस्य**] उसी परमात्माका [**भावं**] शुद्ध बुद्ध स्वभाव [**जानीहि**] हे प्रभाकरभट्ट, तू जान अर्थात् ध्यान कर ॥१७॥

आगे फिर उसी परमात्माका कथन करते हैं—[**यः**] जो [**निज भावं**] अनंतज्ञानादिरूप अपने भावोंको [**न परिहरति**] कभी नहीं छोड़ता [**यः**] और जो [**परभावं**] कामक्रोधादिरूप परभावोंको [**न लाति**] कभी ग्रहण नहीं करता है, [**सकलमपि**] तीन लोक तीन कालकी सब

कालत्रयवर्तिवस्तुस्वभावं न केवलं जानाति द्रव्यार्थिकनयेन नित्य एव अथवा नित्यं सर्वकालमेव जानाति परं नियमेन। स इत्थंभूत. शिवो भवति शान्तश्च भवतीति। किं च अयमेव जीवः मुक्तावस्थायां व्यक्तिरूपेण शान्तः शिवसंज्ञां लभते संसारावस्थायां तु शुद्धद्रव्यार्थिकनयेन शक्तिरूपेणेति। तथा चोक्तम्––"परमार्थनयाय सदा शिवाय नमोऽस्तु"। पुनश्चोक्तम्––"शिवं परमकल्याणं निर्वाणं शान्तमक्षयम्। प्राप्तं मुक्तिपदं येन स शिवः परिकीर्तितः॥" अन्यः कोऽप्येको जगत्कर्ता व्यापी सदा मुक्तः शान्तः शिवोऽस्तीत्येवं न। अत्रायमेव शान्तशिवसंज्ञः शुद्धात्मोपादेय इति भावार्थः ॥१८॥

अथ पूर्वोक्तं निरञ्जनस्वरूपं सूत्रत्रयेण व्यक्तीकरोति—

जासु ण वण्णु ण गंधु रसु जासु ण सद्दु ण फासु।
जासु ण जम्मणु मरणु णवि णाउ णिरंजणु तासु ॥१९॥
जासु ण कोहु ण मोहु मउ जासु ण माय ण माणु।
जासु ण ठाणु ण झाणु जिय सो जि णिरंजणु जाणु ॥२०॥
अत्थि ण पुण्णु ण पाउ जसु अत्थि ण हरिसु विसाउ।
अत्थि ण एक्कु वि दोसु जसु सो जि णिरंजणु भाउ ॥२१॥तियलं।

यस्य न वर्णो न गन्धो रसः यस्य न शब्दो न स्पर्शः।
यस्य न जन्म मरणं नापि नाम निरञ्जनस्तस्य ॥१९॥
यस्य न क्रोधो न मोहो मदः यस्य न माया न मानः।
यस्य न स्थानं न ध्यानं जीव तमेव निरञ्जनं जानीहि ॥२०॥
अस्ति न पुण्यं न पापं यस्य अस्ति न हर्षो विषादः।
अति न एकोऽपि दोषो यस्य स एव निरञ्जनो भावः ॥२१॥त्रिकलम्।

चीजोंको [परं] केवल [नित्यं] हमेशा [जानाति] जानता है, [सः] वही [शिव.] शिवस्वरूप तथा [शान्तः] शांतस्वरूप [भवति] है॥ भावार्थ—संसार अवस्थामें शुद्ध द्रव्यार्थिकनयकर सभी जीव शक्तिरूपसे परमात्मा है, व्यक्तिरूपसे नहीं है। ऐसा कथन अन्य ग्रन्थोंमें भी कहा है—'शिवमित्यादि' अर्थात् परमकल्याणरूप, निर्वाणरूप, महाशांत अविनश्वर ऐसे मुक्ति-पदको जिसने पा लिया है, वही शिव है. अन्य कोई, एक जगतकर्ता सर्वव्यापी सदा मुक्त शांत शिवरूप नैयायिकोंका तथा वेशेषिक वगेरहका माना हुआ नहीं है। यह शुद्धात्मा ही शांत है, शिव है, उपादेय है।

आगे पहले कहे हुए निरंजनस्वरूपको तीन दोहा-सूत्रोंसे प्रगट करते हैं—[यस्य] जिस भगवान्के [वर्णः] सफेद, काला, लाल, पीला, नोलस्वरूप पाँच प्रकार वर्ण [न] नहीं है, [गंधः रसः] सुगन्ध दुर्गन्धरूप दो प्रकारकी गन्ध [न] नही है, मधुर, आम्ल (खट्टा), तिक्त, कटु, कषाय (क्षार) रूप पाँच रस नहीं हैं [यस्य] जिसके [शब्दः न] भाषा अभाषारूप शब्द नहीं है, अर्थात् सचित्त अचित्त मिश्ररूप कोई शब्द नहीं है, सात स्वर नहीं है, [स्पर्शः न] शीत, उष्ण, स्निग्ध, रूक्ष गुरु, लघु, मृदु, कठिनरूप आठ तरहका स्पर्श नहीं है, [यस्य] और जिसके [जन्म न] जन्म जरा

यस्य मुक्तात्मनः शुक्लकृष्णरक्तपीतनीलरूपपञ्चप्रकारवर्णो नास्ति, सुरभिदुरभिरूपो द्विप्रकारोगन्धो नास्ति, कटुकतीक्ष्णमधुराम्लकषायरूपः पञ्चप्रकारो रसो नास्ति, भाषात्मकाभाषात्मकादिभेदभिन्नः शब्दो नास्ति, शीतोष्णस्निग्धरूक्षगुरुलघुमृदुकठिनरूपोऽष्टप्रकारः। स्पर्शो नास्ति, पुनश्च यस्य जन्म मरणमपि नैवास्ति तस्य चिदानन्दैकस्वभावपरमात्मनो निरञ्जनसंज्ञा लभते ।। पुनश्च किंरूपः स निरञ्जनः। यस्य न विद्यते। किं किं न विद्यते। क्रोधो मोहो विज्ञानाद्यष्टविधमदभेदो यस्यैव मायामानकषायो यस्यैव नाभिहृदयललाटादिध्यानस्थानानि चित्तनिरोधलक्षणध्यानमपि यस्य न तमित्थंभूतं स्वशुद्धात्मानं हे जीव निरञ्जनं जानीहि। ख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपसमस्तविभावपरिणामान् त्यक्त्वा स्वशुद्धात्मानुभूतिलक्षणनिर्विकल्पसमाधौ स्थित्वानुभवेत्यर्थः ।। पुनरपि किंस्वभावः स निरञ्जनः। यस्यास्ति न। किं किं नास्ति। द्रव्यभावरूपं पुण्यं पापं च ।। पुनरपि किं नास्ति। रागरूपो हर्षो द्वेषरूपो विषादश्च। पुनश्च। नास्ति क्षुधाद्यष्टादशदोषेषु मध्ये चैकोऽपि दोषः। स एव शुद्धात्मा निरञ्जन इति हे प्रभाकरभट्ट त्वं जानीहि। स्वशुद्धात्मसंवित्तिलक्षणवीतरागनिर्विकल्पसमाधौ स्थित्वानुभवेत्यर्थः। किं च। एवंभूतसूत्रत्रयव्याख्यातलक्षणो निरञ्जनो ज्ञातव्यो न चान्यः कोऽपि निरञ्जनोऽस्ति परकल्पितः। अत्र सूत्रत्रयेऽपि त्रिशुद्धज्ञानदर्शनस्वभावो योऽसौ निरञ्जनो व्याख्यातः स एवोपादेय इति भावार्थः ।।१९-२१।।

नहीं है, [मरणं नापि] तथा मरण भी नहीं है [तस्य] उसी चिदानन्द शुद्धस्वभाव परमात्माको [निरंजनं नाम] निरंजन संज्ञा है, अर्थात् ऐसे परमात्माको ही निरंजनदेव कहते हैं। फिर वह निरंजनदेव कैसा है—[यस्य] जिस सिद्धपरमेष्ठीके [क्रोध न] गुस्सा नहीं है, [मोहः मदः न] मोह तथा कुल जाति वगैरह आठ तरहका अभिमान नहीं है, [यस्य माया न मानः न] जिसके माया व मान कषाय नहीं है, और [यस्य] जिसके [स्थानं न] ध्यानके स्थान नाभि, हृदय, मस्तक, वगैरह नहीं है [ध्यानं न] चित्तके रोकनेरूप ध्यान नहीं है, अर्थात् जब चित्त ही नहीं है, तो रोकना किसका हो, [स एव] ऐसे निजशुद्धात्माको हे जीव, तू जान। साराश यह हुआ, कि अपनी प्रसिद्धता (बड़ाई) महिमा, अपूर्व वस्तुका मिलना, और देखे सुने भोग इनको इच्छारूप सब विभाव परिणामोंको छोड़कर अपने शुद्धात्माकी अनुभूतिस्वरूप निर्विकल्पसमाधिमे ठहरकर उस शुद्धात्माका अनुभव कर। पुनः वह निरंजन कैसा है—[यस्य] जिसके [पुण्यं न पाप न अस्ति] द्रव्यभावरूप पुण्य नहीं, तथा पाप नहीं है, [हर्षः विषादः न] राग द्वेषरूप खुशी व रंज नहीं हैं, [यस्य] और जिसके [एकः अपि दोषः] क्षुधा (भूख) वगैरह दोषोमेसे एक भी दोष नहीं है [स एव] वही शुद्धात्मा [निरंजनः] निरंजन है, ऐसा तू [भावय] जान ।। भावार्थ—ऐसे निज शुद्धात्माके परिज्ञानरूप वीतरागनिर्विकल्पसमाधिमें स्थित होकर तू अनुभव कर। इस प्रकार तीन दोहोंमे जिसका स्वरूप कहा गया है, उसे ही निरंजन जानो, अन्य कोई भी परिकल्पित निरंजन नहीं है। इन तीनों दोहोंमें जो निर्मल ज्ञान दर्शनस्वभाववाला निरंजन कहा गया है, वही उपादेय है ।।१९-२१।।

---

१. पाठान्तरः—पुण्यं पापं च। = पुण्यपापं च।

अथ धारणाध्येययन्त्रमन्त्रमण्डलमुद्रादिकं व्यवहारध्यानविषयं मन्त्रवादशास्त्रकथितं यत्तन्निर्दोषपरमात्माराधनाध्याने निषेधयन्ति—

जासु ण धारणु धेउ ण वि जासु ण जंतु ण मंतु ।
जासु ण मंडलु मुद्द ण वि सो मुणि देउँ अणंतु ॥२२॥

यस्य न धारणा ध्येयं नापि यस्य न यन्त्रं न मन्त्रः ।
यस्य न मण्डलं मुद्रा नापि तं मन्यस्व देवमनन्तम् ॥२२॥

यस्य परमात्मनो नास्ति न विद्यते । किं किम् । कुम्भकरेचकपूरकसंज्ञावायुधारणादिकप्रतिमादिकं ध्येयमिति । पुनरपि किं तस्य । अक्षररचनाविन्यासरूपस्तम्भनमोहनादिविषयं यन्त्रस्वरूपं विविधाक्षरोच्चारणरूपं मन्त्रस्वरूपं च अप्मण्डलवायुमण्डलपृथ्वीमण्डलादिकं गारुडमुद्राज्ञानमुद्रादिकं च यस्य नास्ति तं परमात्मानं देवमाराध्यं द्रव्यार्थिकनयेनानन्तमविनश्वरमनन्तज्ञानादिगुणस्वभावं च मन्यस्व जानीहि । अतीन्द्रियसुखास्वादविपरीतस्य जिह्वेन्द्रियविषयस्य निर्मोहशुद्धात्मस्वभावप्रतिकूलस्य मोहस्य वीतरागसहजानन्दपरमसमरसीभावसुखरसानुभवप्रतिपक्षस्य नवप्रकाराब्रह्मव्रतस्य वीतरागनिर्विकल्पसमाधिघातकस्य मनोगतसंकल्पविकल्पजालस्य च विजयं कृत्वा हे प्रभाकरभट्ट शुद्धात्मानमनुभवेत्यर्थः । तथा चोक्तम्—"अक्खाण रसणी कम्माण मोहणी तह वयाण बंभं च । गुत्तीसु य मणगुत्ती चउरो दुक्खेहि सिज्झंति ॥" ॥२२॥

आगे धारणा, ध्येय, यंत्र, मंत्र, मंडल, मुद्रा आदिक व्यवहारध्यानके विषय मंत्रवाद शास्त्रमे कहे गये हैं, उन सबका निर्दोष परमात्माकी आराधनारूप ध्यानमें निषेध किया है—[**यस्य**] जिस परमात्माके [**धारणा न**] कुंभक, पूरक, रेचक नामवाली वायुधारणादिक नहीं है, [**ध्येयं नापि**] प्रतिमा वगैरह ध्यान करने योग्य पदार्थ भी नहीं है, [**यस्य**] जिसके [**यंत्रं न**] अक्षरोंकी रचनारूप स्तंभन मोहनादि विषयक यंत्र नहीं है, [**मंत्रः न**] अनेक तरहके अक्षरोंके बोलनेरूप मंत्र नहीं है, [**यस्य**] और जिसके [**मंडल न**] जलमंडल, वायुमंडल, अग्निमंडल, पृथ्वीमंडलादिक पवनके भेद नहीं हैं, [**मुद्रा न**] गारुडमुद्रा, ज्ञानमुद्रा वगैरह मुद्रा नहीं है, [**तं**] उसे [**अनंत**] द्रव्यार्थिकनयसे अविनाशी तथा अनन्त ज्ञानादिगुणरूप [**देवं मन्यस्व**] **परमात्मदेव** जानो ॥ **भावार्थ**— अतीन्द्रिय आत्मीक-सुखके आस्वादसे विपरीत जिह्वाइन्द्रीके विषय (रस) को जीतके निर्मोह शुद्ध स्वभावसे विपरीत मोहभावको छोड़कर और वीतराग सहज आनन्द परम समरसीभाव सुखरूपी रसके अनुभवका शत्रु जो नौ तरहका कुशील उसको तथा निर्विकल्पसमाधिके घातक मनके संकल्प विकल्पोंको त्यागकर हे प्रभाकरभट्ट, तू शुद्धात्माका अनुभव कर। ऐसा ही दूसरी जगह भी कहा है—"**अक्खाणेति**" इसका आशय इस तरह है, कि इन्द्रियोंमें जीभ प्रबल होती है, ज्ञानावरणादि आठ कर्मोंमें मोह कर्म बलवान् होता है, पाँच महाव्रतोंमें ब्रह्मचर्य व्रत प्रबल है, और तीन गुप्तियोंमेंसे मनोगुप्ति पालना कठिन है। ये चार बातें मुश्किलसे सिद्ध होती हैं ॥२२॥

अथ वेदशास्त्रेन्द्रियादिपरद्रव्यालम्बनाविषयं च वीतरागनिर्विकल्पसमाधिविषयं च परमात्मानं प्रतिपादयन्ति--

वेयहिँ सत्थहिँ इंदियहिँ जो जिय मुणहु ण जाइ ।
णिम्मल-झाणहँ जो विसउ सो परमप्पु अणाइ ॥२३॥
वेदैः शास्त्रैरिन्द्रियैः यो जीव मन्तुं न याति ।
निर्मलध्यानस्य यो विषयः स परमात्मा अनादिः ॥२३॥

वेदशास्त्रेन्द्रियैः कृत्वा योऽसौ मन्तुं ज्ञातुं न याति पुनश्च कथंभूतो यः । मिथ्याविरतिप्रमादकषाययोगाभिधानपञ्चप्रत्ययरहितस्य निर्मलस्य स्वशुद्धात्मसंवित्तिसंजातनित्यानन्दैकसुखामृतास्वादपरिणतस्य ध्यानस्य विषयः । पुनरपि कथंभूतो यः । अनादिः स परमात्मा भवतीति हे जीव जानीहि । तथा चोक्तम्--"अन्यथा वेदपाण्डित्यं शास्त्रपाण्डित्यमन्यथा । अन्यथा परमं तत्त्वं लोकाः क्लिश्यन्ति चान्यथा ॥" अत्रार्थभूत[1] एवं शुद्धात्मोपादेयो अन्यद्धेयमिति भावार्थः ॥२३॥

अथ योऽसौ वेदादिविषयी न भवति परमात्मा समाधिविषयी भवति पुनरपि

आगे वेद, शास्त्र, इंद्रियादि परद्रव्योंके अगोचर और वीतरागनिर्विकल्प समाधिके गोचर (प्रत्यक्ष) ऐसे परमात्माका स्वरूप कहते है--[वेदैः] केवलीको दिव्यवाणीसे [शास्त्रैः] महा मुनियोंके वचनोंसे तथा [इन्द्रियैः] इन्द्रिय और मनसे भी [यः] जो शुद्धात्मा [मंतुं] जाना [न याति] नहीं जाता है, अर्थात् वेद, शास्त्र, ये दोनों शब्द अर्थस्वरूप है, आत्मा शब्दातीत है, तथा इन्द्रिय, मन विकल्परूप हैं, और मूर्तीक पदार्थको जानते हैं, वह आत्मा निर्विकल्प है, अमूर्तीक है, इसलिये इन तीनोंसे नही जान सकते। [यः] जो आत्मा [निर्मलध्यानस्य] निर्मल ध्यानके [विषयः] गम्य है, [स] वही [अनादिः] आदि अन्त रहित [परमात्मा] परमात्मा है, अर्थात् मिथ्यात्व, अविरति, प्रमाद, कषाय, योग, इन पाँच तरह आस्रवोंसे रहित निर्मल निज शुद्धात्माके ज्ञानकर उत्पन्न हुए नित्यानन्द सुखामृतका आस्वाद उस स्वरूप परिणत निर्विकल्प अपने स्वरूपके ध्यानकर स्वरूपकी प्राप्ति है। आत्मा ध्यानगम्य ही है, शास्त्रगम्य नहीं है, क्योकि जिनको शास्त्र सुननेसे ध्यानकी सिद्धि हो जावे, वे ही आत्माका अनुभव कर सकते हैं, जिन्होंने पाया, उन्होंने ध्यानसे ही पाया है, और शास्त्र सुनना तो ध्यानका उपाय है, ऐसा समझकर अनादि अनन्त चिद्रूपमें अपना परिणाम लगाओ। दूसरी जगह भी 'अन्यथा' इत्यादि कहा है। उसका यह भावार्थ है, कि वेद शास्त्र तो अन्य तरह ही हैं, नय प्रमाणरूप हैं, तथा ज्ञानकी पंडिताई कुछ और ही है, वह आत्मा निर्विकल्प है, नय प्रमाण निक्षेपसे रहित है, वह परमतत्त्व तो केवल आनन्दरूप है, और ये लोक अन्य ही मार्गमें लगे हुए हैं, सो वृथा क्लेश कर रहे हैं। इस जगह अर्थरूप शुद्धात्मा ही उपादेय है, अन्य सब त्यागने योग्य हैं, यह सारांश समझना ॥२३॥

आगे कहते हैं, कि जो परमात्मा वेदशास्त्रगम्य तथा इंद्रियगम्य नही, केवल परमसमाधिरूप

---

१. पाठान्तरः--एवं = एव

तस्यैव स्वरूपं व्यक्तं करोति—

केवल-दंसण-णाणमउ केवल-सुक्ख-सहाउ ।
केवल-वीरिउ सो मुणहि जो जि परावरु भाउ ॥२४॥

केवलदर्शनज्ञानमयः केवलसुखस्वभावः ।
केवलवीर्यस्तं मन्यस्व य एव परापरो भावः ॥२४॥

केवलोऽसहायः ज्ञानदर्शनाभ्यां निर्वृत्तः केवलदर्शनज्ञानमयः केवलानन्तसुखस्वभावः केवलानन्तवीर्यस्वभाव इति यस्तमात्मानं मन्यस्व जानीहि । पुनश्च कथंभूतः य एव । यः परापरः परेभ्योऽर्हत्परमेष्ठिभ्यः पर उत्कृष्टो मुक्तिगतः शुद्धात्मा भावः पदार्थः स एव सर्वप्रकारेणोपादेय इति तात्पर्यार्थः ॥२४॥

अथ त्रिभुवनवन्दित इत्यादिलक्षणैर्युक्तो योऽसौ शुद्धात्मा भणितः स लोकाग्रे तिष्ठतीति कथयति—

एयहिँ जुत्तउ लक्खणहिँ जो परु णिक्कलु देउ ।
सो तहिँ णिवसइ परम-पइ जो तइलोयहँ झेउ ॥२५॥

एतैर्युक्तो लक्षणैः यः परो निष्कलो देवः ।
स तत्र निवसति परमपदे यः त्रैलोक्यस्य ध्येयः ॥२५॥

एतैस्त्रिभुवनवन्दितादिलक्षणैः पूर्वोक्तैर्युक्तो यः । पुनश्च कथंभूतो यः । परः परमात्मस्वभावः । पुनरपि किंविशिष्टः । निष्कलः पञ्चविधशरीररहितः । पुनरपि किंविशिष्टः । देवस्त्रिभुवनाराध्यः स एव परमपदे मोक्षे निवसति । यत्पदं कथंभूतम् ।

निर्विकल्पध्यानकर ही गम्य है, इसलिये उसीका स्वरूप फिर कहते है—[यः] जो **[केवलदर्शनज्ञानमयः]** केवलज्ञान केवलदर्शनमयी है, अर्थात् जिसके परवस्तुका आश्रय (सहायता) नही, आप हो सब बातोमे परिपूर्ण ऐसे ज्ञान दर्शनवाला है, [**केवलसुखस्वभावः**] जिसका केवलसुख स्वभाव है, और जो [**केवलवीर्यः**] अनंतवीर्यवाला है, [**स एव**] वही [**परापरभावः**] उत्कृष्ट अर्हंतपरमेष्ठीसे भी अधिक स्वभाववाला सिद्धरूप शुद्धात्मा है [**मन्यस्व**] ऐसा मानो ॥ **भावार्थ**—परमात्माके दो भेद है, पहला सकलपरमात्मा दूसरा निष्कलपरमात्मा उनमेंसे कल अर्थात् शरीर सहित तो अरहंत भगवान् हैं, वे साकार हैं, और जिनके शरीर नहीं, ऐसे निष्कलपरमात्मा निराकारस्वरूप सिद्धपरमेष्ठी हैं, वे सकल परमात्मासे भी उत्तम हैं, वही सिद्धरूप शुद्धात्मा ध्यान करने योग्य है ॥२४॥

आगे तीन लोककर वंदना करने योग्य पूर्व कहे हुए लक्षणों सहित जो शुद्धात्मा कहा गया है, वही लोकके अग्रमें रहता है, यही कहते हैं—[**एतैः लक्षणैः**] 'तीन भुवनकर वंदनीक' इत्यादि जो लक्षण कहे थे, उन लक्षणोंकर [**युक्तः**] सहित [**परः**] सबसे उत्कृष्ट [**निष्कलः**] औदारिक, वैक्रियिक, आहारक, तैजस, कार्माण ये पाँच शरीर जिसके नहीं हैं, अर्थात् निराकार है, [**देवः**] तीन लोककर आराधित जगतका देव है, [यः] ऐसा जो परमात्मा सिद्ध है, [**सः**] वही [**तत्र परमपदे**] उस लोकके शिखरपर [**निवसति**] विराजमान है, [**यः**] जो कि [**त्रैलोक्यस्य**] तीन लोकका [**ध्येयः**] ध्येय (ध्यान करने योग्य) है ॥ **भावार्थ**—यहाँपर जो सिद्धपरमेष्ठीका व्याख्यान किया

त्रैलोक्यस्यावसानमिति । अत्र तदेव मुक्तजीवसदृशं स्वशुद्धात्मस्वरूपमुपादेयमिति भावार्थः ॥२५॥ एवं त्रिविधात्मकथनप्रथममहाधिकारमध्ये मुक्तिगतसिद्धजीवव्याख्यान मुख्यत्वेन दोहकसूत्रदशकं गतम् ।

अत ऊर्ध्वं प्रक्षेपपञ्चकमन्तर्भाव[1]चतुर्विंशतिसूत्र पर्यन्तं यादृशो व्यक्तिरूपः परमात्मा मुक्तौ तिष्ठति तादृशः शुद्धनिश्चयनयेन शक्तिरूपेण देहेऽपि तिष्ठतीति कथयन्ति । तद्यथा—

जेहउ णिम्मलु णाणमउ सिद्धिहिँ णिवसइ देउ ।
तेहउ णिवसइ बंभु परु देहहँ मं करि भेउ ॥२६॥

यादृशो निर्मलो ज्ञानमयः सिद्धौ निवसति देवः ।
तादृशो निवसति ब्रह्मा परः देहे मा कुरु भेदम् ॥२६॥

यादृशः केवलज्ञानादिव्यक्तिरूपः कार्यसमयसारः, निर्मलो भावकर्मद्रव्यकर्मनोकर्ममलरहितः, ज्ञानमयः केवलज्ञानेन निर्वृत्तः केवलज्ञानान्तर्भूतानन्तगुणपरिणतः सिद्धो मुक्तो मुक्तौ निवसति तिष्ठति देवः परमाराध्यः । तादृश पूर्वोक्तलक्षणसदृशः निवसति तिष्ठति ब्रह्मा शुद्धबुद्धैकस्वभाव. परमात्मा परः उत्कृष्टः । क्व निवसति । देहे । केन । शुद्धद्रव्यार्थिकनयेन । कथंभूतेन । शक्तिरूपेण हे प्रभाकरभट्ट भेदं मा कार्षीस्त्वमिति । तथा चोक्तं श्रीकुन्दकुन्दाचार्यदेवै. मोक्षप्राभृते—"णमिएहिं जं णमिज्जइ झाइज्जइ झाइएहिं अणवरयं । थुव्वंतेहिं थुणिज्जइ देहत्थं किं पि तं मुणह ॥"

है, उसीके समान अपना भी स्वरूप है, वही उपादेय (ध्यान करने योग्य) है, जो सिद्धालय है, वह देहालय है, अर्थात् जैसा सिद्धलोकमे विराज रहा है, वैसा ही हंस (आत्मा) इस घट (देह) मे विराजमान है ॥२५॥

इस प्रकार जिसमे तीन तरहके आत्माका कथन है, ऐसे प्रथम महाधिकारमे मुक्तिको प्राप्त हुए सिद्धपरमात्माके व्याख्यानकी मुख्यताकर चौथे स्थलमे दश दोहा-सूत्र कहे । आगे पाँच क्षेपक मिले हुए चौबीस दोहोंमे जैसा प्रगटरूप परमात्मा मुक्तिमे है, वैसा ही शुद्धनिश्चयनयकर देहमे भी शक्तिरूप है, ऐसा कहते है—[**यादृशः**] जैसा केवलज्ञानादि प्रगटस्वरूप कार्यसमयसार [**निर्मलः**] उपाधि रहित भावकर्म-द्रव्यकर्म-नोकर्मरूप मलसे रहित [**ज्ञानमयः**] केवलज्ञानादि अनन्त गुणरूप सिद्धपरमेष्ठी [**देवः**] देवाधिदेव परम आराध्य [**सिद्धौ**] मुक्तिमे [**निवसति**] रहता है, [**तादृशः**] वैसा ही सब लक्षणो सहित [**परः ब्रह्मा**] परब्रह्म, शुद्ध, बुद्ध, स्वभाव परमात्मा, उत्कृष्ट शुद्ध द्रव्यार्थिकनयकर शक्तिरूप परमात्मा [**देहे**] शरीरमे [**निवसति**] तिष्ठता है, इसलिये हे प्रभाकरभट्ट, तू [**भेदं**] सिद्ध भगवान्मे और अपनेमें भेद [**मा कुरु**] मत कर। ऐसा ही मोक्षपाहुड़मे श्रीकुन्दकुन्दाचार्यने भी कहा है "णमिएहिं" इत्यादि—इसका यह अभिप्राय है, कि जो नमस्कार योग्य महापुरुषोसे भी नमस्कार करने योग्य है, स्तुति करने योग्य सत्पुरुषोंसे स्तुति किया गया है, और ध्यान करने योग्य आचार्यपरमेष्ठी वगैरहसे भी ध्यान करने योग्य

१. पाठान्तरः-भाव = भूत

अत्र स एव परमात्मोपादेय इति भावार्थः ॥२६॥

अथ येन शुद्धात्मना स्वसंवेदनज्ञानचक्षुषावलोकितेन पूर्वकृतकर्माणि नश्यन्ति तं किं न जानासि त्वं हे योगिन्निति कथयन्ति--

जें दिट्ठें तुट्टंति लहु कम्मइँ पुव्व-कियाइँ ।
सो परु जाणहि जोइया देहि वसंतु ण काइँ ॥२७॥

येन दृष्टेन त्रुटयन्ति लघु कर्माणि पूर्वकृतानि ।
तं परं जानासि योगिन् देहे वसन्तं न किम् ॥२७॥

जें दिट्ठें तुट्टंति लहु कम्मइं पुव्वकियाइं **येन परमात्मना दृष्टेन सदानन्दैकरूपवीतरागनिर्विकल्पसमाधिलक्षणनिर्मललोचनेनावलोकितेन त्रुटयन्ति शतचूर्णानि भवन्ति** लघु **शीघ्रम् अन्तर्मुहूर्तेन । कानि । परमात्मनः प्रतिबन्धकानि स्वसंवेद्यभावोपार्जितानि पूर्वकृतकर्माणि** सो परु जाणहि जोइया देहि वसंतु ण काइं **तं नित्यानन्दैकस्वभावं स्वात्मानं परमोत्कृष्टं किं न जानासि हे योगिन् । कथंभूतमपि । स्वदेहे वसन्तमपीति । अत्र स एवोपादेय इति भावार्थः ॥२७॥**

अथ ऊर्ध्वं प्रक्षेपपञ्चकं कथयन्ति । तद्यथा---

जित्थु ण इंदिय-सुह-दुहइँ जित्थु ण मण-वावारु ।
सो अप्पा मुणि जीव तहुँ अण्णु परिं अवहारु ॥२॥

ऐसा जीवनामा पदार्थ इस देहमें बसता है, उसको तूं परमात्मा जान ॥ **भावार्थ**—वही परमात्मा उपादेय है ॥२६॥

आगे जिस शुद्धात्माको सम्यग्ज्ञान-नेत्रसे देखनेसे पहले उपार्जन किये हुए कर्म नाश हो जाते हैं, उसे हे योगिन्, तू क्यों नही पहचानता, ऐसा कहते हैं—[**येन**] जिस परमात्माको [**दृष्टेन**] सदा आनन्दरूप वीतराग निर्विकल्प समाधिस्वरूप निर्मल नेत्रोंकर देखनेसे [**लघु**] शीघ्र ही [**पूर्वकृतानि**] निर्वाणके रोकनेवाले पूर्व उपार्जित [**कर्माणि**] कर्म [**त्रुट्यन्ति**] चूर्ण हो जाते हैं, अर्थात् सम्यग्ज्ञानके अभावसे (अज्ञानसे) जो पहले शुभ अशुभ कर्म कमाये थे, वे निजस्वरूपके देखनेसे ही नाश हो जाते हैं, [**तं परं**] उस सदानन्दरूप परमात्माको [**देहे वसंतं**] देहमें बसते हुए भी [**हे योगिन्**] हे योगी [**किं न जानासि**] तू क्यों नहीं जानता ? ॥ **भावार्थ**—जिसके जाननेसे कर्म-कलंक दूर हो जाते हैं वह आत्मा शरीरमें निवास करता हुआ भी देहरूप नहीं होता, उसको तूं अच्छी तरह पहचान और दूसरे अनेक प्रपंचों (झगडों) को तो जानता है; अपने स्वरूपको तरफ क्यों नहीं देखता ? वह निज स्वरूप ही उपादेय है, अन्य कोई नहीं है ॥२७॥

इससे आगे पाँच प्रक्षेपकों द्वारा आत्मा ही का कथन करते हैं—[**यत्र**] जिस शुद्ध आत्मस्वभावमें [**इन्द्रियसुखदुःखानि**] आकुलता रहित अतीन्द्रियसुखसे विपरीत जो आकुलताके उत्पन्न

यत्र नेन्द्रियसुखदुःखानि यत्र न मनोव्यापारः ।
तं आत्मानं मन्यस्व जीव त्वं अन्यत्परमपहर ॥२८॥

जित्थु ण इंदियसुहदुहइं जित्थु ण मणवावारु **यत्र शुद्धात्मस्वरूपे न सन्ति न विद्यन्ते । कानि । अनाकुलत्वलक्षणपारमार्थिकसौख्यविपरीतान्याकुलत्वोत्पादकानीन्द्रिय सुखदुःखानि यत्र च निर्विकल्पपरमात्मनो विलक्षणः संकल्पविकल्परूपो मनोव्यापारो नास्ति ।** सो अप्पा मुणि जीव तुहुं अण्णु परि अवहारु **तं पूर्वोक्तलक्षणं स्वशुद्धात्मानं मन्यस्व नित्यानन्दैकरूपं वीतरागनिर्विकल्पसमाधौ स्थित्वा जानीहि हे जीव, त्वम् अन्यत्परमात्मस्वभावाद्विपरीतं पञ्चेन्द्रियविषयस्वरूपादिविभावसमूहं परस्मिन् दूरे सर्वप्रकारेणापहर त्यजेति तात्पर्यार्थः । निर्विकल्पसमाधौ सर्वत्र वीतरागविशेषणं किमर्थं कृतम् इति पूर्वपक्षः । परिहारमाह । यत एव हेतोः वीतरागस्तत एव निर्विकल्प इति हेतुहेतुमद्भावज्ञापनार्थम्, अथवा ये सरागिणोऽपि सन्तो वयं निर्विकल्पसमाधिस्था इति वदन्ति तन्निषेधार्थम्, अथवाश्वेतशङ्खवत्स्वरूपविशेषणमिदम् इति परिहारत्रयं निर्दोषिपरमात्मशब्दादिपूर्वपक्षेऽपि योजनीयम् ॥२८॥**

अथ यः परमात्मा व्यवहारेण देहे तिष्ठति निश्चयेन स्वस्वरूपे तमाह—

देहादेहहिँ जो वसइ भेयाभेय-णएण ।
सो अप्पा मुणि जीव तुहुँ किं अण्णेँ बहुएण ॥२९॥

देहादेहयोः यो वसति भेदाभेदनयेन ।
तमात्मानं मन्यस्व जीव त्वं किमन्येन बहुना ॥२९॥

करनेवाले इन्द्रियजनित सुख दुःख [**न**] नहीं हैं, [**यत्र**] जिसमे [**मनोव्यापारः**] संकल्प-विकल्परूप मनका व्यापार भी [**न**] नहीं है, अर्थात् विकल्प रहित परमात्मासे मनके व्यापार जुदे है, [**तं**] उस पूर्वोक्त लक्षणवालेको [**हे जीव त्वं**] हे जीव, तू [**आत्मानं**] आत्माराम [**मन्यस्व**] मान, [**अन्यत्परं**] अन्य सब विभावोंको [**अपहर**] छोड़ ॥ **भावार्थ**—ज्ञानानन्दस्वरूप निज शुद्धात्माको निर्विकल्पसमाधिमें स्थिर होकर जान, अन्य परमात्मस्वभावसे विपरीत पाँच इंद्रियोके विषय वगैरह सब विकार परिणामोंको दूरसे ही त्याग, उनका सर्वथा ही त्याग कर। यहाँपर किसी शिष्यने प्रश्न किया, कि निर्विकल्पसमाधिमें सब जगह वीतराग विशेषण क्यों कहा है ? उसका उत्तर कहते है— जहाँपर वीतरागता है, वहीं निर्विकल्पसमाधिपना है, इस रहस्यको समझानेके लिये अथवा जो रागी हुए कहते हैं कि, हम निर्विकल्पसमाधिमें स्थित हैं, उनके निषेधके लिये वीतरागता सहित निर्विकल्पसमाधिका कथन किया गया है, अथवा सफेद शंखकी तरह स्वरूप प्रगट करनेके लिये कहा गया है, अर्थात् जो शंख होगा, वह श्वेत ही होगा, उसी प्रकार जो निर्विकल्पसमाधि होगी, वह वीतरागतारूप ही होगी ॥२८॥

आगे यह परमात्मा व्यवहारनयसे तो इस देहमें ठहर रहा है, लेकिन निश्चयनयकर अपने स्वरूपमें ही तिष्ठता है, ऐसी आत्माको कहते है—[**यः**] जो [**भेदाभेदनयेन देहादेहयोः वसति**] अनुप-

देहादेहयोरधिकरणभूतयोर्यो वसति । केन । भेदाभेदनयेन । तथाहि—अनुपचरितासद्भूतव्यवहारेणाभेदनयेन [स्वपरमात्मनोऽभिन्ने] स्वदेहे वसति शुद्धनिश्चयनयेन तु भेदनयेन स्वदेहाद्भिन्ने स्वात्मनि वसति यः तमात्मानं मन्यस्व जानीहि हे जीव नित्यानन्दैकवीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः । किमन्येन शुद्धात्मनो भिन्नेन देहरागादिना बहुना । अत्र योऽसौ देहे वसन्नपि निश्चयेन देहरूपो न भवति स एव स्वशुद्धात्मोपादेय इति तात्पर्यार्थः ।।२९।।

अथ जीवाजीवयोरेकत्वं मा कार्षीर्लक्षणभेदेन भेदोऽस्तीति निरूपयति—

जीवाजीव म एक्कु करि लक्खण भेएँ भेउ ।
जो परु सो परु भणमि मुणि अप्पा अप्पु अभेउ ।।३०।।

जीवाजीवौ मा एकौ कुरु लक्षणभेदेन भेदः ।
यत्परं तत्परं भणामि मन्यस्व आत्मन आत्मना अभेदः ।।३०।।

हे प्रभाकरभट्ट जीवाजीवावेकौ मा कार्षीः । कस्मात् । लक्षणभेदेन भेदोऽस्ति तद्यथा—रसादिरहितं शुद्धचैतन्यं जीवलक्षणम् । तथा चोक्तं प्राभृते-"अरसमरूवमगंधं अव्वत्तं चेदणागुणमसद्दं जाण अलिंगग्गहणं जीवमणिद्दिट्ठसंठाणं ।।" इत्थंभूतशुद्धात्मनो भिन्नमजीवलक्षणम् । तच्च द्विविधम् । जीवसंबन्धमजीवसंबन्धं च ।

चरितअसद्भूतव्यवहारनय अपनेसे भिन्न जड़रूप देहमें तिष्ठ रहा है, और शुद्ध निश्चयनयकर अपने आत्मस्वभावमें ठहरा हुआ है, अर्थात् व्यवहारनयकर तो देहसे अभेदरूप (तन्मय) है, और निश्चयसे सदा कालसे अत्यन्त जुदा है, अपने स्वभावमे स्थित है, [तं] उसे [हे जीव त्वं] हे जीव, तूं [आत्मानं] परमात्मा [मन्यस्व] जान। अर्थात् नित्यानन्द वीतराग निर्विकल्पसमाधिमें ठहरके अपने आत्माका ध्यान कर। [अन्येन] अपनेसे भिन्न [बहुना] देह रागादिकोसे [किं] तुझे क्या प्रयोजन है ? भावार्थ—देहमे रहता हुआ भी निश्चयसे देहस्वरूप जो नहीं होता, वही निज शुद्धात्मा उपादेय है ।।२९।।

आगे जीव और अजीवमें लक्षणके भेदसे भेद है, तू दोनोंको एक मत जान, ऐसा कहते हैं—
हे प्रभाकरभट्ट, तूं [जीवाजीवौ] जीव और अजीवको [एकौ] एक [मा कार्षीः] मत कर, क्योंकि इन दोनोंमें [लक्षणभेदेन] लक्षणके भेदसे [भेदः] भेद है [यत्परं] जो परके सम्बन्धसे उत्पन्न हुए रागादि विभाव (विकार) हैं, [तत्परं] उनको पर (अन्य) [मन्यस्व] समझ [च] और [आत्मनः] आत्माका [आत्मना अभेदः] अपनेसे अभेद जान [भणामि] ऐसा मैं कहता हूँ ।। भावार्थ—जीव अजीवके लक्षणोंमेंसे जीवका लक्षण शुद्ध चैतन्य है, वह स्पर्श, रस, गंधरूप शब्दादिकसे रहित है। ऐसा ही श्रीसमयसारमे कहा है—"अरसं" इत्यादि। इसका सारांश यह है, कि जो आत्मद्रव्य है, वह मिष्ट वगेरह पाँच प्रकारक रस रहित है, श्वेत आदिक पाँच तरह के वर्ण रहित है, सुगन्ध दुर्गन्ध इन दो तरहके गन्ध उसमें नहीं हैं, प्रगट (दृष्टिगोचर) नहीं है, चैतन्यगुण सहित है, शब्दसे रहित है, पुल्लिंग वगेरह करक ग्रहण नहीं होता, अर्थात् लिंग रहित है, और उसका आकार नहीं

देहरागादिरूपं जीवसंबन्धं, पुद्गलादिपञ्चद्रव्यरूपमजीवसंबन्धमजीवलक्षणम् । अत एव भिन्नं जीवादजीवलक्षणम् । ततः कारणात् यत्परं रागादिकं तत्परं जानीहि । कथंभूतम् । भेद्यमभेद्यमित्यर्थः । अत्र योऽसौ शुद्धलक्षणसंयुक्तः शुद्धात्मा स एवोपादेय इति भावार्थः ॥३०॥

अथ तस्य शुद्धात्मनो ज्ञानमयादिलक्षणं विशेषेण कथयति—

अमणु अणिंदिउ णाणमउ मुत्ति-विरहिउ चिमित्तु ।
अप्पा इंदिय-विसउ णवि लक्खणु एहु णिरुत्तु ॥३१॥

अमनाः अनिन्द्रियो ज्ञानमयः मूर्तिविरहितश्चिन्मात्रः ।
आत्मा इन्द्रियविषयो नैव लक्षणमेतन्निरुक्तम् ॥३१॥

परमात्मविपरीतमानसविकल्पजालरहितत्वादमनस्कः, अतीन्द्रियशुद्धात्मविपरीतेनेन्द्रियग्रामेण रहितत्वादतीन्द्रियः लोकालोकप्रकाशकेवलज्ञानेन निर्वृत्तत्वात् ज्ञानमयः, अमूर्तात्मविपरीतलक्षणया स्पर्शरसगन्धवर्णवत्या मूर्त्या वर्जितत्वान्मूर्तिविरहितः, अन्यद्रव्यासाधारणया शुद्धचेतनया निष्पन्नत्वाच्चिन्मात्रः । कोऽसौ । आत्मा । पुनश्च किंविशिष्टः । वीतरागस्वसंवेदनज्ञानेन ग्राह्योऽपीन्द्रियाणामविषयश्च लक्षणमिदं निरुक्तं निश्चितमिति । अत्रोक्तलक्षणपरमात्मोपादेय इति तात्पर्यार्थः ॥३१॥

दीखता, अर्थात् निराकार वस्तु है। आकार छह प्रकारके हैं—समचतुरस्र, न्यग्रोधपरिमंडल, सातिक, कुब्जक, वामन, हुंडक। इन छह प्रकारके आकारोंसे रहित है, ऐसा जो चिद्रूप निज वस्तु है, उसे तू पहचान। आत्मासे भिन्न जो अजीव पदार्थ है, उसके लक्षण दो तरहसे हैं, एक जीव सम्बन्धी, दूसरा अजीवसम्बन्धी। जो द्रव्यकर्म भावकर्म नोकर्मरूप है, वह तो जीवसम्बन्धी है, और पुद्गलादि पाँच द्रव्यरूप अजीव जीवसम्बन्धी नहीं हैं, अजीवसम्बन्धी ही हैं, इसलिये अजीव हैं, जीवसे भिन्न हैं। इस कारण जीवसे भिन्न अजीवरूप जो पदार्थ हैं, उनको अपने मत समझो। यद्यपि रागादिक विभाव परिणाम जीवमें ही उपजते हैं, इससे जीवके कहे जाते हैं, परन्तु वे कर्म जनित हैं, परपदार्थ (कर्म) के सम्बन्धसे हैं, इसलिये पर ही समझो। यहाँपर जीव अजीव दो पदार्थ कहे गये हैं, उनमेंसे शुद्ध चेतना लक्षणका धारण करनेवाला शुद्धात्मा ही ध्यान करने योग्य है, यह सारांश हुआ ॥३०॥

आगे शुद्धात्माके ज्ञानादिक लक्षणोंको विशेषपनेसे कहते हैं—[आत्मा] यह शुद्ध आत्मा [अमनाः] परमात्मासे विपरीत विकल्पजालमयी मनसे रहित है [अनिन्द्रियः] शुद्धात्मासे भिन्न इन्द्रिय-समूहसे रहित है [ज्ञानमयः] लोक और अलोकके प्रकाशनेवाले केवलज्ञान स्वरूप है, [मूर्तिविरहितः] अमूर्तीक आत्मासे विपरीत स्पर्श, रस, गंध, वर्णवाली मूर्तिरहित है, [चिन्मात्रः] अन्य द्रव्योंमें नहीं पाई जावे, ऐसी शुद्धचेतनास्वरूप ही है, और [इन्द्रियविषयः नैव] इन्द्रियोंके गोचर नहीं है, वीतरागस्वसंवेदनसे ही ग्रहण किया जाता है, [एतत् लक्षणं] ये लक्षण जिसके [निरुक्तं] प्रगट कहे गये हैं वे उसको ही तू निःसन्देह आत्मा जान। इस जगह जिसके ये लक्षण कहे गये हैं, वहीआत्मा है, वही उपादेय है, आराधने योग्य है, यह तात्पर्य निकला ॥३१॥

अथ संसारशरीरभोगनिर्विण्णो भूत्वा यः शुद्धात्मानं ध्यायति तस्य संसारवल्ली नश्यतीति कथयति—

भव-तणु-भोय-विरत्त-मणु जो अप्पा झाएइ ।
तासु गुरुक्की वेल्लडी संसारिणि तुट्टेइ ॥३२॥

भवतनुभोगविरक्तमना य आत्मानं ध्यायति ।
तस्य गुर्वी वल्ली सांसारिकी त्रुटयति ॥३२॥

भवतनुभोगेषु रञ्जितं मूर्छितं वासितमासक्तं चित्तं स्वसंवित्तिसमुत्पन्नवीतरागपरमानन्दसुखरसास्वादेन व्यावृत्य स्वशुद्धात्मसुखे रतत्वात्संसारशरीरभोगविरक्तमनाः सन् यः शुद्धात्मानं ध्यायति तस्य गुरुक्की महती संसारवल्ली त्रुट्यति नश्यति शतचूर्णा भवतीति । अत्र येन परमात्मध्यानेन संसारवल्ली विनश्यति स एव परमात्मोपादेयो भावनीयश्चेति तात्पर्यार्थः ॥३२॥ इति चतुर्विंशतिसूत्रमध्ये प्रक्षेपकपञ्चकं गतम् ।

तदनन्तरं देहदेवगृहे योऽसौ वसति स एव शुद्धनिश्चयेन परमात्मा तन्निरूपयति—

देहादेवलि जो वसइ देउ अणाइ-अणंतु ।
केवल-णाण-फुरंत-तणु सो परमप्पु णिभंतु ॥३३॥

देहदेवालये यः वसति देवः अनाद्यनन्तः ।
केवलज्ञानस्फुरत्तनुः स परमात्मा निर्भ्रान्तिः ॥३३॥

व्यवहारेण देहदेवकुले वसन्नपि निश्चयेन देहाद्भिन्नत्वाद्देहवन्मूर्तः सर्वाशुचिमयो न भवति । यद्यपि देहो नाराध्यस्तथापि स्वयं परमात्माराध्यो देवः पूज्यः,

---

आगे जो कोई ससार, शरीर, भोगोंसे विरक्त होके शुद्धात्माका ध्यान करता है। उसोके संसाररूपी बेल नाशको प्राप्त हो जाती है, इसे कहते हैं—[यः] जो जीव [भवतनुभोगविरक्तमना] संसार, शरीर और भोगोंमे विरक्त मन हुआ [आत्मानं] शुद्धात्माका [ध्यायति] चितवन करता है, [तस्य] उसकी [गुर्वी] मोटी [सांसारिकी वल्ली] संसाररूपी बेल [त्रुटयति] नाशको प्राप्त हो जाती है ॥ भावार्थ—संसार, शरीर, भोगोंमे अत्यंत आसक्त (लगा हुआ) चित्त है, उसको आत्मज्ञानसे उत्पन्न हुए वीतरागपरमानंद सुखामृतके आस्वादसे राग-द्वेषसे हटाकर अपने शुद्धात्म-सुखमे अनुरागी कर शरीरादिकमें वैराग्यरूप हुआ जो शुद्धात्माको विचारता है, उसका संसार छूट जाता है, इसलिये जिस परमात्माके ध्यानसे संसाररूपी बेल दूर हो जाती है, वही ध्यान करने योग्य (उपादेय) है ॥३२॥

आगे जो देहरूपी देवालयमें रहता है, वही शुद्धनिश्चयनयसे परमात्मा है, यह कहते हैं—[यः] जो व्यवहारनयकर [देहदेवालये] देहरूपी देवालयमें [वसति] बसता है, निश्चयनयकर देहसे भिन्न है, देहकी तरह मूर्तीक तथा अशुचिमय नहीं है, महा पवित्र है, [देवः] आराधने योग्य है, पूज्य है, देह आराधने योग्य नहीं है, [अनाद्यनंतः] जो परमात्मा आप शुद्ध द्रव्यार्थिकनयकर अनादि अनंत है, तथा यह देह आदि अन्तकर सहित है, [केवलज्ञानस्फुरिततनुः] जो आत्मा निश्चय-

यद्यपि देह आद्यन्तस्तथापि स्वयं शुद्धद्रव्यार्थिकनयेनानाद्यनन्तः, यद्यपि देहो जडस्तथापि स्वयं लोकालोकप्रकाशकत्वात्केवलज्ञानस्फुरिततनुः केवलज्ञानप्रकाशरूपशरीर इत्यर्थः। स पूर्वोक्तलक्षणयुक्तः परमात्मा भवतीति। कथंभूतः। निर्भ्रान्तः निस्सन्देह इति अत्र योऽसौ देहे वसन्नपि सर्वाशुच्यादिदेहधर्मं न स्पृशति स एव शुद्धात्मोपादेय इति भावार्थः ॥३३॥

अथ शुद्धात्मविलक्षणे देहे वसन्नपि देहं न स्पृशति देहेन सोऽपि न स्पृश्यत इति प्रतिपादयति---

देहे वसंतु वि णवि छिवइ णियमें देहु वि जो जि।
देहें छिप्पइ जो वि णवि मुणि परमप्पउ सो जि ॥३४॥

देहे वसन्नपि नैव स्पृशति नियमेन देहमपि य एव।
देहेन स्पृश्यते योऽपि नैव मन्यस्व परमात्मानं तमेव ॥३४॥

देहे वसन्नपि नैव स्पृशति नियमेन देहमपि यः एव देहेन न स्पृश्यते योऽपि मन्यस्व जानीहि परमात्मा सोऽपि। इतो विशेषः---शुद्धात्मानुभूतिविपरीतेन क्रोधमानमायालोभस्वरूपादिविभावपरिणामेनोपार्जितेन पूर्वकर्मणा निर्मिते देहे अनुपचरितासद्भूतव्यवहारेण वसन्नपि निश्चयेन य एव देहं न स्पृशति, तथाविधदेहेन न स्पृश्यते योऽपि तं मन्यस्व जानीहि परमात्मानं तमेवम्। किं कृत्वा। वीतरागनिर्विकल्पसमाधौ स्थित्वेति। अत्र य एव शुद्धात्मानुभूतिरहितदेहे वसन्नपि देहममत्वपरि-

---

नयकर लोक अलोकको प्रकाशनेवाले केवलज्ञानस्वरूप है, अर्थात् केवलज्ञान ही प्रकाशरूप शरीर है, और देह जड है [सः परमात्मा] वही परमात्मा [निर्भ्रान्तः] निःसंदेह है, इसमें कुछ संशय नहीं समझना। सारांश यह है, कि जो देहमें रहता है, तो भी देहसे जुदा है, सर्वाशुचिमयी देहको वह देव छूता नहीं है, वही आत्मदेव उपादेय है ॥३३॥

आगे शुद्धात्मासे भिन्न इस देहमें रहता हुआ भी देहको नहीं स्पर्श करता है, और देह भी उसको नहीं छूती है, वह कहते हैं---[य एव] जो [देहे वसन्नपि] देहमें रहता हुआ भी [नियमेन] निश्चयनयकर [देहमपि] शरीरको [नैव स्पृशति] नहीं स्पर्श करता, [देहेन] देहसे [यः-अपि] वह भी [नैव स्पृश्यते] नहीं छुआ जाता। अर्थात् न तो जीव देहको स्पर्श करता और न देह जीवको स्पर्श करती, [तमेव] उसीको [परमात्मानं] परमात्मा [मन्यस्व] तू जान, अर्थात् अपना स्वरूप ही परमात्मा है॥ **भावार्थ**---जो शुद्धात्माकी अनुभूतिसे विपरीत क्रोध, मान, माया, लोभरूप विभाव परिणाम हैं, उनकर उपार्जन किये शुभ अशुभ कर्मोंकर बनाई हुई देहमें अनुपचरितअसद्भूतव्यवहारनयकर बसता हुआ भी निश्चयकर देहको नहीं छूता, उसको तुम परमात्मा जानो, उसी स्वरूपको वीतराग निर्विकल्पसमाधिमें तिष्ठकर चिंतवन करो। यह आत्मा जड़रूप देहमें

णामेन सहितानां हेयः स एव शुद्धात्मा देहममत्वपरिणामरहितानामुपादेय इति भावार्थः ॥३४॥

अथ यः समभावस्थितानां योगिनां परमानन्दं जनयन् कोऽपि शुद्धात्मा स्फुरति तमाह—

जो सम-भाव-परिट्ठियहँ जोइहँ कोइ फुरेइ ।
परमाणंदु जणंतु फुडु सो परमप्पु हवेइ ॥३५॥

यः समभावप्रतिष्ठितानां योगिनां कश्चित् स्फुरति ।
परमानन्दं जनयन् स्फुटं स परमात्मा भवति ॥३५॥

यः कोऽपि परमात्मा जीवितमरणलाभालाभसुखदुःखशत्रुमित्रादिसमभावपरिणतस्वशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मकवीतरागनिर्विकल्पसमाधौ प्रतिष्ठितानां परमयोगिनां कश्चित् स्फुरति संवित्तिमायाति । किं कुर्वन् । वीतरागपरमानन्दं जनयन् स्फुटं निश्चितम् । तथा चोक्तम्—"आत्मानुष्ठाननिष्ठस्य व्यवहारबहिःस्थितेः । जायते परमानन्दः कश्चिद्योगेन योगिन. ।" हे प्रभाकरभट्ट स एवंभूतः परमात्मा भवतीति । अत्र वीतरागनिर्विकल्पसमाधिरतानां स एवोपादेयः, तद्विपरीतानां हेय इति तात्पर्यार्थः ॥३५॥

अथ शुद्धात्मप्रतिपक्षभूतकर्मदेहप्रतिबद्धोऽप्यात्मा निश्चयनयेन सकलो न भवतीति ज्ञापयति—

कम्म-णिबद्ध वि जोइया देहि वसंतु वि जो जि ।
होइ ण सयलु कया वि फुडु मुणि परमप्पउ सो जि ॥३६॥

व्यवहारनयकर रहता है, सो देहात्मबुद्धिवालेको नहीं मालूम होतो है, वही शुद्धात्मा देहके ममत्वसे रहित (विवेकी) पुरुषोंके आराधने योग्य है ॥३४॥

आगे जो योगी समभावमें स्थित हैं, उनको परमानन्द उत्पन्न करता हुआ कोई शुद्धात्मा स्फुरायमान है, उसका स्वरूप कहते हैं—[**समभावप्रतिष्ठितानां**] समभाव अर्थात् जोवित, मरण, लाभ, अलाभ, सुख, दुःख, शत्रु, मित्र इत्यादि इन सबमें समभावको परिणत हुए [**योगिनां**] परम योगीश्वरोंके अर्थात् जिनके शत्रु-मित्रादि सब समान है, और सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्ररूप अभेदरत्नत्रय जिसका स्वरूप है, ऐसो वोतरागनिर्विकल्पसमाधिमें तिष्ठे हुए हैं, उन योगीश्वरोंके हृदयमें [**परमानन्दं जनयन्**] वीतराग परम आनन्दको उत्पन्न करता हुआ [**यः कश्चित्**] जो कोई [**स्फुरति**] स्फुरायमान होता है, [**स स्फुटं**] वही प्रकट [**परमात्मा**] परमात्मा [**भवति**] है, ऐसा जानो। ऐसा ही दूसरी जगह भी "आत्मानुष्ठान" इत्यादिसे कहा है, अर्थात् जो योगी आत्माके अनुभवमें तल्लीन हैं, और व्यवहारसे रहित शुद्ध निश्चयमें तिष्ठते हैं, उन योगियोंके ध्यान करके अपूर्व परमानन्द उत्पन्न होता है। इसलिये, हे प्रभाकरभट्ट, जो आत्मस्वरूप योगीश्वरोंके हृदयमें स्फुरायमान है, वही उपादेय है। जो योगी वीतरागनिर्विकल्पसमाधिमें लगे हुए हैं, संसारसे पराङ्मुख है, उन्हींके वह आत्मा उपादेय है, और जो देहात्मबुद्धि विषयासक्त है, वे अपने स्वरूपको नहीं जानते है, उनके आत्मरुचि नहीं हो सकती यह तात्पर्य हुआ ॥३५॥

कर्मनिबद्धोऽपि योगिन् देहे वसन्नपि य एव।
भवति न सकलः कदापि स्फुटं मन्यस्व परमात्मानं तमेव ॥३६॥

कर्मनिबद्धोऽपि हे योगिन् देहे वसन्नपि य एव न भवति सकलः क्वापि काले स्फुटं मन्यस्व जानीहि परमात्मानं तमेवेति । अतो विशेषः—**परमात्मभावनाविपक्षभूतैः रागद्वेषमोहैः समुपार्जितैः कर्मभिरशुद्धनयेन बद्धोऽपि तथैव देहस्थितोऽपि निश्चयनयेन सकलः सदेहो न भवति क्वापि तमेव परमात्मानं** हे प्रभाकरभट्ट **मन्यस्व जानीहि वीतरागस्वसंवेदनज्ञानेन** भावयेत्यर्थः । अत्र **सदैव परमात्मा वीतरागनिर्विकल्पसमाधिरतानामुपादेयो भवत्यन्येषां हेय** इति भावार्थः ॥३६॥

यः **परमार्थेन देहकर्मरहितोऽपि मूढात्मनां सकल इति प्रतिभातीत्येवं निरूपयति—**

जो परमत्थें णिक्कलु वि कम्म-विभिण्णउ जो जि ।
मूढा सयलु भणंति फुडु मुणि परमप्पउ सो जि ॥३७॥

यः परमार्थेन निष्कलोऽपि कर्मविभिन्नो य एव।
मूढाः सकलं भणन्ति स्फुटं मन्यस्व परमात्मानं तमेव ॥३७॥

यः परमार्थेन निष्कलोऽपि देहरहितोऽपि कर्मविभिन्नोऽपि य एव भेदाभेदरत्नत्रयभावनारहिता मूढात्मानस्तमात्मानं सकलमिति भणन्ति स्फुटं निश्चितं हे प्रभाकरभट्ट **तमेव परमात्मानं मन्यस्व जानीहीति, वीतरागसदानन्दैकसमाधौ स्थित्वानुभवेत्यर्थः । अत्र स एव परमात्मा शुद्धात्मसंवित्तिप्रतिपक्षभूतमिथ्यात्वरागादिनिवृत्तिकाले सम्यगुपा-**

आगे शुद्धात्मासे जुदे कर्म और शरीर इन दोनोंकर अनादिकर बँधा हुआ यह आत्मा है, तो भी निश्चयकर शरीरस्वरूप नहीं है, यह कहते हैं—[**योगिन्**] हे योगी [**यः**] जो यह आत्मा [**कर्मनिबद्धोऽपि**] यद्यपि कर्मोंसे बँधा है, [**देहे वसन्नपि**] और देहमें रहता भी है, [**कदापि**] परन्तु कभी [**सकलः न भवति**] देहरूप नहीं होता, [**तमेव**] उसीको तू [**परमात्मानं**] परमात्मा [**स्फुटं**] निश्चयसे [**मन्यस्व**] जान ॥ **भावार्थ**—परमात्माकी भावनासे विपरीत जो राग, द्वेष, मोह हैं, उनकर यद्यपि व्यवहारनयसे बँधा है, और देहमें तिष्ठ रहा है, तो भी निश्चयनयसे शरीररूप नहीं है, उससे जुदा ही है, किसी कालमें भी यह जीव जड़ न तो हुआ, न होगा, उसे हे प्रभाकरभट्ट, परमात्मा जान । निश्चयकर आत्मा ही परमात्मा है, उसे तू वीतराग स्वसंवेदनज्ञानकर चितवन कर । सारांश यह है, कि यह आत्मा सदैव वीतरागनिर्विकल्पसमाधिमें लीन साधुओंको तो प्रिय है किन्तु मूढोंको नहीं ॥३६॥

आगे निश्चयनयकर आत्मा देह और कर्मोंसे रहित है, तो भी मूढों (अज्ञानियों) को शरीरस्वरूप मालूम होता है, ऐसा कहते हैं—[**यः**] जो आत्मा [**परमार्थेन**] निश्चयनयकर [**निष्कलोऽपि**] शरीर रहित है, [**कर्मविभिन्नोऽपि**] और कर्मोंसे भी जुदा है, तो भी [**मूढाः**] निश्चय व्यवहार रत्नत्रयकी भावनासे विमुख मूढ़ [**सकलं**] शरीरस्वरूप ही [**स्फुटं**] प्रगटपनेसे [**भणंति**] मानते हैं, सो हे प्रभाकरभट्ट, [**तमेव**] उसीको [**परमात्मानं**] परमात्मा [**मन्यस्व**] जान, अर्थात् वीतराग सदानन्द निर्विकल्पसमाधिमें रहके अनुभव कर ॥ **भावार्थ**—वही परमात्मा शुद्धात्माके

वेयो भवति तदभावे हेय इति तात्पर्यार्थः ॥३७॥

अथानन्ताकाशैकनक्षत्रमिव यस्य केवलज्ञाने त्रिभुवनं प्रतिभाति स परमात्मा भवतीति कथयति––

गयणि अणंति वि एक्क उडु जेहउ भुयणु विहाइ ।
मुक्कहँ जसु पए बिंबियउ सो परमप्पु अणाइ ॥३८॥

गगने अनन्तेऽपि एकमुडु यथा भुवनं विभाति ।
मुक्तस्य यस्य पदे बिम्बितं स परमात्मा अनादिः ॥३८॥

गगने अनन्तेऽप्येकनक्षत्रं यथा तथा भुवनं जगत् प्रतिभाति । क्व प्रतिभाति । मुक्तस्य यस्य पदे केवलज्ञाने बिम्बितं प्रतिफलितं दर्पणे बिम्बमिव । स एवंभूतः परमात्मा भवतीति । अत्र यस्यैव केवलज्ञाने नक्षत्रमेकमिव लोकः प्रतिभाति स एव रागादिसमस्तविकल्परहितानामुपादेयो भवतीति भावार्थः ॥३८॥

अथ योगीन्द्रवृन्दैर्यो निरवधिज्ञानमयो निर्विकल्पमाधिकाले ध्येयरूपश्चिन्त्यते त परमात्मानमाह––

जोइय-विंदहिं णाणमउ जो झाइज्जइ झेउ ।
मोक्खहँ कारणि अणवरउ सो परमप्पउ देउ ॥३९॥

योगिवृन्दैः ज्ञानमयः यो ध्यायते ध्येयः ।
मोक्षस्य कारणे अनवरतं स परमात्मा देवः ॥३९॥

योगीन्द्रवृन्दैः शुद्धात्मवीतरागनिर्विकल्पसमाधिरतैः ज्ञानमयः केवलज्ञानेन निर्वृत्तः यः कर्मतापन्नो ध्यायते ध्येयो ध्येयरूपोऽपि । किमर्थं ध्यायते । मोक्षकारणे मोक्षनिमित्ते अनवरतं निरन्तरं स एव परमात्मा देवः परमाराध्य इति । अत्र य एव

वैरो मिथ्यात्व रागादिकोंके दूर होनेके समय ज्ञानी जीवोंको उपादेय है, और जिनके मिथ्यात्वरागादिक दूर नहीं हुए उनके उपादेय नहीं, परवस्तुका ही ग्रहण है ॥३७॥

आगे अनंत आकाशमें एक नक्षत्रकी तरह जिसके केवलज्ञानमें तीनों लोक भासते हैं, वह परमात्मा है, ऐसा कहते हैं—**[यथा]** जैसे **[अनंतेऽपि]** अनंत **[गगने]** आकाशमें **[एकं उडु]** एक नक्षत्र **["तथा"]** उसी तरह **[भुवनं]** तीन लोक **[यस्य]** जिसके **[पदे]** केवलज्ञानमे **[बिंबितं]** प्रतिबिंबित हुए **[विभाति]** दर्पणमें मुखकी तरह भासता है, **[सः]** वह **[परमात्मा अनादिः]** परमात्मा अनादि है ॥ **भावार्थ—** जिसके केवलज्ञानमें एक नक्षत्रकी तरह समस्त लोक अलोक भासते हैं, वही परमात्मा रागादि समस्त विकल्पोंसे रहित योगीश्वरोंको उपादेय है ॥३८॥

आगे अनंतज्ञानमयी परमात्मा योगीश्वरोंकर निर्विकल्पसमाधि-कालमें ध्यान करने योग्य है, उसी परमात्माको कहते हैं—**[यः]** जो **[योगींद्रवृंदैः]** योगीश्वरोंकर **[मोक्षस्य कारणे]** मोक्षके निमित्त **[अनवरतं]** निरन्तर **[ज्ञानमयः]** ज्ञानमयी **[ध्यायते]** चिंतवन किया जाता है, **[सः परमात्मा देवः]** वह परमात्मदेव **[ध्येयः]** आराधने योग्य है, दूसरा कोई नहीं ॥ **भावार्थ—**जो परमात्मा

परमात्मा मुनिवृन्दानां ध्येयरूपो भणितः स एव शुद्धात्मसंवित्तिप्रतिपक्षभूतार्तरौद्रध्यानरहितानामुपादेय इति भावार्थः ॥३९॥

अथ योऽयं शुद्धबुद्धैकस्वभावो जीवो ज्ञानावरणादिकर्महेतुं लब्ध्वा त्रसस्थावररूपं जगज्जनयति स एव परमात्मा भवति नान्यः कोऽपि जगत्कर्ता ब्रह्मादिरिति प्रतिपादयति—

जो जिउ हेउ लहेवि विहि जगु बहु-विहउ जणेइ ।
लिंगत्तय-परिमंडियउ सो परमप्पु हवेइ ॥४०॥

यो जीवः हेतुं लब्ध्वा विधिं जगत् बहुविधं जनयति ।
लिङ्गत्रयपरिमण्डितः स परमात्मा भवति ॥४०॥

यो जीवः कर्ता हेतुं लब्ध्वा । किम् । विधिसंज्ञं ज्ञानावरणादिकर्म । पश्चाज्जङ्गमस्थावररूपं जगज्जनयति स एव लिङ्गत्रयमण्डितः सन् परमात्मा भण्यते न चान्यः कोऽपि जगत्कर्ता हरिहरादिरिति । तद्यथा । योऽसौ पूर्वं बहुधा शुद्धात्मा भणितः स एव शुद्धद्रव्यार्थिकनयेन शुद्धोऽपि सन् अनादिसंतानागतज्ञानावरणादिकर्मबन्धप्रच्छादितत्वाद्वीतरागनिर्विकल्पसहजानन्दैकसुखास्वादमलभमानो व्यवहारनयेन त्रसो भवति, स्थावरो भवति, स्त्रीपुंनपुंसकलिङ्गो भवति, तेन कारणेन जगत्कर्ता भण्यते नान्यः कोऽपि परकल्पितपरमात्मेति । अत्रायमेव शुद्धात्मा परमात्मोपलब्धिप्रतिपक्षभूतवेदत्रयोदयजनितं रागादिविकल्पजालं निर्विकल्पसमाधिना यदा विनाशयति

मुनियोंको ध्यावने योग्य कहा है, वही शुद्धात्मज्ञानके वैरी आर्त रौद्र ध्यानकर रहित धर्म ज्ञानी पुरुषोंको उपादेय है, अर्थात् जब आर्तध्यान रौद्रध्यान ये दोनों छूट जाते है, तभी उसका ध्यान हो सकता है ॥३९॥

आगे जो शुद्ध ज्ञानस्वभावजीव ज्ञानावरणादिकर्मोंके कारणसे त्रस स्थावर जन्मरूप जगत्को उत्पन्न करता है, वही परमात्मा है, दूसरे कोई भी ब्रह्मादिक जगत्कर्ता नहीं है, ऐसा कहते है—[यः] जो [जीवः] आत्मा [विधि हेतुं] ज्ञानावरणादि कर्मरूप कारणोंको [लब्ध्वा] पाकर [बहुविधं जगत्] अनेक प्रकारके जगत्को [जनयति] पैदा करता है, अर्थात् कर्मके निमित्तसे त्रस स्थावररूप अनेक जन्म धरता है [लिंगत्रयपरिमंडितः] स्त्रीलिंग, पुल्लिंग, नपुंसकलिंग इन तीन चिन्होंकर सहित हुआ [सः] वही [परमात्मा] शुद्धनिश्चयकर परमात्मा [भवति] है, अर्थात् अशुद्धपनेको परिणत हुआ जगतमे भटकता है, इसलिये जगतका कर्त्ता कहा है, और शुद्धपनेरूप परिणत हुआ विभाव (विकार) परिणामोको हरता है, इसलिये हर्त्ता है । यह जीव ही ज्ञान अज्ञान दशाकर कर्त्ता हर्त्ता है और दूसरे कोई भी हरिहरादिक कर्त्ता हर्त्ता नहीं है ॥ **भावार्थ**—पूर्व जो शुद्धात्मा कहा था, वह यद्यपि शुद्धनयकर शुद्ध है, तो भी अनादिसे संसारमे ज्ञानावरणादि कर्मबंधकर ढका हुआ वीतराग, निर्विकल्पसहजानन्द, अद्वितीयसुखके स्वादको न पानेसे व्यवहारनयकर त्रस और स्थावररूप स्त्री पुरुष नपुंसक लिंगादि सहित होता है, इसलिये जगत्कर्त्ता कहा जाता है अन्य कोई भी दूसरोंकर कल्पित परमात्मा नहीं है । यह आत्मा ही परमात्माकी प्राप्तिके शत्रु तीन वेदों (स्त्रीलिंगादि) कर उत्पन्न हुए रागादि विकल्प-जालोको निर्विकल्पसमाधिसे जिस समय नाश

तदोपादेयभूतमोक्षसुखसाधकत्वादुपादेय इति भावार्थः ॥४०॥

अथ यस्य परमात्मनः केवलज्ञानप्रकाशमध्ये जगद्वसति जगन्मध्ये सोऽपि वसति तथापि तद्रूपो न भवतीति कथयति—

जसु अब्भंतरि जगु वसइ जग-अब्भंतरि जो जि।
जगि जि वसंतु वि जगु जि ण वि मुणि परमप्पउ सो जि ॥४१॥

यस्य अभ्यन्तरे जगत् वसति जगदभ्यन्तरे य एव।
जगति एव वसन्नपि जगत् एव नापि मन्यस्व परमात्मानं तमेव ॥४१॥

यस्य केवलज्ञानस्याभ्यन्तरे जगत् त्रिभुवनं ज्ञेयभूतं वसति जगतोऽभ्यन्तरे योऽसौ ज्ञायको भगवानपि वसति जगति वसन्नेव रूपविषये चक्षुरिव निश्चयनयेन तन्मयो न भवति मन्यस्व जानीहि। हे प्रभाकरभट्ट, तमित्थंभूतं परमात्मानं वीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः। अत्र योऽसौ केवलज्ञानादिव्यक्तिरूपस्य कार्यसमयसारस्य वीतरागस्वसंवेदनकाले मुक्तिकारणं भवति स एवोपादेय इति भावार्थः ॥४१॥

अथ देहे वसन्तमपि हरिहरादयः परमसमाधेरभावादेव यं न जानन्ति स परमात्मा भवतीति कथयन्ति[1]—

देहि वसंत वि हरि-हर वि जं अज्ज वि ण मुणंति।
परम-समाहि-तवेण विणु सो परमप्पु भणंति ॥४२॥

करता है, उसी समय उपादेयरूप मोक्ष-सुखका कारण होनेसे उपादेय हो जाता है। ॥४०॥

आगे जिस परमात्माके केवलज्ञानरूप प्रकाशमें जगत् बस रहा है, और जगत्के मध्यमे वह ठहर रहा है, तो भी वह जगत्रूप नहीं है, ऐसा कहते हैं—[यस्य] जिस आत्मारामके [अभ्यन्तरे] केवल ज्ञानमे [जगत्] संसार [वसति] बस रहा है, अर्थात् प्रतिबिम्बित हो रहा है, प्रत्यक्ष भास रहा है, [जगदभ्यन्तरे] और जगत्मे वह बस रहा है, अर्थात् सबमे व्याप रहा है। वह ज्ञाता है और जगत् ज्ञेय है, [जगति एव वसन्नपि] संसारमे निवास करता हुआ भी [जगदेव नापि] निश्चयनयकर किसी जगत्को वस्तुसे तन्मय (उस स्वरूप) नहीं होता, अर्थात् जैसे रूपी पदार्थको नेत्र देखते हैं, तो भी उनसे जुदे ही रहते हैं, इस तरह वह भी सबसे जुदा रहता है, [तमेव] उसीको [परमात्मानं] परमात्मा [मन्यस्व] हे प्रभाकरभट्ट, तू जान ॥ भावार्थ—जो शुद्ध, बुद्ध सवव्यापक सबसे अलिप्त, शुद्धात्मा है, उसे वीतराग निर्विकल्प समाधिमे स्थिर होकर ध्यान कर। जो केवलज्ञानादि व्यक्तिरूप कार्यसमयसार है, उसका कारण वीतराग स्वसंवेदन ज्ञानरूप निजभाव ही उपादेय हैं॥४१॥

आगे वह शुद्धात्मा यद्यपि देहमें रहता है, तो भी परमसमाधिके अभावसे हरिहरादिक सरीखे भी जिसे प्रत्यय नहीं जान सकते, वह परमात्मा है, ऐसा कहते हैं—[देहे] परमात्मस्वभावसे भिन्न शरीरमे [वसन्तमपि] अनुपचरितअसद्भूतव्यवहारनयकर बसता है, तो भी [यं] जिसको

---

१. पाठान्तरः—कथयति = कथयन्ति।

देहे वसन्तमपि हरिहरा अपि यम् अद्यापि न जानन्ति ।
परमसमाधितपसा विना तं परमात्मानं भणन्ति ॥४२॥

परमात्मस्वभावविलक्षणे देहे अनुपचरितासद्भूतव्यवहारनयेन वसन्तमपि हरिहरा अपि यमद्यापि न जानन्ति । केन विना । वीतरागनिर्विकल्पनित्यानन्दैकसुखामृतरसास्वादरूपपरमसमाधितपसा । तं परमात्मानं भणन्ति वीतरागसर्वज्ञा इति । किं च । पूर्वभवे कोऽपि जीवो भेदाभेदरत्नत्रयाराधनां कृत्वा विशिष्टपुण्यबन्धं च कृत्वा पश्चादज्ञानभावेन निदानबन्धं करोति तदनन्तरं स्वर्गं गत्वा पुनर्मनुष्यो भूत्वा त्रिखण्डाधिपतिर्वासुदेवो भवति । अन्यः कोऽपि जिनदीक्षां गृहीत्वाप्यत्रैव भवे विशिष्टसमाधिबलेन पुण्यबन्धं कृत्वा पश्चात्पूर्वकृतचारित्रमोहोदयेन विषयासक्तो भूत्वा रुद्रो भवति । कथं ते परमात्मस्वरूपं न जानन्ति इति पूर्वपक्षः । तत्र परिहारं ददाति । युक्तमुक्तं भवता, यद्यपि रत्नत्रयाराधनां कृतवन्तस्तथापि यादृशेन वीतरागनिर्विकल्परत्नत्रयस्वरूपेण तद्भवे मोक्षो भवति तादृशं न जानन्तीति । अत्र यमेव शुद्धात्मानं साक्षादुपादेयभूतं तद्भवमोक्षसाधकाराधनासमर्थं च ते हरिहरादयो न जानन्तीति स एवोपादेयो भवतीति भावार्थः ॥४२॥

[**हरिहरा अपि**] हरिहर सरीखे चतुर पुरुष [**अद्य अपि**] अबतक भी [**न जानंति**] नहीं जानते हैं। किसके विना [**परमसमाधितपसा विना**] वीतरागनिर्विकल्प नित्यानंद अद्वितीय सुखरूप अमृतके रसके आस्वादरूप परमसमाधिभूत महातपके विना नहीं जानते, [**तं**] उसको [**परमात्मानं**] परमात्मा [**भणंति**] कहते हैं। यहाँ किसीका प्रश्न है, कि पूर्वभवमें कोई जीव जिनदीक्षा धारणकर व्यवहार निश्चयरूप रत्नत्रयकी आराधनाकर महान पुण्यको उपार्जन करके अज्ञानभावसे निदानबंध करनेके बाद स्वर्गमें उत्पन्न होता है, पीछे आकर मनुष्य होता है, वही तीन खंडका स्वामी वासुदेव (हरि) कहलाता है, और कोई जीव इसी भवमें जिनदीक्षा लेकर समाधिके बलसे पुण्यबंध करता है, उसके बाद पूर्वकृत चारित्रमोहके उदयसे विषयोंमें लीन हुआ रुद्र (हर) कहलाता है। इसलिये वे हरिहरादिक परमात्माका स्वरूप कैसे नहीं जानते ? इसका समाधान यह है, कि तुम्हारा कहना ठीक है। यद्यपि इन हरिहरादिक महान् पुरुषोंने रत्नत्रयकी आराधना की, तो भी जिस तरहके वीतराग-निर्विकल्प-रत्नत्रयस्वरूपसे तद्भव मोक्ष होता है, वैसा रत्नत्रय इनके नहीं प्रगट हुआ, सरागरत्नत्रय हुआ है, इसीका नाम व्यवहाररत्नत्रय है। सो यह तो हुआ, लेकिन शुद्धोपयोगरूप वीतरागरत्नत्रय नहीं हुआ, इसलिये वीतरागरत्नत्रयके धारक उसी भवसे मोक्ष जानेवाले योगी जैसा जानते हैं, वैसा ये हरिहरादिक नहीं जानते। इसीलिये परम शुद्धोपयोगियोंकी अपेक्षा इनको नहीं जाननेवाले कहा गया है, क्योंकि जैसे स्वरूपके जाननेसे साक्षात् मोक्ष होता है, वैसा स्वरूप ये नहीं जानते। यहाँपर सारांश यह है कि जिस साक्षात् उपादेय शुद्धात्माको तद्भव मोक्षके साधक महामुनि ही आराध सकते हैं, और हरिहरादिक नहीं जान सकते, वही चिंतवन करने योग्य है ॥४२॥

अथोत्पादव्ययपर्यायार्थिकनयेन संयुक्तोऽपि यः द्रव्यार्थिकनयेन उत्पादव्ययरहितः स एव परमात्मा निर्विकल्पसमाधिबलेन जिनवरैर्देहेऽपि दृष्ट इति निरूपयति—

भावाभावहिँ संजुवउ भावाभावहिँ जो जि।
देहि जि दिट्ठउ जिणवरहिँ मुणि परमप्पउ सो वि ॥४३॥

भावाभावाभ्यां संयुक्तः भावाभावाभ्यां य एव।
देहे एव दृष्टः जिनवरैः मन्यस्व परमात्मानं तमेव ॥४३॥

भावाभावाभ्यां संयुक्तः पर्यायार्थिकनयेनोत्पादव्ययाभ्यां परिणतः द्रव्यार्थिकनयेन भावाभावयोः रहितः य एव वीतरागनिर्विकल्पसदानन्दैकसमाधिना तद्भवमोक्षसाधकाराधनासमर्थेन जिनवरैर्देहेऽपि दृष्टः तमेव परमात्मानं मन्यस्व जानीहि वीतरागपरमसमाधिबलेनानुभवेत्यर्थः। अत्र य एव परमात्मा कृष्णनीलकापोतलेश्यास्वरूपादिसमस्तविभावरहितेन शुद्धात्मोपलब्धिध्यानेन जिनवरैर्देहेऽपि दृष्टः स एव साक्षादुपादेय इति तात्पर्यार्थः ॥४३॥

अथ येन देहे वसता पञ्चेन्द्रियग्रामो वसति गतेनोद्वसो भवति स एव परमात्मा भवतीति कथयति—

देहि वसंतेँ जेण पर इंदिय-गामु वसेइ।
उव्वसु होइ गएण फुडु सो परमप्पु हवेइ ॥४४॥

देहे वसता येन परं इन्द्रियग्रामः वसति।
उद्वसो भवति गतेन स्फुटं स परमात्मा भवति ॥४४॥

आगे यद्यपि पर्यायार्थिकनयकर उत्पाद व्ययकर सहित है, तो भी द्रव्यार्थिकनयकर उत्पादव्यय रहित है, सदा ध्रुव (अविनाशी) ही है, वही परमात्मा निर्विकल्प समाधिके बलसे तीर्थंकर देवोंने देहमें भी देख लिया है, ऐसा कहते हैं—[य एव] जो [भावाभावाभ्यां] व्यवहारनयकर यद्यपि उत्पाद और व्ययकर [संयुक्तः] सहित है, तो भी द्रव्यार्थिकनयसे [भावाभावाभ्यां] उत्पाद और विनाशसे ("रहितः") रहित है, तथा [जिनवरैः] वीतरागनिर्विकल्प आनंदरूपसमाधिकर तद्भव मोक्षके साधक जिनवरदेवने [देहे अपि] देहमें भी [दृष्टः] देख लिया है, [तमेव] उसीको तू [परमात्मानं] परमात्मा [मन्यस्व] जान, अर्थात् वीतराग परमसमाधिके बलसे अनुभव कर॥ **भावार्थ**—जो परमात्मा कृष्ण, नील, कापोत, लेश्यारूप विभाव परिणामोंसे रहित शुद्धात्मकी प्राप्तिरूप ध्यानकर जिनवरदेवने देहमें देखा है, वही साक्षात् उपादेय है ॥४३॥

आगे देहमें जिसके रहनेसे पाँच इंद्रियरूप गाँव बसता है, और जिसके निकलनेसे पंचेन्द्रियरूप ग्राम ऊजड़ हो जाता है, वह परमात्मा है, ऐसा कहते हैं—[येन परं देहे वसता] जिसके केवल

देहे वसता येन परं नियमेनेन्द्रियग्रामो वसति येनात्मना निश्चयेनातीन्द्रियस्वरूपेणापि व्यवहारनयेन शुद्धात्मविपरीते देहे वसता स्पर्शनादीन्द्रियग्रामो वसति, स्वसंवित्त्यभावे स्वकीयविषये प्रवर्तत इत्यर्थः । उद्वसो भवति गतेन स एवेन्द्रियग्रामो यस्मिन् भवान्तरगते सत्युद्वसो भवति स्वकोयविषयव्यापाररहितो भवति स्फुटं निश्चितं स एवं लक्षणश्चिदानन्दैकस्वभावः परमात्मा भवतीति । अत्र य एवातीन्द्रियसुखास्वादसमाधिरतानां मुक्तिकारणं भवति स एव सर्वप्रकारोपादेयातीन्द्रियसुखसाधकत्वादुपादेय इति भावार्थः ॥४४॥

अथ यः पञ्चेन्द्रियैः पञ्चविषयान् जानाति स च तैर्न ज्ञायते स परमात्मा भवतीति निरूपयति—

जो णिय-करणहिँ पंचहिँ वि पंच वि विसय मुणेइ ।
मुणिउ ण पंचहिँ पंचहिँ वि सो परमप्पु हवेइ ॥४५॥

यः निजकरणैः पञ्चभिरपि पञ्चापि विषयान् जानाति ।
ज्ञातः न पञ्चभिः पञ्चभिरपि स परमात्मा भवति ॥४५॥

जो निजकरणैः पञ्चभिरपि पञ्चापि विषयान् मनुते जानाति । तद्यथा । यः कर्ता शुद्धनिश्चयनयेनातीन्द्रियज्ञानमयोऽपि अनादिबन्धवशात् असद्भूतव्यवहारेणेन्द्रियमयशरीरं गृहीत्वा स्वयमर्थान् ग्रहीतुमसमर्थत्वात्पञ्चेन्द्रियैः कृत्वा पञ्चविषयान् जानाति, इन्द्रियज्ञानेन परिणमतीत्यर्थः । पुनश्च कथंभूतः । मुणिउ ण पंचहि पचहिं वि सो परमप्पु हवेइ मतो न ज्ञातो न पञ्चभिरिन्द्रियैः पञ्चभिरपि स्पर्शादिविषयैः तथाहि—

देहमें रहनेसे [**इन्द्रियग्रामः**] इन्द्रिय गाँव [**वसति**] रहता है, [**गतेन**] और जिसके परभवमें चले जानेपर [**उद्वसः स्फुटं भवति**] ऊजड़ निश्चयसे हो जाता है [**स परमात्मा**] वह परमात्मा [**भवति**] है ॥**भावार्थ**—शुद्धात्मासे जुदी ऐसी देहमें बसते आत्म ज्ञानके अभावसे ये इन्द्रियाँ अपने अपने विषयोंमे (रूपादिमे) प्रवर्तती है, और जिसके चले जानेपर अपने अपने विषय-व्यापारसे रुक जाती हैं, ऐसा चिदानन्द निज आत्मा वही परमात्मा है। अतीन्द्रियसुखके आस्वादी परमसमाधिमे लीन हुए मुनियोंको ऐसे परमात्माका ध्यान ही मुक्तिका कारण है, वही अतीन्द्रियसुखका साधक होनेसे सब तरह उपादेय है ॥४४॥

आगे जो पाँच इन्द्रियोंसे पाँच विषयोंको जानता है, और आप इन्द्रियोके गोचर नही होता है, वही परमात्मा है, यह कहते हैं—[**यः**] जो आत्माराम शुद्धनिश्चयनयकर अतीन्द्रिय ज्ञानमय है, तो भी अनादि बंधके कारण व्यवहारनयसे इन्द्रियमय शरीरको ग्रहणकर [**निजकरणैः पंचभिरपि**] अपनी पाँचों इन्द्रियो द्वारा [**पंचापि विषयान्**] रूपादि पाँचो ही विषयोंको जानता है, अर्थात् इंद्रियज्ञानरूप परिणमन करके इन्द्रियोंसे रूप, रस, गंध, शब्द, स्पर्शको जानता है, और आप [**पंचभिः**] पाँच इन्द्रियोंकर तथा [**पंचभिरपि**] पाँचों विषयोंसे सो [**मतो न**] नही जाना जाता, अगोचर है, [**स परमात्मा**] ऐसे लक्षण जिसके है, वही परमात्मा [**भवति**] है ॥ **भावार्थ**—पाँच

वीतरागनिर्विकल्पस्वसंवेदनज्ञानविषयोऽपि पञ्चेन्द्रियैश्च न ज्ञात इत्यर्थः। स एवं-लक्षणः परमात्मा भवतीति। अत्र य एव पञ्चेन्द्रियविषयसुखास्वादविपरीतेन वीत-रागनिर्विकल्पपरमानन्दसमरसीभावसुखरसास्वादपरिणतेन समाधिना ज्ञायते, स एवात्मोपादानसिद्धमित्यादिविशेषणविशिष्टस्योपादेयभूतस्यातीन्द्रियसुखस्य साधक-त्वादुपादेय इति भावार्थः ॥४५॥

अथ यस्य परमार्थेन बन्धसंसारौ न भवतस्तमात्मानं व्यवहारं मुक्त्वा जानीहि इति कथयति—

जसु परमत्थे बंधु णवि जोइय ण वि संसारु।
सो परमप्पउ जाणि तुहुँ मणि मिल्लि वि ववहारु ॥४६॥

यस्य परमार्थेन बन्धो नैव योगिन् नापि संसारः।
तं परमात्मानं जानीहि त्वं मनसि मुक्त्वा व्यवहारम् ॥४६॥

जसु परमत्थें बंधु णवि जोइय ण वि संसारु **यस्य परमार्थेन बन्धो नैव हे योगिन् नापि संसारः। तद्यथा—यस्य चिदानन्दैकस्वभावशुद्धात्मनस्तद्विलक्षणो द्रव्यक्षेत्रकालभवभावरूपः परमागमप्रसिद्धः पञ्चप्रकारः संसारो नास्ति, इत्थंभूत-संसारस्य कारणभूतप्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नकेवलज्ञानाद्यनन्तचतुष्टयव्यक्ति-रूपमोक्षपदार्थाद्विलक्षणो बन्धोऽपि नास्ति,** सो परमप्पउ जाणि तुहुं मणि मिल्लहि ववहारु **तमेवेत्थंभूतलक्षणं परमात्मानं मनसि व्यवहारं मुक्त्वा जानीहि, वीतराग-निर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः। अत्र य एव शुद्धात्मानुभूतिविलक्षणेन**

इंद्रियोंके विषय—सुख के आस्वादसे विपरीत, वीतराग निर्विकल्प परमानंद समरसीभावरूप, सुखके रसका आस्वादरूप, परमसमाधि करके जो जाना जाता है, वही परमात्मा है, वह ज्ञानगम्य है, इन्द्रियोंसे अगम्य है, और उपादेयरूप अतीन्द्रिय सुखका साधन अपना स्वभावरूप वही परमात्मा आराधने योग्य है ॥४५॥

आगे जिसके निश्चयकर बंध नहीं हैं, और संसार भी नहीं है, उस आत्माको सब लौकिक-व्यवहार छोड़कर अच्छी तरह पहचानो, ऐसा कहते हैं—[**हे योगिन्**] हे योगी, [**यस्य**] जिस चिदानन्द शुद्धात्माके [**परमार्थेन**] निश्चय करके [**संसारः**] निज स्वभावसे भिन्न द्रव्य, क्षेत्र, काल, भव, भावरूप पाँच प्रकार परिवर्तन (भ्रमण) स्वरूप संसार [**नैव**] नहीं है, [**बन्धो नापि**] और संसारके कारण जो प्रकृति, स्थिति, अनुभाग, प्रदेशरूप चार प्रकारका बंध भी नहीं है। जो बंध केवलज्ञानादि अनंतचतुष्टयको प्रगटतारूप मोक्ष-पदार्थसे जुदा है, [**तं परमात्मानं**] उस परमात्माको [**त्वं**] तू [**मनसि व्यवहारं मुक्त्वा**] मनमेंसे सब लौकिक-व्यवहारको छोड़कर तथा वीतरागसमाधिमें ठहरकर [**जानीहि**] जान, अर्थात् चिन्तवन कर॥ **भावार्थ**—शुद्धात्माकी अनुभूतिसे भिन्न जो संसार और संसारका कारण बंध इन दोनोंसे रहित और आकुलतासे रहित

संसारेण बन्धनेन च रहितः स एवानाकुलत्वलक्षणसर्वप्रकारोपादेयभूतमोक्षसुखसाधकत्वादुपादेय इति तात्पर्यार्थः ।।४६।।

अथ यस्य परमात्मनो ज्ञानं वल्लीवत् ज्ञेयास्तित्वाभावेन निवर्तते न च शक्त्यभावेनेति कथयति--

णेयाभावे विल्लि जिम थक्कइ णाणु वलेवि ।
मुक्कहँ जसु पय बिंबियउ परम-सहाउ भणेवि ।।४७।।

ज्ञेयाभावे वल्ली यथा तिष्ठति ज्ञानं वलित्वा ।
मुक्तानां यस्य पदे बिम्बितं परमस्वभावं भणित्वा ।।४७।।

णेयाभावे विल्लि जिम थक्कइ णाणु वलेवि ज्ञेयाभावे वल्ली यथा तथा ज्ञानं तिष्ठति व्यावृत्येति । यथा मण्डपाद्यभावे वल्ली व्यावृत्य तिष्ठति तथा ज्ञेयावलम्बनाभावे ज्ञानं व्यावृत्य तिष्ठति न च ज्ञातृत्वशक्त्यभावेनेत्यर्थः । कस्य संबन्धि ज्ञानम् । मुक्कहं मुक्तात्मनां ज्ञानम् । कथंभूतम् । जसु पय बिंबियउ यस्य भगवतः पदे परमात्मस्वरूपे बिम्बितं प्रतिफलितं तदाकारेण परिणतम् । कस्मात् । परमसहाउ भणेवि परमस्वभाव इति भणित्वा मत्वा ज्ञात्वैवेत्यर्थः । अत्र यस्येत्थंभूतं ज्ञानं सिद्धसुखस्योपादेयस्याविनाभूतं स एव शुद्धात्मोपादेय इति भावार्थः ।।४७।।

ऐसे लक्षणवाला मोक्षका मूलकारण जो शुद्धात्मा है, वही सर्वथा आराधने योग्य है ।।४६।।

आगे जिस परमात्माका ज्ञान सर्वव्यापक है, ऐसा कोई पदार्थ नहीं है, जो ज्ञानसे न जाना जावे, सब ही पदार्थ ज्ञानमें भासते है, ऐसा कहते हैं—[**यथा**] जैसे मंडपके अभावसे [**वल्ली**] बेल (लता) [**तिष्ठति**] ठहरती है, अर्थात् जहाँतक मंडप है, वहाँतक तो चढ़ती है और आगे मंडपका सहारा न मिलनेसे चढनेसे ठहर जाती है, उसी तरह [**मुक्तानां**] मुक्त-जीवोंका [**ज्ञानं**] ज्ञान भी जहाँतक ज्ञेय (पदार्थ) हैं, वहाँतक फैल जाता है, [**ज्ञेयाभावे**] और ज्ञेयका अवलम्बन न मिलनेसे [**वलेपि** ?] जाननेकी शक्ति होनेपर भी [**तिष्ठति**] ठहर जाता है, अर्थात् कोई पदार्थ जाननेसे बाकी नहीं रहता, सब द्रव्य, क्षेत्र, काल और सब भावोंको ज्ञान जानता है, ऐसे तीन लोक सरीखे अनंते लोकालोक होवें, तो भी एक समयमें ही जान लेवे, [**यस्य**] जिस भगवान् परमात्माके [**पदे**] केवलज्ञानमें [**परमस्वभावं**] अपना उत्कृष्ट स्वभाव सबके जाननेरूप [**बिंबितं**] प्रतिभासित हो रहा है, अर्थात् ज्ञान सबका अंतर्यामि है, सर्वाकार ज्ञानकी परिणति है, ऐसा [**भणित्वा**] जानकर ज्ञानका आराधन करो ।। **भावार्थ**—जहाँतक मंडप वहाँतक ही बेल (लता) की बढ़वारी है, और जब मंडपका अभाव हो, तब बेल स्थिर होके आगे नहीं फैलती, लेकिन बेलमें विस्तार-शक्तिका अभाव नही कह सकते, इसी तरह सर्वव्यापक ज्ञान केवलीका है, जिसके ज्ञानमें सब पदार्थ झलकते हैं, वही ज्ञान आत्माका परम स्वभाव है, ऐसा जिसका ज्ञान है, वही शुद्धात्मा उपादेय है । यह ज्ञानानंदरूप आत्माराम है, वही महामुनियोंके चित्तका विश्राम (ठहरनेकी जगह) है ।।४७।।

अथ यस्य कर्माणि यद्यपि सुखदुःखादिकं जनयन्ति तथापि स न जनितो न हृत इत्यभिप्रायं मनसि धृत्वा सूत्रं कथयति—

कम्महिँ जासु जणंतहिँ वि णिउ णिउ कज्जु सया वि ।
किं पि ण जणियउ हरिउ णवि सो परमप्पउ भावि ॥४८॥

कर्मभिः यस्य जनयद्भिरपि निजनिजकार्यं सदापि ।
किमपि न जनितो हृतः नैव तं परमात्मानं भावय ॥४८॥

कर्मभिर्यस्य जनयद्भिरपि । किम् । निजनिजकार्यं सदापि तथापि किमपि न जनितो हृतश्च नैव तं परमात्मानं भावयत । यद्यपि व्यवहारनयेन शुद्धात्मस्वरूप-प्रतिबन्धकानि कर्माणि सुखदुःखादिकं निजनिजकार्यं जनयन्ति तथापि शुद्धनिश्चयनयेन अनन्तज्ञानादिस्वरूपं न हृतं न विनाशितं न चाभिनवं जनितमुत्पादितं किमपि यस्यात्मनस्तं परमात्मानं वीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः । अत्र यदेव कर्मभिर्न हृतं न चोत्पादितं चिदानन्दैकस्वरूपं तदेवोपादेयमिति तात्पर्यार्थः ॥४८॥

अथ यः कर्मनिबद्धोऽपि कर्मरूपो न भवति कर्मापि तद्रूपं न संभवति तं परमात्मानं भावयेति कथयति—

आगे जो शुभ अशुभ कर्म हैं, वे यद्यपि सुख-दुःखादिको उपजाते हैं, तो भी वह आत्मा किसीसे उत्पन्न नहीं हुआ, किसीने बनाया नहीं, ऐसा अभिप्राय मनमें रखकर गाथा-सूत्र कहते है—

[**कर्मभिः**] ज्ञानावरणादि कर्म [**सदापि**] हमेशा [**निजनिजकार्यं**] अपने अपने सुख-दुःखादि कार्यको [**जनयद्भिरपि**] प्रगट करते है, तो भी शुद्धनिश्चयनयकर [**यस्य**] जिस आत्माका [**किमपि**] कुछ भी अर्थात् अनन्तज्ञानादिस्वरूप [**न जनितः**] न तो नया पैदा किया और [**नैव हृतः**] न विनाश किया, और न दूसरी तरहका किया, [**तं**] उस [**परमात्मानं**] परमात्माको [**भावय**] तू चिन्तवन कर ॥ **भावार्थ**—यद्यपि व्यवहारनयसे शुद्धात्मस्वरूपके रोकनेवाले ज्ञानावरणादिकर्म अपने अपने कार्यको करते हैं, अर्थात् ज्ञानावरण तो ज्ञानको ढँकता है, दर्शनावरणकर्म दर्शनको आच्छादन करता है, वेदनीय साता असाता उत्पन्न करके अतीन्द्रियसुखको घातता है, मोहनीय सम्यक्त्व तथा चारित्रको रोकता है, आयुकर्म स्थितिके प्रमाण शरीरमे राखता है, अविनाशी भावको प्रगट नही होने देता, नामकर्म नाना प्रकार गति जाति शरीरादिकको उपजाता है, गोत्रकर्म ऊँच नीच गोत्रमें डाल देता है, और अन्तरायकर्म अनन्तवीर्य (बल) को प्रगट नहीं होने देता। इस प्रकार ये कार्यको करते हैं, तो भी शुद्धनिश्चयनयकर आत्माका अनन्तज्ञानादिस्वरूपका इन कर्मोंने तो नाश किया, और न नया उत्पन्न किया, आत्मा तो जैसा है वैसा ही है। ऐसे अखंड परमात्माका तू वीतराग-निर्विकल्पसमाधिमें स्थिर होकर ध्यान कर। यहाँपर यह तात्पर्य है, कि जो जीवपदार्थ कर्मोंसे न हरा गया, न उपजा, किसी दूसरी तरह नहीं किया गया, वही चिदानन्दस्वरूप उपादेय है ॥४८॥

इसके बाद जो आत्मा कर्मोंसे अनादिकालका बँधा हुआ है, तो भी कर्मरूप नहीं होता, और कर्म भी आत्मस्वरूप नहीं होते आत्मा चेतन्य है, कर्म जड़ हैं, ऐसा जानकर उस परमात्माका तू ध्यान कर, ऐसा कहते हैं—[**यः**] जो चिदानन्द आत्मा [**कर्मनिबद्धोऽपि**] ज्ञानावरणादिकर्मोंसे बँधा हुआ होनेपर भी [**कदाचिदपि**] कभी भी [**कर्म नैव स्फुटं**] कर्मरूप निश्चयसे नहीं [**भवति**]

**कम्म-णिबद्धु वि होइ णवि जो फुडु कम्मु कया वि ।
कम्मु वि जो ण कया वि फुडु सो परमप्पउ भावि ।।४९।।**

कर्मनिबद्धोऽपि भवति नैव यः स्फुटं कर्म कदापि ।
कर्मापि यो न कदापि स्फुटं तं परमात्मानं भावय ।।४९।।

कम्मणिबद्धु वि होइ णवि जो फुडु कम्मु कया वि **कर्मनिबद्धोऽपि भवति नैव यः स्फुटं निश्चितम् ।** किं न भवति । **कर्म कदाचिदपि** । तथाहि—यः कर्ता शुद्धात्मोपलम्भाभावेनोपार्जितेन ज्ञानावरणादिशुभाशुभकर्मणा व्यवहारेण बद्धोऽपि शुद्धनिश्चयेन कर्मरूपो न भवति । केवलज्ञानाद्यनन्तगुणस्वरूपं त्यक्त्वा कर्मरूपेण न परिणमतीत्यर्थः । पुनश्च किंविशिष्टः । कम्मु वि जो ण कया वि फुडु **कर्मापि यो न कदापि स्फुटं निश्चितम्** । तद्यथा—ज्ञानावरणादिद्रव्यभावरूपं कर्मापि कर्तृभूतं यः परमात्मा न भवति, स्वकीयकर्मपुद्गलस्वरूपं विहाय परमात्मरूपेण न परिणमतीत्यर्थः । सो परमप्पउ भावि **तमेवंलक्षणं परमात्मानं भावय** । देहरागादिपरिणतिरूपं बहिरात्मानं मुक्त्वा शुद्धात्मपरिणतिभावनारूपेऽन्तरात्मनि स्थित्वा सर्वप्रकारोपादेयभूतं विशुद्धज्ञानदर्शनस्वभावं परमात्मानं भावयेति भावार्थः ।।४९।। एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये यथा निर्मलो ज्ञानमयो व्यक्तिरूपः शुद्धात्मा सिद्धौ तिष्ठति, तथाभूतः शुद्धनिश्चयेन शक्तिरूपेण देहेऽपि तिष्ठतीति व्याख्यानमुख्यत्वेन चतुर्विंशतिसूत्राणि गतानि ।।

अत ऊर्ध्वं स्वदेहप्रमाणव्याख्यानमुख्यत्वेन षट्सूत्राणि कथयन्ति । तद्यथा—

होता, [**कर्म अपि**] और कर्म भी [**यः**] जिस परमात्मरूप [**कदाचिदपि स्फुटं**] कभी भी निश्चयकर [**न**] नहीं होते, [**तं**] उस पूर्वोक्त लक्षणोंवाले [**परमात्मानं**] परमात्माको तू [**भावय**] चिन्तवन कर ।। **भावार्थ**—जो आत्मा अपने शुद्धात्मस्वरूपकी प्राप्तिके अभावसे उत्पन्न किये ज्ञानावरणादि शुभ अशुभ कर्मोंसे व्यवहारनयकर बंधा हुआ है, तो भी शुद्धनिश्चयनयसे कर्मरूप नहीं है, अर्थात् केवलज्ञानादि अनन्तगुणरूप अपने स्वरूपको छोड़कर कर्मरूप नहीं परिणमता, और ये ज्ञानावरणादि द्रव्य—भावरूप कर्म भी आत्मस्वरूप नहीं परिणमते, अर्थात् अपने जड़रूप पुद्गलपनेको छोड़कर चैतन्यरूप नहीं होते, यह निश्चय है, कि जीव तो अजीव नहीं होता, और अजीव है, वह जीव नहीं होता । ऐसी अनादिकालकी मर्यादा है । इसलिये कर्मोंसे भिन्न ज्ञान-दर्शनमयी सब तरह उपादेयरूप (आराधने योग्य) परमात्माको तुम देह रागादि परिणतिरूप बहिरात्मपनेको छोड़कर शुद्धात्मपरिणतिकी भावनारूप अन्तरात्मामें स्थिर होकर चिन्तवन करो, उसीका अनुभव करो, ऐसा तात्पर्य हुआ ।।४९।।

ऐसे तीन प्रकार आत्माके कहनेवाले पहले महाधिकारके पाँचवें स्थलमें जैसा निर्मल ज्ञानमया प्रगटरूप शुद्धात्मा सिद्धलोकमें विराजमान है, वैसा ही शुद्धनिश्चयनयकर शक्तिरूपसे देहमें तिष्ठ रहा है, ऐसे कथनकी मुख्यतासे चौबीस दोहा-सूत्र कहे गये । इससे आगे छह दोहा-सूत्रोंमें

कि वि भणंति जिउ सव्वगउ जिउ जडु के वि भणंति ।
कि वि भणंति जिउ देह-समु सुण्णु वि के वि भणंति ॥५०॥

केऽपि भणन्ति जीवं सर्वगतं जीवं जडं केऽपि भणन्ति ।
केऽपि भणन्ति जीवं देहसमं शून्यमपि केऽपि भणन्ति ॥५०॥

केऽपि भणन्ति जीवं सर्वगतं, जीवं केऽपि जडं भणन्ति, केऽपि भणन्ति जीवं देह-समं, शून्यमपि केऽपि वदन्ति । तथाहि—केचन सांख्यनैयायिकमीमांसकाः **सर्वगतं जीवं वदन्ति ।** सांख्याः पुनर्जडमपि **कथयन्ति । जैनाः** पुनर्देहप्रमाणं वदन्ति । **बौद्धाश्च शून्यं वदन्तीति । एवं प्रश्नचतुष्टयं कृतमिति** भावार्थः ॥५०॥

अथ वक्ष्यमाणनयविभागेन प्रश्नचतुष्टयस्याप्यभ्युपगमं स्वीकारं करोति—

अप्पा जोइय सव्व-गउ अप्पा जडु वि वियाणि ।
अप्पा देह-पमाणु मुणि अप्पा सुण्णु वियाणि ॥५१॥

आत्मा योगिन् सर्वगतः आत्मा जडोऽपि विजानीहि ।
आत्मानं देहप्रमाणं मन्यस्व आत्मानं शून्यं विजानीहि ॥५१॥

आत्मा हे योगिन् सर्वगतोऽपि भवति, आत्मानं जडमपि विजानीहि, आत्मानं वेहप्रमाणं **मन्यस्व, आत्मानं** शून्यमपि जानीहि । **तद्यथा ।** हे प्रभाकरभट्ट **वक्ष्यमाण-विवक्षितनयविभागेन परमात्मा सर्वगतो भवति, जडोऽपि भवति, देहप्रमाणोऽपि भवति, शून्योऽपि भवति नापि दोष इति भावार्थः ॥५१॥**

आत्मा व्यवहारनयकर अपनी देहके प्रमाण है, यह कह सकते हैं—[**केऽपि**] कोई नैयायिक, वेदान्ती और मीमांसक-दर्शनवाले [**जीवं**] जीवको [**सर्वगतं**] सर्वव्यापक [**भणंति**] कहते हैं, [**केऽपि**] कोई सांख्य-दर्शनवाले [**जीवं**] जीवको [**जडं**] जड़ [**भणंति**] कहते हैं, [**केऽपि**] कोई बौद्ध-दर्शनवाले जीव-को [**शून्यं अपि**] शून्य भी [**भणंति**] कहते हैं, [**केऽपि**] कोई जिनधर्मी [**जीवं**] जीवको [**देहसमं**] व्यवहारनयकर देहप्रमाण [**भणंति**] कहते हैं, और निश्चयनयकर लोकप्रमाण कहते हैं। वह आत्मा कैसा है ? और कैसा नहीं है ? ऐसे चार प्रश्न शिष्यने किये, ऐसा तात्पर्य है ॥५०॥

आगे नय-विभागकर आत्मा सबरूप है, एकान्तवादकर अन्यवादी मानते हैं, सो ठीक नहीं है इस प्रकार चारों प्रश्नोंको स्वीकार करके समाधान करते हैं—[**हे योगिन्**] हे प्रभाकरभट्ट, [**आत्मा सर्वगतः**] आगे कहे जानेवाले नयके भेदसे आत्मा सर्वगत भी है, [**आत्मा**] आत्मा [**जडोऽपि**] जड भी है ऐसा [**विजानीहि**] जानो, [**आत्मानं देहप्रमाणं**] आत्माको देहके बराबर भी [**मन्यस्व**] मानो, [**आत्मानं शून्यं**] आत्माको शून्य भी [**विजानीहि**] जानो। नय-विभागसे माननेमें कोई दोष नहीं है, ऐसा तात्पर्य है ॥५१॥

अथ कर्मरहितात्मा केवलज्ञानेन लोकालोकं जानाति तेन कारणेन सर्वगतो भवतीति प्रतिपादयति--

अप्पा कम्म-विवज्जियउ केवल-णाणें जेण ।
लोयालोउ वि मुणइ जिय सव्वगु वुच्चइ तेण ॥५२॥

आत्मा कर्मविवर्जितः केवलज्ञानेन येन ।
लोकालोकमपि मनुते जीव सर्वगः उच्यते तेन ॥५२॥

आत्मा कर्मविवर्जितः सन् केवलज्ञानेन करणभूतेन येन कारणेन लोकालोकं मनुते जानाति हे जीव सर्वगत उच्यते तेन कारणेन । तथाहि---अयमात्मा व्यवहारेण केवलज्ञानेन लोकालोकं जानाति, देहमध्ये स्थितोऽपि निश्चयनयेन स्वात्मानं जानाति, तेन कारणेन व्यवहारनयेन ज्ञानापेक्षया रूपविषये दृष्टिवत्सर्वगतो भवति न च प्रदेशापेक्षयेति । कश्चिदाह । यदि व्यवहारेण लोकालोकं जानाति तर्हि व्यवहारनयेन सर्वज्ञत्वं, न च निश्चयनयेनेति । परिहारमाह--यथा स्वकीयमात्मानं तन्मयत्वेन जानाति तथा परद्रव्यं तन्मयत्वेन न जानाति तेन कारणेन व्यवहारो भण्यते न च परिज्ञानाभावात् । यदि पुनर्निश्चयेन स्वद्रव्यवत्तन्मयो भूत्वा परद्रव्यं जानाति तर्हि परकीयसुखदुःखरागद्वेषपरिज्ञाने सुखी दुःखी रागी द्वेषी च स्यादिति महद्दूषणं प्राप्नोतीति । अत्र येनैव ज्ञानेन व्यापको भण्यते तदेवोपादेयस्यानन्तसुखस्याभिन्नत्वादु पादेयमित्यभिप्रायः ॥५२॥

आगे कर्मरहित आत्मा केवलज्ञानसे लोक और अलोक दोनोंको जानता है, इसलिये सर्वव्यापक भी हो सकता है, ऐसा कहते है---[आत्मा] यह आत्मा [कर्मविवर्जित.] कर्म रहित हुआ [केवलज्ञानेन] केवलज्ञानसे [येन] जिस कारण [लोकालोकमपि] लोक और अलोकको [मनुते] जानता है, [तेन] इसीलिये [हे जीव] हे जीव, [सर्वग] सर्वगत [उच्यते] कहा जाता है ॥ **भावार्थ**---यह आत्मा व्यवहारनयसे केवलज्ञानकर लोक अलोकको जानता है, और शरीरमे रहनेपर भी निश्चयनयसे अपने स्वरूपको जानता है, इस कारण ज्ञानकी अपेक्षा तो व्यवहारनयसे सर्वगत है, प्रदेशोंको अपेक्षा नहीं है । जैसे रूपवाले पदार्थोंको नेत्र देखते हैं, परंतु उन पदार्थोंसे तन्मय नही होते, उसरूप नहीं होते हैं, यहां कोई प्रश्न करता है, कि जो व्यवहारनयसे लोकालोकको जानता है, और निश्चयनयसे नहीं, तो व्यवहारसे सर्वज्ञपना हुआ, निश्चयनयकर न हुआ ? उसका समाधान करते हैं---जैसे अपनी आत्माको तन्मयी होकर जानता है, उस तरह परद्रव्यको तन्मयोपनेसे नहीं जानता, भिन्नस्वरूप जानता है, इस कारण व्यवहारनयसे कहा, कुछ ज्ञानके अभावसे नहीं कहा । ज्ञानकर जानपना तो निज और परका समान है । जैसे अपनेको सन्देह रहित जानता है, वैसा ही परको भी जानता है, इसमें सन्देह नहीं समझना, लेकिन निज स्वरूपसे तो तन्मयी है, और परसे तन्मयो नही । और जिस तरह निजको तन्मयी होकर निश्चयसे जानता है, उसी तरह यदि परको भी तन्मय होकर जाने, तो परके सुख, दुःख, राग, द्वेषके ज्ञान होनेपर सुखी, दुःखी, रागी, द्वेषी होवे,

अथ येन कारणेन निजबोधं लब्ध्वात्मन इन्द्रियज्ञानं नास्ति तेन कारणेन जडो भवतीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं कथयति—

जे णिय-बोह-परिट्ठियहँ जीवहँ तुट्टइ णाणु।
इंदिय-जणियउ जोइया तिं जिउ जडु वि वियाणु ॥५३॥

येन निजबोधप्रतिष्ठितानां जीवानां त्रुटयति ज्ञानम्।
इन्द्रियजनितं योगिन् तेन जीवं जडमपि विजानीहि ॥५३॥

येन कारणेन निजबोधप्रतिष्ठितानां जीवानां त्रुटयति विनश्यति[1]। किं कर्तृ। ज्ञानम्। कथंभूतम्। इन्द्रियजनितं हे योगिन् तेन कारणेन जीवं जडमपि विजानीहि। तद्यथा। छद्मस्थानां वीतरागनिर्विकल्पसमाधिकाले स्वसंवेदनज्ञाने सत्यपीन्द्रियजनितं ज्ञानं नास्ति, केवलज्ञानिनां पुनः सर्वदैव नास्ति तेन कारणेन जडत्वमिति। अत्र इन्द्रियज्ञानं हेयमतीन्द्रियज्ञानमुपादेयमिति भावार्थः ॥५३॥

अथ शरीरनामकर्मकारणरहितो जीवो न वर्धते न च हीयते तेन कारणेन मुक्तश्चरमशरीरप्रमाणो भवतीति निरूपयति—

कारण-विरहिउ सुद्ध-जिउ वड्ढइ खिरइ ण जेण।
चरम-सरीर-पमाणु जिउ जिणवर बोल्लहिँ तेण ॥५४॥

यह बडा दूषण है। सो इस प्रकार कभी नहीं हो सकता। यहाँ जिस ज्ञानसे सर्वव्यापक कहा, वही ज्ञान उपादेय अतीन्द्रियसुखसे अभिन्न है, सुखरूप है, ज्ञान और आनन्दमें भेद नहीं है, वही ज्ञान उपादेय है, यह अभिप्राय जानना। इस दोहामें जीवको ज्ञानकी अपेक्षा सर्वगत कहा है ॥५२॥

आगे आत्म-ज्ञानको पाकर इन्द्रिय-ज्ञान नाशको प्राप्त होता है, परमसमाधिमे आत्मस्वरूपमें लीन है. परवस्तुकी गम्य नही है, इसलिये नयप्रमाणकर जड़ भी है, परन्तु ज्ञानाभावरूप जड़ नही है, चैतन्यरूप हो है, अपेक्षासे जड़ कहा जाता है, यह अभिप्राय मनमें रखकर गाथा-सूत्र कहते हैं— [**येन**] जिस अपेक्षा [**निजबोधप्रतिष्ठितानां**] आत्म-ज्ञानमे ठहरे हुए [**जीवानां**] जीवोंके [**इन्द्रियजनितं ज्ञानं**] इन्द्रियोसे उत्पन्न हुआ ज्ञान [**त्रुटयति**] नाशको प्राप्त हाता है, [**हे योगिन्**] हे योगी, [**तेन**] उसी कारणसे [**जीवं**] जीवको [**जडमपि**] जड़ भी [**विजानीहि**] जानो ॥ **भावार्थ**—महामुनियोंके वीतरागनिर्विकल्प-समाधिके समयमें स्वसंवेदनज्ञान होनेपर भी इन्द्रियजनित ज्ञान नहीं है, और केवलज्ञानियोंके तो किसी समय भी इन्द्रियज्ञान नही है, केवल अतीन्द्रियज्ञान ही है, इसलिये इंद्रिय-ज्ञानके अभावकी अपेक्षा आत्मा जड़ भी कहा जा सकता है। यहाँपर बाह्य इन्द्रिय-ज्ञान सब तरह हेय है, और अतीन्द्रियज्ञान उपादेय है, यह सारांश हुआ ॥५३॥

आगे शरीरनामा नामकर्मरूप कारणसे रहित यह जीव न घटता है, और न बढ़ता है, इस कारण मुक्त-अवस्थामे चरम-शरीरसे कुछ कम पुरुषाकार रहता है, इसलिये शरीरप्रमाण भी कहा

---

१. पाठान्तरः—नास्तिः नश्यति

कारणविरहितः शुद्धजीवः वर्धते क्षरति न येन।
चरमशरीरप्रमाणं जीवं जिनवराः ब्रुवन्ति तेन ॥५४॥

कारणविरहितः शुद्धजीवो वर्धते क्षरति हीयते न येन कारणेन चरमशरीरप्रमाणं मुक्तजीवं जिनवरा भवन्ति तेन कारणेनेति। तथाहि—यद्यपि संसारावस्थायां हानिवृद्धिकारणभूतशरीरनामकर्मसहितत्वाद्धीयते वर्धते च तथापि मुक्तावस्थायां हानिवृद्धिकारणाभावाद्वर्धते हीयते च नैव, चरमशरीरप्रमाण एव तिष्ठतीत्यर्थः। कश्चिदाह—मुक्तावस्थायां प्रदीपवदावरणाभावे सति लोकप्रमाणविस्तारेण भाव्यमिति। तत्र परिहारमाह—प्रदीपस्य योऽसौ प्रकाशविस्तारः स स्वभावज एव न त्वपरजनितः पश्चाद्भाजनादिना साद्यावरणेन प्रच्छादितस्तेन कारणेन तस्यावरणाभावेऽपि प्रकाशविस्तारो घटते एव। जीवस्य पुनरनादिकर्मप्रच्छादितत्वात्पूर्वं स्वभावेन विस्तारो नास्ति। किंरूपसंहारविस्तरौ। शरीरनानानामकर्मजनितौ। तेन

जाता है, ऐसा कहते हैं—[**येन**] जिस हेतु [**कारणविरहितः**] हानि-वृद्धिका कारण शरीर नामकर्मसे रहित हुआ [**शुद्धजीवः**] शुद्धजीव [**न वर्धते क्षरति**] न तो बढ़ता है, और न घटता है, [**तेन**] इसी कारण [**जिनवराः**] जिनेन्द्रदेव [**जीवं**] जीवको [**चरमशरीरप्रमाणं**] चरमशरीर प्रमाण [**ब्रुवन्ति**] कहते हैं ॥ **भावार्थ**—यद्यपि संसार अवस्थामे हानि-वृद्धिका कारण शरीरनामा नामकर्म है, उसके सम्बन्धसे जीव घटता है, और बढ़ता है; जब महामच्छका शरीर पाता है, तब तो शरीरकी वृद्धि होती है, और जब निगोदिया शरीर धारता है, तब घट जाता है, और मुक्त अवस्थामें हानि-वृद्धिका कारण जो नामकर्म उसका अभाव होनेसे जीवके प्रदेश न तो सिकुड़ते हैं, न फैलते हैं, किन्तु चरमशरीरसे कुछ कम पुरुषाकार ही रहते हैं, इसलिये शरीरप्रमाण है, यह निश्चय हुआ। यहाँ कोई प्रश्न करे, कि जब तक दीपकके आवरण है, तब तक तो प्रकाश नहीं हो सकता है, और जब उसके रोकनेवालेका अभाव हुआ, तब प्रकाश विस्तृत होकर फैल जाता है, उसी प्रकार मुक्तिअवस्थामे आवरणके अभाव होनेसे आत्माके प्रदेश लोक-प्रमाण फैलने चाहिये, शरीर-प्रमाण ही क्यों रह गये ? उसका समाधान यह है, कि दीपकके प्रकाशका जो विस्तार है, वह स्वभावसे होता है, परसे नहीं उत्पन्न हुआ, पीछे भाजन वगेरहसे अथवा दूसरे आवरणसे आच्छादन किया गया, तब वह प्रकाश संकोचको प्राप्त हो जाता है, जब आवरणका अभाव होता है, तब प्रकाश विस्ताररूप हो जाता है, इसमें सन्देह नहीं और जीवका प्रकाश अनादिकालसे कर्मोंसे ढका हुआ है, पहले कभी विस्ताररूप नहीं हुआ। शरीर-प्रमाण ही संकोचरूप और विस्ताररूप हुआ, इसलिये जीवके प्रदेशोंका प्रकाश सकोच विस्ताररूप शरीरनामकर्मसे उत्पन्न हुआ है, इस कारण सूखी मिट्टीके बर्तनकी तरह कारणके अभावसे संकोच-विस्ताररूप नहीं होता, शरीर-प्रमाण ही रहता है, अर्थात् जबतक मिट्टीका बासन जलसे गीला रहता है, तबतक जलके सम्बन्धसे वह घट बढ़ जाता है, और जब जलका अभाव हुआ, तब बासन सूख जानेसे घटता बढ़ता नहीं है—जैसेका तैसा रहता है। उसी तरह इन जीवके जबतक नामकर्मका सम्बन्ध है, तबतक संसार-अवस्थामें शरीरकी हानि-वृद्धि होती है, उसकी हानि-वृद्धिसे प्रदेश सिकुड़ते हैं और फैलते हैं। तथा सिद्ध-अवस्थामे नामकर्मका

कारणेन शुष्कमृत्तिकाभाजनवत् कारणाभावादुपसंहारविस्तारौ न भवतः । चरमशरीरप्रमाणेन तिष्ठतीति । अत्र य एव मुक्तौ शुद्धबुद्धस्वभावः परमात्मा तिष्ठति तत्सदृशो रागादिरहितकाले स्वशुद्धात्मोपादेय इति भावार्थः ॥५४॥

अथाष्टकर्माष्टादशदोषरहितत्वापेक्षया शून्यो भवतीति न च केवलज्ञानादिगुणापेक्षया चेति दर्शयति—

अट्ठ वि कम्मइँ बहुविहइँ णवणव दोस वि जेण ।
सुद्धहँ एक्कु वि अत्थि णवि सुण्णु वि वुच्चइ तेण ॥५५॥

अष्टावपि कर्माणि बहुविधानि नवनव दोषा अपि येन ।
शुद्धानां एकोऽपि अस्ति नैव शून्योऽपि उच्यते तेन ॥५५॥

अष्टावपि कर्माणि बहुविधानि नवनव दोषा अपि येन कारणेन शुद्धात्मनां तन्मध्ये चैकोऽप्यस्ति नैव शून्योऽपि भण्यते तेन कारणेनेति । तद्यथा । शुद्धनिश्चयनयेन ज्ञानावरणाद्यष्टद्रव्यकर्माणि क्षुधादिदोषकारणभूतानि क्षुधातृषादिरूपाष्टदशदोषा अपि कार्यभूताः, अपिशब्दात्सत्ताचैतन्यबोधादिशुद्धप्राणरूपेण शुद्धजीवत्वे सत्यपि दशप्राणरूपमशुद्धजीवत्वं च नास्ति तेन कारणेन संसारिणां निश्चयनयेन शक्तिरूपेण रागादिविभावशून्यं च भवति । मुक्तात्मनां तु व्यक्तिरूपेणापि न चात्मानन्तज्ञानादि-

---

अभाव हो जाता है, इस कारण शरीरके न होनेसे प्रदेशोंका संकोच विस्तार नहीं होता, सदा एकसे ही रहते हैं । जिस शरीरसे मुक्त हुआ, उसी प्रमाण कुछ कम रहता है । दीपकका प्रकाश तो स्वभाव से उत्पन्न है, इससे आवरणसे आच्छादित हो जाता है । जब आवरण दूर हो जाता है, तब प्रकाश सहज ही विस्तरता है । यहाँ तात्पर्य है, कि जो शुद्ध बुद्ध (ज्ञान) स्वभाव परमात्मा मुक्तिमें तिष्ठ रहा है, वैसा ही शरीरमे भी विराज रहा है । जब रागका अभाव होता है, उस कालमें यह आत्मा परमात्माके समान है, वही उपादेय है ॥५४॥

आगे आठ कर्म और अठारह दोषोंसे रहित हुआ विभाव-भावोंकर रहित होनेसे शून्य कहा जाता है, लेकिन केवलज्ञानादि गुणको अपेक्षा शून्य नहीं है, सदा पूर्ण ही है, ऐसा दिखलाते हैं— [येन] जिस कारण [अष्टौ अपि] आठों ही [बहुविधानि कर्माणि] अनेक भेदोंवाले कर्म [नवनव दोषा अपि] अठारह ही दोष इनमेसे [एकः अपि] एक भी [शुद्धानां] शुद्धात्माओंके [नैव अस्ति] नहीं है, [तेन] इसलिये [शून्योऽपि] शून्य भी [भण्यते] कहा जाता है ॥ [भावार्थ]—इस आत्माके शुद्धनिश्चयनयकर ज्ञानावरणादि आठ द्रव्यकर्म नहीं है, क्षुधादि दोषोंके कारणभूत कर्मोंके नाश हो जानेसे क्षुधा तृषादि अठारह दोष कार्यरूप नही है, और अपि शब्दसे सत्ता चेतन्य ज्ञान आनंदादि शुद्ध प्राण होनेपर भी इंद्रियादि दश अशुद्धरूप प्राण नही हैं, इसलिये संसारी-जीवोंके भी शुद्धनिश्चयनयसे शक्तिरूपसे शुद्धपना है, लेकिन रागादि विभाव-भावोंकी शून्यता ही है । तथा सिद्ध-

गुणशून्यत्वमेकान्तेन बौद्धादिमतवदिति । तथा चोक्तं पञ्चास्तिकाये––"जेसिं जीवसहावो णत्थि अभावो य सव्वहा तस्य । ते होंति भिण्णदेहा सिद्धा वचिगोयरमदीदा" । अत्र य एव मिथ्यात्वरागादिविभावेन शून्यश्चिदानन्दैकस्वभावेन भरितावस्थः प्रतिपादितः परमात्मा स एवोपादेय इति तात्पर्यार्थः ।।५५।। एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये य एव ज्ञानापेक्षया व्यवहारनयेन लोकालोकव्यापको भणितः स एव परमात्मा निश्चयनयेनासंख्यातप्रदेशोऽपि स्वदेहमध्ये तिष्ठतीति व्याख्यानमुख्यत्वेन सूत्रषट्कं गतम् ।।५५।।

तदनन्तरं द्रव्यगुणपर्यायनिरूपणमुख्यत्वेन सूत्रत्रयं कथयति । तद्यथा––

अप्पा जणियउ केण ण वि अप्पें जणिउ ण कोइ ।
दव्व-सहावें णिच्चु मुणि पज्जउ विणसइ होइ ।।५६।।

आत्मा जनितः केन नापि आत्मना जनितं न किमपि ।
द्रव्यस्वभावेन नित्यं मन्यस्व पर्यायः विनश्यति भवति ।।५६।।

आत्मा न जनितः केनापि आत्मना कर्तृभूतेन जनितं न किमपि, द्रव्यस्वभावेन नित्यमात्मानं मन्यस्व जानीहि । पर्यायो विनश्यति भवति चेति । तथाहि । संसारिजीवः शुद्धात्मसंवित्त्यभावेनोपार्जितेन कर्मणा यद्यपि व्यवहारेण जन्यते स्वयं च शुद्धा-

---

जीवोंके तो सब तरहसे प्रगटरूप रागादिसे रहितपना है, इसलिये विभावोंसे रहितपनेकी अपेक्षा शून्यभाव है, इसी अपेक्षासे आत्माको शून्य भी कहते हैं। ज्ञानादिक शुद्ध भावकी अपेक्षा सदा पूर्ण ही है, और जिस तरह बौद्धमती सर्वथा शून्य मानते हैं, वैसा अनंतज्ञानादि गुणोंसे कभी नहीं हो सकता। ऐसा कथन श्रीपंचास्तिकायमें भी किया है—"जेसिं जीवसहावो" इत्यादि। इसका अभिप्राय यह है, कि जिन सिद्धोंके जीवका स्वभाव निश्चल है, जिस स्वभावका सर्वथा अभाव नहीं है, वे सिद्धभगवान् देहसे रहित हैं, और वचनके विषयसे रहित हैं, अर्थात् जिनका स्वभाव वचनोंसे नहीं कह सकते। यहाँ मिथ्यात्व रागादिभावकर शून्य तथा एक चिदानंदस्वभावसे पूर्ण जो परमात्मा कहा गया है, अर्थात् विभावसे शून्य स्वभावसे पूर्ण कहा गया है, वही उपादेय है, ऐसा तात्पर्य हुआ ।।५५।।

ऐसे जिसमें तीन प्रकारकी आत्माका कथन है, ऐसे पहले महाअधिकारमें जो ज्ञानकी अपेक्षा व्यवहारनयसे लोकालोकव्यापक कहा गया, वही परमात्मा निश्चयनयसे असंख्यातप्रदेशी है, तो भी अपनी देहके प्रमाण रहता है, इस व्याख्यानकी मुख्यतासे छह दोहा-सूत्र कहे गये। आगे द्रव्य, गुण, पर्यायके कथनकी मुख्यतासे तीन दोहे कहते है—[आत्मा] यह आत्मा [केन अपि] किसीसे भी [न जनितः] उत्पन्न नही हुआ, [आत्मना] और इस आत्मासे [किमपि] कोई द्रव्य [न जनितं] उत्पन्न नहीं हुआ, [द्रव्यस्वभावेन] द्रव्यस्वभावकर [नित्यं मन्यस्व] नित्य जानो, [पर्यायः विनश्यति भवति] पर्यायभावसे विनाशीक है ।। भावार्थ—यह संसारी-जीव यद्यपि व्यवहारनयकर शुद्धात्मज्ञानके अभावसे उपार्जन किये ज्ञानावरणादि शुभाशुभ कर्मोंके निमित्तसे नर नारकादि पर्यायोंसे उत्पन्न होता है, और विनसता है, और आप भी शुद्धात्मज्ञानसे रहित हुआ कर्मोंको उप-

त्मसंवित्तिच्युतः सन् कर्माणि जनयति तथापि शुद्धनिश्चयनयेन शक्तिरूपेण कर्मकर्तृभूतेन नरनारकादिपर्यायेण न जन्यते स्वयं च कर्मनोकर्मादिकं न जनयतीति । आत्मा पुनर्न केवलं शुद्धनिश्चयनयेन व्यवहारेणापि न च जन्यते न च जनयति तेन कारणेन द्रव्यार्थिकनयेन नित्यो भवति, पर्यायार्थिकनयेनोत्पद्यते विनश्यति चेति । अत्राह शिष्यः । मुक्तात्मनः कथमुत्पादव्ययाविति । परिहारमाह । [1]आगमप्रसिद्धयागुरुलघुकगुणहानिवृद्ध्यपेक्षया, अथवा येनोत्पादादिरूपेण ज्ञेयं वस्तु परिणमति तेन परिच्छित्त्याकारेण ज्ञानपरिणत्यपेक्षया । अथवा मुक्तौ संसारपर्यायविनाशः सिद्धपर्यायोत्पादः शुद्धजीवद्रव्यं ध्रौव्यापेक्षया च सिद्धानामुत्पादव्ययौ ज्ञातव्याविति । अत्र तदेव सिद्धस्वरूपमुपादेयमिति भावार्थः ॥५६॥

जाता (बाँधता) है, तो भी शुद्धनिश्चयनयकर शक्तिरूप शुद्ध ही है, कर्मोंसे उत्पन्न हुई नर नारकादि पर्यायरूप नहीं होता, और आप भी कर्म नोकर्मादिकको नहीं उपजाता और व्यवहारसे भी न जन्मता है, न किसीसे विनाशको प्राप्त होता है, न किसीको उपजाता है. कारणकार्यसे रहित है, अर्थात् कारण उपजानेवालेको कहते हैं। कार्य उपजानेवालेको कहते हैं। सो ये दोनों भाव वस्तुमें नहीं हैं, इससे द्रव्यार्थिकनयकर जीव नित्य है, और पर्यायार्थिकनयकर उत्पन्न होता है, तथा विनाशको प्राप्त होता है। यहाँपर शिष्य प्रश्न करता है, कि संसारी जीवोंके तो नर नारकी आदि पर्यायोंकी अपेक्षा उत्पत्ति और मरण प्रत्यक्ष दीखता है, परंतु सिद्धोंके उत्पाद, व्यय, किस तरह हो सकता है? क्योंकि उनके विभाव-पर्याय नहीं है, स्वभाव-पर्याय ही है, और वे सदा अखंड अविनश्वर ही हैं। इसका समाधान यह है–कि जैसा उत्पन्न होना, मरना, चारों गतियोंमें संसारीजीवोंके है, वैसा तो उन सिद्धोंके नहीं है, वे अविनाशी हैं, परंतु शास्त्रोंमें प्रसिद्ध अगुरुलघु गुणकी परिणतिरूप अर्थपर्याय है, वह समय समयमें आविर्भावतिरोभावरूप होती है। अर्थात् समयमे पूर्वपरिणतिका व्यय होता है और आगेकी पर्यायका आविर्भाव (उत्पाद) होता है। इस अर्थपर्यायकी अपेक्षा उत्पाद व्यय जानना, अन्य संसारी-जीवोंकी तरह नहीं है। सिद्धोके एक तो अर्थपर्यायकी अपेक्षा उत्पाद व्यय कहा है। अर्थपर्यायमें षट्गुणी हानि और वृद्धि होती है। अनंतभागवृद्धि १, असंख्यातभागवृद्धि २, संख्यातभागवृद्धि ३, संख्यातगुणवृद्धि ४, असख्यातगुणवृद्धि ५, अनंतगुणवृद्धि ६। अनंतभागहानि १, असंख्यातभागहानि २, संख्यातभागहानि ३, संख्यातगुणहानि ४, असंख्यातगुणहानि ५, अनंतगुणहानि ६। ये षट्गुणी हानि-वृद्धिके नाम कहे हैं। इनका स्वरूप तो केवलीके गम्य है, सो इस षट्गुणी हानि-वृद्धिकी अपेक्षा सिद्धोंके उत्पाद व्यय कहा जाता है। अथवा समस्त ज्ञेयपदार्थ उत्पाद व्यय ध्रौव्यरूप परिणमते हैं, सो सब पदार्थ सिद्धोंके ज्ञान-गोचर हैं। ज्ञेयाकार ज्ञानकी परिणति है, सो जब ज्ञेय-पदार्थमें उत्पाद व्यय हुआ, तब ज्ञानमें सब प्रतिभासित हुआ, इसलिये ज्ञानकी परिणतिकी अपेक्षा उत्पाद व्यय जानना। अथवा जब सिद्ध हुए, तब संसार-पर्यायका विनाश हुआ, सिद्धपर्यायका उत्पाद हुआ, तथा द्रव्य स्वभावसे सदा ध्रुव ही है। सिद्धोंके जन्म, जरा, मरण नहीं हैं, सदा अविनाशी हैं। सिद्धका स्वरूप सब उपाधियोंसे रहित है, वही उपादेय है, यह भावार्थ जानना ॥९६॥

---

१. पाठान्तरः—आगमप्रसिद्धया = आगमप्रसिद्ध।

अथ द्रव्यगुणपर्यायस्वरूपं प्रतिपादयति—

तं परियाणहि दव्वु तुहुं जं गुण-पज्जय-जुत्तु ।
सह-भुव जाणहि ताहं गुण कम-भुव पज्जउ वुत्तु ॥५७॥

तत् परिजानीहि द्रव्यं त्वं यत् गुणपर्याययुक्तम् ।
सहभुवः जानीहि तेषां गुणाः क्रमभुवः पर्यायाः उक्ताः ॥५७॥

तं परियाणहि दव्वु तुहुं जं गुणपज्जयजुत्तु तत्परि समन्ताज्जानीहि द्रव्यं त्वम् । तत्किम् । यद्गुणपर्याययुक्तं, गुणपर्यायस्य स्वरूपं कथयति । सहभुव जाणहि ताहं गुण कमभुव पज्जउ वुत्तु सहभुवो जानीहि तेषां द्रव्याणां गुणाः, क्रमभुवः पर्याया उक्ता भणिता इति । तद्यथा । गुणपर्ययवद् द्रव्यं ज्ञातव्यम् । इदानीं तस्य द्रव्यस्य गुणपर्यायाः कथ्यन्ते । सहभुवो गुणाः, क्रमभुव पर्यायाः, इदमेकं तावत्सामान्यलक्षणम् । अन्वयिनो गुणाः व्यतिरेकिणः पर्यायाः, इति द्वितीयं च । यथा जीवस्य ज्ञानादयः पुद्गलस्य वर्णादयश्चेति । ते च प्रत्येकं द्विविधाः स्वभावविभावभेदेनेति । तथाहि । जीवस्य तावत्कथ्यन्ते । सिद्धत्वादयः स्वभावपर्यायाः केवलज्ञानादयः स्वभावगुणा

आगे द्रव्य, गुण, पर्यायका स्वरूप कहते हैं—[यत्] जो [गुणपर्याययुक्तं] गुण और पर्यायोंकर सहित है, [तत्] उसको [त्वं] हे प्रभाकरभट्ट, तू [द्रव्यं] द्रव्य [परिजानीहि] जान, [सहभुवः] जो सदाकाल पाये जावें, नित्यरूप हों, वे तो [तेषां गुणाः] उन द्रव्योंके गुण हैं, [क्रमभुवः] और जो द्रव्यकी अनेकरूप परिणति क्रमसे हों अर्थात् अनित्यपनेरूप समय समय उपजे, विनशे, नानास्वरूप हों वह [पर्यायाः] पर्याय [उक्ताः] कही जाती हैं ॥ भावार्थ—जो द्रव्य होता है, वह गुणपर्यायकर सहित होता है । यही कथन तत्त्वार्थसूत्रमें कहा है 'गुणपर्ययवद्द्रव्यं" । अब गुणपर्यायका स्वरूप कहते हैं—"सहभुवो गुणाः क्रमभुवः पर्यायाः" यह नयचक्र ग्रंथका वचन है, अथवा "अन्वयिनो गुणा व्यतिरेकिणः पर्यायाः" इनका अर्थ ऐसा है, कि गुण तो सदा द्रव्यसे सहभावी हैं, द्रव्यमें हमेशा एकरूप नित्यरूप पाये जाते हैं, और पर्याय नानारूप होती हैं, जो परिणति पहले समयमें थी, वह दूसरे समयमें नहीं होती, समय समयमें उत्पाद व्ययरूप होता है, इसलिये पर्याय क्रमवर्ती कहा जाता है । अब इसका विस्तार कहते हैं—जीव द्रव्यके ज्ञान आदि अर्थात् ज्ञान, दर्शन, सुख, वीर्य, आदि अनंत गुण हैं, और पुद्गल-द्रव्यके स्पर्श, रस, गंध, वर्ण, इत्यादि अनंतगुण हैं, सो ये गुण तो द्रव्यमें सहभावी हैं, अन्वयी हैं, सदा नित्य हैं, कभी द्रव्यसे तन्मयपना नहीं छोड़ते । तथा पर्यायके दो भेद हैं—एक तो स्वभाव दूसरो विभाव । जीवके सिद्धत्वादि स्वभाव-पर्याय हैं, और केवलज्ञानादि स्वभाव-गुण हे । ये तो जीवमें ही पाये जाते हैं, अन्य द्रव्यमें नहीं पाये जाते । तथा अस्तित्व, वस्तुत्व, द्रव्यत्व, अगुरुलघुत्व, ये स्वभावगुण सब द्रव्योंमें पाये जाते हैं । अगुरुलघु गुणका परिणमन षट्गुणी हानि-वृद्धिरूप है । यह स्वभावपर्याय सभी द्रव्योंमें हैं, कोई द्रव्य षट्गुणी हानि-वृद्धि विना नहीं है, यही अर्थ-पर्याय कही जाती हैं, वह शुद्ध पर्याय है । यह शुद्ध पर्याय संसारी-जीवोंके सब अजीव-पदार्थोंके तथा सिद्धोंके पायी जाती है, और सिद्धपर्याय तथा केवलज्ञानादि गुण

असाधारणा इति । अगुरुलघुकाः स्वभावगुणास्तेषामेव गुणानां षड्हानिवृद्धिरूप-स्वभावपर्यायाश्च सर्वद्रव्यसाधारणा । तस्यैव जीवस्य मतिज्ञानादिविभावगुणा नर-नारकादिविभावपर्यायाश्च इति । इदानीं पुद्गलस्य कथ्यन्ते । केवलपरमाणुरूपेणाव-स्थानं स्वभावपर्यायः वर्णान्तरादिरूपेण परिणमनं वा । तस्मिन्नेव परमाणौ वर्णादयः स्वभावगुणा इति, द्व्यणुकादिरूपस्कन्धरूपविभावपर्यायास्तेष्वेव द्व्यणुकादिस्कन्धेषु वर्णादयो विभावगुणा इति भावार्थः । धर्माधर्माकाशकालानां स्वभावगुणपर्यायास्ते च यथावसरं कथ्यन्ते । विभावपर्यायास्तूपचारेण यथा घटाकाशमित्यादि । अत्र शुद्धगुण-पर्यायसहितः शुद्धजीव एवोपादेय इति भावार्थः ॥५७॥

अथ जीवस्य विशेषेण द्रव्यगुणपर्यायान् कथयति--

अप्पा बुज्झहि दव्वु तुहुँ गुण पुणु दंसणु णाणु ।
पज्जय चउ-गइ-भाव तणु कम्म-विणिम्मिय जाणु ॥५८॥

आत्मानं बुध्यस्व द्रव्यं त्वं गुणौ पुनः दर्शनं ज्ञानम् ।
पर्यायान् चतुर्गतिभावान् तनुं कर्मविनिर्मितान् जानीहि ॥५८॥

अप्पा बुज्झहि दव्वु तुहुं **आत्मानं द्रव्यं बुध्यस्व जानीहि त्वम्** । गुण पुणु

सिद्धोंके ही पाया जाता है, दूसरोंके नहीं । संसारी-जीवोंके मतिज्ञानादि विभावगुण और नर-नारकी आदि विभावपर्याय ये संसारी-जीवोंके पायी जाती हैं । ये तो जीव-द्रव्यके गुण-पर्याय कहे और पुद्गल के परमाणुरूप तो द्रव्य तथा वर्ण आदि स्वभावगुण और एक वर्णसे दूसरे वर्णरूप होना, ये विभाव-गुण व्यञ्जन-पर्याय तथा एक परमाणुमें दो तीन इत्यादि अनेक परमाणु मिलकर स्कन्धरूप होना, ये विभावद्रव्य व्यञ्जन-पर्याय हैं । द्व्यणुकादि स्कन्धमें जो वर्ण आदि हैं, वे विभावगुण कहे जाते हैं, और वर्ण से वर्णान्तर होना, रस से रसान्तर होना, गन्धसे अन्य गन्ध होना, यह विभाव-पर्याय हैं । परमाणु शुद्ध द्रव्यमे एक वर्ण, एक रस, एक गन्ध, और शीत उष्णमेंसे एक, तथा रूखे चिकनेमेंसे एक, ऐसे दो स्पर्श, इस तरह पाँच गुण तो मुख्य हैं, इनको आदिसे अस्तित्वादि अनन्तगुण हैं, वे स्वभाव-गुण कहे जाते हैं, और परमाणुका जो आकार वह स्वभावद्रव्य व्यञ्जन-पर्याय है, तथा वर्णादि गुणरूप परिणमन वह स्वभावगुण व्यञ्जन-पर्याय है । जीव और पुद्गल इन दोनोंमें तो स्वभाव और विभाव दोनों हैं, तथा धर्म, अधर्म, आकाश, काल, इन चारोंमें अस्तित्वादि स्वभाव-गुण ही हैं, और अर्थपर्याय षट्गुणी हानि वृद्धिरूप स्वभाव-पर्याय सभीके हैं । धर्मादिके चार पदार्थोंके विभावगुण-पर्याय नहीं है । आकाशके घटाकाश मठाकाश इत्यादिकी जो कहावत है, वह उपचारमात्र है । ये षट् द्रव्योंके गुण-पर्याय कहे गये हैं । इन षट् द्रव्योंमें जो शुद्ध गुण, शुद्ध पर्याय सहित जो शुद्ध जीवद्रव्य है, वही उपादेय है—आराधने योग्य है ॥५७॥

आगे जीवके विशेषपनेकर द्रव्य-गुणपर्याय कहते हैं—हे शिष्य, [**त्वं**] तू [**आत्मानं**] आत्माको तो [**द्रव्यं**] द्रव्य [**बुध्यस्व**] जान, [**पुनः**] और [**दर्शनं ज्ञानं**] दर्शन ज्ञानको [**गुणौ**] गुण जान, [**चतुर्गतिभावान् तनुं**] चार गतियोंके भाव तथा शरीरको [**कर्मविनिर्मितान्**] कर्मजनित [**पर्यायान्**] विभाव-पर्याय [**जानीहि**] समझ ॥ **भावार्थ**—इसका विशेष व्याख्यान करते हैं—शुद्ध-

दंसणु णाणु गुणो पुनर्दर्शनं ज्ञानं च । पज्जय चउगइभाव तणु कम्मविणिम्मिय जाणु तस्यैव जीवस्य पर्यायांश्चतुर्गतिभावान् परिणामान् तनुं शरीरं च । कथंभूतान् तान् । कर्मविनिर्मितान् जानीहीति । इतो विशेषः । शुद्धनिश्चयेन शुद्धबुद्धैकस्वभावमात्मानं द्रव्यं जानीहि । तस्यैवात्मनः सविकल्पं ज्ञानं निर्विकल्पं दर्शनं गुण इति । तत्र ज्ञानमष्टविधं केवलज्ञानं सकलमखण्डं शुद्धमिति शेषं सप्तकं खण्डज्ञानमशुद्धमिति । तत्र सप्तकमध्ये मत्यादिचतुष्टयं सम्यग्ज्ञानं कुमत्यादित्रयं मिथ्याज्ञानमिति । दर्शनचतुष्टयमध्ये केवलदर्शनं सकलमखण्डं शुद्धमिति चक्षुरादित्रयं विकलमशुद्धमिति । किं च । गुणास्त्रिविधि भवन्ति । केचन साधारणाः; केचनासाधारणाः, केचन साधारणासाधारणा इति । जीवस्य तावदुच्यन्ते । अस्तित्वं वस्तुत्वं प्रमेयत्वागुरुलघुत्वादयः साधारणाः, ज्ञानसुखादयः स्वजातौ साधारणा अपि विजातौ पुनरसाधारणाः । अमूर्तत्वं पुद्गलद्रव्यं प्रत्यसाधारणमाकाशादिकं प्रति साधारणम् । प्रदेशत्वं पुनः कालद्रव्यं प्रति पुद्गलपरमाणुद्रव्यं च प्रत्यसाधारणं शेषद्रव्यं प्रति साधारणमिति संक्षेपव्याख्यानम् । एवं शेषद्रव्याणामपि यथासंभवं ज्ञातव्यमिति भावार्थः ॥५८॥

अथानन्तसुखस्योपादेयभूतस्याभिन्नत्वात् शुद्धगुणपर्याय इति प्रतिपादनमुख्यत्वेन

निश्चयनयकर शुद्ध, बुद्ध, अखंड, स्वभाव, आत्माको तू द्रव्य जान, चेतनपनेके सामान्य स्वभावको दर्शन जान, और विशेषतासे जानपना उसको ज्ञान समझ । ये दर्शन ज्ञान आत्माके निज गुण हैं, उनमेंसे ज्ञानके आठ भेद है, उनमे केवलज्ञान तो पूर्ण है, अखण्ड है, शुद्ध है, तथा मतिज्ञान, श्रुतज्ञान, अवधिज्ञान, मन पर्ययज्ञान ये चार ज्ञान तो सम्यक्ज्ञान और कुमति, कुश्रुत, कुअवधि ये तीन मिथ्या ज्ञान, ये केवल की अपेक्षा सातो ही खंडित है, अखंड हैं, और सर्वथा शुद्ध नहीं है, अशुद्धता सहित हैं, इसलिये परमात्मामे एक केवलज्ञान ही है । पुद्गलमे अमूर्तगुण नही पाये जाते, इस कारण पाँचोकी अपेक्षा साधारण, पुद्गलको अपेक्षा असाधारण । प्रदेशत्वगुण कालके विना पाँच द्रव्योंमे पाया जाता है, इसलिये पाँचको अपेक्षा यह प्रदेशगुण साधारण है, और कालमे न पानेसे कालकी अपेक्षा असाधारण है । पुद्गल-द्रव्यमे मूर्तीकगुण असाधारण है, इसीमे पाया जाता है, अन्यमें नहीं और अस्तित्वादि गुण इसमें भी पाये जाते हैं, तथा अन्यमे भी, इसलिये साधारणगुण हैं । चेतनपना पुद्गलमें सर्वथा नहीं पाया जाता । पुद्गल-परमाणुको द्रव्य कहते हैं । स्पर्श, रस, गन्ध, वर्णस्वरूप जो मूर्ति वह इस पुद्गलका विशेषगुण है । अन्य सब द्रव्योंमे जो उनका स्वरूप है, वह द्रव्य है, और अस्तित्वादि गुण, तथा स्वभाव परिणति पर्याय है । जीव और पुद्गलके विना अन्य चार द्रव्योंमें विभाव-गुण और विभाव-पर्याय नहीं है, तथा जीव पुद्गलमें स्वभाव विभाव दोनों हैं । उनमेसे सिद्धोंमें तो स्वभाव ही है, और ससारीमें विभावकी मुख्यता है । पुद्गल परमाणुमें स्वभाव ही है, और स्कन्ध विभाव ही है । इस तरह छहों द्रव्योंका संक्षेपसे व्याख्यान जानना ।।५८।।

ऐसे तीन प्रकारकी आत्माका है कथन जिसमें ऐसे पहले महाधिकारमें द्रव्य-गुण पर्यायके

सूत्राष्टकं कथ्यते । तत्राष्टकमध्ये प्रथमचतुष्टयं कर्मशक्तिस्वरूपमुख्यत्वेन द्वितीयचतुष्टयं कर्मफलमुख्यत्वेनेति । तद्यथा ।

जीवकर्मणोरनादिसंबन्धं कथयति---

जीवहँ कम्मु अणाइ जिय जणियउ कम्मु ण तेण ।
कम्में जीउ वि जणिउ णवि दोहिँ वि आइ ण जेण ॥५९॥

जीवानां कर्माणि अनादीनि जीव जनितं कर्म न तेन ।
कर्मणा जीवोऽपि जनितः नैव द्वयोरपि आदिः न येन ॥५९॥

जीवहं कम्मु अणाइ जिय जणियउ कम्मु ण तेण **जीवानां कर्मणामनादिसंबन्धो भवति हे जीव जनितं कर्म न तेन जीवेन ।** कम्में जीउ वि जणिउ णवि दोहिं वि आइ ण जेण **कर्मणा कर्तृभूतेन । जीवोऽपि जनितो न द्वयोरप्यादिर्न येन कारणेनेति । इतो विशेषः । जीवकर्मणामनादिसंबन्धः पर्यायसंतानेन बीजवृक्षवद्व्यवहारनयेन संबन्धः कर्म तावत्तिष्ठति तथापि शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभावेन जीवेन न तु जनितं कर्म तथाविधजीवोऽपि स्वशुद्धात्मसंवित्त्यभावोपार्जितेन कर्मणा नरनारकादिरूपेण न जनितः कर्मात्मेति च द्वयोरनादित्वादिति । अत्रानादिजीवकर्मणोस्संबन्धव्याख्यानेन सदा मुक्तः सदा शिवः कोऽप्यस्तीति निराकृतमिति**

व्याख्यानकी मुख्यतासे सातवें स्थलमें तीन दोहा-सूत्र कहे । आगे आदर करने योग्य अतीन्द्रिय सुखसे तन्मयी जो निर्विकल्पभाव उसकी प्राप्तिके लिए शुद्ध गुण-पर्यायके व्याख्यानकी मुख्यतासे आठ दोहा कहते हैं । इनमें पहले चार दोहोंमें अनादि कर्मसंबंधका व्याख्यान और पिछले चार दोहोंमें कर्मके फलका व्याख्यान इस प्रकार आठ दोहोंका रहस्य है, उसमे प्रथम ही जीव और कर्मका अनादि कालका संबंध है, ऐसा कहते है—**[हे जीव]** हे आत्मा **[जीवानां]** जीवोंके **[कर्माणि]** कर्म **[अनादीनि]** अनादि कालसे हैं, अर्थात् जीव कर्मका अनादि कालका संबंध है, **[तेन]** उस जीवने **[कर्म]** कर्म **[न जनितं]** नही उत्पन्न किये, **[कर्मणा अपि]** ज्ञानावरणादि कर्मोंने भी **[जीव]** यह जीव **[नैव जनितः]** नही उपजाया, **[येन]** क्योंकि **[द्वयोःअपि]** जीव कर्म इन दोनोंका ही **[आदिः न]** आदि नही है, दोनों ही अनादिके है। **भावार्थ—**यद्यपि व्यवहारनयसे पर्यायोंके समूहकी अपेक्षा नये-नये कर्म समय समय बाँधता है, नये नये उपार्जन करता है, जैसे बीजसे वृक्ष और वृक्षसे बोज होता है, उसी तरह पहले बोजरूप कर्मोंसे देह धारता है, देहमें नये नये कर्मोंको विस्तारता है, यह तो बोजसे वृक्ष हुआ। इसी प्रकार जन्म-सन्तान चली जाती है । परन्तु शुद्धनिश्चयनयसे विचारा जावे, तो जीव निर्मल ज्ञान दर्शनस्वभाव ही है । जीवने ये कर्म न तो उत्पन्न किये, और यह जीव भी इन कर्मोंने नहीं पैदा किया । जीव भी अनादिका है, ये पुद्गलस्कंध भी अनादिके हैं, जीव और कर्म नये नही है, जोव अनादिका कर्मोंसे बँधा है । और कर्मोंके क्षयसे मुक्त होता है । इस व्याख्यानसे जो कोई ऐसा कहते है, कि आत्मा सदा मुक्त है, कर्मोंसे रहित है, उनका निराकरण (खंडन) किया । ये वृथा कहते हैं, ऐसा तात्पर्य है ।

भावार्थः ।। तथा चोक्तम्--"मुक्तश्चेत्प्राग्भवे बद्धो नो बद्धो मोचनं वृथा । अबद्धो मोचनं नैव मुञ्चेरर्थो निरर्थकः ।। अनादितो हि मुक्तश्चेत्पश्चाद्बन्धः कथं भवेत् । बन्धनं मोचनं नो चेन्मुञ्चेरर्थो निरर्थकः ।।" ।।५९।।

अथ व्यवहारनयेन जीवः पुण्यपापरूपो भवतीति प्रतिपादयति--

एहु ववहारें जीवडउ हेउ लहेविणु कम्मु ।
बहुविह-भावें परिणवइ तेण जि धम्मु अहम्मु ।।६०।।

एष व्यवहारेण जीवः हेतुं लब्ध्वा कर्म ।
बहुविधभावेन परिणमति तेन एव धर्मः अधर्मः ।।६०।।

एहु ववहारें जीवडउ हेउ लहेविणु कम्मु **एष प्रत्यक्षीभूतो जीवो व्यवहार-नयेन हेतुं लब्ध्वा । किम् । कर्मेति ।** बहुविहभावें परिणवइ तेण जि धम्मु अहम्मु **बहुविधभावेन विकल्पज्ञानेन परिणमति तेनैव कारणेन धर्मोऽधर्मश्च भवतीति । तद्यथा । एष जीवः शुद्धनिश्चयेन वीतरागचिदानन्दैकस्वभावोऽपि पश्चाद्व्यवहारेण वीतरागनिर्विकल्पस्वसंवेदनाभावेनोपार्जितं शुभाशुभं कर्म हेतुं लब्ध्वा पुण्यरूपः पाप-रूपश्च भवति । अत्र यद्यपि व्यवहारेण पुण्यपापरूपो भवति तथापि परमात्मानुभूत्य-विनाभूतवीतरागसम्यग्दर्शनज्ञानचारित्रबहिर्द्रव्येच्छानिरोधलक्षणतपश्चरणरूपा या तु निश्चयचतुर्विधाराधना तस्या भावनाकाले साक्षादुपादेयभूतवीतरागपरमानन्दैकरूपो मोक्षसुखाभिन्नत्वात् शुद्ध-जीव उपादेय इति तात्पर्यार्थः ।।६०।।**

ऐसा दूसरी जगह भी कहा है—"मुक्तश्चेत्" इत्यादि । इसका अर्थ यह है, कि जो यह जीव पहले बँधा हुआ होवे, तभी 'मुक्त' ऐसा कथन संभवता है, और जो पहले बंधा ही नहीं तो फिर 'मुक्त' ऐसा कहना किस तरह ठीक हो सकता । मुक्त तो छूटे हुएका नाम है, सो जब बँधा ही नहीं, तो फिर 'छूटा' किस तरह कहा जा सकता है । जो अबध है, उसको छूटा कहना ठीक नहीं । जो विभावबंध मुक्ति मानते हैं, उनका कथन निरर्थक है । जो यह अनादिका मुक्त ही होवे, तो पीछे बंध कैसे सम्भव हो सकता है । बंध होवे तभी मोचन छुटकारा हो सके । जो बंध न हो तो मुक्त कहना निरर्थक है ।।५९।।

आगे व्यवहारनयसे यह जीव पुण्य-पापरूप होता है, ऐसा कहते हैं—[**एष जीवः**] यह जीव [**व्यवहारेण**] व्यवहारनयकर [**कर्म हेतुं**] कर्मरूप कारणको [**लब्ध्वा**] पाकरके [**बहुविध-भावेन**] अनेक विकल्परूप ['**परिणमति**] परिणमता है । [**तेन एव**] इसीसे [**धर्मः अधर्मः**] पुण्य और पापरूप होता है ।। **भावार्थ**—यह जीव शुद्ध निश्चयकर वीतराग चिदानन्द स्वभाव है, तो भी व्यवहारनयकर वीतराग निर्विकल्प स्वसंवेदनज्ञानके अभावसे रागादिरूप परिणमनेसे उपार्जन किये शुभ अशुभ कर्मोंके कारणको पाकर पुण्यी तथा पापी होता है । यद्यपि यह व्यवहारनयकर पुण्य पापरूप है, तो भी परमात्माकी अनुभूतिसे तन्मयी जो वीतराग सम्यग्दर्शन, ज्ञान, चारित्र, और बाह्य पदार्थोंमें इच्छाके रोकनेरूप तप, ये चार निश्चयआराधना है, उनकी भावनाके समय साक्षात् उपादेयरूप वीतराग परमानन्द जो मोक्षका सुख उससे अभिन्न आनन्दमयी ऐसा निज

अथ तानि पुनः कर्माण्यष्टौ भवन्तीति कथयति—

ते पुणु जीवहँ जोइया अट्ठ वि कम्म हवंति ।
जेहिँ जि झंपिय जीव णवि अप्प-सहाउ लहंति ॥६१॥

तानि पुन. जीवाना योगिन् अष्टौ अपि कर्माणि भवन्ति ।
येः एव झंपिताः जीवाः नेव आत्मस्वभावं लभन्ते ॥६१॥

ते पुणु जीवहं जोइया अट्ठ वि कम्म हवंति **तानि पुनर्जीवानां हे योगिन्नष्टावेव कर्माणि भवन्ति ।** जेहिं जि झंपिय जीव णवि अप्पसहाउ लहंति **यैरेव कर्मभिर्झंपिताः जीवा नैवात्मस्वभावं लभन्ते इति । तद्यथा—ज्ञानावरणादिभेदेन कर्माण्यष्टावेव भवन्ति यैर्झंपिताः सन्तो जीवाः सम्यक्त्वाद्यष्टविधस्वकीयस्वभावं न लभन्ते । तद्यथा हि—"सम्मत्तणाणदंसणवीरियसुहुमं तहेव अवगहणं । अगुरुगलहुगं अव्वाबाहं अट्ठगुणा हुंति सिद्धाणं ॥" । शुद्धात्मादिपदार्थविषये विपरीताभिनिवेशरहितः परिणाम क्षायिकसम्यक्त्वमिति भण्यते । जगत्त्रयकालत्रयवर्तिपदार्थयुगपद्विशेषपरिच्छित्तिरूपं केवलज्ञानं भण्यते तत्रैव सामान्यपरिच्छित्तिरूपं केवलदर्शनं भण्यते । तत्रैव केवलज्ञानविषये अनन्तपरिच्छित्तिशक्तिरूपमनन्तवीर्यं भण्यते । अतीन्द्रिय ज्ञानविषयं सूक्ष्मत्वं भण्यते । एकजीवावगाहप्रदेशे अनन्तजीवावगाहदानसामर्थ्यमवगाहनत्वं भण्यते । एकान्तेन गुरुलघुत्वस्याभावरूपेण अगुरुलघुत्वं भण्यते । वेदनीयकर्मोदयजनितसमस्तबाधारहितत्वादव्याबाधगुणश्चेति । इदं सम्यक्त्वादिगुणाष्टकं संसारावस्थायां किमपि केनापि कर्मणा प्रच्छादितं तिष्ठति यथा तथा कथ्यते । सम्यक्त्वं मिथ्यात्वकर्मणा प्रच्छादितं, केवलज्ञानं केवलज्ञानावरणेन झंपितं, केवलदर्शनं केवल-**

शुद्धात्मा ही उपादेय है, अन्य सब हेय हैं ॥६०॥

आगे कहते हैं, वे कर्म आठ है, जिनसे संसारी जीव बँधे है, कहते—श्रीगुरु अपने शिष्य मुनिसे कहते है, कि [**योगिन्**] हे योगी, [**तानि पुन· कर्माणि**] वे फिर कर्म [**जीवानां अष्टौ अपि**] जीवोंके आठ ही [**भवंति**] होते हैं, [**यैः एव झंपिताः**] जिन कर्मोसे ही आच्छादित (ढँके हुए) [**जीवाः**] ये जीवकर [**आत्मस्वभावं**] अपने सम्यक्त्वादि आठ गुणरूप स्वभावको [**नैव लभंते**] नही पाते । अब उन्ही आठ गुणोंका व्याख्यान करते है "सम्मत्त" इत्यादि—इसका अर्थ ऐसा है, कि शुद्ध आत्मादि पदार्थोंमें विपरीत श्रद्धान रहित जो परिणाम उसको क्षायिकसम्यक्त्व कहते है, तीन लोक तीन कालके पदार्थोको एक ही समयमे विशेषरूप सबको जानें, वह केवलज्ञान है, सब पदार्थोंको केवलदृष्टिसे एक ही समयमे देखे, वह केवलदर्शन है । उसी केवलज्ञानमें अनन्तज्ञायक (जाननेकी) शक्ति वह अनन्तवीर्य है, अतीन्द्रियज्ञानसे अमूर्तीक सूक्ष्म पदार्थोंको जानना, आप चार ज्ञानके धारियोंसे न जाना जावे वह सूक्ष्मत्व हैं, एक जीवके अवगाह क्षेत्रमे (जगहमे) अनन्ते जीव समा जावें, ऐसी अवकाश देनेकी सामर्थ्य वह अवगाहनगुण है, सर्वथा गुरुता और लघुताका अभाव अर्थात् न गुरु न लघु—उसे अगुरु-लघु कहते हैं और वेदनीयकर्मके उदयके अभावसे उत्पन्न हुआ

दर्शनावरणेन झंपितम्, अनन्तवीर्यवीर्यान्तरायेण प्रच्छादितं, सूक्ष्मत्वमायुष्ककर्मणा प्रच्छादितम् । कस्मादिति चेत् । विवक्षितायुःकर्मोदयेन भवान्तरे प्राप्ते सत्यतीन्द्रियज्ञानविषयं सूक्ष्मत्वं त्यक्त्वा पश्चादिन्द्रियज्ञानविषयो भवतीत्यर्थः । अवगाहनत्वं शरीरनामकर्मोदयेन प्रच्छादितं, सिद्धावस्थायोग्यं विशिष्टागुरुलघुत्वं नामकर्मोदयेन प्रच्छादितम् । गुरुत्वशब्देनोच्चगोत्रजनितं महत्त्वं भण्यते, लघुत्वशब्देन नीचगोत्रजनितं तुच्छत्वमिति, तदुभयकारणभूतेन गोत्रकर्मोदयेन विशिष्टागुरुलघुत्वं प्रच्छाद्यत इति । अव्याबाधगुणत्वं वेदनीयकर्मोदयेनेति संक्षेपेणाष्टगुणानां कर्मभिराच्छादनं ज्ञातव्यमिति । तदेव गुणाष्टकं मुक्तावस्थायां स्वकीयस्वकीयकर्मप्रच्छादनाभावे व्यक्तं भवतीति संक्षेपेणाष्टगुणाः कथिताः । विशेषेण पुनरमूर्तत्वनिर्नामगोत्रादयः साधारणासाधारणरूपानन्तगुणाः यथासंभवमागमाविरोधेन ज्ञातव्या इति । अत्र सम्यक्त्वादिशुद्धगुणस्वरूपः शुद्धात्मैवोपादेय इति भावार्थ. ।।६१।।

अथ विषयकषायासक्तानां जीवानां ये कर्मपरमाणवः संबद्धा भवन्ति तत्कर्मेति कथयति—

विसय-कसायहिँ रंगियहँ ते अणुया लग्गंति ।
जीव-पएसहँ मोहियहँ ते जिण कम्म भणंति ।।६२।।

विषयकषायैः रञ्जितानां ये अणवः लगन्ति ।
जीवप्रदेशेषु मोहितानां तान् जिनाः कर्म भणन्ति ।।६२।।

समस्त बाधा रहित जो निराबाधगुण उसे अव्याबाध कहते हैं । ये सम्यक्त्वादि आठ गुण जो सिद्धोंके हैं, वे संसारावस्थामे किस किस कर्मसे ढँके हुए हैं, इसे कहते है—सम्यक्त्व गुण मिथ्यात्वनाम दर्शनमोहनीयकर्मसे आच्छादित है, केवलज्ञानावरणसे केवलज्ञान ढका हुआ है केवलदर्शनावरणसे केवलदर्शन ढका है, वीर्यान्तिरायकर्मसे अनन्तवीर्य ढका है, आयुःकर्मसे सूक्ष्मत्वगुण ढका है, क्योंकि आयुकर्म उदयसे जब जीव परभवको जाता है, वहाँ इन्द्रियज्ञानका धारक होता है, अतोन्द्रियज्ञानका अभाव होता है, इस कारण कुछ एक स्थूलवस्तुओंको तो जानता है, सूक्ष्मको नहीं जानता, शरीरनामकर्मके उदयसे अवगाहनगुण आच्छादित है, सिद्धावस्थाके योग्य विशेषरूप अगुरुलघुगुण नामकर्मके उदयसे अथवा गोत्रकर्मके उदयसे ढक गया है, क्योंकि गोत्रकर्मके उदयसे जब नीच गोत्र पाया, तब उसमे तुच्छ या लघु कहलाया, और उच्च गोत्रमे बड़ा अर्थात् गुरु कहलाया और वेदनीयकर्मके उदयसे अव्याबाध गुण ढक गया, क्योंकि उसके उदय साता असातारूप सांसारिक सुख दुःखका भोक्ता हुआ । इस प्रकार आठ गुण आठ कर्मोंसे ढक गये, इसलिये यह जीव संसारमें भ्रमा । जब कर्मका आवरण मिट जाता है, तब सिद्धपदमें ये आठ गुण प्रकट होते हैं । यह संक्षेपसे आठ गुणोंका कथन किया । विशेषतासे अमूर्तत्व निर्नामगोत्रादिक अनन्तगुण यथासम्भव शास्त्र-प्रमाणसे जानने । तात्पर्य यह है, कि सम्यक्त्वादि निज शुद्ध गुणस्वरूप जो शुद्धात्मा है, वही उपादेय है ।।६१।।

विसयकसायहिं रंगियहं जे अणुया लग्गंति **विषयकषायैः** रंगितानां **रक्तानां ये परमाणवो लग्ना भवन्ति**। जीवपएसिहिं मोहियहं ते जिण कम्म भणंति। **केषु लग्ना भवन्ति। जीवप्रदेशेषु। केषाम्। मोहितानां जीवानाम्। तान् कर्मस्कन्धान् जिनाः कर्मेति कथयन्ति। तथाहि। शुद्धात्मानुभूतिविलक्षणैर्विषयकषायै रक्तानां स्वसंवित्त्यभावोपार्जितमोहकर्मोदयपरिणतानां च जीवानां कर्मवर्गणायोग्यस्कन्धास्तैलम्रक्षितानां मलपर्यायवदष्टविधज्ञानावरणादिकर्मरूपेण परिणमन्तीत्यर्थः॥ अत्र य एव विषयकषायकाले कर्मोपार्जनं करोति स एव परमात्मा वीतरागनिर्विकल्पसमाधिकाले साक्षादुपादेयो भवतीति तात्पर्यार्थः॥६२॥ इति कर्मस्वरूपकथनमुख्यत्वेन सूत्रचतुष्टयं गतम्॥**

अथापीन्द्रियचित्तसमस्तविभावचतुर्गतिसंतापाः शुद्धनिश्चयनयेन कर्मजनिता इत्यभिप्रायं मनसि धृत्वा सूत्रं कथयन्ति—

पंच वि इंदिय अण्णु मणु अण्णु वि सयल-विभाव।
जीवहँ कम्मइँ जणिय जिय अण्णु वि चउगइ-ताव॥६३॥

पञ्चापि इन्द्रियाणि अन्यत् मनः अन्यदपि सकलविभावः।
जीवानां कर्मणा जनिताः जीव अन्यदपि चतुर्गतितापाः॥६३॥

पंच वि इंदिय अण्णु वि सयलवि भाव **पञ्चेन्द्रियाणि अन्यन्मनः अन्यदपि पुनरपि समस्तविभावः**। जीवहं कम्मइं जणिय जिय अण्णु वि चउगइताव **एते जीवानां कर्मणा जनिता हे जीव, न केवलमेते अन्यदपि पुनरपि चतुर्गतिसंतापास्ते**

आगे विषय-कषायोंमें लीन जीवोंके जो कर्मपरमाणुओंके समूह बँधते हैं, वे कर्म कहे जाते हैं, ऐसा कहते हैं—[**विषयकषायैः**] विषय-कषायोंसे [**रंगितानां**] रागी [**मोहितानां**] मोही जीवोंके [**जीवप्रदेशेषु**] जीवके प्रदेशोंमें [**ये अणवः**] जो परमाणु [**लगंति**] लगते हैं, बँधते हैं. [**तान्**] उन परमाणुओंके स्कंधों (समूहों) को [**जिनाः**] जिनेन्द्रदेव [**कर्म**] कर्म [**भणंति**] कहते हैं॥ **भावार्थ—** शुद्ध आत्माकी अनुभूतिसे भिन्न जो विषयकषाय उनसे रँगे हुए आत्म-ज्ञानके अभावसे उपार्जन किये हुए मोहकर्मके उदयकर परिणत हुए, ऐसे रागी द्वेषी मोही संसारी जीवोंके कर्मवर्गणा योग्य जो पुद्गलस्कंध हैं, वे ज्ञानावरणादि आठ प्रकार कर्मरूप होकर परिणमते है। जैसे तेलसे शरीर चिकना होता है, और धूलि लगकर मैलरूप होके परिणमती है, वैसे ही रागी, द्वेषी, मोही, जीवोंके विषय-कषाय-दशामें पुद्गलवर्गणा कर्मरूप होके परिणमती हैं। जो कर्मोंका उपार्जन करते हैं, वही जब वीतराग निर्विकल्पसमाधिके समय कर्मोंका क्षय करते हैं, तब आराधने योग्य हैं, यह तात्पर्य हुआ॥६२॥

इस प्रकार कर्मस्वरूपके कथनकी मुख्यतासे चार दोहे कहे। आगे पाँच इंद्रिय, मन, समस्त विभाव और चार गतिके दुःख ये सब शुद्ध निश्चयनयकर कर्मसे उपजे हैं, जीवके नहीं हैं, यह अभिप्राय मनमें रखकर दोहा-सूत्र कहते हैं—[**पंचापि**] पाँचों ही [**इंद्रियाणि**] इन्द्रियाँ [**अन्यत्**] भिन्न हैं, [**मनः**] मन [**अपि**] और [**सकलविभावः**] रागादि सब विभाव परिणाम [**अन्यत्**] अन्य हैं,

कर्मजनिता इति । तद्यथा । अतीन्द्रियात् शुद्धात्मनो यानि विपरीतानि पञ्चेन्द्रियाणि, शुभाशुभसंकल्पविकल्परहितात्मनो यद् विपरीतमनेकसंकल्पविकल्पजालरूपं मनः, ये च शुद्धात्मतत्त्वानुभूतेर्विलक्षणाः समस्तविभावपर्यायाः, वीतरागपरमानन्दसुखामृतप्रतिकूलाः समस्तचतुर्गतिसंतापाः दुःखदाहाश्चेति सर्वेऽप्येते अशुद्धनिश्चयनयेन स्वसंवेद्याभावोपार्जितेन कर्मणा निर्मिता जीवानामिति । अत्र परमात्मद्रव्यात्प्रतिकूलं यत्पञ्चेन्द्रियादिसमस्तविकल्पजालं तद्धेयं तद्विपरीतं स्वशुद्धात्मतत्त्वं पञ्चेन्द्रियविषयाभिलाषादिसमस्तविकल्परहितं परमसमाधिकाले साक्षादुपादेयमिति भावार्थः ॥६३॥

अथ सांसारिकसमस्तसुखदुःखानि शुद्धनिश्चयनयेन जीवानां कर्म जनयतीति निरूपयति—

दुक्खु वि सुक्खु वि बहु-विहउ जीवहँ कम्मु जणेइ ।
अप्पा देक्खइ मुणइ पर णिच्छउ एउँ भणेइ ॥६४॥

दुःखमपि सुखमपि बहुविधं जीवानां कर्म जनयति ।
आत्मा पश्यति मनुते परं निश्चयः एवं भणति ॥६४॥

दुक्खु वि सुक्खु वि बहुविहउ जीवहं कम्मु जणेइ **दुःखमपि सुखमपि । कथंभूतम् । बहुविधं जीवानां कर्म जनयति ।** अप्पा देक्खइ मुणइ पर णिच्छउ एउं भणेइ **आत्मा पुनः पश्यति जानाति परं नियमेन निश्चयनयः एवं ब्रूवते इति ।**

[**चतुर्गतितापाः अपि**] तथा चारों गतियोंके दुःख भी [**अन्यत्**] अन्य है, [**जीव**] हे जीव, ये सब [**जीवानां**] जीवोंके [**कर्मणा**] कर्मकर [**जनिताः**] उपजे है, जीवसे भिन्न है, ऐसा जान ॥ **भावार्थ**—इन्द्रिय रहित शुद्धात्मासे विपरीत जो स्पर्शन आदि पाँच इन्द्रियाँ, शुभ अशुभ सकल्प-विकल्पसे रहित आत्मामे विपरीत अनेक संकल्प-विकल्पसमूहरूप जो मन और शुद्धात्मतत्त्वका अनुभूतिसे भिन्न जो राग, द्वेष, मोहादिरूप सब विभाव ये सब आत्मामे जुदे हैं, तथा वीतराग परमानंद सुखरूप अमृतसे पराङ्मुख जो समस्त चतुर्गतिके महान् दुःखदायी दुःख वे सब जीव-पदार्थसे भिन्न है । ये सभी अशुद्धनिश्चयनयकर आत्म-ज्ञानके अभावसे उपार्जन किये हुए कर्मोंसे जीवके उत्पन्न हुए है । इसलिये ये सब अपने नही हैं, कर्मजनित हैं । यहाँपर परमात्म-द्रव्यसे विपरीत जो पाँचों इन्द्रियोंको आदि लेकर सब विकल्प-जाल है, वे तो त्यागने योग्य हैं, उससे विपरीत पाँचों इन्द्रियोंके विषयोंको अभिलाषाको आदि लेकर सब विकल्प-जालोंसे रहित अपना शुद्धात्मतत्त्व वही परमसमाधिके समय साक्षात् उपादेय है । यह तात्पर्य जानना ॥६३॥

आगे संसारके सब सुख दुःख शुद्ध निश्चयनयसे शुभ अशुभ कर्मोंकर उत्पन्न होते है, और कर्मोंको ही उपजाते है, जीवके नही है, ऐसा कहते है—[**जीवानां**] जीवोंके [**बहुविधं**] अनेक तरहके [**दुःखमपि सुखं अपि**] दुःख और सुख दोनों ही [**कर्म**] कर्म ही [**जनयति**] उपजाता है । [**आत्मा**] और आत्मा [**पश्यति**] उपयोगमयी होनेसे देखता है, [**परं मनुते**] और केवल जानता है, [**एवं**] इस प्रकार [**निश्चयः**] निश्चयनय [**भणति**] कहता है, अर्थात् निश्चयनयसे

तथाहि—अनाकुलत्वलक्षणपारमार्थिकवीतरागसौख्यात् प्रतिकूलं सांसारिकसुखदुःखं यद्यप्यशुद्धनिश्चयनयेन जीवजनितं तथापि शुद्धनिश्चयेन कर्मजनितं भवति । आत्मा पुनर्वीतरागनिर्विकल्पसमाधिस्थः सन् वस्तु वस्तुस्वरूपेण पश्यति जानाति च न च रागादिकं करोति । अत्र पारमार्थिकसुखाद्विपरीतं सांसारिकसुखदुःखविकल्पजालं हेयमिति तात्पर्यार्थः ॥६४॥

अथ निश्चयेन बंधमोक्षौ कर्म करोतीति प्रतिपादयति—

बंधु वि मोक्खु वि सयलु जिय जीवहँ कम्मु जणेइ ।
अप्पा किंपि वि कुणइ णवि णिच्छउ एउँ भणेइ ॥६५॥

बन्धमपि मोक्षमपि सकलं जीव जीवनां कर्म जनयति ।
आत्मा किमपि करोति नैव निश्चय एवं भणति ॥६५॥

बंधु वि मोक्खु वि सयलु जिय जीवहं कम्मु जणेइ **बन्धमपि मोक्षमपि समस्तं हे जीव जीवानां कर्म कर्तृ जनयति** अप्पा किंपि [किंचि] वि कुणइ णवि णिच्छउ एउं भणेइ **आत्मा किमपि न करोति बन्धमोक्षस्वरूपं निश्चय एवं भणति । तद्यथा । अनुपचरितासद्भूतव्यवहारेण द्रव्यबन्धं तथैवाशुद्धनिश्चयेन भावबन्धं तथा नयद्वयेन द्रव्यभावमोक्षमपि यद्यपि जीवः करोति तथापि शुद्धपारिणामिकपरमभावग्राहकेन शुद्धनिश्चयनयेन न करोत्येव भणति । कोऽसौ । निश्चय इति । अत्र य एव शुद्ध-**

भगवान्‌ने ऐसा कहा है ॥ **भावार्थ**—आकुलता रहित पारमार्थिक वीतराग सुखसे पराङ्मुख (उलटा) जो संसारके सुख दुःख यद्यपि अशुद्ध निश्चयनयकर जीवसम्बंधी है, तो भी शुद्ध निश्चयनयकर जीवने उपजाये नहीं हैं, इसलिये जीवके नहीं हैं, कर्म-संयोगकर उत्पन्न हुए हैं और आत्मा तो वीतरागनिर्विकल्पसमाधिमें स्थिर हुआ वस्तुको वस्तुके स्वरूप देखता है, जानता है, रागादिकरूप नहीं होता, उपयोगरूप है, ज्ञाता द्रष्टा है, परम आनन्दरूप है । यहाँ पारमार्थिक सुखसे उलटा जो इन्द्रियजनित संसारका सुख दुःख आदि विकल्प समूह है वह त्यागने योग्य है, ऐसा भगवान्‌ने कहा है. यह तात्पर्य है ॥६४॥

आगे निश्चयनयकर बंध और मोक्ष कर्मजनित ही है, कर्मके योगसे बंध और कर्मके वियोगसे मोक्ष है, ऐसा कहते हैं—[**जीव**] हे जीव [**बंधमपि**] बंधको [**मोक्षमपि**] और मोक्षको [**सकलं**] सबको [**जीवानां**] जीवोंके [**कर्म**] कर्म ही [**जनयति**] करता है, [**आत्मा**] आत्मा [**किमपि**] कुछ भी [**नैव करोति**] नहीं करता, [**निश्चयः**] निश्चयनय [**एवं**] ऐसा [**भणति**] कहता है, अर्थात् निश्चयनयसे भगवान्‌ने ऐसा कहा है ॥ **भावार्थ**—अनादि कालको संबंधवाली अयथार्थ-स्वरूप अनुपचरितासद्भूतव्यवहारनयसे ज्ञानावरणादि द्रव्यकर्मबंध और अशुद्धनिश्चयनयसे रागादि भावकर्मके बंधको तथा दोनों नयोंसे द्रव्यकर्म भावकर्मकी मुक्तिको यद्यपि जीव करता है, तो भी शुद्धपारिणामिक परमभावके ग्रहण करनेवाले शुद्धनिश्चयनयसे नहीं करता है, बंध और मोक्षसे रहित है, ऐसा भगवान्‌ने कहा है । यहाँ जो शुद्धनिश्चयनयकर बन्ध और मोक्षका कर्ता नहीं, वही शुद्धात्मा

निश्चयेन बन्धमोक्षौ न करोति स एव शुद्धात्मोपादेय इति भावार्थः ॥६५॥

अथ स्थलसंख्याबाह्यं प्रक्षेपकं कथयति—

सो णत्थि त्ति पएसो चउरासी-जोणि-लक्ख-मज्झम्मि ।
जिण-वयणं ण लहंतो जत्थ ण डुलुडुल्लिओ जीवो ॥६५*१॥

स नास्ति इति प्रदेशः चतुरशीतियोनिलक्षमध्ये ।
जिनवचनं न लभमानः यत्र न भ्रमितः जीवः जावः ॥६५*१॥

सो णत्थि त्ति पएसो स प्रदेशो नास्त्यत्र जगति । स किम् । चउरासीजोणिलक्खमज्झम्मि जिणवयणं ण लहंतो जत्थ ण डुलडुल्लिओ जीवो चतुरशीतियोनिलक्षेषु मध्ये भूत्वा जिनवचनमलभमानो यत्र न भ्रमितो जीव इति । तथाहि । भेदाभेदरत्नत्रयप्रतिपादकं जिनवचनमलभमानः सन्नयं जीवोऽनादिकाले यत्र चतुरशीतियोनिलक्षेषु मध्ये भूत्वा न भ्रमितः सोऽत्र कोऽपि प्रदेशो नास्ति इति । अत्र यदेव भेदाभेदरत्नत्रयप्रतिपादकं जिनवचनमलभमानो भ्रमितो जीवस्तदेवोपादेयात्मसुखप्रतिपादकत्वादुपादेयमिति तात्पर्यार्थः ॥६५*१॥

अथात्मा पङ्गुवत् स्वयं न याति न चैति कर्मैव नयत्यानयति चेति कथयति—

अप्पा पंगुह अणुहरइ अप्पु ण जाइ ण एइ ।
भुवणत्तयहँ वि मज्झि जिय विहि आणइ विहि णेइ ॥६६॥

आत्मा पङ्गोः अनुहरति आत्मा न याति न आयाति ।
भुवनत्रयस्य अपि मध्ये जीव विधिः आनयति विधिः नयति ॥६६॥

अप्पा पंगुह अणुहरइ अप्पु ण जाइ ण एइ आत्मा पङ्गोरनुहरति सदृशो भवति [1]अयमात्मा न याति न चागच्छति । क्व । भुवणत्तयहं वि मज्झि जिय विहि

आराधने योग्य है ॥६५॥

ऐसे बहिरात्मा।अन्तरात्मा परमात्मारूप तीन प्रकारके आत्माका जिसमे कथन है, ऐसे पहले अधिकारमें मिथ्यादृष्टिको भावनासे रहित जा सम्यग्दृष्टिकी भावना उसकी मुख्यतासे आठ दोहा-सूत्र कहे । आगे भेदविज्ञानको मुख्यतासे "अप्पा संजमु" इत्यादि इकतीस दोहापर्यंत क्षेपक-सूत्रोंको छोड़कर पहला अधिकार पूर्ण करते हुए व्याख्यान करते है, उसमे भी जो शिष्यने प्रश्न किया, कि यदि पुण्य पापादिरूप आत्मा नहो है, तो कैसा है ? ऐसे प्रश्नका श्रीगुरु समाधान करते है— [आत्मा] निज गुण-पर्यायका धारक ज्ञानस्वरूप चिदानन्द ही [संयम.] संयम है, [शीलं तपः] शील है, तप है, [आत्मा] आत्मा [दर्शन ज्ञानं] दर्शनज्ञान है, और [आत्मानं जानन्] अपनेको जानता अनुभवता हुआ [आत्मा] आत्मा [शाश्वतमोक्षपदं] अविनाशी सुखका स्थान मोक्षका मार्ग है । इसो कथनको विशेषताकर कहते है ॥ भावार्थ—पाँच इन्द्रियों और मनका रोकना व छह कायके जीवोंको दयास्वरूप ऐसे इन्द्रियसयम तथा प्राणसयम इन दोनोके बलसे साध्य-साधक भावकर निश्चयसे अपने शुद्धात्मस्वरूपमे स्थिर होनेसे आत्माको संयम कहा गया है, बहिरग सहकारी निश्चय शोलका कारणरूप जो काल क्रोधादिके त्यागरूप व्रतकी रक्षा वह व्यवहार शोल है, और निश्चयनयकर अन्तरंगमें अपने शुद्धात्मद्रव्यका निर्मल अनुभव वह शोल कहा जाता है, सो शीलरूप आत्मा ही कहा गया है, बाह्य सहकारी कारणभूत जो अनशनादि बारह प्रकारका तप है, उससे तथा निश्चयकर अन्तरंगमें सब परद्रव्यकी इच्छाके रोकनेसे परमात्मस्वभाव (निजस्वभाव) मे

येन परमात्मस्वभावे प्रतपनाद्विजयनात्तपश्चरणं भवति। स्वशुद्धात्मैवोपादेय इति रुचिकरणान्निश्चयसम्यक्त्वं भवति। वीतरागस्वसंवेदनज्ञानानुभवनान्निश्चयज्ञानं भवति। मिथ्यात्वरागादिसमस्तविकल्पजालत्यागेन परमात्मतत्त्वे परमसमरसीभावपरिणमनाच्च मोक्षमार्गो भवतीति। अत्र बहिरङ्गद्रव्येन्द्रियसंयमादिप्रतिपादनादभ्यन्तरे शुद्धात्मानुभूतिरूपभावसंयमादिपरिणमनादुपादेयसुखसाधकत्वादात्मैवोपादेय इति तात्पर्यार्थः ॥९३॥

अथ स्वशुद्धात्मसंवित्तिं विहाय निश्चयनयेनान्यद्दर्शनज्ञानचारित्रं नास्तीत्यभिप्रायं मनसि संप्रधार्य सूत्रं कथयति--

अण्णु जि दंसणु अत्थि ण वि अण्णु जि अत्थि ण णाणु ।
अण्णु जि चरणु ण अत्थि जिय मेल्लिवि अप्पा जाणु ॥९४॥

अन्यद् एव दर्शनं अस्ति नापि अन्यदेव अस्ति न ज्ञानं ।
अन्यद् एव चरणं न अस्ति जीव मुक्त्वा आत्मानं जानीहि ॥९४॥

अण्णु जि दंसणु अत्थि ण वि अण्णु जि अत्थि ण णाणु अण्णु जि चरणु ण अत्थि जिय अन्यदेव दर्शनं नास्ति अन्यदेव ज्ञानं नास्ति अन्यदेव चरणं नास्ति हे जीव। किं कृत्वा। मेल्लिवि अप्पा जाणु मुक्त्वा। कम्। आत्मानं जानीहीति। तथाहि यद्यपि षड्द्रव्यपञ्चास्तिकायसप्ततत्त्वनवपदार्थाः साध्यसाधकभावेन निश्चयसम्यक्त्वहेतुत्वाद्व्यवहारेण सम्यक्त्वं भवति, तथापि निश्चयेन वीतरागपरमा-

---

प्रतापरूप तिष्ठ रहा है, इस कारण और समस्त विभावपरिणामोंके जीतनेसे आत्मा ही 'तपश्चरण' है, और आत्मा ही निजस्वरूपकी रुचिरूप सम्यक्त्व है, वह सर्वथा उपादेयरूप है, इससे सम्यग्दर्शन आत्मा ही है, अन्य कोई नहीं है, वीतराग स्वसंवेदनज्ञानके अनुभवसे आत्मा ही है, अन्य कोई नहीं है, वीतरागसंवेदनज्ञानके अनुभवसे आत्मा ही निश्चयज्ञानरूप है, और मिथ्यात्व रागादि समस्त विकल्पजालको त्यागकर परमात्मतत्त्वमें परमसमरसीभावके परिणमनसे आत्मा ही मोक्षमार्ग है। तात्पर्य यह है कि बहिरंग द्रव्येन्द्रिय-संयमादिके पालनेमें अन्तरंगमें शुद्धात्माके अनुभवरूप भावसंयमादिकके परिणमनसे उपादेयसुख जो अतींद्रियसुख उसके साधकपनेसे आत्मा ही उपादेय है ॥ ९३ ॥

आगे निज शुद्धात्मस्वरूपको छोड़कर निश्चयनयसे दूसरा कोई दर्शन ज्ञान चारित्र नहीं है, इस अभिप्रायको मनमें रखकर गाथा-सूत्र कहते है---[जीव] हे जीव [आत्मानं] आत्माको [मुक्त्वा] छोड़कर [अन्यदपि] दूसरा कोई भी [दर्शनं] दर्शन [न एव] नहीं है, [अन्यदपि] अन्य कोई [ज्ञानं न अस्ति] ज्ञान नहीं है, [अन्यद् एव चरणं नास्ति] अन्य कोई चरित्र नहीं है, ऐसा [जानीहि] तू जान, अर्थात् आत्मा ही दर्शन ज्ञान चारित्र है, ऐसा सन्देह रहित जानो ॥ **भावार्थ**---यद्यपि छह द्रव्य, पाँच अस्तिकाय, सात तत्त्व, नौ पदार्थका श्रद्धान कार्य-कारणभावसे निश्चयसम्यक्त्वका कारण होनेसे व्यवहारसम्यक्त्व कहा जाता है, अर्थात् व्यवहार साधक है, निश्चय साध्य है, तो भी निश्चयनयकर एक वीतराग परमानन्दस्वभाववाला शुद्धात्मा ही उपादेय है, ऐसा

नन्दैकस्वभावः शुद्धात्मोपादेय इति रुचिरूपपरिणामपरिणतशुद्धात्मैव निश्चयसम्यक्त्वं भवति । यद्यपि निश्चयस्वसंवेदनज्ञानसाधकत्वात्तु व्यवहारेण शास्त्रज्ञानं भवति, तथापि निश्चयनयेन वीतरागस्वसंवेदनज्ञानपरिणतः शुद्धात्मैव निश्चयज्ञानं भवति । यद्यपि निश्चयचारित्रसाधकत्वान्मूलोत्तरगुणा व्यवहारेण चारित्रं भवति, तथापि शुद्धात्मानुभूतिरूपवीतरागचारित्रपरिणतः स्वशुद्धात्मैव निश्चयनयेन चारित्रं भवतीति । अत्रोक्तलक्षणेऽभेदरत्नत्रयपरिणतः परमात्मैवोपादेय इति भावार्थः ॥९४॥

अथ निश्चयेन वीतरागभावपरिणतः स्वशुद्धात्मैव निश्चयतीर्थः निश्चयगुरुर्निश्चयदेव इति कथयति—

अण्णु जि तित्थु म जाहि जिय अण्णु जि गुरुउ म सेवि ।
अण्णु जि देउ म चिंति तुहुँ अप्पा विमलु मुएवि ॥९५॥

अन्यद् एव तीर्थं मा याहि जीव अन्यद् एव गुरुं मा सेवस्व ।
अन्यद् एव देवं मा चिन्तय त्वं आत्मानं विमलं मुक्त्वा ॥९५॥

अण्णु जि तित्थु म जाहि जिय अण्णु जि गुरुउम सेवि अण्णु जि देउ म चिंति तुहुं अन्यदेव तीर्थं मा गच्छ हे जीव अन्यदेव गुरुं मा सेवस्व अन्यदेव देवं मा चिन्तय त्वम् । किं कृत्वा । अप्पा विमलु मुएवि मुक्त्वा त्यक्त्वा । कम् । आत्मानम् । कथंभूतम् । विमलं रागादिरहितमिति । तथाहि । यद्यपि व्यवहारनयेन निर्वाणस्थानचैत्यचैत्यालयादिकं तीर्थभूतपुरुषगुणस्मरणार्थं तीर्थं भवति, तथापि वीतरागनिर्विकल्प-

---

रुचिरूप परिणामसे परिणत हुआ शुद्धात्मा ही निश्चयसम्यक्त्व है, यद्यपि निश्चयस्वसंवेदनज्ञानका साधक होनेसे व्यवहारनयकर शास्त्रका ज्ञान भी ज्ञान है, तो भी निश्चयनयकर वीतरागस्वसंवेदनज्ञानरूप परिणत हुआ शुद्धात्मा ही निश्चयज्ञान है। यद्यपि निश्चयचारित्रके साधक होनेसे अट्ठाईस मूलगुण, चौरासी लाख उत्तरगुण, व्यवहारनयकर चारित्र कहे जाते है, तो भी शुद्धात्मानुभूतिरूप वीतराग-चारित्रको परिणत हुआ निज शुद्धात्मा ही निश्चयनयकर चारित्र है। तात्पर्य यह है, कि अभेदरूप परिणत हुआ परमात्मा ही ध्यान करने योग्य है ॥९४॥

आगे निश्चयनयकर वीतरागभावरूप परिणत हुआ निज शुद्धात्मा ही निश्चयतीर्थ, निश्चयगुरु, निश्चयदेव है, ऐसा कहते है—[**जीव**] हे जीव [**त्वं**] तू [**अन्यद् एव**] दूसरे [**तीर्थं**] तीर्थको [**मा याहि**] मत जावे, [**अन्यद् एव**] दूसरे [**गुरुं**] गुरुको [**मा सेवस्व**] मत सेवे, [**अन्यद् एव**] अन्य [**देवं**] देवको [**मा चिंतय**] मत ध्यावे, [**आत्मानं विमलं**] रागादि मल रहित आत्माको [**मुक्त्वा**] छोड़कर अर्थात् अपना आत्मा ही तीर्थ है, वहाँ रमण कर, आत्मा ही गुरु है, उसकी सेवा कर, और आत्माही देव है, उसीकी आराधना कर। अपने सिवाय दूसरेका सेवन मत करे, इसी कथनको विस्तारसे कहते है ॥ **भावार्थ**—यद्यपि व्यवहारनयसे मोक्षके स्थानक सम्मेदशिखर आदि व जिनप्रतिमा जिनमन्दिर आदि तीर्थ हैं, क्योंकि वहाँसे गये महान् पुरुषोंके गुणोंकी याद होती है, तो भी वीतराग निर्विकल्पसमाधिरूप छेद रहित जहाजकर संसाररूपी

समाधिरूपनिश्छिद्रपोतेन संसारसमुद्रतरणसमर्थत्वान्निश्चयनयेन स्वात्मतत्त्वमेव तीर्थं भवति यदुपदेशात्पारंपर्येण परमात्मतत्त्वलाभो भवतीति । व्यवहारेण शिक्षादीक्षादायको यद्यपि गुरुर्भवति, तथापि निश्चयनयेन पञ्चेन्द्रियविषयप्रभृतिसमस्तविभावपरिणामपरित्यागकाले संसारविच्छित्तिकारणत्वात् स्वशुद्धात्मैव गुरुः । यद्यपि प्राथमिकापेक्षया सविकल्पापेक्षया चित्तस्थितिकरणार्थं तीर्थंकरपुण्यहेतुभूतं साध्यसाधकभावेन परंपरया निर्वाणकारणं च जिनप्रतिमादिकं व्यवहारेण देवो भण्यते, तथापि निश्चयनयेन · परमाराध्यत्वाद्वीतरागनिर्विकल्पत्रिगुप्तपरमसमाधिकाले स्वशुद्धात्मस्वभाव एव देव इति । एवं निश्चयव्यवहाराभ्यां साध्यसाधकभावेन तीर्थगुरुदेवतास्वरूपं ज्ञातव्यमिति भावार्थः ॥९५॥

अथ निश्चयेनात्मसंवित्तिरेव दर्शनमिति प्रतिपादयति—

अप्पा दंसणु केवलु वि अण्णु सव्वु ववहारु ।
एक्कु जि जोइय झाइयइ जो तइलोयहं सारु ॥९६॥
आत्मा दर्शनं केवलोऽपि अन्यः सर्वः व्यवहारः ।
एक एव योगिन् ध्यायते यः त्रैलोक्यस्य सारः ॥९६॥

अप्पा दंसणु केवलु वि आत्मा दर्शनं सम्यक्त्वं भवति । कथंभूतोऽपि । केवलोऽपि । अण्णु सव्वु ववहारु अन्यः शेषः सर्वोऽपि व्यवहारः । तेन कारणेन एक्कु

समुद्रके तरनेको समर्थ जो निज आत्मतत्त्व है, वही निश्चयकर तीर्थ है, उसके उपदेश-परम्परासे परमात्मतत्त्वका लाभ होता है । यद्यपि व्यवहारनयकर दीक्षा शिक्षाका देनेवाला दिगंबर गुरु होता है, तो भी निश्चयनयकर विषय कषाय आदिक समस्त विभावपरिणामोंके त्यागनेके समय निज-शुद्धात्मा ही गुरु है, उसीसे संसारकी निवृत्ति होती है । यद्यपि प्रथम अवस्थामें चित्तकी स्थिरताके लिये व्यवहारनयकर जिनप्रतिमादिक देव कहे जाते हैं, और वे परंपरासे निर्वाणके कारण है, तो भी निश्चयनयकर परम आराधने योग्य वीतराग निर्विकल्पपरमसमाधिके समय निज शुद्धात्मभाव ही देव हैं, अन्य नहीं । इस प्रकार निश्चय व्यवहारनयकर साध्य-साधक-भावसे तीर्थ गुरु देवका स्वरूप जानना चाहिये । निश्चयदेव निश्चयगुरु निश्चयतीर्थ निज आत्मा ही है, वही साधने योग्य है, और व्यवहारदेव जिनेन्द्र तथा उनकी प्रतिमा, व्यवहारगुरु महामुनिराज, व्यवहारतीर्थ सिद्धक्षेत्रादिक ये सब निश्चयके साधक है, इसलिये प्रथम अवस्थामे आराधने योग्य हैं । तथा निश्चयनयकर ये सब पदार्थ है, इनसे साक्षात् सिद्धि नही है, परम्परासे है । यहाँ श्रीपरमात्मप्रकाश अध्यात्म-ग्रन्थमें निश्चयदेव गुरु तीर्थ अपना आत्मा ही है, उसे आराधनकर अनत सिद्ध हुए और होवेंगे, ऐसा सारांश हुआ ॥९५॥

आगे निश्चयनयकर आत्मस्वरूप ही सम्यग्दर्शन है—[केवलः आत्मा अपि] केवल (एक) आत्मा ही [दर्शनं] सम्यग्दर्शन है, [अन्यः सर्वः व्यवहारः] दूसरा सब व्यवहार है, इसलिये [योगिन्] हे योगी [एक एव ध्यायते] एक आत्माही ध्यान करने योग्य है, [यः त्रैलोक्यस्य

१. पाठान्तरः—य = त ।

जि जोइय झाइयइ हे योगिन्, एक एव ध्यायते । यः आत्मा कथंभूतः । जो तइं-लोयहं सारु यः परमात्मा त्रैलोक्यस्य सारभूत इति । तद्यथा । वीतरागचिदानन्दैकस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयलक्षणनिर्विकल्पत्रिगुप्तिसंमाधिपरिणतो निश्चयनयेन स्वात्मैव सम्यक्त्वं अन्यः सर्वोऽपि व्यवहारस्तेन कारणेन स एव ध्यातव्य इति । अत्र यथा द्राक्षाकर्पूरश्रीखण्डादिबहुद्रव्यैर्निष्पन्नमपि पानकमभेदविवक्षया कृत्वैकं भण्यते, तथा शुद्धात्मानुभूतिलक्षणैर्निश्चयसम्यग्दर्शनज्ञानचारित्रैर्बहुभिः परिणतो अनेकोऽप्यात्मा त्वभेदविवक्षया एकोऽपि भण्यत इति भावार्थः। तथा चोक्तं अभेदरत्नत्रयलक्षणम्—"दर्शनमात्मविनिश्चितिरात्मपरिज्ञानमिष्यते बोधः । स्थितिरात्मनि चारित्रं कुत एतेभ्यो भवति बन्धः ॥" ॥९६॥

अथ निर्मलमात्मानं ध्यायस्व येन ध्यातेनान्तर्मुहूर्तेनैव मोक्षपदं लभ्यत इति निरूपयति—

अप्पा झायहि णिम्मलउ किं बहुएँ अण्णेण ।
जो झायंतहँ परम-पउ लब्भइ एक्क-खणेण ॥९७॥

आत्मानं ध्यायस्व निर्मलं कि बहुना अन्येन ।
यं ध्यायमानानां परमपदं लभ्यते एकक्षणेन ॥९७॥

अप्पा झायहि णिम्मलउ आत्मानं ध्यायस्व । कथंभूतं निर्मलम् । किं बहुएं अण्णेण किं बहुनान्येन शुद्धात्मबहिर्भूतेन रागादिविकल्पजालमालाप्रपञ्चेन । जो झायंतह परमपउ लब्भइ यं परमात्मानं ध्यायमानानां परमपद लभ्यते । केन

सार] जो कि तीन लोकमें सार है ॥ भावार्थ—वीतराग चिदानंद अखड स्वभाव, आत्मतत्त्वका सम्यक् श्रद्धान ज्ञान अनुभवरूप जो अभेदरत्नत्रय वही जिसका लक्षण है, तथा मनोगुप्ति आदि तीन गुप्तिरूप समाधिमे लीन निश्चयनयसे निज आत्मा ही निश्चयसम्यक्त्व है, अन्य सब व्यवहार है। इस कारण आत्मा ही ध्यावने योग्य है। जैसे दाख, कपूर, चन्दन वगैरह बहुत द्रव्योसे बनाया गया जो पीनेका रस वह यद्यपि अनेक रसरूप है, तो भी अभेदनयकर एक पानवस्तु कही जाती है, उसी तरह शुद्धात्मानुभूतिस्वरूप निश्चयसम्यग्दर्शन ज्ञान चारित्रादि अनेक भावोंसे परिणत हुआ आत्मा अनेकरूप है, तो भी अभेदनयकी विवक्षासे आत्मा एक ही वस्तु है, यही अभेदरत्नत्रयका स्वरूप जैनसिद्धांतोमे हरएक जगह कहा है—"दर्शनमित्यादि" इसका अर्थ ऐसा है, कि आत्माका निश्चय वह सम्यग्दर्शन है, आत्माका जानना वह सम्यग्ज्ञान है, और आत्मामे निश्चल होना वह सम्यक्चारित्र है, यह निश्चयरत्नत्रय साक्षात् मोक्षका कारण है, इनसे बंध कैसे हो सकता है ? कभी नहीं हो सकता ॥९६॥

आगे ऐसा कहते है, कि जो निर्मल आत्माको ही ध्यावो, जिसके ध्यान करनेसे अन्तर्मुहूर्तमें (तात्काल) मोक्षपदकी प्राप्ति हो—हे योगी तू [निर्मलं आत्मानं] निर्मल आत्माका ही [ध्यायस्व] ध्यान कर, [अन्येन बहुना किं] और बहुत पदार्थोंसे क्या। देश काल पदार्थ आत्मासे भिन्न है, उनसे कुछ प्रयोजन नहीं है, रागादि-विकल्पजालके समूहोंके प्रपंचसे क्या फायदा, एक निज स्वरूप-

[1]कारणभूतेन । एक्कखणेण एकक्षणेनान्तर्मुहूर्तेनापि । तथाहि । समस्तशुभाशुभसंकल्पविकल्परहितेन स्वशुद्धात्मतत्त्वध्यानेनान्तर्मुहूर्तेन मोक्षो लभ्यते तेन कारणेन तदेव निरन्तरं ध्यातव्यमिति । तथा चोक्तं बृहदाराधनाशास्त्रे । षोडशतीर्थंकराणां एकक्षणे तीर्थंकरोत्पत्तिवासरे प्रथमे श्रामण्यबोधसिद्धिः अन्तर्मुहूर्तेन निर्वृत्ता । अत्राह शिष्यः । यद्यन्तर्मुहूर्तपरमात्मध्यानेन मोक्षो भवति तर्हि इदानीमस्माकं तद्ध्यानं कुर्वाणानां किं न भवति । परिहारमाह । यादृशं तेषां प्रथमसंहननसहितानां शुक्लध्यानं भवति तादृशमिदानीं नास्तीति । तथा चोक्तम्—"अत्रेदानीं निषेधन्ति शुक्लध्यानं जिनोत्तमाः । धर्मध्यानं पुनः प्राहुः श्रेणिभ्यां प्राग्विवर्तनम् ।।" अत्र येन कारणेन परमात्मध्यानेनान्तर्मुहूर्तेन मोक्षो लभ्यते तेन कारणेन संसारस्थितिच्छेदनार्थमिदानीमपि तदेव ध्यातव्यमिति भावार्थः ।।९७।।

अथ यस्य वीतरागमनसि शुद्धात्मभावना नास्ति तस्य शास्त्रपुराणतपश्चरणानि किं कुर्वन्तीति कथयति—

अप्पा णिय-मणि णिम्मलउ णियमें वसइ ण जासु ।
सत्थ-पुराणइँ तव-चरणु मुक्खु वि करहिँ कि तासु ।।९८।।

आत्मा निजमनसि निर्मलः नियमेन वसति न यस्य ।
शास्त्रपुराणानि तपश्चरणं मोक्षं अपि कुर्वन्ति किं तस्य ।।९८।।

अप्पा णियमणि णिम्मलउ णियमे वसइ ण जासु आत्मा निजमनसि निर्मलो

को ध्यावो, [यं] जिस परमात्माके [ध्यायमानानां] ध्यान करनेवालोंको [एकक्षणेन] क्षणमात्रमें [परमपदं] मोक्षपद [लभ्यते] मिलता है ।। भावार्थ—सब शुभाशुभ संकल्प विकल्प रहित निजशुद्ध आत्मस्वरूपके ध्यान करनेसे शीघ्र ही मोक्ष मिलता है, इसलिये वही हमेशा ध्यान करने योग्य है । ऐसा ही बृहदाराधना-शास्त्रमें कहा है । सोलह तीर्थंकरोंके एक ही समय तीर्थंकरोंके उत्पत्तिके दिन पहले चारित्र ज्ञानकी सिद्धि हुई, फिर अंतर्मुहूर्तमें मोक्ष हो गया । यहाँपर शिष्य प्रश्न करता है, कि यदि परमात्माके ध्यानसे अन्तर्मुहूर्तमें मोक्ष होता है, तो इस समय ध्यान करनेवाले हम लोगोंको क्यों नहीं होता ? उसका समाधान इस तरह है—कि जैसा निर्विकल्पशुक्लध्यान वज्रवृषभनाराचसंहननवालोंको चौथे कालमें होता है, वैसा अब नहीं हो सकता । ऐसा ही दूसरे ग्रन्थोंमें कहा है—"अत्रेत्यादि" इसका अर्थ यह है, कि श्रीसर्वज्ञवीतरागदेव इस भरतक्षेत्रमें इस पंचमकालमें शुक्लध्यानका निषेध करते है, इस समय धर्मध्यान हो सकता है, शुक्लध्यान नहीं हो सकता । उपशमश्रेणी और क्षपकश्रेणी दोनों ही इस समय नहीं है, सातवां गुणस्थानतक गुणस्थान है, ऊपरके गुणस्थान नहीं हैं । इस जगह तात्पर्य यह है, कि जिस कारण परमात्माके ध्यानसे अन्तर्मुहूर्तमें मोक्ष होता है, इसलिये संसारकी स्थिति घटानेके वास्ते अब भी धर्मध्यानका आराधन करना चाहिये, जिससे परम्परया मोक्ष भी मिल सकता है ।।९७।।

आगे ऐसा कहते हैं, कि जिसके राग रहित मनमें शुद्धात्माकी भावना नहीं है, उसके शास्त्र

---

१. कारणभूतेन = करणभूतेन ।

नियमेन वसति तिष्ठति न यस्य सत्थपुराणइं तवचरणु मुक्खु वि करहिं कि तासु **शास्त्रपुराणानि तपश्चरणं च मोक्षमपि किं कर्वन्ति तस्येति । तद्यथा । वीतराग-निर्विकल्पसमाधिरूपा यस्य शुद्धात्मभावना नास्ति तस्य शास्त्रपुराणतपश्चरणानि निरर्थकानि भवन्ति । तर्हि किं सर्वथा निष्फलानि । नैवम् । यदि वीतरागसम्यक्त्व-रूपस्वशुद्धात्मोपादेयभावनासहितानि भवन्ति तदा मोक्षस्यैव बहिरङ्गसहकारिकार-णानि भवन्ति तदभावे पुण्यबन्धकारणानि भवन्ति ।** मिथ्यात्वरागादिसहितानि पापबन्ध-कारणानि च विद्यानुवादसंज्ञितदशमपूर्वश्रुतं पठित्वा भर्गपुरुषादिवदिति भावार्थः ॥९८॥

अथात्मनि ज्ञाते सर्वं ज्ञातं भवतीति दर्शयति--

जोइय अप्पेँ जाणिएण जगु जाणियउ हवेइ ।
अप्पहँ केरइ भावडइ बिंबिउ जेण वसेइ ॥९९॥

योगिन् आत्मना ज्ञातेन जगत् ज्ञातं भवति ।
आत्मनः संबन्धिनिर्भावे बिम्बितं येन वसति ॥९९॥

जोइय अप्पे जाणिएण **हे योगिन् आत्मना ज्ञातेन । किं भवति ।** जगु जाणियउ हवेइ **जगत्त्रिभुवनं ज्ञातं भवति । कस्मात् ।** अप्पहं केरइ भावडइ बिंबिउ जेण वसेइ **आत्मनः संबन्धिनि भावे केवलज्ञानपर्याये बिम्बितं प्रतिबिम्बितं येन कारणेन वसति**

पुराण तपश्चरण क्या कर सकते हैं ? अर्थात् कुछ भी नहीं कर सकते—[**यस्य**] जिसके [**निज-मनसि**] निज मनमें [**निर्मलः आत्मा**] निर्मल आत्मा [**नियमेन** निश्चयसे [**न वसति**] नहीं रहता, [**तस्य**] उस जीवक [**शास्त्रपुराणानि**] शास्त्र पुराण [**तपश्चरणमपि**] तपस्या भी [**किं**] क्या [**मोक्षं**] मोक्षको [**कुर्वंति**] कर सकते हैं ? कभी नहीं कर सकते ॥ **भावार्थ**—वीतरागनिर्वि-कल्पसमाधिरूप शुद्धभावना जिसके नहीं हैं, उसके शास्त्र पुराण तपश्चरणादि सब व्यर्थ है । यहां शिष्य प्रश्न करता है, कि क्या बिलकुल ही निरर्थक है । उसका समाधान ऐसा है, कि बिलकुल तो नहीं है, लेकिन वीतराग सम्यक्त्वरूप निज शुद्धात्माकी भावना सहित हो, तब तो मोक्षके ही बाह्य सहकारी कारण हैं, यदि वे वीतरागसम्यक्त्वके अभावरूप हों, तो पुण्यबंधके कारण है, और जो मिथ्यात्वरागादि सहित हों, तो पापबंधके कारण है, जैसे कि रुद्र वगैरह विद्यानुवादनामा दशवें पूर्वतक शास्त्र पढ़कर भ्रष्ट हो जाते है ॥९८॥

आगे जिन भव्यजीवोंने आत्मा जान लिया, उन्होंने सब जाना ऐसा दिखलाते है—[**योगिन्**] हे योगी [**आत्मना ज्ञातेन**] एक अपने आत्माके जाननेसे [**जगत् ज्ञातं भवति**] यह तीन लोक जाना जाता है [**येन**] क्योंकि [**आत्मनः संबंधिनि भावे**] आत्माके भावरूप केवलज्ञानमे [**बिम्बितं**] यह लोक प्रतिबिंबित हुआ [**वसति**] बस रहा है ॥ **भावार्थ**—वीतराग निर्विकल्पस्वसंवेदनज्ञानसे शुद्धात्मतत्त्वके जाननेपर समस्त द्वादशांग शास्त्र जाना जाता है । क्योंकि जैसे रामचन्द्र पांडव भरत सगर आदि महान् पुरुष भी जिनराजकी दीक्षा लेकर फिर द्वादशांगको पढ़कर द्वादशांग पढ़नेका

तिष्ठतीति । अयमर्थः । वीतरागनिर्विकल्पस्वसंवेदनज्ञानेन परमात्मतत्त्वे ज्ञाते सति द्वादशाङ्गागमस्वरूपं ज्ञातं भवति । कस्मात् । यस्माद्राघवपाण्डवादयो महापुरुषा जिनदीक्षां गृहीत्वा द्वादशाङ्गं पठित्वा द्वादशाङ्गाध्ययनफलभूते निश्चयरत्नत्रयात्मके परमात्मध्याने तिष्ठन्ति तेन कारणेन वीतरागस्वसंवेदनज्ञानेन निजात्मनि ज्ञाते सति सर्वं ज्ञातं भवतीति । अथवा निर्विकल्पसमाधिसमुत्पन्नपरमानन्दसुखरसास्वादे जाते सति पुरुषो जानाति । किं जानाति । वेत्ति मम स्वरूपमन्यद्देहरागादिकं परमिति तेन कारणेनात्मनि ज्ञाते सर्वं ज्ञातं भवति । अथवा आत्मा कर्ता श्रुतज्ञानरूपेण व्याप्तिज्ञानेन करणभूतेन सर्वं लोकालोकं जानाति तेन कारणेनात्मनि ज्ञाते सर्वं ज्ञातं भवतीति । अथवा वीतरागनिर्विकल्पत्रिगुप्तिसमाधिबलेन केवलज्ञानोत्पत्तिबीजभूतेन केवलज्ञाने जाते सति दर्पणे बिम्बवत् सर्वं लोकालोकस्वरूपं विज्ञायत इति हेतोरात्मनि ज्ञाते सर्वं ज्ञातं भवतीति । अत्रेदं व्याख्यानचतुष्टयं ज्ञात्वा बाह्याभ्यन्तरपरिग्रहत्यागं कृत्वा सर्वतात्पर्येण निजशुद्धात्मभावना कर्तव्येति तात्पर्यम् । तथा चोक्तं समयसारे—"जो पस्सइ अप्पाणं अबद्धपुट्ठं अणण्णमविसेसं । अपदेससुत्तमज्झं पस्सइ जिणसासणं सव्वं ।।" ।।९९।।

अथैतदेव समर्थयति—

फल निश्चयरत्नत्रयस्वरूप जो शुद्धपरमात्मा उसके ध्यानमे लीन हुए तिष्ठे थे । इसलिये वीतरागस्वसंवेदनज्ञानकर अपने आत्माका जानना ही सार है, आत्माके जाननेसे सबका जानपना सफल होता है, इस कारण जिन्होंने अपनी आत्मा जानी उन्होंने सबको जाना । अथवा निर्विकल्पसमाधिसे उत्पन्न हुआ जो परमानंद सुखरस उसके आस्वाद होनेपर ज्ञानी पुरुष ऐसा जानता है, कि मेरा स्वरूप जुदा है, और देह रागादिक मेरेसे दूसरे है, मेरे नहीं है, इसीलिये आत्माके (अपने) जाननेसे सब भेद जाने जाते हैं, जिसने अपनेको जान लिया, उसने अपनेसे भिन्न सब पदार्थ जाने । अथवा आत्मा श्रुतज्ञानरूप व्याप्तिज्ञानसे सब लोकालोकको जानता है, इसलिये आत्माके जाननेसे सब जाना गया । अथवा वीतरागनिर्विकल्प परमसमाधिके बलसे केवलज्ञानको उत्पन्न (प्रगट) करके जैसे दर्पणमे घट पटादि पदार्थ झलकते हैं, उसी प्रकार ज्ञानरूपी दर्पणमें सब लोक अलोक भासते है । इससे यह बात निश्चय हुई, कि आत्माके जाननेसे सब जाना जाता है । यहाँपर सारांश यह हुआ, कि इन चारो व्याख्यानोका रहस्य जानकर बाह्य अभ्यंतर सब परिग्रह छोड़कर सब तरहसे अपने शुद्धात्माकी भावना करनी चाहिये । ऐसा ही कथन समयसारमे श्रीकुंदकुंदाचार्यने किया है । "जो पस्सइ" इत्यादि—इसका अर्थ यह है, कि जो निकट-संसारी जीव स्वसंवेदनज्ञानकर अपने आत्माको अनुभवता, सम्यग्दृष्टिपनेसे अपनेको देखता है, वह सब जैनशासनको देखता है, ऐसा जिनसूत्रमे कहा है । कैसा वह आत्मा है ? रागादिक ज्ञानावरणादिकसे रहित है, अन्यभाव जो नर नारकादि पर्याय उनसे रहित है, विशेष अर्थात् गुणस्थान मार्गणा जीवसमास इत्यादि सब भेदोंसे रहित है । ऐसे आत्माके स्वरूपको जो देखता है, जानता है, अनुभवता है, वह सब जिनशासनका मर्म जाननेवाला है ।।९९।।

अप्प-सहावि परिट्ठियह एहउ होइ विसेसु ।
दीसइ अप्प-सहावि लहु लोयालोउ असेसु ॥१००॥
आत्मस्वभावे प्रतिष्ठितानां एष भवति विशेषः ।
दृश्यते आत्मस्वभावे लघु लोकालोकः अशेषः ॥१००॥

अप्पसहावि परिट्ठियहं **आत्मस्वभावे प्रतिष्ठितानां पुरुषाणां,** एहउ होइ विसेसु **एष प्रत्यक्षीभूतो विशेषो भवति । एष कः ।** दीसइ अप्पसहावि लहु **दृश्यते परमात्मस्वभावे स्थितानां लघु शीघ्रम् । अथवा पाठान्तरं 'दीसइ अप्पसहाउ लघु' । दृश्यते, स कः, आत्मस्वभावः कर्मतापन्नो, लघु शीघ्रम् । न केवलमात्मस्वभावो दृश्यते** लोयालोउ असेसु **लोकालोकस्वरूपमप्यशेषं दृश्यत इति । अत्र विशेषेण पूर्वसूत्रोक्तमेव व्याख्यानचतुष्टयं ज्ञातव्यं यस्मात्तस्यैव वृद्धमतसवादरूपत्वादिति भावार्थः ॥१००॥**

अतोऽमुमेवार्थं दृष्टान्तदार्ष्टान्ताभ्यां समर्थयति––

अप्पु पयासइ अप्पु परु जिम अंबरि रवि-राउ ।
जोइय एत्थु म भंति करि एहउ वत्थु-सहाउ ॥१०१॥
आत्मा प्रकाशयति आत्मान परं यथा अम्बरे रविरागः ।
योगिन् अत्र मा भ्रान्ति कुरु एष वस्तुस्वभावः ॥१०१॥

अप्पु पयासइ **आत्मा कर्ता प्रकाशयति । कम् ।** अप्पु परु **आत्मानं परं च । यथा कः किं प्रकाशयति ।** जिमुअंबरि रविराउ **यथा येन प्रकारेण अम्बरे रविरागः ।** जोइय एत्थु म भंति करि एहउ वत्थुसहाउ हे **योगिन् अत्र भ्रान्तिं मा कार्षीः, एष वस्तुस्वभावः इति । तद्यथा । यथा निर्मेघाकाशे रविरागो रविप्रकाशः स्वं परं च**

अब इसी बातका समर्थन (दृढ) करते हैं—**[आत्मस्वभावे]** आत्माके स्वभावमे **[प्रतिष्ठितानां]** लीन हुए पुरुषोके **[एष विशेष. भवति]** प्रत्यक्षमे तो यह विशेषता होती है, कि **[आत्मस्वभावे]** आत्मस्वभावमे उनको **[अशेष लोकालोक]** समस्त लोकालोक **[लघु]** शीघ्र ही **[दृश्यते]** दीख जाता है। अथवा इस जगह ऐसा भी पाठांतर है, "अप्पसहाव लहु" इसका अर्थ यह है, कि अपना स्वभाव शीघ्र दीख जाता है, और स्वभावके देखनेसे समस्त लोक भी दीखता है। यहाँपर भी विशेष करके पूर्व सूत्रकथित चारों तरहका व्याख्यान जानना चाहिये, क्योंकि यही व्याख्यान बड़े-बड़े आचार्योंने माना है ॥१००॥

आगे इसी अर्थको दृष्टातदार्ष्टान्तसे दृढ करते हैं—**[यथा]** जैसे **[अम्बरे]** आकाश मे **[रविरागः]** सूर्यका प्रकाश अपनेको और परको प्रकाशित करता है, उसी तरह **[आत्मा]** आत्मा **[आत्मानं]** अपनेका **[परं]** पर पदार्थोंको **[प्रकाशयति]** प्रकाशता है, सो **[योगिन्]** हे योगी **[अत्र]** इसमे **[भ्रांति मा कुरु]** भ्रम मत कर। **[एष वस्तुस्वभावः]** ऐसा ही वस्तुका स्वभाव है ॥ **भावार्थ**— जैसे मेघ रहित आकाशमे सूर्यका प्रकाश अपनेको और परको प्रकाशता है, उसी प्रकार वीतरागनिर्विकल्प समाधिरूप कारणसमयसारमे लीन होकर मोहरूप मेघ-समूहका नाश करके

प्रकाशयति तथा वीतरागनिर्विकल्पसमाधिरूपे कारणसमयसारे स्थित्वा मोहमेघपटले विनष्टे सति परमात्मा छद्मस्थावस्थायां वीतरागभेदभावनाज्ञानेन स्वं परं च प्रकाशयतीत्येष पश्चादर्हदवस्थारूपकार्यसमयसाररूपेण परिणम्य केवलज्ञानेन स्वं परं च प्रकाशयतीत्येष आत्मवस्तुस्वभावः संदेहो नास्तीति। अत्र योऽसौ केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपः कार्यसमयसारः स एवोपादेय इत्यभिप्रायः ॥१०१॥

अथास्मिन्नेवार्थे पुनरपि व्यक्त्यर्थं दृष्टान्तमाह—

तारायणु जलि बिंबियउ णिम्मलि दीसइ जेम।
अप्पए णिम्मलि बिंबियउ लोयालोउ वि तेम ॥१०२॥

तारागणः जले बिम्बितः निर्मले दृश्यते यथा।
आत्मनि निर्मले बिम्बितं लोकालोकमपि तथा ॥१०२॥

तारायणु जलि बिंबियउ तारागणो जले बिम्बितः प्रतिफलितः। कथंभूते जले। णिम्मलि दीसइ जेम निर्मले दृश्यते यथा। दार्ष्टान्तमाह। अप्पइ णिम्मलि बिंबियउ लोयालोउ वि तेम आत्मनि निर्मले मिथ्यात्वरागादिविकल्पजालरहिते [1]बिम्बितं लोकालोकमपि तथा दृश्यत इति। अत्र विशेषव्याख्यानं यदेव पूर्वदृष्टान्तसूत्रे व्याख्यातमत्रापि तदेव ज्ञातव्यम्। कस्मात्। अयमपि तस्य दृष्टान्तस्य दृढीकरणार्थमिति सूत्रतात्पर्यार्थः ॥१०२॥

अथात्मा परश्च येनात्मना ज्ञानेन ज्ञायते तमात्मानं स्वसंवेदनज्ञानबलेन जानीहीति कथयति—

अप्पु वि परु वि वियाणइ जें अप्पें मुणिएण।
सो णिय-अप्पा जाणि तुहुँ जोइय णाण-बलेण ॥१०३॥

यह आत्मा मुनि अवस्थामें वीतराग स्वसंवेदनज्ञानकर अपनेको और परको कुछ प्रकाशित करता है, पीछे अरहंत अवस्थारूप कार्यसमयसार स्वरूप परिणमन करके केवलज्ञानसे निज और परको सब द्रव्य क्षेत्र काल भावसे प्रकाशता है। यह आत्म-वस्तुका स्वभाव है, इसमें सन्देह नहीं समझना। इस जगह ऐसा सारांश है कि जो केवलज्ञान केवलदर्शन अनन्तसुख अनन्तवीर्यरूप कार्यसमयसार है, वही आराधने योग्य है ॥१०१॥

आगे इसी अर्थको फिर भी खुलासा करनेके लिये दृष्टान्त देकर कहते हैं—[**यथा**] जैसे [**तारागणः**] ताराओंका समूह [**निर्मले जले**] निर्मल जलमें [**बिम्बितः**] प्रतिबिम्बित हुआ [**दृश्यते**] प्रत्यक्ष दीखता है, [**तथा**] उसी तरह [**निर्मले आत्मनि**] मिथ्यात्व रागादि विकल्पोंसे रहित स्वच्छ आत्मामें [**लोकालोकं अपि**] समस्त लोक अलोक भासते हैं॥ **भावार्थ**—इसका विशेष व्याख्यान जो पहले कहा था, वही यहाँपर जानना अर्थात् जो सबका ज्ञाता दृष्टा आत्मा है। वही उपादेय है। यह सूत्र भी पहले कथनको दृढ़ करनेवाला है ॥१०२॥

आगे जिस आत्माके जाननेसे निज और पर सब पदार्थ जान जाते हैं, उसी आत्माको तू

1. पाठान्तरः—बिम्बितं = बिम्बितं

आत्मापि परः अपि विज्ञायते येन आत्मना विज्ञातेन ।
तं निजात्मानं जानीहि त्वं योगिन् ज्ञानबलेन ॥१०३॥

अप्पु वि परु वि वियाणियइ जें अप्पें मुणिएण **आत्मापि परोऽपि विज्ञायते येन आत्मना विज्ञातेन** सो णियें अप्पा जाणि तुहुं **तं निजात्मानं जानीहि त्वम्** । जोइय णाणबलेण **हे योगिन्, केन कृत्वा जानीहि । ज्ञानबलेनेति । अयमत्रार्थः । वीतराग-सदानन्दैकस्वभावेन येनात्मना ज्ञातेन स्वात्मा परोऽपि ज्ञायते तमात्मानं वीतराग-निर्विकल्पस्वसंवेदनज्ञानभावनासमुत्पन्नपरमानन्दसुखरसास्वादेन जानीहि तन्मयो भूत्वा सम्यगनुभवेति भावार्थः ॥१०३॥**

अतः कारणात् ज्ञानं पृच्छति—

णाणु पयासहि परमु महु किं अण्णे बहुएण ।
जेण णियप्पा जाणियइ सामिय एक्क-खणेण ॥१०४॥

ज्ञानं प्रकाशय परमं मम किं अन्येन बहुना ।
येन निजात्मा ज्ञायते स्वामिन् एकक्षणेन ॥१०४॥

णाणु पयासहि परमु महु **ज्ञानं प्रकाशय परमं मम** । किं अण्णे बहुएण **किमन्येन ज्ञानरहितेन बहुना** । जेण णियप्पा जाणियइ **येन ज्ञानेन निजात्मा ज्ञायते**, सामिय एक्कखणेण **हे स्वामिन् नियतकालेनैकक्षणेनेति । तथाहि ।** प्रभाकरभट्टः **पृच्छति । किं पृच्छति ।** हे **भगवन् येन वीतरागस्वसंवेदनज्ञानेन क्षणमात्रेणैवशुद्धबुद्धैकस्वभावो**

स्वसंवेदन ज्ञानके बलसे जान, ऐसा कहते हैं—[**येन आत्मना विज्ञातेन**] जिस आत्माको जाननेसे [**आत्मा अपि**] आप और [**परः अपि**] पर सब पदार्थ [**विज्ञायते**] जाने जाते हैं, [**तं निजात्मानं**] उस अपने आत्माको [**योगिन्**] हे योगी [**त्वं**] तू [**ज्ञानबलेन**] आत्मज्ञानके बलसे [**जानीहि**] जान ॥ **भावार्थ**—यहाँपर यह है, कि रागादि विकल्प-जालसे रहित सदा आनंद स्वभाव जो निज आत्मा उसके जाननेसे निज और पर सब जाने जाते हैं, इसलिये हे योगी, हे ध्यानी, तू उस आत्मा-को वीतराग निर्विकल्पस्वसंवेदनज्ञानकी भावनासे उत्पन्न परमानंद सुखरसके आस्वादसे जान, अर्थात् तन्मयी होकर अनुभव कर । स्वसंवेदन ज्ञान (आपकर अपनेको अनुभव करना) ही सार है । ऐसा उपदेश श्रीयोगीन्द्रदेवने प्रभाकरभट्टको दिया ॥१०३॥

अब प्रभाकरभट्ट महान् विनयसे ज्ञानका स्वरूप पूछता है—[**स्वामिन्**] हे भगवान्, [**येन ज्ञानेन**] जिस ज्ञानसे [**एक क्षणेन**] क्षणभरमें [**निजात्मा**] अपनी आत्मा [**ज्ञायते**] जानी जाती है, वह [**परमं ज्ञानं**] परम ज्ञान [**मम**] मेरे [**प्रकाशय**] प्रकाशित करो, [**अन्येन बहुना**] और बहुत विकल्प-जालोंसे [**किम्**] क्या फायदा ? कुछ भी नहीं ॥ **भावार्थ**—प्रभाकरभट्ट श्रीयोगींद्र-देवसे पूछता है, कि हे स्वामी, जिस वीतरागस्वसंवेदनज्ञानकर क्षणमात्रमें शुद्ध बुद्ध स्वभाव अपनी आत्मा जानी जाती है, वह ज्ञान मुझको प्रकाशित करो, दूसरे विकल्प-जालोंसे कुछ फायदा नहीं है, क्योंकि ये रागादिक विभावोंके बढ़ानेवाले हैं । सारांश यह है, कि मिथ्यात्व रागादि विकल्पोंसे रहित

निजात्मा ज्ञायते तदेव ज्ञानं कथय किमन्येन रागादिप्रवर्धकेन विकल्पजालेनेति । अत्र येनैव ज्ञानेन मिथ्यात्वरागादिविकल्परहितेन निजशुद्धात्मसंवित्तिरूपेणान्तर्मुहूर्तेनैव परमात्मस्वरूपं ज्ञायते तदेवोपादेयमिति तात्पर्यार्थः ॥१०४॥

अत ऊर्ध्वं सूत्रचतुष्टयेन ज्ञानस्वरूपं प्रकाशयति—

अप्पा णाणु मुणेहि तुहुँ जो जाणइ अप्पाणु ।
जीव-पएसहिँ तित्तिडउ णाणेँ गयण-पवाणु ॥१०५॥

आत्मानं ज्ञानं मन्यस्व त्वं यः जानाति आत्मानम् ।
जीवप्रदेशैः तावन्मात्रं ज्ञानेन गगनप्रमाणम् ॥१०५॥

अप्पा णाणु मुणेहि तुहुँ प्रभाकरभट्ट आत्मानं ज्ञानं मन्यस्व त्वम् । यः किं करोति । जो जाणइ अप्पाणु यः कर्ता जानाति । कम् । आत्मानम् । किंविशिष्टम् । जीवपएसहिं तित्तिडउ जीवप्रदेशैस्तावन्मात्रं लोकमात्रप्रदेशम् । अथवा पाठान्तरम् । 'जीवपएसहिं देहसमु' तस्यार्थो निश्चयेन लोकमात्रप्रदेशोऽपि व्यवहारेणैव संहार-विस्तारधर्मत्वाद्देहमात्रः । पुनरपि कथंभूतम् आत्मानं णाणें गयणपवाणु ज्ञानेन कृत्वा व्यवहारेण गगनमात्रं जानीहीति । तद्यथा । निश्चयनयेन मतिश्रुतावधिमनःपर्यय-केवलज्ञानपञ्चकादभिन्नं व्यवहारेण ज्ञानापेक्षया रूपावलोकनविषये दृष्टिवल्लोका-लोकव्यापकं निश्चयेन लोकमात्रासंख्येयप्रदेशमपि व्यवहारेण स्वदेहमात्रं तमित्थंभूत-मात्मानम् आहारभयमैथुनपरिग्रहसंज्ञास्वरूपप्रभृतिसमस्तविकल्पकल्लोलजालं त्यक्त्वा

तथा निज शुद्ध आत्मानुभवरूप जिस ज्ञानसे अंतर्मुहूर्तमें ही परमात्माका स्वरूप जाना जाता है, वही ज्ञान उपादेय है । ऐसी प्रार्थना शिष्यने श्रीगुरुसे की ॥१०४॥

आगे श्रीगुरु चार दोहा-सूत्रोंसे ज्ञानका स्वरूप प्रकाशते हैं—श्रीगुरु कहते है, कि हे प्रभाकर-भट्ट, [**त्वं**] तू [**आत्मानं**] आत्माको ही [**ज्ञानं**] ज्ञान [**मन्यस्व**] जान, [**यः**] जो ज्ञानरूप आत्मा [**आत्मानं**] अपनेको [**जीवप्रदेशैः तावन्मात्रं**] अपने प्रदेशोंमें लोक-प्रमाण [**ज्ञानेन गगन-प्रमाणं**] ज्ञानसे व्यवहारनयकर आकाश-प्रमाण [**जानाति**] जानता है । अथवा यहाँ "देहसमु" ऐसा भी पाठ है, तब ऐसा समझना, कि निश्चयनयसे लोकप्रमाण है, तो भी व्यवहारनयसे संकोच विस्तार स्वभाव होनेसे शरीरप्रमाण है ।। **भावार्थ**—निश्चयनयकर मति श्रुत अवधि मनःपर्यय केवल इन पाँच ज्ञानोंसे अभिन्न तथा व्यवहारनयसे ज्ञानकी अपेक्षारूप देखनेमें नेत्रोंकी तरह लोक अलोकमें व्यापक है । अर्थात् जैसे आँखें रूपी पदार्थोंको देखती हैं, परंतु उन स्वरूप नहीं होतीं, वैसे ही आत्मा यद्यपि लोक अलोकको जानता है, देखता है, तो भी उन स्वरूप नहीं होता, अपने स्वरूप ही रहता है, ज्ञानकर ज्ञेय प्रमाण है, यद्यपि निश्चयसे प्रदेशोंकर लोक-प्रमाण है, असंख्यात प्रदेशी है, तो भी व्यवहारनयकर अपने देह-प्रमाण है, ऐसे आत्माको जो पुरुष आहार भय मैथुन परि-ग्रहरूप चार वांछाओं स्वरूप आदि समस्त विकल्पकी तरंगोंको छोड़कर जानता है वही पुरुष ज्ञानसे

जानाति यः स पुरुष एव ज्ञानादभिन्नत्वाज् ज्ञानं भण्यत इति। अत्रायमेव निश्चयनयेन पञ्चज्ञानादभिन्नमात्मानं जानात्यसौ ध्याता तमेवोपादेयं जानीहीति भावार्थः। तथा चोक्तम्—"आभिणिसुदोहिमणकेवलं च तं होदि एगमेव पदं। सो एसो परमट्ठो जं लहिदुं णिव्वुदिं लजादि॥" ॥१०५॥

अथ—

अप्पहँ जे वि विभिण्ण वढ ते वि हवंति ण णाणु।
ते तुहुँ तिण्णि वि परिहरिवि णियमिँ अप्पु वियाणु ॥१०६॥

आत्मन. ये अपि विभिन्नाः वत्स तेऽपि भवन्ति न ज्ञानम्।
तान् त्वं त्रीण्यपि परिहृत्य नियमेन आत्मानं विजानीहि ॥१०६॥

अप्पहँ जे वि विभिण्ण वढ आत्मनः सकाशाद्येऽपि भिन्नाः वत्स ते वि हवंति ण णाणु तेऽपि भवन्ति न ज्ञानं, तेन कारणेन तुहुं तिण्णि वि परिहरिवि तान् कर्मतापन्नान् तत्र हे प्रभाकरभट्ट त्रीण्यपि परिहृत्य। पश्चात्किं कुरु। णियमिं अप्पु वियाणु निश्चयेनात्मानं विजानीहीति। तद्यथा। सकलविशदैकज्ञानस्वरूपात् परमात्मपदार्थात् निश्चयनयेन भिन्नान् त्रीण्यपि धर्मार्थकामान् त्यक्त्वा वीतरागस्वसंवेदनलक्षणे शुद्धात्मानुभूतिज्ञाने स्थित्वात्मानं जानीहीति भावार्थः ॥१०६॥

अप्पा णाणहँ गम्मु पर णाणु वियाणइ जेण।
तिण्णि वि मिल्लिवि जाणि तुहुँ अप्पा णाणेँ तेण ॥१०७॥

अभिन्न होनेसे ज्ञान कहा जाता है। आत्मा और ज्ञानमे भेद नही है, आत्मा ही ज्ञान है। यहाँ सारांश यह है, कि निश्चयनयकरके पाँच प्रकारके ज्ञानोंसे अभिन्न अपने आत्माको जो ध्यानी जानता है, उसी आत्माको तू उपादेय जान। ऐसा ही सिद्धान्तोंमे हरएक जगह कहा है—"आभिणि" इत्यादि। इसका अर्थ यह है, कि मति श्रुत अवधि मनःपर्यय केवलज्ञान ये पाँच प्रकारके सम्यग्ज्ञान एक आत्माके ही स्वरूप हैं, आत्माके विना ये ज्ञान नही हो सकते, वह आत्मा ही परम अर्थ है, जिसको पाकर वह जीव निर्वाणको पाता है ॥१०५॥

आगे परभावका निषेध करते हैं—[वत्स] हे शिष्य, [आत्मन] आत्मा से [ये अपि भिन्नाः] जो जुदे भाव हैं, [तेऽपि] वे भी [ज्ञानं न भवंति] ज्ञान नहीं है, वे सब भाव ज्ञानसे रहित जड़रूप है, [तान्] उन [त्रीणि अपि] धर्म अर्थ कामरूप तीनो भावोंको [परिहृत्य] छोड़कर [नियमेन] निश्चयसे [आत्मानं] आत्माको [त्वं] तू [विजानीहि] जान॥ भावार्थ—हे प्रभाकरभट्ट, मुनिरूप धर्म, अर्थरूप संसारके प्रयोजन, काम (विषयाभिलाष) ये तीनों ही आत्मासे भिन्न हैं, ज्ञानरूप नहीं हैं। निश्चयनयकरके सब तरफसे निर्मल केवलज्ञानस्वरूप परमात्मपदार्थसे भिन्न तीनों ही धर्म अर्थ काम पुरुषार्थोंको छोड़कर वीतरागस्वसंवेदनस्वरूप शुद्धात्मानुभवरूपज्ञानमे रहकर आत्माको जान ॥१०६॥

आगे आत्माका स्वरूप दिखलाते हैं—[आत्मा] आत्मा [परं] नियमसे [ज्ञानस्य] ज्ञानके [गम्यः] गोचर है, [येन] क्योंकि [ज्ञानं] ज्ञान ही [विजानाति] आत्माको जानता है, [तेन]

आत्मा ज्ञानस्य गम्यः परः ज्ञानं विजानाति येन ।
त्रीण्यपि मुक्त्वा जानीहि त्वं आत्मानं ज्ञानेन तेन ॥१०७॥

अप्पा णाणहं गम्मु पर आत्मा ज्ञानस्य गम्यो विषयः परः । कोऽर्थः । नियमेन । कस्मात् । णाणु वियाणइ जेण ज्ञानं कर्तृ विजानात्यात्मानं येन कारणेन अतः कारणात् तिण्णि वि मिल्लिवि जाणि तुहुं त्रीण्यपि मुक्त्वा जानीहि त्वं हे प्रभाकर-भट्ट, अप्पा णाणें तेण । कं जानीहि । आत्मानम् । केन । ज्ञानेन तेन कारणेनेति । तथाहि । निजशुद्धात्मा ज्ञानस्यैव गम्यः । कस्मादिति चेत् । मतिज्ञानादिकपञ्चविकल्परहितं यत्परमपदं परमात्मशब्दवाच्यं साक्षान्मोक्षकारणं तद्रूपो योऽसौ परमात्मा तमात्मानं वीतरागनिर्विकल्पस्वसंवेदनज्ञानगुणेन विना दुर्धरानुष्ठानं कुर्वाणा-अपि बहवोऽपि न लभन्ते यतः कारणात् । तथा चोक्तं समयसारे--"णाणगुणेहिं विहीणा एदं तु पदं बहू वि ण लहंति । तं गिण्ह णियदमेदं जइ इच्छसि दुक्खपरिमोक्खं ।।" अत्र धर्मार्थकामादिसर्वपरद्रव्येच्छां योऽसौ मुञ्चति स्वशुद्धात्मसुखामृते तृप्तो भवति स एव निःपरिग्रहो भण्यते स एवात्मानं जानातीति भावार्थः । उक्तं च--"अपरिग्गहो अणिच्छो भणिदो णाणी य णेच्छदे धम्मं । अपरिग्गहो दु धम्मस्स जाणगो तेण सो होदि ।।" ॥१०७॥

इसलिये [त्वं] हे प्रभाकर भट्ट तू [त्रीणि अपि मुक्त्वा] धर्म अर्थ काम इन तीनों ही भावोंको छोड़कर [ज्ञानेन] ज्ञानसे [आत्मानं] निज आत्माको [जानीहि] जान ।। भावार्थ—निज शुद्धात्मा ज्ञानके ही गोचर (जानने योग्य) है, क्योंकि मतिज्ञानादि पाँच भेदों रहित जो परमात्म शब्दका अर्थ परमपद है, वही साक्षात् मोक्षका कारण है, उस स्वरूप परमात्माको वीतरागनिर्विकल्पस्व-संवेदन ज्ञानके बिना दुर्धर तपके करनेवाले भी बहुतसे प्राणी नहीं पाते । इसलिये ज्ञानसे ही अपना स्वरूप अनुभव कर। ऐसा ही कथन श्रीकुन्दकुन्दाचार्यने समयसारजीमें किया है "णाणगुणेहिं" इत्यादि । इसका अर्थ यह है, कि सम्यग्ज्ञाननामा निज गुणसे रहित पुरुष इस ब्रह्मपदको बहुत कष्ट करके भी नहीं पाते, अर्थात् जो महान दुर्धर तप करो तो भी नहीं मिलता । इसलिये जो तू दुःखसे छूटना चाहता है, सिद्धपदकी इच्छा रखता है, तो आत्मज्ञानकर निजपदको प्राप्त कर। यहाँ सारांश यह है, कि जो धर्म अर्थ कामादि सब परद्रव्यकी इच्छाको छोड़ता है, वही निज शुद्धात्मसुखरूप अमृतमें तृप्त हुआ सिद्धान्तमे परिग्रह रहित कहा जाता है, और निर्ग्रंथ कहा जाता है, और वही अपने आत्माका जानता है । ऐसा ही समयसारमें कहा है "अपरिग्गहो" इत्यादि । इसका अर्थ ऐसा है, कि निज सिद्धान्तमें परिग्रह रहित और इच्छारहित ज्ञानी कहा गया है, जो धर्मको भी नहीं चाहता है, अर्थात् जिसके व्यवहारधर्मकी भी कामना नहीं है, उसके अर्थ तथा कामकी इच्छा कहाँसे होवे ? वह आत्मज्ञानी सब अभिलाषाओंसे रहित है, जिसके धर्मका भी परिग्रह नहीं है, तो अन्य परिग्रह कहाँसे हो ? इसलिये वह ज्ञानी परिग्रही नहीं है, केवल निजस्वरूपका जाननेवाला ही होता है ।।१०७।।

अथ—

णाणिय णाणिउ णाणिएण णाणिउँ जा ण मुणेहि ।
ता अण्णाणिं णाणमउँ किं पर बंभु लहेहि ॥१०८॥

ज्ञानिन् ज्ञानी ज्ञानिना ज्ञानिनं यावत् न मन्दस्व ।
तावद् अज्ञानेन ज्ञानमयं किं परं ब्रह्म लभते ॥१०८॥

णाणिय हे ज्ञानिन् णाणिउ ज्ञानी निजात्मा णाणिएण ज्ञानिना निजात्मना करणभूतेन । कथंभूतो निजात्मा । णाणिउ ज्ञानी ज्ञानलक्षणः तमित्थंभूतमात्मानं जा ण मुणेहि यावत्कालं न जानासि ता अण्णाणि णाणमउं तावत्कालमज्ञानेन मिथ्यात्वरागादिविकल्पजालेन ज्ञानमयम् । किं पर बंभु लहेहि किं परमुत्कृष्टं ब्रह्मस्वभावं लभसे किं तु नैवेति । तद्यथा । यावत्कालमात्मा कर्ता आत्मानं कर्मतापन्नम् आत्मना करणभूतेन आत्मने निमित्तं आत्मनः सकाशात् आत्मनि स्थितं समस्तरागादिविकल्पजालं मुक्त्वा न जानासि तावत्कालं परमब्रह्मशब्दवाच्यं निर्दोषिपरमात्मानं किं लभसे नैवेति भावार्थः ॥१०८॥ इति सूत्रचतुष्टेनान्तरस्थलं ज्ञातव्याख्यानं गतम् ।

अथानन्तरं सूत्रचतुष्टयेनान्तरस्थले परलोकशब्दव्युत्पत्त्या परलोकशब्दवाच्यं परमात्मानं कथयति—

जोइज्जइ तिं बंभु परु जाणिज्जइ तिं सोइ ।
बंभु मुणेविणु जेण लहु गम्मिज्जइ परलोइ ॥१०९॥

दृश्यते तेन ब्रह्मा परः ज्ञायते तेन स एव ।
ब्रह्म मत्वा येन लघु गम्यते परलोके ॥१०९॥

जोइज्जइ दृश्यते तिं तेन पुरुषेण तेन कारणेन वा । कोऽसौ दृश्यते । बंभु परु ब्रह्मशब्दवाच्यः शुद्धात्मा । कथंभूत । परः उत्कृष्टः । अथवा पर इति पाठे नियमेन ।

आगे ज्ञानसे ही परब्रह्मकी प्राप्ति होती है, ऐसा कहते हैं—[ज्ञानिन्] हे ज्ञानी [ज्ञानी] ज्ञानवान् अपना आत्मा [ज्ञानिना] सम्यग्ज्ञान करके [ज्ञानिनं] ज्ञान लक्षणवाले आत्माको [यावत्] जबतक [न] नहीं [जानासि] जानता, [तावत्] तबतक [अज्ञानेन] अज्ञानी होनेसे [ज्ञानमयं] ज्ञानमय [परं ब्रह्म] अपने स्वरूपको [किं लभसे] क्या पा सकता है ? कभी नहीं पा सकता। जो कोई आत्माको पाता है, तो ज्ञानसे ही पा सकता है ॥ **भावार्थ**—जबतक यह जीव अपनेको आपकर अपनी प्राप्तिके लिये आपसे अपनेमें तिष्ठता नहीं जान ले, तबतक निर्दोष शुद्ध परमात्मा सिद्धपरमेष्ठीको क्या पा सकता है ? कभी नहीं पा सकता। जो आत्माको जानता है, वही परमात्माको जानता है ॥१०८॥

इस प्रकार प्रथम महास्थलमें चार दोहोंमें अंतरस्थलमें ज्ञानका व्याख्यान किया। आगे चार सूत्रोंमें अंतरस्थलमें परलोक शब्दकी व्युत्पत्तिकर परलोक शब्दसे परमात्माको ही कहते हैं—[तेन] उस कारणसे उसी पुरुषसे [परः ब्रह्मा] शुद्धात्मा नियमसे [दृश्यते] देखा जाता है, [तेन]

न केवलं दृश्यते जाणिज्जइ **ज्ञायते तेन पुरुषेण तेन कारणेन वा** सोइ **स एव शुद्धात्मा । केन कारणेन ।** बंभु मुणेविणु जेण लहु **येन पुरुषेण येन कारणेन वा ब्रह्मशब्दवाच्यनिर्दोषिपरमात्मानं मत्वा ज्ञात्वा पश्चात्** गम्मिज्जइ परलोइ **तेनैव पूर्वोक्तेन ब्रह्मस्वरूपे परिज्ञानपुरुषेण तनैव कारणेन वा गम्यते । क्व । परलोके परलोकशब्दवाच्ये परमात्मतत्त्वे । किं च । योऽसौ शुद्धनिश्चयनयेन शक्तिरूपेण केवलज्ञानदर्शनस्वभावः परमात्मा स सर्वेषां सूक्ष्मैकेन्द्रियादिजीवानां शरीरे पृथक् पृथग्रूपेण तिष्ठति स एव परमब्रह्मा स एव परमविष्णुः स एव परमशिवः इति, व्यक्तिरूपेण पुनर्भगवानर्हन्नेव मुक्तिगतसिद्धात्मा वा परमब्रह्मा विष्णुः शिवो वा भण्यते । तेन नान्यः कोऽपि परिकल्पितः जगद्व्यापी तथैवैको परमब्रह्मा विष्णुः शिवो वास्तीति । अयमत्रार्थः । यत्रासौ मुक्तात्मा लोकाग्रे तिष्ठति स एव ब्रह्मलोकः स एव विष्णुलोकः स एव शिवलोको नान्यः कोऽपीति भावार्थः ॥१०९॥ अथ--**

मुणि-वर-विंदहँ हरि-हरहं जो मणि णिवसइ देउ ।
परहँ जि परतरु णाणमउ सो वुच्चइ पर-लोउ ॥११०॥

मुनिवरवृन्दानां हरिहराणां यः मनसि निवसति देवः ।
परस्माद् अपि परतरः ज्ञानमयः स उच्यते परलोकः ॥११०॥

मुणिवरविंदहं हरिहरहं **मुनिवरवृन्दानां हरिहराणां च** जो मणि णिवसइ

उसी पुरुषसे निश्चयसे [**स एव**] वही शुद्धात्मा [**ज्ञायते**] जाना जाता है, [**येन**] जो पुरुष जिस कारण [**ब्रह्म मत्वा**] अपना स्वरूप जानकर [**परलोके लघु गम्यते**] परमात्मतत्त्वमें शीघ्र ही प्राप्त होता है ॥ **भावार्थ**—जो कोई शुद्धात्मा अपना स्वरूप शुद्ध निश्चयनयकर शक्तिरूपसे केवलज्ञान केवलदर्शन स्वभाव है, वही वास्तवमें (असलमे) परमेश्वर है। परमेश्वरमें और जीवमें जाति-भेद नहीं है, जबतक कर्मोंसे बँधा हुआ है, तबतक संसारमे भ्रमण करता है। सूक्ष्म बादर एकेन्द्रियादि जीवोंके शरीरमे जुदा जुदा तिष्ठता है, और जब कर्मोंसे रहित हो जाता है, तब सिद्ध कहलाता है। संसार-अवस्थामें शक्तिरूप परमात्मा है, और सिद्ध-अवस्थामें व्यक्तिरूप है। यही आत्मा परब्रह्म परमविष्णु परमशिव शक्तिरूप है, और प्रगटरूपमे भगवान् अर्हंत अथवा मुक्तिको प्राप्त हुए सिद्धात्मा ही परमब्रह्मा परमविष्णु परमशिव कहे जाते हैं। यह निश्चयसे जानो। ऐसा कहनेसे अन्य कोई भी कल्पना किया हुआ जगत्में व्यापक परमब्रह्म परमविष्णु परमशिव नहीं। सारांश यह है कि जिस लोकके शिखरपर अनंत सिद्ध विराज रहे हैं, वही लोकका शिखर परमधाम ब्रह्मलोक वही विष्णु-लोक और वही शिवलोक है, अन्य कोई भी ब्रह्मलोक विष्णुलोक शिवलोक नहीं है। ये सब निर्वाण क्षेत्रके नाम हैं, और ब्रह्मा विष्णु शिव ये सब सिद्धपरमेष्ठीके नाम हैं। भगवान् तो व्यक्तिरूप परमात्मा हैं, तथा यह जीव शक्तिरूप परमात्मा है। इसमें संदेह नहीं है। जितने भगवान्के नाम हैं, उतने सब शक्तिरूप इस जीवके नाम हैं। यह जीव ही शुद्ध नयकर भगवान् है। ॥१०९॥

आगे ऐसा कहते हैं कि भगवान्का ही नाम परलोक है—[**यः**] जो आत्मदेव [**मुनिवर-**

वेउ योऽसौ मनसि निवसति देवः आराध्यः । पुनरपि **किंविशिष्टः** । परहं जि परतरु णाणमउ **परस्मादुत्कृष्टादपि अथवा परहं जि बहुवचनं परेभ्योऽपि सकाशादतिशयेन परः परतरः ।** पुनरपि कथंभूतः । **ज्ञानमयः केवलज्ञानेन निर्वृत्तः** सो वुच्चइ परलोउ **स एवंगुणविशिष्टः** शुद्धात्मा परलोक इत्युच्यते इति । पर **उत्कृष्टो वीतरागचिदानन्दैकस्वभाव आत्मा तस्य** लोकोऽवलोकनं निर्विकल्पसमाधौ वानुभवनमिति परलोक-**शब्दस्यार्थः, अथवा लोक्यन्ते दृश्यन्ते जीवादिपदार्था यस्मिन् परमात्मस्वरूपे यस्य केवलज्ञानेन वा स भवति लोकः परश्चासौ लोकश्च परलोकः व्यवहारेण पुनः स्वर्गापवर्गलक्षणः परलोको भण्यते । अत्र योऽसौ परलोकशब्दवाच्यः परमात्मा स एवोपादेय इति तात्पर्यार्थः** ॥११०॥ **अथ--**

सो पर वुच्चइ लोउ परु जसु मइ तित्थु वसेइ ।
जहिँ मइ तहिँ गइ जीवह जि णियमेँ जेण हवेइ ॥१११॥

सः परः उच्यते लोकः परः यस्य मतिः तत्र वसति ।
यत्र मतिः तत्र गतिः जीवस्य एव नियमेन येन भवति ॥१११॥

सो पर वुच्चइ लोउ परु **स परः नियमेनोच्यते लोको जनः । कथंभूतो भण्यते । पर उत्कृष्टः** । **स कः** । जसु मइ तित्थु वसेइ **यस्य भव्यजनस्य मतिर्मनश्चित्तं तत्र निजपरमात्मस्वरूपे वसति विषयकषायविकल्पजालत्यागेन स्वसंवेदनसंवित्तिस्वरूपेण स्थिरीभवतीति । यस्य परमात्मतत्त्वे मतिस्तिष्ठति स कस्मात्परो भवतीति**

वृंदानां हरिहराणां] मुनीश्वरोंके समूहके तथा इंद्र वा वासुदेव रुद्रोंके [**मनसि**] चित्तमें [**निवसति**] बस रहा है, [**सः**] वह [**परस्माद् अपि परतर**] उत्कृष्टसे भी उत्कृष्ट [**ज्ञानमय**] ज्ञानमयी [**परलोक**] परलोक [**उच्यते**] कहा जाता है ॥ **भावार्थ**--परलोक शब्दका अर्थ ऐसा है कि पर अर्थात् उत्कृष्ट वीतराग चिदानंद शुद्ध स्वभाव आत्मा उसका लोक अर्थात् अवलोकन निर्विकल्पसमाधिमें अनुभवना वह **परलोक** है । अथवा जिसके परमात्मस्वरूपमें या केवलज्ञानमें जीवादि पदार्थ देखे जावें, इसलिये उस परमात्माका नाम परलोक है । अथवा व्यवहारनयकर स्वर्ग मोक्षको परलोक कहते हैं । स्वर्ग और मोक्षका कारण भगवानका धर्म है, इसलिये केवली भगवान्को परलोक कहते हैं । परमात्माके समान अपना निज आत्मा है, वही परलोक है, वही उपादेय है ॥११०॥

आगे ऐसा कहते है, जिसका मन निज आत्मामे बस रहा है, वही ज्ञानी जीव परलोक है--[**यस्य मतिः**] जिस भव्यजीवकी बुद्धि [**तत्र**] उस निज आत्मस्वरूपमे [**वसति**] बस रही है, अर्थात् विषय-कषाय-विकल्प-जालके त्यागसे स्वसंवेदन--ज्ञानस्वरूपकर स्थिर हो रही है । [**सः**] वह पुरुष [**परः**] निश्चयकर [**परः लोकः**] उत्कृष्ट जन [**उच्यते**] कहा जाता है । अर्थात् जिसकी बुद्धि निजस्वरूपमे ठहर रही है, वह उत्तम जन है, [**येन**] क्योंकि [**यत्र मतिः**] जेसी बुद्धि होती है, [**तत्र**] वैसी [**एव**] ही [**जीवस्य**] जीवकी [**गतिः**] [**नियमेन**] निश्चयकर [**भवति**] होती है, ऐसा जिनवरदेवने कहा है । अर्थात् शुद्धात्मस्वरूपमें जिस जीवको बुद्धि होवे,

चेत् जहिं मइ तहिं जीवहं जि णियमें जेण हवेइ **येन कारणेन यत्र स्वशुद्धात्मस्वरूपे मतिस्तत्रैव गतिः। कस्यैव। जीव-जीवस्यैव अथवा बहुवचनपक्षे जीवानामेव निश्चयेन भवतीति। अयमत्र भावार्थः। यद्यार्तरौद्राधीनतया स्वशुद्धात्मभावनाच्युतो भूत्वा परभावेन परिणमति तदा दीर्घसंसारी भवति, यदि पुनर्निश्चयरत्नत्रयात्मके परमात्मतत्त्वे भावनां करोति तर्हि निर्वाणं प्राप्नोति इति ज्ञात्वा सर्वरागादिविकल्पत्यागेन तत्रैव भावनां कर्तव्येति ॥१११॥ अथ—**

जहिँ मइ तहिँ गइ जीव तुहुँ मरणु वि जेण लहेहि।
तेँ परबंभु मुएवि मइँ मा पर-दव्वि करेहि ॥११२॥

यत्र मतिः तत्र गतिः जीव त्वं मरणमपि येन लभसे।
तेन परब्रह्म मुक्त्वा मतिं मा परद्रव्ये कार्षीः ॥११२॥

जहिं मइ तहिं गइ जीव तुहुं मरणु वि जेण लहेहि **यत्र मतिस्तत्र गतिः। हे जीव त्वं मरणेन कृत्वा येन कारणेन लभसे** तें परबंभु मुएवि मइं मा परदव्वि करेहि **तेन कारणेन परब्रह्मशब्दवाच्यं शुद्धद्रव्यार्थिकनयेन टङ्कोत्कीर्णज्ञायकैकस्वभावं वीतरागसदानन्दैकसुखामृतरसपरिणतं निजशुद्धात्मतत्त्वं मुक्त्वा मतिं चित्तं परद्रव्ये देहसंगादिषु मा कार्षीरिति तात्पर्यार्थः ॥११२॥ एवं सूत्रचतुष्टयेनान्तरस्थले परलोकशब्दव्युत्पत्त्या परलोकशब्दवाच्यस्य परमात्मनो व्याख्यानं गतम्।**

तदनन्तरं किं तत् परद्रव्यमिति प्रश्ने प्रत्युत्तरं ददाति—

जं णियदव्वहँ भिण्णु जडु तं पर-दव्वु वियाणि।
पुग्गलु धम्माधम्मु णहु कालु वि पंचमु जाणि ॥११३॥

उसको वैसी ही गति होती है, जिन जीवोंका मन निज-वस्तुमे है, उनको निज-पदकी प्राप्ति होती है, इसमें सदेह नही है। **भावार्थ**—जो आर्तध्यान रौद्रध्यानकी आधीनतासे अपने शुद्धात्मकी भावनासे रहित हुआ रागादिक परभावोंस्वरूप परिणमन करता है, तो वह दीर्घसंसारी होता है, और जो निश्चयरत्नत्रयस्वरूप परमात्मतत्त्वमे भावना करता है तो वह मोक्ष पाता है। ऐसा जानकर सब रागादि विकल्पोंको त्यागकर उस परमात्मतत्त्वमे ही भावना करनी चाहिये ॥१११॥

आगे फिर भी इसी बातको दृढ़ करते हैं—[**जीव**] हे जीव [**यत्र मतिः**] जहाँ तेरी बुद्धि है, [**तत्र गतिः**] वहींपर गति है, उसकी [**येन**] जिस कारणसे [**त्वं मृत्वा**] तू मरकर [**लभसे**] पावेगा [**तेन**] इसलिये तू [**परब्रह्म**] परब्रह्मको [**मुक्त्वा**] छोड़कर [**परद्रव्ये**] परद्रव्यमे [**मतिं**] बुद्धिको [**मा कार्षीः**] मत कर ॥ **भावार्थ**—शुद्ध द्रव्यार्थिकनयकर टाँकीका-सा गढ़ा हुआ अघटितघाट, अमूर्तीक पदार्थ, ज्ञायकमात्र स्वभाव, वीतराग, सदा आनंदरूप, अद्वितीय अतीद्रिय सुखरूप, अमृतके रसकर तृप्त, ऐसे निज शुद्धात्मतत्त्वको छोड़कर द्रव्यकर्म भावकर्म नोकर्म या देहादि परिग्रहमें मनको मत लगा ॥११२॥

इस प्रकार पहले महाधिकारमें चार दोहा-सूत्रोंकर अंतरस्थलमें परलोक शब्दका अर्थ परमात्मा

यत् निजद्रव्याद् भिन्नं जडं तत् परद्रव्यं जानीहि ।
पुद्गलः धर्माधर्मः नभः कालं अपि पञ्चमं जानीहि ॥११३॥

जमित्यादि । पदखण्डनारूपेण व्याख्यानं क्रियते । जं **यत्** णियदव्वहं **निज-द्रव्यात्** भिण्णु **भिन्नं पृथग्भूतं** जडु **जडं** तं **तत्** परदव्वु वियाणि **परद्रव्यं जानीहि । तच्च किम् ।** पुग्गलु धम्माधम्मु णहु **पुद्गलधर्माधर्मनभोरूपं** कालु वि **कालमपि** पंचमु जाणि **पञ्चमं जानीहीति । अनन्तचतुष्टयस्वरूपान्निजद्रव्याद्बाह्यं भावकर्मद्रव्यकर्मनो-कर्मरूपं जीवसंबद्धं शेषं पुद्गलादिपञ्चभेदं यत्सर्वं तद्धेयमिति ॥११३॥**

अथ वीतरागनिर्विकल्पसमाधिरन्तर्मुहूर्तेनापि कर्मजालं दहतीति ध्यानसामर्थ्यं दर्शयति—

जइ णिविसद्धु वि कु वि करइ परमप्पइ अणुराउ ।
अग्गि-कणी जिम कट्ठ-गिरी डहइ असेसु वि पाउ ॥११४॥

यदि निमिषार्धमपि कोऽपि करोति परमात्मनि अनुरागम् ।
अग्निकणिका यथा काष्ठगिरिं दहति अशेषमपि पापम् ॥११४॥

जइ इत्यादि । जइ णिविसद्धु वि **यदि निमिषार्धमपि** कु वि करइ **कोऽपि कश्चित्** करोति । **किं करोति ।** परमप्पइ अणुराउ **परमात्मन्यनुरागम् । तदा किं करोति ।** अग्गिकणी जिम कट्ठगिरी **अग्निकणिका यथा काष्ठगिरिं दहति तथा** डहइ

किया । आगे परलोक (परमात्मा) में ही मन लगा, परद्रव्यसे ममता छोड़ ऐसा कहा गया था, उसमें शिष्यने प्रश्न किया कि परद्रव्य क्या है ? उसका समाधान श्रीगुरु करते हैं—[**यत्**] जो [**निजद्रव्यात्**] आत्म-पदार्थसे [**भिन्नं**] जुदा [**जडं**] जड पदार्थ है, [**तत्**] उसे [**परद्रव्यं**] परद्रव्य [**जानीहि**] जानो, और वह परद्रव्यः [**पुद्गलः धर्माधर्म नभः कालं अपि पंचमं**] पुद्गल धर्म अधर्म आकाश और पाँचवाँ कालद्रव्य [**जानीहि**] ये सब परद्रव्य जानो ॥ **भावार्थ**—द्रव्य छह हैं, उनमेंसे पाँच जड़ और जीवको चैतन्य जानो । पुद्गल धर्म अधर्म काल आकाश ये सब जड़ हैं, इनको अपनेसे जुदा जाना और जीव भी अनंत हैं, उन सबोंको अपनेसे भिन्न जानो । अनंतचतुष्टय-स्वरूप अपना आत्मा है, उसीको निज (अपना) जानो, और जीवके भावकर्मरूप रागादिक तथा द्रव्यकर्म, ज्ञानावरणादि आठ कर्म, और शरीरादिक नोकर्म, और इनका संबध अनादिसे है, परंतु जीवसे भिन्न है, इसलिये अपने मत मान । पुद्गलादि पाँच भेद जड़ पदार्थ सब हेय जान, अपना स्वरूप ही उपादेय है, उसीको आराधन कर ॥११३॥

आगे एक अन्तर्मुहूर्तमें कर्म-जालको वीतरागनिर्विकल्पसमाधिरूप अग्नि भस्म कर डालती है ऐसी समाधिकी सामर्थ्य है, वही दिखाते हैं—[**यदि**] जो [**निमिषार्धमपि**] आधे निमेषमात्र भी [**कोऽपि**] कोई [**परमात्मनि**] परमात्मामें [**अनुरागं**] प्रीतिको [**करोति**] करे तो [**यथा**] जैसे [**अग्निकणिका**] अग्निकी कणी [**काष्ठगिरिं**] काठके पहाड़को [**दहति**] भस्म करती है, उसी तरह [**अशेषं अपि पापं**] सब ही पापोंको भस्म कर डाले ॥ **भावार्थ**—ऋद्धिका गर्व, रसायनका गर्व

असेसु वि पाउ **बहत्यशेषं पापमिति । तथाहि—ऋद्धिगौरवरसगौरवकवित्ववादित्व-गमकत्ववाग्मित्वचतुर्विधशब्दगौरवस्वरूपप्रभृतिसमस्तविकल्पजालत्यागरूपेण महावातेन प्रज्वलिता निजशुद्धात्मतत्त्वध्यानाग्निकणिका [1]स्तोकाग्निकेन्धनराशिमिवान्तर्मुहूर्तेनापि चिरसंचितकर्मराशिं दहतीति । अत्रैवंविधं शुद्धात्मध्यानसामर्थ्यं ज्ञात्वा तदेव निरन्तरं भावनीयमिति भावार्थः ॥११४॥**

अथ हे जीव चिन्ताजालं मुक्त्वा शुद्धात्मस्वरूपं निरन्तरं पश्येति निरूपयति—

मेल्लिवि सयल अवक्खडी जिय णिच्चिंतउ होइ ।
चित्तु णिवेसहि परमपए देउ णिरंजणु जोइ ॥११५॥

मुक्त्वा सकलां चिन्तां जीव निश्चिन्तः भूत्वा ।
चित्तं निवेशय परमपदे देवं निरञ्जनं पश्य ॥११५॥

मेल्लिवि इत्यादि । मेल्लिवि **मुक्त्वा** सयल **समस्तं** अवक्खडी **देशभाषया चिन्ता** जिय **हे जीव** णिच्चिंतउ होइ **निश्चिन्तो भूत्वा । किं कुरु ।** चित्तु णिवेसहि **चित्तं निवेशय धारय । क्व ।** परमपए **निजपरमात्मपदे । पश्चात् किं कुरु ।** देउ णिरंजणु जोइ **देवं निरञ्जनं पश्येति । तद्यथा । हे जीव दृष्टश्रुतानुभूतभोगाकांक्षास्वरूपापध्यानादि समस्तचिन्ताजालं मुक्त्वा निश्चिन्तो भूत्वा चित्तं परमात्मस्वरूपे स्थिरं**

अर्थात् पारा वगैरह आदि धातुओंके भस्म करनेका मद, अथवा नौ रसके जाननेका गर्व, कविकलाका मद, बादमें जीतनेका मद, शास्त्रकी टीका बनानेका मद, शास्त्रके व्याख्यान करनेका मद, **ये चार** तरहका शब्द-गौरव-स्वरूप इत्यादि अनेक विकल्प-जालोका त्यागरूप प्रचंड पवन उससे प्रज्वलित हुई (दहकती हुई) जो निज शुद्धात्मतत्त्वके ध्यानरूप अग्निकी कणी है, जैसे वह अग्निकी कणी काठके पर्वतको भस्म कर देती है, उसी तरह यह समस्त पापोंको भस्म कर डालती है, अर्थात् जन्म जन्मके इकट्ठे किये हुए कर्मोंको आधे निमेषमे नष्ट कर देती है, ऐसी शुद्ध आत्म-ध्यानकी सामर्थ्य जानकर उसी ध्यानको ही भावना सदा करनी चाहिये ॥११४॥

आगे हे जीव, चिंताओको छोडकर शुद्धात्मस्वरूपको निरंतर देख, ऐसा कहते है—**[हे जीव]** हे जीव [**सकलां**] समस्त [**चिंतां**] चिंताओंको [**मुक्त्वा**] छोडकर [**निश्चितः भूत्वा**] निश्चित होकर तू [**चित्तं**] अपने मनको [**परमपदे**] परमपदमे [**निवेशय**] धारण कर, और [**निरंजनं देवं**] निरंजनदेवको [**पश्य**] देख ॥ **भावार्थ**—हे हंस, (जीव) देखे सुने और भोगे हुए भोगोंकी वांछारूप खोटे ध्यान आदि सब चिंताओको छोड़कर अत्यंत निश्चित होकर अपने चित्तको परमात्म-स्वरूपमें स्थिर कर । उसके बाद भावकर्म द्रव्यकर्म नोकर्मरूप अंजनसे रहित जो निरंजनदेव परम आराधने योग्य अपना शुद्धात्मा है, उसका ध्यान कर । पहले यह कहा था कि खोटे ध्यानको छोड़, सो खोटे ध्यानका नाम शास्त्रमें अपध्यान कहा है । अपध्यानका लक्षण कहते है । "बंधवधेत्यादि" उसका अर्थ ऐसा है कि निर्मल बुद्धिवाले पुरुष जिन-शासनमें उसको अपध्यान कहते हैं, जो द्वेषसे परके मारनेका बाँधनेका अथवा छेदनेका चिंतवन करे, और रागभावसे परस्त्री आदिका चितवन करे । उस अपध्यानके दो भेद हैं, एक आर्त दूसरा रौद्र । सो ये दोनों ही नरक निगोदकेकारण हैं, इस-

---

1. पाठान्तरः—स्तोकाग्निके = स्तोकाग्निकणिकानि ।

कुरु, तदनन्तरं भावकर्मद्रव्यकर्मनोकर्माञ्जनरहितं देवं परमाराध्यं निजशुद्धात्मानं ध्यायेति भावार्थः। अपध्यानलक्षणं कथ्यते—"बन्धवधच्छेदादेर्द्वेषाद्रागाच्च परकलत्रादेः। आध्यानमपध्यानं शासति जिनशासने विशदाः॥" ॥११५॥

अथ शिवशब्दवाच्ये निजशुद्धात्मनि ध्याते यत्सुखं भवति तत्सूत्रत्रयेण प्रतिपादयति—

जं सिव-दंसणि परम-सुहु पावहि झाणु करंतु।
तं सुहु भुवणि वि अत्थि णवि मेल्लिवि देउ अणंतु ॥११६॥

यत् शिवदर्शने परमसुखं प्राप्नोषि ध्यानं कुर्वन्।
तत् सुखं भुवनेऽपि अस्ति नैव मुक्त्वा देव अनन्तम् ॥११६॥

जमित्यादि। पदखण्डनारूपेण व्याख्यानं क्रियते—ज यत् सिवदंसणि स्वशुद्धात्मदर्शने परमसुहु परमसुखं पावहि प्राप्नोषि हे प्रभाकरभट्ट। किं कुर्वन् सन्। झाणु करंतु ध्यानं कुर्वन् सन् त सुहु तत्पूर्वोक्तसुखं भुवणि वि भुवनेऽपि अत्थि णवि अस्ति नैव। किं कृत्वा। मेल्लिवि मुक्त्वा। कम्। देउ देवम्। कथंभूतम्। अणंतु अनन्तशब्दवाच्यपरमात्मपदार्थमिति। तथाहि—शिवशब्देनात्र विशुद्धज्ञानस्वभावो निजशुद्धात्मा ज्ञातव्यः तस्य दर्शनमवलोकनमनुभवनं तस्मिन् शिवदर्शने परमसुखं निजशुद्धात्मभावनोत्पन्नवीतरागपरमाह्लादरूपं लभसे। किं कुर्वन् सन्। वीतरागनिर्विकल्पत्रिगुप्तिसमाधिं कुर्वन्। इत्थंभूतं सुखं अनन्तशब्दवाच्यो योऽसौ परमात्मपदार्थस्तं मुक्त्वा त्रिभुवनेऽपि नास्तीति। अयमत्रार्थः। शिवशब्दवाच्यो योऽसौ निजपरमात्मा स एव रागद्वेषमोहपरिहारेण ध्यातः सन्ननाकुलत्वलक्षणं परमसुखं ददाति

लिये विवेकियोंको त्यागने योग्य है ॥११५॥

आगे शिव शब्दसे कहे गये निज शुद्ध आत्माके ध्यान करनेपर जो सुख होता है, उस सुखको तीन दोहा-सूत्रोंमे वर्णन करते है—[यत्] जो [ध्यानं कुर्वन्] ध्यान करता हुआ [शिवदर्शने परमसुखं] निज शुद्धात्माके अवलोकनमे अत्यन्त सुख [प्राप्नोषि] हे प्रभाकर, तू पा सकता है, [तत् सुखं] वह सुख [भुवने अपि] तीनलोकमें भी [अनंतं देव मुक्त्वा] परमात्म द्रव्यके सिवाय [नैव अस्ति] नहीं है॥ भावार्थ—शिव नाम कल्याणका है, सो कल्याणरूप ज्ञानस्वभाव निज शुद्धात्मा जानो, उसका जो दर्शन अर्थात् अनुभव उसमे सुख होता है, वह सुख परमात्माको छोड़ तीन लोकमे नही है। वह सुख क्या है? जो निर्विकल्प वीतराग परम आनन्दरूप शुद्धात्मभाव है, वही सुखो है। क्या करता हुआ यह सुख पाता है कि तीन गुप्तिरूप परमसमाधिमें आरूढ़ हुआ सता ध्यानी पुरुष ही उस सुखको पाता है। अनन्त गुणरूप आत्म-तत्त्वके बिना वह सुख तीनों लोकके स्वामी इन्द्रादिको भी नहीं है। इस कारण सारांश यह निकला कि शिव नामवाला जो निज शुद्धात्मा है, वही राग द्वेष मोहके त्यागकर ध्यान किया गया आकुलता रहित परम सुखको देता है। संसारी जीवोंके जो इन्द्रियजनित सुख है, वह आकुलतारूप है, और आत्मीक अतीन्द्रियसुख आकुलता रहित है, सो सुख ध्यानसे ही मिलता है, दूसरा कोई शिव या ब्रह्मा या विष्णु नामका

नान्यः कोऽपि शिवनामेति पुरुषः ॥११६॥ **अथ—**

जं मुणि लहइ अणंत-सुहु णिय-अप्पा झायंतु ।
तं सुहु इंदु वि णवि लहइ देविहिँ कोडि रमंतु ॥११७॥

यत् मुनिः लभते अनन्तसुखं निजात्मानं ध्यायन् ।
तत् सुखं इन्द्रोऽपि नैव लभते देवीनां कोटिं रम्यमाणः ॥११७॥

जमित्यादि । जं यत् मुणि **मुनिस्तपोधनः** लहइ **लभते** अणंतसुहु **अनन्तसुखम् । किं कुर्वन् सन् ।** णियअप्पा झायंतु **निजात्मानं ध्यायन् सन्** तं सुहु **तत्पूर्वोक्तं सुखं** इंदु वि णवि लहइ **इन्द्रोऽपि नैव लभते । किं कुर्वन् सन् ।** देविहिं कोडि रमतु **देवीनां कोटिं रमयन् अनुभवन्निति । अयमत्र तात्पर्यार्थः । बाह्याभ्यन्तरपरिग्रहरहितः स्वशुद्धात्मतत्त्वभावनोत्पन्नवीतरागपरमानन्दसहितो मुनिर्यत्सुखं लभते तद्देवेन्द्रादयोऽपि न लभन्त इति । तथा चोक्तम्—"दह्यमाने जगत्यस्मिन्महता मोहवन्हिना । विमुक्तविषयासंगाः सुखायन्ते तपोधनाः"** ॥११७॥

अप्पा-दंसणि जिणवरहँ जं सुहु होइ अणंतु ।
तं सुहु लहइ विराउ जिउ जाणंतउ सिउ संतु ॥११८॥

आत्मदर्शने जिनवराणां यत् सुखं भवति अनन्तम् ।
तत् सुखं लभते विरागः जीवः जानन् शिवं शान्तम् ॥११८॥

अप्पा इत्यादि । अप्पादंसणि **निजशुद्धात्मदर्शने** जिणवरहं **छद्मस्थावस्थायां जिन-**

पुरुष देनेवाला नहीं है । आत्माका ही नाम शिव है, विष्णु है, ब्रह्मा है ॥११६॥

आगे कहते हैं कि जो सुख आत्माको ध्यावनेसे महामुनि पाते हैं, वह सुख इन्द्रादि देवोंको दुर्लभ है—[**निजात्मानं ध्यायन्**] अपनी आत्माको ध्यावता [**मुनिः**] परम तपोधन (मुनि) [**यत् अनंतसुखं**] जो अनन्तसुख [**लभते**] पाता है, [**तत् सुखं**] उस सुखको [**इंद्रः अपि**] इन्द्र भी [**देवीनां कोटिं रम्यमाणः**] करोड़ देवियोंके साथ रमता हुआ [**नैव**] नहीं [**लभते**] पाता ॥ **भावार्थ**—बाह्य और अन्तरंग परिग्रहसे रहित निज शुद्धात्माकी भावनासे उत्पन्न हुआ जो वीतराग परमानन्द सहित महामुनि जो सुख पाता है, उस सुखको इन्द्रादिक भी नहीं पाते । जगत्‌में सुखी साधु ही हैं, अन्य कोई नहीं । यही कथन अन्य शास्त्रोंमें भी कहा है—"**दह्यमाने इत्यादि**" इसका अर्थ ऐसा है कि महामोहरूपी अग्निसे जलते हुए इस जगत्‌में देव मनुष्य तिर्यञ्च नारकी सभी दुःखी हैं, और जिनके तप ही धन है, तथा सब विषयोंका सम्बन्ध जिन्होंने छोड़ दिया है, ऐसे साधु मुनि ही इस जगत्‌में सुखी हैं ॥११७॥

आगे ऐसा कहते है कि वैरागी मुनि ही निज आत्माको जानते हुए निर्विकल्प सुखको पाते हैं—[**आत्म दर्शने**] निज शुद्धात्माके दर्शनमें [**यत् अनंतं सुखं**] जो अनन्त अद्भुत सुख [**जिनवराणां**] मुनि-अवस्थामें जिनेश्वरदेवोंके [**भवति**] होता है, [**तत् सुखं**] वह सुख [**विरागः जीवः**] वीतरागभावनाको परिणत हुआ मुनिराज [**शिवं शांतं जानन्**] निज शुद्धात्मस्वभावको तथा रागादि रहित शांत भावको जानता हुआ [**लभते**] पाता है ॥ **भावार्थ**—**दीक्षाके समय तीर्थंकर-**

वराणां जं सुहु होइ अणंतु यत्सुखं भवत्यनन्तं तं सुहु तत्पूर्वोक्तसुखं लहइ लभते । कोऽसौ । विराउ जिउ वीतरागभावनापरिणतो जीवः किं कुर्वन् सन् । जाणंतउ जानन्ननुभवन् सन् । कम् । सिउ शिवशब्दवाच्यं निजशुद्धात्मस्वभावम् । कथंभूतम् । संतु शान्तं रागादिविभावरहितमिति । अयमत्र भावार्थः । दीक्षाकाले शिवशब्दवाच्य-स्वशुद्धात्मानुभवने यत्सुखं भवति जिनवराणां वीतरागनिर्विकल्पसमाधिरतो जीव-स्तत्सुखं लभत इति ।।११८।।

अथ कामक्रोधादिपरिहारेण शिवशब्दवाच्यः परमात्मा दृश्यत इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं कथयन्ति––

जोइय णिय-मणि णिम्मलए पर दीसइ सिउ संतु ।
अंबरि णिम्मलि घण-रहिए भाणु जि जेम फुरंतु ।।११९।।

योगिन् निजमनसि निर्मले परं दृश्यते शिवः शान्तः ।
अम्बरे निर्मले घनरहिते भानुः इव यथा स्फुरन् ।।११९।।

जोइय इत्यादि । जोइय हे योगिन् णियमणि निजमनसि । कथंभूते । णिम्मलए निर्मले परं नियमेन दीसइ दृश्यते । कोऽसौ । कर्मतापन्नः सिउ शिवशब्दवाच्यो निजपरमात्मा । कथंभूतः । संतु शान्तः रागादिरहितः । दृष्टान्तमाह । अम्बरे आकाशे । कथंभूते । णिम्मलि निर्मले । पुनरपि कथंभूते । घणरहिए घनरहिते । क इव । भाणु जि भानुरिव यथा । किं कुर्वन् । फुरंतु स्फुरन् प्रकाशमान इति । अयमत्र तात्पर्यार्थः । यथा घनघटाटोपविघटने सति निर्मलाकाशे दिनकरः प्रकाशते तथा शुद्धात्मानुभूतिप्रतिपक्षभूतानां कामक्रोधादिविकल्परूपघनानां विनाशे सति

देव निज शुद्ध आत्माको अनुभवते हुए जो निर्विकल्प सुख पाते हैं, वही सुख रागादि रहित निर्वि-कल्प-समाधिमें लीन विरक्त मुनि पाते हैं ।।११८।।

आगे काम क्रोधादिकके त्यागनेसे शिव शब्दसे कहा गया परमात्मा दीख जाता है, ऐसा अभिप्राय मनमें रखकर यह गाथा-सूत्र कहते हैं––[**योगिन्**] हे योगी, [**निर्मले निजमनसि**] निर्मल अपने मनमे [**शिवः शांतः**] निज परमात्मा रागादि रहित [**परं**] नियमसे [**दृश्यते**] दीखता है, [**यथा**] जैसे [**घनरहिते निर्मले**] बादल रहित निर्मल [**अंबरे**] आकाशमें [**भानुः इव**] सूर्यके समान [**स्फुरन्**] भासमान (प्रकाशमान) है ।। **भावार्थ**––जैसे मेघमालाके आडंबरसे सूर्य नहीं भासता-दीखता और मेघके आडंबरके दूर होनेपर निर्मल आकाशमें सूर्य स्पष्ट दीखता है, उसी तरह शुद्ध आत्माकी अनुभूतिके शत्रु जो काम-क्रोधादि विकल्परूप मेघ हैं, उनके नाश होने-पर निर्मल मनरूपी आकाशमें केवलज्ञानादि अनतगुणरूप किरणोंकर सहित निज शुद्धात्मारूपी सूर्य प्रकाश करता है ।।११९।।

आगे जैसे मेले दर्पणमें रूप नहीं दीखता, उसी तरह रागादिकर मलिन चित्तमें शुद्ध आत्म-स्वरूप नही दीखता, ऐसा कहते हैं––[**रागेण रंजिते**] रागकरके रंजित [**हृदये**] मनमें [**शांतः**

निर्मलचित्ताकाशे केवलज्ञानाद्यनन्तगुणकरकलितः निजशुद्धात्मादित्यः प्रकाशं करोतीति ॥११९॥

अथ यथा मलिने दर्पणे रूपं न दृश्यते तथा रागादिमलिनचित्ते शुद्धात्मस्वरूपं न दृश्यत इति निरूपयति—

राएँ रंगिए हियवडए देउ ण दीसइ संतु।
दप्पणि मइलए बिंबु जिम एहउ जाणि णिभंतु ॥१२०॥

रागेन रञ्जिते हृदये देवः न दृश्यते शान्तः।
दर्पणे मलिने बिम्बं यथा एतत् जानीहि निर्भ्रान्तम् ॥१२०॥

राएं इत्यादि। राएं रंगिए हियवडए रागेन रञ्जिते हृदये देउ ण दीसइ देवो न दृश्यते। किंविशिष्टः संतु शान्तो रागादिरहितः। दृष्टान्तमाह्ः। दप्पणि मइलए दर्पणे मलिने बिबु जिम बिम्बं यथा एहउ एतत् जाणि जानीहि हे प्रभाकरभट्ट णिभंतु निर्भ्रान्तं यथा भवतीति। अयमत्राभिप्रायः। यथा मेघपटलप्रच्छादितो विद्यमानोऽपि सहस्रकरो न दृश्यते तथा केवलज्ञानकिरणैर्लोकालोकप्रकाशकोऽपि कामक्रोधादि-विकल्पमेघप्रच्छादितः सन् देहमध्ये शक्तिरूपेण विद्यमानोऽपि निजशुद्धात्मा दिनकरो न दृश्यते इति ॥१२०॥

अथानन्तरं विषयासक्तानां परमात्मा न दृश्यत इति दर्शयति—

जसु हरिणच्छी हियवडए तसु णवि बंभु वियारि।
एक्कहिँ केम समंति वढ बे खंडा पडियारि ॥१२१॥

यस्य हरिणाक्षी हृदये तस्य नैव ब्रह्म विचारय।
एकस्मिन् कथं समायातौ वत्स द्वौ खड्गौ प्रत्याकारे (?) ॥१२१॥

जसु इत्यादि। जसु यस्य पुरुषस्य हरिणच्छि हरिणाक्षी स्त्री हियवडए हृदये

देवः] रागादि रहित आत्मा देव [न दृश्यते] नहीं दीखता, [यथा] जैसे कि [मलिने दर्पणे] मैले दर्पणमें [बिंबं] मुख नहीं भासता [एतत्] यह बात हे प्रभाकरभट्ट, तू [निर्भ्रान्तं] संदेह रहित [जानीहि] जान ॥ भावार्थ—ऐसा श्रीयोगींद्राचार्यने उपदेश दिया है कि जैसे सहस्र किरणोंसे शोभित सूर्य आकाशमे प्रत्यक्ष दीखता है, लेकिन मेघसमूहकर ढँका हुआ नहीं दीखता, उसी तरह केवलज्ञानादि अनंत गुणरूप किरणोंकर लोक-अलोकका प्रकाशनेवाला भी इस देह (घट) के बीचमे शक्तिरूपसे विद्यमान निज शुद्धात्मरूप (परमज्योति चिद्रूप) सूर्य काम क्रोधादि राग द्वेष भावोंस्वरूप विकल्प-जालरूप मेघसे ढँका हुआ नहीं दीखता ॥१२०॥

आगे जो विषयोंमें लीन है, उनको परमात्माका दर्शन नहीं होता, ऐसा दिखलाते हैं— [यस्य हृदये] जिस पुरुषके चित्तमे [हरिणाक्षी] मृगके समान नेत्रवाली स्त्री [वसति] बस रही है [तस्य] उसके [ब्रह्म] अपना शुद्धात्मा [नैव] नहीं है, अर्थात् उसके शुद्धात्माका विचार नहीं होता, ऐसा हे प्रभारभट्ट, तू अपने मनमें [विचारय] विचार कर। बड़े [वत] खेदकी बात है कि [एकस्मिन्] एक [प्रतिकारे] म्यानमें [द्वौ खड्गौ] दो तलवारें [कथं समायातौ] कैसे आ सकती

बसतीति क्रियाध्याहारः, तसु तस्य णवि नैवास्ति । कोऽसौ । बंभु ब्रह्मशब्दवाच्यो निजपरमात्मा वियारी एवं विचारय त्वं हे प्रभाकरभट्ट। अत्रार्थे दृष्टान्तमाह। एक्कहिं केम एकस्मिन् कथं समंति सम्यग्मिमाते सम्यगवकाशं कथं लभेते वढ बत बे खंडा द्वो खड्गौ असी । क्वाधिकरणभूते । पडियारी प्रतिकारे (?) कोशशब्दवाच्ये इति । तथाहि । वीतरागनिर्विकल्पपरमसमाधिसंजातानाकुलत्वलक्षणपरमानन्दसुखामृतप्रतिबन्धकैराकुलत्वोत्पादकैः स्त्रीरूपावलोकनचिन्ताविसमुत्पन्नहावभावविभ्रमविलासविकल्पजालैर्मूर्च्छिते वासिते रञ्जिते परिणते चित्ते त्वेकस्मिन् प्रतिहारे (?) खड्गद्वयवत्परमब्रह्मशब्दवाच्यनिजशुद्धात्मा कथमवकाशं लभते न कथमपीति भावार्थः । हावभावविभ्रमविलासलक्षणं कथ्यते । "हावो मुखविकारः स्याद्भावश्चित्तोत्थ उच्यते । विलासो नेत्रजो ज्ञेयो विभ्रमो भ्रूयुगान्तयोः ॥" ॥१२१॥

अथ रागादिरहिते निजमनसि परमात्मा निवसतीति दर्शयति—

णिय-मणि णिम्मलि णाणियहँ णिवसइ देउ अणाइ ।
हंसा सरवरि लीणु जिम महु एहउ पडिहाइ ॥१२२॥

निजमनसि निर्मले ज्ञानिनां निवसति देवः अनादिः ।
हंसः सरोवरे लीनः यथा मम ईदृशः प्रतिभाति ॥१२२॥

णियमणि इत्यादि । णियमणि निजमनसि । किंविशिष्टे । णिम्मलि निर्मले

हैं ? कभी नहीं समा सकतीं ॥ भावार्थ—वीतरागनिर्विकल्पपरमसमाधिकर उत्पन्न हुआ अनाकुलतारूप परम आनन्द अतीन्द्रिय-सुखरूप अमृत है, उसके रोकनेवाले तथा आकुलताको उत्पन्न करनेवाले जो स्त्रीरूपके देखनेकी अभिलाषादिसे उत्पन्न हुए हाव (मुख-विकार) भाव अर्थात् चित्तका विकार, विभ्रम अर्थात् मुँहका टेढा करना, विलास अर्थात् नेत्रोंके कटाक्ष इन स्वरूप विकल्पजालोंकर, मूर्छित रंजित परिणत चित्तमें ब्रह्मका (निज शुद्धात्माका) रहना कैसे हो सकता है ? जैसे कि एक म्यानमें दो तलवारें कैसे आ सकती है ? नहीं आ सकती । उसी तरह एक चित्तमे ब्रह्म-विद्या और विषय-विनोद ये दोनो नहीं समा सकते । जहाँ ब्रह्म-विचार है, वहाँ विषय-विकार नहीं है, जहाँ विषय-विकार हैं वहाँ ब्रह्मविचार नही है । इन दोनोमे आपसमे विरोध है । हाव भाव विभ्रम विलास इन चारोंका लक्षण दूसरी जगह भी कहा है । "हावो मुखविकारः" इत्यादि, उसका अर्थ ऊपर कर चुके हैं, इससे दूसरी बार नही करा ॥१२१॥

आगे रागादि रहित निज मनमें परमात्मा निवास करता है, ऐसा दिखाते हैं—[ज्ञानिनां] ज्ञानियोंके [निर्मले] रागादि मल रहित [निजमनसि] निज मनमें [अनादिः देवः] अनादि देव आराधने योग्य शुद्धात्मा [निवसति] निवास कर रहा है, [यथा] जैसे [सरोवरे] मानससरोवरमें [लीनः हंसः] लीन हुआ हंस बसता है । सो हे प्रभाकरभट्ट, [मम] मुझे [एवं] ऐसा [प्रतिभाति] मालूम पड़ता है । ऐसा वचन श्रीयोगीन्द्रदेवने प्रभाकरभट्टसे कहा ॥ भावार्थ—पहले दोहेमें जो कहा था कि चित्तकी आकुलताके उपजानेवाले स्त्रीरूपका देखना सेवना चिन्तादिकोंसे उत्पन्न हुए

रागादिमलरहिते । केषां मनसि । णाणियहं ज्ञानिनां णिवसइ निवसति । कोऽसौ । देउ देवः आराध्यः किंविशिष्टः । अणाइ अनादिः । क इव कुत्र । हंसा सरवरि लीणु जिम हंसः सरोवरे लीनो यथा हे प्रभाकरभट्ट महु एहउ पडिहाइ ममैवं प्रतिभातीति । तथाहि । पूर्वसूत्रकथितेन चित्ताकुलत्वोत्पादकेन स्त्रीरूपावलोकनसेवनचिन्ताविसमुपत्पन्नेन रागादिकल्लोलमालाजालेन रहिते निजशुद्धात्मद्रव्यसम्यक्श्रद्धानसहजसमुत्पन्नवीतरागपरमसुखसुधारसस्वरूपेण निर्मलनीरेण पूर्णे वीतरागस्वसंवेदनजनितमानससरोवरे परमात्मा लीनस्तिष्ठति । कथंभूतः । निर्मलगुणसादृश्येन हंस इव हंसपक्षी इव । कुत्र प्रसिद्धः । सरोवरे । हंस इवेत्यभिप्रायो भगवतां श्रीयोगीन्द्रदेवानाम् ॥१२२॥

उक्तं च—

देउ ण देउले णवि सिलए णवि लिप्पइ णवि चित्ति ।
अखउ णिरंजणु णाणमउ सिउ संठिउ सम-चित्ति ॥१२३॥

देवः न देवकुले नैव शिलायां नैव लेप्ये नैव चित्रे ।
अक्षयः निरञ्जनः ज्ञानमयः शिवः संस्थितः समचित्ते ॥१२३॥

देउ इत्यादि । देउ देवः परमाराध्यः ण नास्तिः कस्मिन् कस्मिन् नास्ति । देउले देवकुले देवतागृहे णवि सिलए नैव शिलाप्रतिमायां, णवि लिप्पइ नैव लेपप्रतिमायां, णवि चित्ति नैव चित्रप्रतिमायाम् । तर्हि क्व तिष्ठति । निश्चयेन अखउ अक्षयः णिरंजणु कर्माञ्जनरहितः । पुनरपि किंविशिष्टः । णाणमउ ज्ञानमयः केवलज्ञानेन निर्वृत्तः

रागादितरंगोंके समूह हैं, उनकर रहित निज शुद्धात्मद्रव्यका सम्यक् श्रद्धान स्वाभाविकज्ञान उससे वीतराग परमसुखरूप अमृतरस उस स्वरूप निर्मल नीरसे भरे हुए ज्ञानियोंके मानससरोवरमे परमात्मादेवरूपी हंस निरन्तर रहता है। वह आत्मदेव निर्मल गुणोंकी उज्ज्वलताकर हंसके समान है। जैसे हंसोंका निवास-स्थान मानससरोवर है, वैसे ब्रह्मका निवास-स्थान ज्ञानियोंका निर्मल चित्त है। ऐसा श्रीयोगीन्द्रदेवका अभिप्राय है ॥१२२॥

आगे इसी बातको दृढ़ करते हैं—[देव] आत्मदेव [देवकुले] देवालयमे (मंदिरमे) [न] नहीं है, [शिलायां नैव] पाषाणकी प्रतिमामे भी नहीं है, [लेपे नैव] लेपमें भी नहीं है, [चित्रे नैव] चित्रामकी मूर्तिमें भी नहीं है। लेप और चित्रामकी मूर्ति लौकिकजन बनाते है, पंडितजन तो धातु पाषाणकी ही प्रतिमा मानते हैं, सो लौकिक दृष्टान्तके लिये दोहामें लेप चित्रामका भी नाम आ गया। वह देव किसी जगह नहीं रहता। वह देव [अक्षयः] अविनाशी है, [निरंजनः] कर्माञ्जनसे रहित है, [ज्ञानमयः] केवलज्ञानकर पूर्ण है, [शिवः] ऐसा निज परमात्मा [समचित्ते संस्थितः] समभावमे तिष्ठ रहा है, अर्थात् समभावको परिणत हुए साधुओंके मनमें विराज रहा है, अन्य जगह नहीं है॥ भावार्थ—यद्यपि व्यवहारनयकर धर्मकी प्रवृत्तिके लिये स्थापनारूप अरहन्तदेव देवालयमें तिष्ठते हैं, धातु पाषाणकी प्रतिमाको देव कहते हैं तो भी निश्चयनयकर शत्रु मित्र सुख दुःख जीवित मरण जिसमें समान हैं, तथा वीतराग सहजानन्दरूप परमात्मतत्त्वका

सिउ शिवशब्द वाच्यो निजपरमात्मा । एवंगुणविशिष्टः परमात्मा देव इति । सठिउ संस्थितः समचित्ति समभावे समभावपरिणतमनसि इति । तद्यथा । यद्यपि व्यवहारेण धर्मवर्तनानिमित्तं स्थापनारूपेण पूर्वोक्तगुणलक्षणो देवो देवगृहादौ तिष्ठति तथापि निश्चयेन शत्रुमित्रसुखदुःखजीवितमरणादिसमतारूपे वीतरागसहजानन्दैकरूपपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयात्मकसमचित्ते शिवशब्दवाच्यः परमात्मा तिष्ठतीति भावार्थः ।। तथा चोक्तं समचित्तपरिणतश्रमणलक्षणम्—"समसत्तुबंधुवग्गो समसुहदुक्खो पसंसणिंदसमो । समलोट्ठकंचणो वि य जीवियमरणे समो समणो ।।" ।।१२३।। इत्येकत्रिंशत्सूत्रैश्चूलिकास्थलं गतम् ।

अथ स्थलसंख्याबाह्यं प्रक्षेपकद्वयं कथ्यते—

मणु मिलियउ परमेसरहँ परमेसरु वि मणस्स ।
बीहि वि समरसि हूवाहँ पुज्ज चडावउँ कस्स ।।१२३*२।।

मनः मिलितं परमेश्वरस्य परमेश्वरः अपि मनसः ।
द्वयोरपि समरसीभूतयोः पूजां समारोपयामि कस्य ।।१२३*२।।

मणु इत्यादि । मणु मनो विकल्परूपं मिलियउ मिलितं तन्मयं जातम् । कस्य संबन्धित्वेन । परमेसरहं परमेश्वरस्य परमेसरु वि मणस्स परमेश्वरोऽपि मनः संबन्धित्वेन लीनो जातः बोहि वि समरसिहूवाहं एवं द्वयोरपि समरसीभूतयोः पुज्ज पूजां चडावउं समारोपयामि । कस्स कस्य निश्चयनयेन न कस्यापीति । अयमत्र भावार्थः । यद्यपि व्यवहारनयेन गृहस्थावस्थायां विषयकषायदुर्ध्यानवञ्चनार्थं धर्मवर्ध-

---

सम्यक् श्रद्धान ज्ञान चारित्ररूप अभेद रत्नत्रयमें लीन ऐसे ज्ञानियोंके सम चित्तमें परमात्मा तिष्ठता है। ऐसा ही अन्य जगह भी समचित्तको परिणत हुए मुनियोंका लक्षण कहा है। "समसत्तु" इत्यादि। इसका अर्थ ऐसा है कि जिसके सुख दुःख समान हैं, शत्रु मित्रोंका वर्ग समान हैं, प्रशंसा निन्दा समान हैं, पत्थर और सोना समान है, और जीवन मरण जिसके समान हैं, ऐसा समभावका धारण करनेवाला मुनि होता है। अर्थात् ऐसे समभावके धारक शांतचित्त योगीश्वरोंके चित्तमें चिदानन्द देव तिष्ठता है ।।१२३।।

इस प्रकार इकतीस दोहा-सूत्रोंका-चूलिका स्थल कहा। चूलिका नाम अन्तका है, सो पहले स्थलका अन्त यहाँतक हुआ। आगे स्थलकी संख्यासे सिवाय दो प्रक्षेपक दोहा कहते हैं—[मनः] विकल्परूप मन [परमेश्वरस्य मिलितं] भगवान् आत्मारामसे मिल गया तन्मयी हो गया [परमेश्वरः अपि] और परमेश्वर भी [मनसः] मनसे मिल गया तो [द्वयोः अपि] दोनों ही को [समरसीभूतयोः] समरस (आपसमें एकमएक) होनेपर [कस्य] किसकी अब मैं [पूजां समारोपयामि] पूजा करूँ। अर्थात् निश्चयनयकर किसीको पूजना, सामग्री चढ़ाना नहीं रहा ।। भावार्थ—जबतक मन भगवानसे नहीं मिला था, तबतक पूजा करता था, और जब मन प्रभुसे मिल गया, तब पूजाका प्रयोजन नहीं है। यद्यपि व्यवहारनयकर गृहस्थ-अवस्थामें विषाय कषायरूप खोटे ध्यानके हटानेके लिये

नार्थं च पूजाभिषेकदानादिव्यवहारोऽस्ति तथापि वीतरागनिर्विकल्पसमाधिरतानां तत्काले बहिरङ्गव्यापाराभावात् स्वयमेव नास्तीति ।।१२३*२।।

जेण णिरंजणि मणु धरिउ विसय-कसायहिँ जंतु ।
मोक्खहँ कारणु एत्तडउ अण्णु ण तंतु ण मंतु ।।१२३*३।।

येन निरञ्जने मनः धृतं विषयकषायेषु गच्छत् ।
मोक्षस्य कारणं एतावदेव अन्यः न तन्त्रं न मन्त्रः ।।१२३*३]

जेण इत्यादि । येन येन पुरुषेण कर्तृभूतेन णिरंजणि कर्माञ्जनरहिते परमात्मनि मणु मनः धरिउ धृतम् । किं कुर्वत् सत् । विसयकसायहिं जंतु विषयकषायेषु गच्छत् सत् । विसयकसायहिं तृतीयान्तं पदं सप्तम्यन्तं कथं जातमिति चेत् । परिहारमाह । प्राकृते क्वचित्कारक-व्यभिचारो भवति लिङ्गव्यभिचारश्च । इदं सर्वत्र ज्ञातव्यम् । मोक्खहं कारणु मोक्षस्य कारणं एत्तडउ एतावदेव । विषयकषायरतचित्तस्य व्यावर्तनेन स्वात्मनि स्थापनं अण्णु ण अन्यत् किमपि न मोक्षकारणम् । अन्यत् किम् । तन्तु तन्त्रं शास्त्रमौषधं वा मंतु मन्त्राक्षरं चेति । तथाहि । शुद्धात्मतत्त्वभावनाप्रतिकूलेषु विषयकषायेषु गच्छत् सत् मनो वीतरागनिर्विकल्पस्वसंवेदनज्ञानबलेन व्यावर्त्य निजशुद्धात्मद्रव्ये स्थापयति यः स एव मोक्षं लभते नान्यो मन्त्रतन्त्रादिबलिष्ठोऽपीति भावार्थः ।।१२३*३।।

एवं परमात्मप्रकाशवृत्तौ प्रक्षेपकत्रयं विहाय त्र्यधिकविंशत्युत्तरशतदोहकसूत्रैस्त्रिविधात्मप्रतिपादकनामा प्रथममहाधिकारः समाप्तः ।।१।।

और धर्मके बढ़ानेके लिये पूजा अभिषेक दान आदिका व्यवहार है, तो भी वीतरागनिर्विकल्पसमाधिमें लीन हुए योगीश्वरोंको उस समयमें बाह्य व्यापार के अभाव होनेसे स्वयं ही द्रव्य-पूजाका प्रसंग नहीं आता, भाव-पूजामें ही तन्मय है ।।१२३*२।।

आगे इसी कथनको दृढ़ करते हैं—[**येन**] जिस पुरुषने [**विषयकषायेषु गच्छत्**] विषय कषायोंमें जाता हुआ [**मनः**] मन [**निरंजने धृतं**] कर्मरूपी अंजनसे रहित भगवान्‌में रक्खा, [**एतावदेव**] और ये ही [**मोक्षस्य कारणं**] मोक्षके कारण हैं, [**अन्यः**] दूसरा कोई भी [**तन्त्रं न**] तंत्र नहीं हैं, [**मन्त्रः न**] और न मंत्र है। तंत्र नाम शास्त्र व औषधका है, मंत्र नाम मंत्राक्षरोंका है। विषय कषायादि पर पदार्थोंसे मनको रोककर परमात्मामें मनको लगाना, यही मोक्षका कारण है ।। **भावार्थ**—जो कोई निकट-संसारी जीव शुद्धात्मतत्त्वकी भावनासे उलटे विषय कषायोंमें जाते हुए मनको वीतरागनिर्विकल्प स्वसंवेदनज्ञानके बलसे पीछे हटाकर निज शुद्धात्मद्रव्यमें स्थापन करता है, वही मोक्षको पाता है, दूसरा कोई मंत्र तंत्रादिमें चतुर होनेपर भी मोक्ष नहीं पाता ।।१२३*३।।

इस तरह परमात्मप्रकाशकी टीकामें तीन क्षेपकोंके सिवाय एकसौ तेईस दोहा-सूत्रोंमें बहिरात्मा अंतरात्मा परमात्मारूप तीन प्रकारसे आत्माको कहनेवाला पहला महाधिकार पूर्ण किया ।।१।।

इति प्रथम महाधिकार

द्वितीय-महाधिकारः ।

अत ऊर्ध्वं स्थलसंख्याबहिर्भूतान् प्रक्षेपकान् विहाय चतुर्दशाधिकशतद्वयप्रमितैर्दोहकसूत्रैर्मोक्षमोक्षफलमोक्षमार्गप्रतिपादनमुख्यत्वेन द्वितीयमहाधिकारः प्रारभ्यते । तत्रादौ सूत्रदशकपर्यन्तं मोक्षमुख्यतया व्याख्यानं करोति । तद्यथा—

सिरिगुरु अक्खहि मोक्खु महु मोक्खहँ कारणु तत्थु ।
मोक्खहँ केरउ अण्णु फलु जें जाणउँ परमत्थु ॥१॥

श्रीगुरो आख्याहि मोक्षं मम मोक्षस्य कारणं तथ्यम् ।
मोक्षस्य संबन्धि अन्यत् फलं येन जानामि परमार्थम् ॥१॥

सिरिगुरु इत्यादि । सिरिगुरु हे श्रीगुरो योगीन्द्रदेव अक्खहि कथय मोक्खु मोक्षं महु मम, न केवलं मोक्षं मोक्खहं कारणु मोक्षस्य कारणम् । कथंभूतम् । तत्थु तथ्यम् मोक्खहं केरउ मोक्षस्य संबन्धि अण्णु अन्यत् । किम् । फलु फलम् । एतत्त्रयेन ज्ञातेन किं भवति । जें जाणउं येन त्रयस्य व्याख्यानेन जानाम्यहं कर्ता । कम् । परमत्थु परमार्थमिति । तद्यथा । प्रभाकरभट्टः श्रीयोगीन्द्रदेवान् विज्ञाप्य मोक्षं मोक्षफलं मोक्षकारणमिति त्रयं पृच्छतीति भावार्थः ॥१॥

अथ तदेव त्रयं क्रमेण भगवान् कथयति—

जोइय मोक्खु वि मोक्ख-फलु पुच्छिउ मोक्खहँ हेउ ।
सो जिण-भासिउ णिसुणि तुहुँ जेण वियाणहि भेउ ॥२॥

योगिन् मोक्षोऽपि मोक्षफलं पृष्टं मोक्षस्य हेतुः ।
तत् जिनभाषितं निशृणु त्वं येन विजानासि भेदम् ॥२॥

जोइय इत्यादि । जोइय हे योगिन् मोक्खु वि मोक्षोऽपि मोक्खफलु मोक्षफलं पुच्छिउ पृष्टं त्वया कर्तृभूतेन । पुनरपि कः पृष्टः । मोक्खहं हेउ मोक्षस्य हेतुः

द्वितीय महाधिकार ।

इसके बाद प्रकरणकी संख्याके बाहर अर्थात् क्षेपकोंके सिवाय दोसौ चौदह दोहा-सूत्रोंसे मोक्ष, मोक्ष-फल और मोक्ष-मार्गके कथनको मुख्यतासे दूसरा महाधिकार आरंभ करते हैं। उसमें भी पहले दस दोहोंतक मोक्षकी मुख्यतासे व्याख्यान करते हैं—[**श्रीगुरो**] हे श्रीगुरु, [**मम**] मुझे [**मोक्षं**] मोक्ष [**तथ्यं मोक्षस्य कारणं**] सत्यार्थ मोक्षका कारण, [**अन्यत्**] और [**मोक्षस्य संबंधि**] मोक्षका [**फलं**] फल [**आख्याहि**] कृपाकर कहो [**येन**] जिससे कि मैं [**परमार्थं**] परमार्थको [**जानामि**] जानूं ॥ **भावार्थ**—प्रभाकरभट्ट श्रीयोगींद्रदेवसे विनती करके मोक्ष, मोक्षका कारण और मोक्षका फल इन तीनोंको पूंछते हैं ॥१॥

अब श्रीगुरु उन्हीं तीनोंको क्रमसे कहते हैं—[**योगिन्**] हे योगी, तूने [**मोक्षोऽपि**] मोक्ष और [**मोक्षफलं**] मोक्षका फल तथा [**मोक्षस्य**] मोक्षका [**हेतुः**] कारण [**पृष्टं**] पूंछा, [**तत्**]

कारणम् । तत्रयं जिणभासिउ जिनभाषितं णिसुणि निश्चयेन शृणु समाकर्णय तुहुं त्वं जेण येन त्रयेन णनेन वियाणहि भेउ विजानासि भेदं त्रयाणां सम्बन्धिनमिति । अयमत्र तात्पर्यार्थः । श्रीयोगीन्द्रदेवाः कथयन्ति हे प्रभाकरभट्ट शुद्धात्मोपलम्भलक्षणं मोक्षं केवलज्ञानाद्यनन्तचतुष्टयव्यक्तिरूपं मोक्षफलं भेदाभेदरत्नत्रयात्मकं मोक्षमार्गं च क्रमेण प्रतिपादयाम्यहं त्वं शृण्विति ॥२॥

अथ धर्मार्थकाममोक्षाणां मध्ये सुखकारणत्वान्मोक्ष एवोत्तम इति अभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति—

धम्मह अत्थहँ कामहँ वि एयहँ सयलहँ मोक्खु ।
उत्तमु पभणहिँ णाणि जिय अण्णेँ जेण ण सोक्खु ॥३॥

धर्मस्य अर्थस्य कामस्यापि एतेषां सकलानां मोक्षम् ।
उत्तमं प्रभणन्ति ज्ञानिनः जीव अन्येन येन न सौख्यम् ॥३॥

धम्महं इत्यादि । धम्महं धर्मस्य धर्माद्वा अत्थहं अर्थस्य अर्थाद्वा कामहं वि कामस्यापि कामाद्वा एयहं सयलहं एतेषां सकलानां संबन्धित्वेन एतेभ्यो वा सकाशात् मोक्खु मोक्षं उत्तमु पभणहि उत्तमं विशिष्टं प्रभणन्ति । के कथयन्ति । णाणि ज्ञानिनः । जिय हे जीव । कस्मादुत्तमं प्रभणन्ति मोक्षम् । अण्णइं अन्येन धर्मार्थकामादिना जेण येन कारणेन ण सोक्खु नास्ति परमसुखम् इति । तद्यथा—धर्मशब्देनात्र पुण्यं कथ्यते अर्थशब्देन तु पुण्यफलभूतार्थो राज्यादिविभूतिविशेषः, कामशब्देन तु तस्यैव राज्यस्य मुख्यफलभूतः स्त्रीवस्त्रगन्ध माल्यादिसंभोगः । एतेभ्य-

---

उसको [जिनभाषितं] जिनेश्वरदेवके कहे प्रमाण [त्वं] तू [निशृणु] निश्चयकर सुन, [येन] जिससे कि [भेदं] भेद [विजानासि] अच्छी तरह जान जावे ॥ भावार्थ—श्रीयोगीद्रदेव गुरु, शिष्यसे कहते हैं कि हे प्रभाकरभट्ट; योगी शुद्धात्माकी प्राप्तिरूप मोक्ष, केवलज्ञानादि अनंतचतुष्टयका प्रगटपना स्वरूप मोक्षफल, और निश्चय व्यवहाररत्नत्रयरूप मोक्षका मार्ग, इन तीनोंको क्रमसे जिनआज्ञाप्रमाण तुझको कहूँगा । उनको तू अच्छी तरह चित्तमें धारण कर, जिससे सब भेद मालूम हो जावेगा ॥२॥

अब धर्म अर्थ काम और मोक्ष इन चारोंमेंसे सुखका मूलकारण मोक्ष ही सबसे उत्तम है, ऐसा अभिप्राय मनमे रखकर इस गाथा-सूत्रको कहते हैं—[जीव] हे जीव, [धर्मस्य] धर्म [अर्थस्य] अर्थ [कामस्य अपि] और काम [एतेषां सकलानां] इन सब पुरुषार्थोंमेसे [मोक्षं उत्तमं] मोक्षको उत्तम [ज्ञानिनः] ज्ञानी पुरुष [प्रभणंति] कहते है, [येन] क्योंकि [अन्येन] अन्य धर्म अर्थ कामादि पदार्थोंमें [सुखं] परमसुख [न] नहीं है ॥ भावार्थ—धर्म शब्दसे यहां पुण्य समझना, अर्थ शब्दसे पुण्यका फल राज्य वगैरह संपदा जानना. और काम शब्दसे उस राज्यका मुख्यफल स्त्री कपड़े सुगंधितमाला आदि वस्तुरूप भोग जानना । इन तीनोंसे परमसुख नही हैं, क्लेशरूप दुःख ही है, इसलिये इन सबसे उत्तम मोक्षको ही वीतरागसर्वज्ञदेव कहते हैं, क्योंकि

स्त्रिभ्यः सकाशान्मोक्षमुत्तमं कथयन्ति । के ते । वीतरागनिर्विकल्पस्वसंवेदनज्ञानिनः । कस्मात् । आकुलत्वोत्पादकेन वीतरागपरमानन्दसुखामृतरसास्वादविपरीतेन धर्मार्थकामादिना मोक्षादन्येन येन कारणेन सुखं नास्तीति भावार्थः ॥३॥

अथ धर्मार्थकामेभ्यो यद्युत्तमो न भवति मोक्षस्तर्हि तत्त्रयं मुक्त्वा परलोकशब्दवाच्यं मोक्षं किमिति जिना गच्छन्तीति प्रकटयन्ति—

जइ जिय उत्तमु होइ णवि एयहँ सयलहँ सोइ ।
तो किं तिण्णि वि परिहरवि जिण वच्चहिँ पर-लोइ ॥४॥

यदि जीव उत्तमो भवति नैव एतेभ्यः सकलेभ्यः स एव ।
ततः किं त्रीण्यपि परिहृत्य जिनाः व्रजन्ति परलोके ॥४॥

जइ इत्यादि । जइ यदि चेत् जिय हे जीव उत्तमु होइ णवि उत्तमो भवति नैव । केभ्यः । एयहं सयलहं एतेभ्यः पूर्वोक्तेभ्यो धर्मादिभ्यः । कतिसंख्योपेतेभ्यः । सकलेभ्यः सो वि स एव पूर्वोक्तो मोक्षः तो ततः कारणात् किं किमर्थं तिण्णि वि परिहरवि त्रीण्यपि परिहृत्य त्यक्त्वा जिण जिनाः कर्तारः वच्चहिं व्रजन्ति गच्छन्ति । कुत्र गच्छन्ति । परलोइ परलोकशब्दवाच्ये परमात्मध्याने न तु कायमोक्षे चेति । तथाहि—परलोकशब्दस्य व्युत्पत्त्यर्थः कथ्यते । परः उत्कृष्टो मिथ्यात्वरागादिरहितः केवलज्ञानाद्यनन्तगुणसहितः परमात्मा परशब्देनोच्यते तस्यैवंगुणविशिष्टस्य परमात्मनो लोको लोकनमवलोकनं वीतरागपरमानन्दसमरसीभावानुभवनं लोक इति परलोकशब्दस्यार्थः । अथवा पूर्वोक्तलक्षणः परमात्मा परशब्देनोच्यते । निश्चयेन परमशिवशब्दवाच्यो मुक्तात्मा शिव इत्युच्यते तस्य लोकः शिवलोक इति । अथवा परमब्रह्मशब्दवाच्यो मुक्तात्मा परमब्रह्म इति तस्य लोको ब्रह्मलोक इति । अथवा परम विष्णुशब्दवाच्यो मुक्तात्मा विष्णुरिति तस्य लोको विष्णुलोक इति परलोकशब्देन मोक्षो

मोक्षसे जुदा जो धर्म अर्थ काम है, वे आकुलताके उत्पन्न करनेवाले है, तथा वीतराग परमानन्द-सुखरूप अमृतरसके आस्वादसे विपरीत हैं, इसलिये सुखके करनेवाले नहीं हैं, ऐसा जानना ॥३॥

आगे धर्म अर्थ काम इन तीनोंसे जो मोक्ष उत्तम नही होता तो इन तीनोंको छोड़कर जिनेश्वरदेव मोक्षको क्यों जाते ? ऐसा दिखाते हैं—[**जीव**] हे जीव, [**यदि**] जो [**एतेभ्यः सकलेभ्यः**] इन सबोंसे [**सः**] मोक्ष [**उत्तमः**] उत्तम [**एव**] ही [**नैव**] नही [**भवति**] होता [**ततः**] तो [**जिना**] श्रीजिनवरदेव [**त्रीण्यपि**] धर्म अर्थ काम इन तीनोंको [**परिहृत्य**] छोड़कर [**परलोके**] मोक्षमें [**किं**] क्यों [**व्रजंति**] जाते ? इसलिये जाते है कि मोक्ष सबसे उत्कृष्ट है ॥ **भावार्थ**—पर अर्थात् उत्कृष्ट मिथ्यात्व रागादि रहित केवलज्ञानादि अनंत गुण सहित परमात्मा वह पर है, उस परमात्माका लोक अर्थात् अवलोकन वीतराग परमानंद समरसीभावका अनुभव वह परलोक कहा जाता है, अथवा परमात्माको परमशिव कहते हैं, उसका जो अवलोकन वह शिवलोक है, अथवा परमात्माका ही नाम परमब्रह्म है, उसका लोक वह ब्रह्मलोक है, अथवा

भण्यते परश्चासौ लोकश्च परलोक इति। परलोकशब्दस्य व्युत्पत्त्यर्थो ज्ञातव्यः न चान्यः कोऽपि परकल्पितः शिवलोकादिरस्तीति। अत्र स एव परलोकशब्दवाच्यः परमात्मोपादेय इति तात्पर्यः ॥४॥

अथ तमेव मोक्षं सुखदायकं दृष्टान्तद्वारेण द्रढयति—

उत्तमु सुक्खु ण देइ जइ उत्तमु मुक्खु ण होइ।
तो किं इच्छहिँ बंधणहिँ बद्धा पसुय वि सोइ ॥५॥

उत्तमं सुखं न ददाति यदि उत्तमो मोक्षो न भवति।
ततः किं इच्छन्ति बन्धनैः बद्धा पशवोऽपि तमेव ॥५॥

उत्तमु इत्यादि। उत्तमु उत्तमं सुक्खु सुखं ण देइ जइ न ददाति यदि चेत् उत्तमु मुक्खु ण होइ उत्तमो मोक्षो न भवति तो तस्मात्कारणात् किं किमर्थं इच्छहिँ इच्छन्ति बंधणहिँ बन्धनैः बद्धा निबद्धाः। पसुय वि पशवोऽपि। किमिच्छन्ति। सोइ तमेव मोक्षमिति। अयमत्र भावार्थः। येन कारणेन सुखकारणत्वाद्धेतोः बन्धनबद्धाः पशवोऽपि मोक्षमिच्छन्ति तेन कारणेन केवलज्ञानाद्यनन्तगुणाविनाभूतस्योपादेयरूपस्यानन्तसुखस्य कारणत्वादिति ज्ञानिनो विशेषेण मोक्षमिच्छन्ति ॥५॥

अथ यदि तस्य मोक्षस्याधिकगुणगणो न भवति तर्हि लोको निजमस्तकस्योपरि तं किमर्थं धरतीति निरूपयति—

अणु जइ जगहँ वि अहिययरु गुण-गणु तासु ण होइ।
तो तइलोउ वि किं धरइ णिय-सिर-उप्परि सोइ ॥६॥

उसीका नाम परमविष्णु है, उसका लोक अर्थात् स्थान वह विष्णुलोक है, ये सब मोक्षके नाम हैं, यानी जितने परमात्माके नाम है, उनके आगे लोक लगानेसे मोक्षके नाम हो जाते है, दूसरा कोई कल्पना किया हुआ शिवलोक, ब्रह्मलोक या विष्णुलोक नही है। यहाँ पर साराश यह हुआ कि परलोकके नामसे कहा गया परमात्मा ही उपादय है, ध्यान करने योग्य है, अन्य कोई नही ॥४॥

आगे मोक्ष अनंत सुखका देनेवाला है, इसको दृष्टांतके द्वारा दृढ़ करते हैं—[**यदि**] जो [**मोक्षः**] मोक्ष [**उत्तमं सुखं**] उत्तम सुखको [**न ददाति**] न देवे तो [**उत्तमः**] उत्तम [**न भवति**] नही होवे और जो मोक्ष उत्तम ही न होवे [**ततः**] तो [**बंधनैः बद्धाः**] बंधनोसे बंधे [**पशवोऽपि**] पशु भी [**तमेव**] उस मोक्ष को ही [**किं इच्छंति**] क्यों इच्छा करें ? ॥ **भावार्थ**—बँधनेके समान कोई दुःख नहीं है, और छूटनेके समान कोई सुख नहीं है, बंधनसे बँधे जानवर भी छूटना चाहते हैं, और जब व छूटने है, तब सुखी होते हैं। इस सामान्य बंधनके अभावसे ही पशु सुखी होते है, तो कर्म-बंधनके अभावसे ज्ञानीजन परमसुखी होवें, इसमे अचम्भा क्या है। इसलिये केवलज्ञानादि अनंत गुणसे तन्मयो अनन्त सुखका कारण मोक्ष ही आदरने योग्य है, इस कारण ज्ञानी पुरुष विशेषतासे मोक्षको ही इच्छते हैं ॥५॥

आगे बतलाते हैं—जो मोक्षमें अधिक गुणोंका समूह नही होता, तो मोक्षको तीन लोक अपने

अन्यद् यदि जगतोऽपि अधिकतरः गुणगण. तस्य न भवति ।
ततः त्रिलोकऽपि किं धरति निजशिर उपरि तमेव ॥६॥

अणु इत्यादि । अणु पुनः **जइ यदि चेत्** जगह वि **जगतोऽपि सकाशात्** अहिययरु **अतिशयेनाधिकः अधिकतरः । कोऽसौ ।** गुणगणु **गुणगणः** तासु **तस्य मोक्षस्य** ण होइ **न भवति ।** तो **ततः कारणात्** तइलोउ वि **त्रिलोकोऽपि कर्ता ।** किं धरइ **किमर्थं धरति । कस्मिन् ।** णियसिरउप्परि **निजशिरसि उपरि ।** किं धरइ **किं धरति ।** सोइ **तमेव मोक्षमिति । तद्यथा ।** यदि तस्य **मोक्षस्य पूर्वोक्तः सम्यक्त्वादिगुणगणो न भवति तर्हि लोकः कर्ता निजमस्तकस्योपरि तत्किं धरतीति । अत्रानेन गुणगणस्थापनेन किं कृतं भवति, बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराभिधानानां नवानां गुणानामभावं मोक्षं मन्यन्ते ये वृद्धवैशेषिकास्ते निषिद्धाः । ये च प्रदीपनिर्वाणवज्जी-**

मस्तकपर क्यों रखता ? [**अन्यद्**] फिर [**यदि**] जो [**जगत. अपि**] सब लोकसे भी [**अधिकतरः**] बहुत ज्यादः [**गुणगणः**] गुणोका समूह [**तस्य**] उस मोक्षमें [**न भवति**] नहीं होता, [**ततः**] तो [**त्रिलोक अपि**] तीनों हो लोक [**निजशिरसि**] अपने मस्तकके [**उपरि**] ऊपर [**तमेव**] उसी मोक्षको [**किं धरति**] क्यों रखते ? ॥ **भावार्थ**—मोक्ष लोकके शिखर (अग्रभाग) पर है, सो सब लोकोंसे मोक्षमें बहुत ज्यादः गुण हैं, इसीलिये उसको लोक अपने सिरपर रखता है । कोई किसीको अपने सिरपर रखता है, वह अपनेसे अधिक गुणवाला जानकर ही रखता है । यदि क्षायिक-सम्यक्त्व केवलदर्शनादि अनंत गुण मोक्षमें न होते, तो मोक्ष सबके सिरपर न होता, मोक्षके ऊपर अन्य कोई स्थान नही है, सबके ऊपर मोक्ष ही है, और मोक्षके आगे अनंत अलोक है, वह शून्य है, वहाँ कोई स्थान नहीं है । वह अनंत अलोक भी सिद्धोके ज्ञानमे भास रहा है । यहाँपर मोक्षमें अनंत गुणोंके स्थापन करनेसे मिथ्यादृष्टियोंका खंडन किया । कोई मिथ्यादृष्टि वैशेषिकादि ऐसा कहते है, कि जो बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म, अधर्म, संस्कार इन नव गुणोंके अभावरूप मोक्ष है, उनका निषेध किया, क्योंकि इंद्रियजनित बुद्धिका तो अभाव है, परंतु केवल बुद्धि अर्थात् केवलज्ञानका अभाव नही है, इंद्रियोंसे उत्पन्न सुखका अभाव है, लेकिन अतीन्द्रिय सुखकी पूर्णता है, दुःख इच्छा द्वेष यत्न इन विभावरूप गुणोंका तो अभाव ही है, केवलरूप परिणमन है, व्यवहार-धर्मका अभाव ही है, और वस्तुका स्वभावरूप धर्म वह ही है, अधर्मका तो अभाव ठीक ही है, और परद्रव्यरूप-संस्कार सर्वथा नही है, स्वभाव-संस्कार ही है । जो मूढ इन गुणोंका अभाव मानते हैं, वे वृथा बकते हैं, मोक्ष तो अनंत गुणरूप है । इस तरह निर्गुणवादियोंका निषेध किया । तथा बौद्धमती जीवके अभावको मोक्ष कहते हैं । वे मोक्ष ऐसा मानते हैं कि जैसे दीपकका निर्वाण (बुझना) उसी तरह जीवका अभाव वही मोक्ष है । ऐसी बौद्धकी श्रद्धाका भी तिरस्कार किया । क्योंकि जो जीवका ही अभाव हो गया, तो मोक्ष किसको हुआ ? जीवका शुद्ध होना वह मोक्ष है, अभाव कहना वृथा है । सांख्यदर्शनवाले ऐसा कहते हैं कि जो एकदम सोनेकी अवस्था है, वही मोक्ष है, जिस जगह न सुख है, न ज्ञान है, ऐसी प्रतीतिका निवारण किया । नैया-

बाभावं मोक्षं मन्यन्ते सौगतास्ते च निरस्ताः । यच्चोक्तं सांख्यैः सुप्तावस्थावत् सुखज्ञानरहितो मोक्षस्तदपि निरस्तम् । लोकाग्रे तिष्ठतीति वचनेन तु मण्डिकसंज्ञा नैयायिकमतान्तर्गता यत्रैव मुक्तस्तत्रैव तिष्ठतीति वदन्ति तेऽपि निरस्ता इति । जैनमते पुनरिन्द्रियजनितज्ञानसुखस्याभावे न चातीन्द्रियज्ञानसुखस्येति कर्मजनितेन्द्रियादिदशप्राणसहितस्याशुद्धजीवस्याभावेन न पुनः शुद्धजीवस्येति भावार्थः ।।६।।

अथोत्तमं सुखं न ददाति यदि मोक्षस्तर्हि सिद्धाः कथं निरन्तरं सेवन्ते तमिति कथयति—

उत्तमु सुक्खु ण देइ जइ उत्तमु मुक्खु ण होइ ।
तो किं सयलु वि कालु जिय सिद्ध वि सेवहिँ सोइ ।।७।।

उत्तमं सुखं न ददाति यदि उत्तमः मोक्षो न भवति ।
ततः किं सकलमपि कालं जीव सिद्धा अपि सेवन्ते तमेव ।।७।।

उत्तमु इत्यादि । उत्तमु सुक्खु **उत्तमं सुखं** ण देइ **न ददाति** जइ **यदि चेत्** । उत्तमु **उत्तमो** मुक्खु **मोक्षः** ण होइ **न भवति** । तो **ततः कारणात्**, किं **किमर्थं**, सयलु वि कालु **सकलमपि कालम्** । जिय **हे जीव** । सिद्ध वि **सिद्धा अपि** सेवहिं

यिक ऐसा कहते हैं कि जहाँसे मुक्त हुआ वहीपर ही तिष्ठता है, ऊपरको गमन नही करता । ऐसे नैयायिकके कथनका लोक-सिखरपर तिष्ठता है, इस वचनसे निषेध किया । जहाँ बंधनसे छूटता है, वहाँ वह नहीं रहता, यह प्रत्यक्ष देखनेमे आता है, जैसे कैदी कैदसे जब छूटता है, तब बंदीगृहसे छूटकर अपने घरकी तरफ गमन करना है, वह निजघर निर्वाण ही है । जैन-मार्गमें तो इंद्रियजनितज्ञान जो कि मति, श्रुत, अवधि, मनःपर्यय हैं, उनका अभाव माना है, और अतींद्रियरूप जो केवलज्ञान है, वह वस्तुका स्वभाव है, उसका अभाव आत्मामे नही हो सकता । स्पर्श, रस, गंध, रूप, शब्द इन पाँच इंद्रिय विषयोंकर उत्पन्न हुए सुखका तो अभाव हो है, लेकिन अतींद्रिय सुख जो निराकुल परमानंद है, उसका अभाव नहीं है, कर्मजनित जो इंद्रियादि दस प्राण अर्थात् पाँच इंद्रियाँ, मन, वचन, काय, आयु, श्वासोच्छ्वास इन दस प्राणोंका भी अभाव है, ज्ञानादि निज प्राणोंका अभाव नहीं है । जीवकी अशुद्धताका अभाव है, शुद्धपनेका अभाव नहीं, यह निश्चयसे जानना ।।६।।

आगे कहते हैं कि जो मोक्ष उत्तम सुख नहीं दे, तो सिद्ध उसे निरंतर क्यों सेवन करें ?— [**यदि**] जो [**उत्तमं सुखं**] उत्तम अविनाशी सुखको [**न ददाति**] नही देवे, तो [**मोक्षः उत्तमः**] मोक्ष उत्तम भी [**न भवति**] नही हो सकता, उत्तम सुख देता है इसीलिये मोक्ष सबसे उत्तम है । जो मोक्षमे परमानंद नहीं होता [**ततः**] तो [**जीव**] हे जीव, [**सिद्धा अपि**] सिद्धपरमेष्ठी भी [**सकलमपि कालं**] सदा काल [**तमेव**] उसी मोक्षको [**किं सेवंते**] क्यो सेवन करते ? कभी भी न सेवते ।। **भावार्थ**—वह मोक्ष अखंड सुख देता है, इसीलिये उसे सिद्ध महाराज सेवते हैं, मोक्ष परम आह्लादरूप है, अविनश्वर है, मन और इंद्रियोसे रहित है, इसीलिये उसे सदाकाल सिद्ध सेवते हैं, केवलज्ञानादि गुण सहित सिद्धभगवान् निरंतर निर्वाणमें ही निवास करते हैं, ऐसा

सेवन्ते सोऽपि तमेव मोक्षमिति । तथाहि । यद्यतीन्द्रियपरमाह्लादरूपमविनश्वरं सुखं न ददाति मोक्षस्तर्हि कथमुत्तमो भवति उत्तमत्वाभावे च केवलज्ञानादिगुणसहिताः सिद्धा भगवन्तः किमर्थं निरन्तरं सेवन्ते च चेत् । तस्मादेव ज्ञायते तत्सुखमुत्तमं ददातीति । उक्तं च सिद्धसुखम्—"आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं, वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावम् । अन्यद्रव्यानपेक्षं निरुपममितं शाश्वतं सर्वकालमुत्कृष्टानन्तसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥" । अत्रेदमेव निरन्तरमभिलषणीयमिति भावार्थः ॥७॥

अथ सर्वेषां परमपुरुषाणां मोक्ष एव ध्येय इति प्रतिपादयति—

हरि-हर-बंभु वि जिणवर वि मुणि-वर-विंद वि भव्व ।
परम-णिरंजणि मणु धरिवि मुक्खु जि झायहिँ सव्व ॥८॥

हरिहरब्रह्माणोऽपि जिनवरा अपि मुनिवरवृन्दान्यपि भव्याः ।
परमनिरञ्जने मनः धृत्वा मोक्षं एव ध्यायन्ति सर्वे ॥ ८ ॥

हरिहर इत्यादि । हरिहरबम्भु वि हरिहरब्रह्माणोऽपि जिणवर वि जिनवरा अपि मुणिवरविंद वि मुनिवरवृन्दान्यपि भव्व शेषभव्या अपि । एते सर्वे किं कुर्वन्ति । परमणिरंजणि परमनिरञ्जनाभिधाने निजपरमात्मस्वरूपे । मणु मनः धरिवि विषयकषायेषु गच्छत् सद् व्यावृत्य धृत्वा पश्चात् मुक्खु जि मोक्षमेव झायहिं ध्यायन्ति सव्व सर्वेऽपि इति । तद्यथा । हरिहरादयः सर्वेऽपि प्रसिद्धपुरुषाः ख्यातिपूजालाभावि-

---

निश्चित है। सिद्धोंका सुख दूसरी जगह भी ऐसा कहा है "आत्मोपादान" इत्यादि। इसका अभिप्राय यह है कि इस अध्यात्म-ज्ञानसे सिद्धोंके जो परमसुख हुआ है, वह कैसा है कि अपनी अपनी जो उपादान-शक्ति उसीसे उत्पन्न हुआ है, परकी सहायतासे नहीं है, स्वयं (आप ही) अतिशयरूप है, सब बाधाओंसे रहित है, निराबाध है, विस्तीर्ण है, घटती-बढ़तीसे रहित है, विषय-विकारसे रहित है, भेदभावसे रहित है, निर्द्वन्द्व है, जहाँपर वस्तुकी अपेक्षा नहीं है, अनुपम है, अनंत है, अपार है, जिसका प्रमाण नही सदा काल शाश्वत है, महा उत्कृष्ट है, अनंत सारता लिये हुए है। ऐसा परमसुख सिद्धोंके है, अन्यके नहीं है। यहाँ तात्पर्य यह है कि हमेशा मोक्षका ही सुख अभिलाषा करने योग्य है, और संसार-पर्याय सब हेय है ॥७॥

आगे सभी महान पुरुषोंके मोक्ष ही ध्यावने योग्य है ऐसा कहते हैं—[**हरिहरब्रह्माणोऽपि**] नारायण वा इन्द्र रुद्र अन्य ज्ञानो पुरुष [**जिनवरा अपि**] श्रीतीर्थंकर परमदेव [**मुनिवरवृंदान्यपि**] मुनीश्वरोंके समूह तथा [**भव्याः**] अन्य भी भव्यजीव [**परमनिरंजने**] परम निरंजनमें [**मनः धृत्वा**] मन रखकर [**सर्वे**] सब ही [**मोक्षं**] मोक्षको [**एव**] ही [**ध्यायंति**] ध्यावते है। यह मन विषयकषायोमे जो जाता है, उसको पीछे लौटाकर अपने स्वरूपमे स्थिर अर्थात् निर्वाणका साधनेवाला करते हैं ॥ **भावार्थ**—श्रीतीर्थंकरदेव तथा चक्रवर्ती, बलदेव, वासुदेव, प्रतिवासुदेव

समस्तविकल्पजालेन शून्ये, शुद्धबुद्धैकस्वभावनिजात्मद्रव्यसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसमुत्पन्नवीतरागसहजानन्दैकसुखरसानुभवेन पूर्णकलशवत् भरितावस्थे निरञ्जनशब्दाभिधेयपरमात्मध्याने स्थित्वा मोक्षमेव ध्यायन्ति । अयमत्र भावार्थः । यद्यपि व्यवहारेण सविकल्पावस्थायां वीतरागसर्वज्ञस्वरूपं तत्प्रतिबिम्बानि तन्मन्त्राक्षराणि तदाराधकपुरुषाश्च ध्येया भवन्ति तथापि वीतरागनिर्विकल्पत्रिगुप्तिगुप्तपरमसमाधिकाले निजशुद्धात्मैव ध्येय इति ॥८॥

अथ भुवनत्रयेऽपि मोक्षं मुक्त्वा अन्यत्परमसुखकारणं नास्तीति निश्चिनोति—

तिहुयणि जीवहँ अत्थि णवि सोक्खहँ कारणु कोइ ।
मुक्खु मुएविणु एक्कु पर तेणवि चिंतहि सोइ ॥९॥

त्रिभुवने जीवानां अस्ति नैव सुखस्य कारणं किमपि ।
मोक्षं मुक्त्वा एकं परं तेनैव चिन्तय तमेव ॥९॥

तिहुयणि इत्यादि । तिहुयणि **त्रिभुवने** जीवहं **जीवानां** अत्थि णवि **अस्ति नैव । किं नास्ति ।** सोक्खहं कारणु **सुखस्य कारणम् ।** कोइ **किमपि वस्तु । किं कृत्वा ।** मुक्खु मुएविणु एक्कु **मोक्षं मुक्त्वैकं** पर **नियमेन** तेणवि **तेनैव कारणेन** चिंतहि **चिंतय** सोइ **तमेव मोक्षमिति । तथाहि । त्रिभुवनेऽपि मोक्षं मुक्त्वा निरन्तरातिशय-**

महादेव इत्यादि सब प्रसिद्ध पुरुष अपने शुद्ध ज्ञान अखंड स्वभाव जो निज आत्मद्रव्य उसका सम्यक् श्रद्धान ज्ञान आचरणरूप जो अभेदरत्नत्रयमय समाधिकर उत्पन्न वीतराग सहजानंद अतीन्द्रियसुखरस उसके अनुभवसे पूर्ण कलशकी तरह भरे हुए निरंतर निराकार निजस्वरूप परमात्माके ध्यानमें स्थिर होकर मुक्त होते है। कैसा वह ध्यान है, कि ख्याति (प्रसिद्धि) पूजा (अपनी महिमा) और धनादिकका लाभ इत्यादि समस्त विकल्प-जालोंसे रहित है। यहाँ केवल आत्म-ध्यान ही को मोक्ष-मार्ग बतलाया है, और अपना स्वरूप ही ध्यावने योग्य है। तात्पर्य यह है कि यद्यपि व्यवहार-नयकर प्रथम अवस्थामें वीतरागसर्वज्ञको स्वरूप अथवा वीतरागके नाममंत्रके अक्षर अथवा वीतराग-के सेवक महामुनि ध्यावने योग्य हैं, तो भी वीतराग निर्विकल्प तीन गुप्तिरूप परमसमाधिके समय अपना शुद्ध आत्मा ही ध्यान करने योग्य है, अन्य कोई भी दूसरा पदार्थ पूर्ण अवस्थामे ध्यावने योग्य नहीं है ॥८॥

अब तीन लोकमे मोक्षके सिवाय अन्य कोई भी परमसुखका कारण नहीं है, ऐसा निश्चय करते हैं—[**त्रिभुवने**] तीन लोकमें [**जीवानां**] जीवोंको [**मोक्षं मुक्त्वा**] मोक्षके सिवाय [**किमपि**] कोई भी वस्तु [**सुखस्य कारणं**] सुखका कारण [**नैव**] नही [**अस्ति**] है, एक सुखका कारण मोक्ष ही है [**तेन**] इस कारण तू [**परं एकं तं एव**] नियमसे एक मोक्षका ही [**विचिंतय**] चिंतवन कर जिसे कि महामुनि भी चिंतवन करते है॥ **भावार्थ**—श्रीयोगींद्राचार्य प्रभाकरभट्टसे कहते हैं कि वत्स; मोक्षके सिवाय अन्य सुखका कारण नहीं है, और आत्म-ध्यानके सिवाय अन्य मोक्षका कारण नहीं है, इस-लिये तू वीतरागनिर्विकल्पसमाधिमें ठहरकर निज शुद्धात्म स्वभावको ही ध्या। यह श्रीगुरुने

सुखकारणमन्यत्पञ्चेन्द्रियविषयानुभवरूपं किमपि नास्ति तेन कारणेन हे प्रभाकरभट्ट वीतरागनिर्विकल्पपरमसामायिके स्थित्वा निजशुद्धात्मस्वभावं ध्याय त्वमिति । अत्राह प्रभाकरभट्टः हे भगवन्नतीन्द्रियमोक्षसुखं निरन्तरं वर्ण्यते भवद्भिस्तच्च न ज्ञायते जनैः । भगवानाह हे प्रभाकरभट्ट कोऽपि पुरुषो निर्व्याकुलचित्तः प्रस्तावे पञ्चेन्द्रियभोगसेवारहितस्तिष्ठति स केनापि देवदत्तेन पृष्टः सुखेन स्थितो भवान् । तेनोक्तं सुखमस्तीति तत्सुखमात्मोत्थम् । कस्मादिति चेत् । तत्काले स्त्रीसेवादिस्पर्शविषयो नास्ति भोजनादिजिह्वेन्द्रियविषयो नास्ति विशिष्टरूपगन्धमाल्यादिघ्राणेन्द्रियविषयो नास्ति दिव्यस्त्रीरूपावलोकनादिलोचनविषयो नास्ति श्रवणरमणीयगीतवाद्यादिशब्दविषयोऽपि नास्तीति तस्मात् ज्ञायते तत्सुखमात्मोत्थमिति । किं च । एकदेशविषयव्यापाररहितानां तदेकदेशेनात्मोत्थसुखमुपलभ्यते वीतरागनिर्विकल्पस्वसंवेदनज्ञानरतानां पुनर्निरवशेषपञ्चेन्द्रियविषयमानसविकल्पजालनिरोधे सति विशेषेणोपलभ्यते । इदं तावत् स्वसंवेदनप्रत्यक्षगम्यं सिद्धात्मनां च सुखं पुनरनुमानगम्यम् । तथाहि । मुक्तात्मनां शरीरेन्द्रियविषयव्यापाराभावेऽपि सुखमस्तीति साध्यम् । कस्माद्धेतोः इदानीं पुनर्वीतरागनिर्विकल्पसमाधिस्थानां परमयोगिनां पञ्चेन्द्रियविषय व्यापाराभावेऽपि स्वात्मोत्थवीतरागपरमानन्दसुखोपलब्धिरिति । अत्रेत्थंभूतं सुखमेवोपादेय-

---

आज्ञा की । तब प्रभाकरभट्टने विनती की, हे भगवन्; तुमने निरंतर अतींद्री मोक्ष-सुखका वर्णन किया है, सो ये जगतके प्राणी अतींद्रिय सुखको जानते हो नही हैं, इंद्रिय सुखको ही सुख मानते हैं । तब गुरुने कहा कि हे प्रभाकरभट्ट; कोई एक पुरुष जिसका चित्त व्याकुलता रहित है, पचेन्द्रियके भोगोंसे रहित अकेला स्थित है, उस समय किसी पुरुषने पूछा कि तुम सुखी हो । तब उसने कहा कि सुखसे तिष्ट रहे हैं, उस समयपर विषय-सेवनादि सुख तो है ही नहीं, उसने यह क्यों कहा कि हम सुखी है । इसलिये यह मालूम होता है, सुख नाम व्याकुलता रहितका है, सुखका मूल निर्व्याकुलपना है, वह निर्व्याकुल अवस्था आत्मामे ही है, विषय-सेवनमें नहीं । भोजनादि जिह्वा इंद्रियका विषय भी उस समय नही है, स्त्रोसेवनादि स्पर्शका विषय नही है, और गंधमाल्यादिक नाकका विषय भो नहीं है, दिव्य स्त्रियोंका रूप अवलोकनादि नेत्रका विषय भी नही, और कानोंका मनोज्ञ गीत वादित्रादि शब्द विषय भी नहीं हैं, इसलिये जानते हैं कि सुख आत्मामें ही है। ऐसा तू निश्चय कर, जो एकोदेश विषय-व्यापारसे रहित है, उनके एकोदेश थिरताका सुख है, तो वीतराग निर्विकल्पस्वसंवेदन ज्ञानियोंके समस्त पंच इंद्रियोंके विषय और मनके विकल्प-जालोंकी रुकावट होनेपर विशेषतासे निर्व्याकुल सुख उपजता है । इसलिये ये दो बातें प्रत्यक्ष ही दृष्टि पड़ती हैं । जो पुरुष निरोग और चिंता रहित हैं, उनके विषय-सामग्रोके विना ही सुख भासता है, और जो महामुनि शुद्धोपयोग अवस्थामें ध्यानारूढ़ हैं, उनके निर्व्याकुलता प्रगट ही दीख रहो है, वे इंद्रादिक देवोंसे भी अधिक सुखी हैं । इस कारण जब संसार अवस्थामें ही सुखका मूल निर्व्याकुलता दीखती है, तो सिद्धोंके सुखकी बात ही क्या है ? यद्यपि वे सिद्ध दृष्टिगोचर नहीं हैं, तो भी अनुमान कर ऐसा

मिति भावार्थः। तथागमे चोक्तमात्मोत्थमतीन्द्रियसुखम्—"अइसयमादसमुत्थं विसयातीवं अणोवममणंतं। अव्वुच्छिण्णं च सुहं सुद्धुवओगप्पसिद्धाणं॥" ॥९॥

अथ यस्मिन् मोक्षे पूर्वोक्तमतीन्द्रियसुखमस्ति तस्य मोक्षस्य स्वरूपं कथयति—

जीवहँ सो पर मोक्खु मुणि जो परमप्पय-लाहु।
कम्म-कलंक-विमुक्काहँ णाणिय बोल्लहिँ साहू॥१०॥

जीवानां तं परं मोक्षं मन्यस्व यः परमात्मलाभः।
कर्मकलङ्कविमुक्तानां ज्ञानिनः ब्रुवन्ति साधवः॥१०॥

जीवहं इत्यादि। जीवहं जीवानां सो तं परं नियमेन मोक्खु मोक्षं मुणि मन्यस्व जानीहि हे प्रभाकरभट्ट। तं कम्। जो परमप्पयलाहु यः परमात्मलाभः। इत्थंभूतो मोक्षः केषां भवति। कम्मकलंकविमुक्काहं ज्ञानावरणाद्यष्टविधकर्मकलङ्कविमुक्तानाम्। इत्थंभूतं मोक्षं के ब्रुवन्ति। णाणिय बोल्लहिं वीतरागस्वसंवेदनज्ञानिनो ब्रुवन्ति। ते के। साहू साधवः इति। तथाहि। केवलज्ञानाद्यनन्तगुणव्यक्तिरूपस्य कार्यसमयसारभूतस्य हि परमात्मलाभो मोक्षो भवतीति। स च केषाम्। पुत्रकलत्रममत्वस्वरूपप्रभृतिसमस्तविकल्परहितध्यानेन भावकर्मद्रव्यकर्मकलङ्करहितानां भव्यानां भवतीति ज्ञानिनः कथयन्ति। अत्रायमेव मोक्षः पूर्वोक्तस्यानन्तसुखस्योपादेयभूतस्य कारणत्वादुपादेय इति भावार्थः॥१०॥ एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहा-

---

जाना जाता है, कि सिद्धोंके भावकर्म, द्रव्यकर्म, नोकर्म नहीं, तथा विषयोंकी प्रवृत्ति नहीं है, कोई भी विकल्प-जाल नहीं है, केवल अतींद्रिय आत्मीक-सुख ही है, वही सुख उपादेय है, अन्य सुख सब दुःखरूप ही हैं। जो चारों गतियोंकी पर्यायें हैं, उनमें कदापि सुख नहीं है। सुख तो सिद्धोंके है, या महामुनीश्वरोंके सुखका लेशमात्र देखा जाता है, दूसरेके जगतकी विषय-वासनाओंमें सुख नहीं है ऐसा ही कथन श्रीप्रवचनसारमें किया है। "अइसय" इत्यादि। सारांश यह है, कि जो शुद्धोपयोगकर प्रसिद्ध ऐसे श्रीसिद्धपरमेष्ठी हैं, उनके अतींद्रिय सुख है, वह सर्वोत्कृष्ट है, और आत्मजनित है, तथा विषय-वासनासे रहित है, अनुपम है, जिसके समान सुख तीन लोकमें भी नहीं है, जिसका पार नहीं ऐसा बाधारहित सुख सिद्धोंके है॥९॥

आगे जिस मोक्षमें ऐसा अतींद्रियसुख है, उस मोक्षका स्वरूप कहते हैं—हे प्रभाकरभट्ट; जो [**कर्मकलंकविमुक्तानां जीवानां**] कर्मरूपी कलंकसे रहित जीवोंको [**यः परमात्मलाभः**] जो परमात्मकी प्राप्ति है [**तं परं**] उसीको नियमसे तू [**मोक्षं मन्यस्व**] मोक्ष जान, ऐसा [**ज्ञानिनः साधवः**] ज्ञानवान् मुनिराज [**ब्रुवंति**] कहते हैं, रत्नत्रयके योगसे मोक्षका साधन करते हैं, इससे उनका नाम साधु है॥ **भावार्थ**—केवलज्ञानादि अनंतगुण प्रगटरूप जो कार्यसमयसार अर्थात् शुद्ध परमात्माका लाभ वह मोक्ष है, यह मोक्ष भव्यजीवोंके ही होता है। भव्य कैसे है कि पुत्र कलत्रादि परवस्तुओंके ममत्वको आदि लेकर सब विकल्पोंसे रहित जो आत्म-ध्यान उससे जिन्होंने भावकर्म और द्रव्यकर्मरूपी कलंक क्षय किये हैं, ऐसे जीवोंके निर्वाण होता है, ऐसा ज्ञानीजन कहते हैं। यहाँ पर अनंत सुखका कारण होनेसे मोक्ष ही उपादेय है॥१०॥

धिकारमध्ये सूत्रदशकेन मोक्षस्वरूपनिरूपणस्थलं समाप्तम् ।

अथ तस्यैव मोक्षस्यानन्तचतुष्टयस्वरूपं फलं दर्शयति—

दंसणु णाणु अणंत-सुहु समउ ण तुट्टइ जासु ।
सो पर सासउ मोक्ख-फलु बिज्जउ अत्थि ण तासु ।।११।।
दर्शनं ज्ञानं अनन्तसुखं समयं न त्रुटयति यस्य ।
तत् परं शाश्वतं मोक्षफलं द्वितीयं अस्ति न तस्य ।।११।।

दंसणु इत्यादि । दंसणु केवलदर्शनं णाणु केवलज्ञानं अणंतसुहु अनन्तसुखम् एतद्‌पलक्षणमनन्तवीर्याद्यनन्तगुणाः समउ ण तुट्टइ एतद्‌गुणकदम्बकमेकसमयमपि यावन्न त्रुटयति न नश्यति जासु यस्य मोक्षपर्यायस्याभेदेन तदाधारजीवस्य वा सो पर तदेव केवलज्ञानादिस्वरूपं सासउ मोक्खफलु शाश्वतं मोक्षफलं भवति । बिज्जउ अत्थि ण तासु तस्यानन्तज्ञानादिमोक्षफलस्यान्यद् द्वितीयमधिकं किमपि नास्तीति । अयमत्र भावार्थः । अनन्तज्ञानादिमोक्षफलं ज्ञात्वा समस्तरागादित्यागेन तदर्थमेव निरन्तरं शुद्धात्मभावना कर्तव्येति ।।११।। एवं द्वितीयमहाधिकारे मोक्षफलकथनरूपेण स्वतन्त्रसूत्रमेकं गतम् ।

अथानन्तरमेकोनविंशतिसूत्रपर्यन्तं निश्चयव्यवहारमोक्षमार्गव्याख्यानस्थलं कथ्यते तद्यथा—

जीवहँ मोक्खहँ हेउ वरु दंसणु णाणु चरित्तु ।
ते पुणु तिण्णि वि अप्पु मुणि णिच्छएँ एहउ वुत्तु ।।१२।।
जीवानां मोक्षस्य हेतुः वरं दर्शनं ज्ञानं चारित्रम् ।
तानि पुन. त्रीण्यपि आत्मानं मन्यस्व निश्चयेन एवं उक्तम् ।।१२।।

जीवहं इत्यादि । जीवहं जीवानां अथवा एकवचनपक्षे 'जीवहो' जीवस्य

इस प्रकार मोक्षका फल और मोक्ष-मार्गका जिसमें कथन है, ऐसे दूसरे महाधिकारके दस दोहोंमें मोक्षका स्वरूप दिखलाया ।

आगे मोक्षका फल अनंतचतुष्टय है, यह दिखलाते हैं—[यस्य] जिस मोक्ष-पर्यायके धारक शुद्धात्माके [दर्शनं ज्ञानं अनंतसुखं] केवलदर्शन, केवलज्ञान, अनंतसुख, और अनंतवीर्य इन अनंत-, चतुष्टयोंको आदि देकर अनंत गुणोंका समूह [समयं न त्रुटयति] एक समयमात्र भी नाश नहीं होता अर्थात् हमेशा अनंत गुण पाये जाते हैं । [तस्य] उस शुद्धात्माके [तत्] वही [परं] निश्चयसे [शाश्वतं फलं] हमेशा रहनेवाला मोक्षका फल [अस्ति] है, [द्वितीयं न] इसके सिवाय दूसरा मोक्ष-फल नहीं है, और इससे अधिक दूसरी वस्तु कोई नहीं है ।। भावार्थ—मोक्षका फल अनंतज्ञानादि जानकर समस्त रागादिकका त्याग करके उसीके लिये निरन्तर शुद्धात्माकी भावना करनी चाहिये ।।११।।

इस प्रकार दूसरे महाधिकारमें मोक्ष-फलके कथनकी मुख्यताकर एक दोहा-सूत्र कहा ।

मोक्खहं हेउ मोक्षस्य हेतुः कारणं व्यवहारनयेन भवतीति क्रियाध्याहार[1] । **कथंभूतम्** । वरु **वरमुत्कृष्टम्** । **किं तत्** । दंसणु णाणु चरित्तु **सम्यग्दर्शनज्ञानचारित्रत्रयम्** । ते पुणु **तानि पुनः** तिण्णि वि **त्रीण्यपि सम्यग्दर्शनज्ञानचारित्राणि** अप्पु **आत्मानमभेदनयेन** मुणि **मन्यस्व जानीहि त्वं हे** प्रभाकरभट्ट णिच्छइं **निश्चयनयेन** एहउ वुत्तु **एवमुक्तं भणितं तिष्ठतीति । इदमत्र तात्पर्यम् । भेदरत्नत्रयात्मको व्यवहारमोक्षमार्गः साधको भवति अभेदरत्नत्रयात्मकः पुनर्निश्चयमोक्षमार्गः साध्यो भवति, एवं निश्चयव्यवहारमोक्षमार्गयोः साध्यसाधकभावो ज्ञातव्यः सुवर्णसुवर्णपाषाणवत् इति । तथा चोक्तम्—"सम्मद्दंसणणाणं चरणं मोक्खस्स कारणं जाणे । ववहारा णिच्छयदो तत्तियमइओ णिओ अप्पा ॥"** ॥१२॥

अथ निश्चयरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भवतीति प्रतिपादयति—

पेच्छइ जाणइ अणुचरइ अप्पिं अप्पउ जो जि ।
दंसणु णाणु चरित्तु जिउ मोक्खहँ कारणु सो जि ॥१३॥

पश्यति जानाति अनुचरति आत्मना आत्मानं य एव ।
दर्शनं ज्ञानं चारित्रं जीव: मोक्षस्य कारणं स एव ॥१३॥

पेच्छइ इत्यादि । पेच्छइ **पश्यति** जाणइ **जानाति** अणुचरइ **अनुचरति** । **केन कृत्वा** । अप्पइं **आत्मना करणभूतेन** । **कं कर्मतापन्नम्** । अप्पउ **निजात्मानम्** । जो जि **य एव कर्ता** दंसणु णाणु चरित्तु **दर्शनज्ञानचारित्रत्रयं भवतीति क्रियाध्याहारः** । **कोऽसौ भवति** । जिउ **जीवः य एवाभेदनयेन सम्यग्दर्शनज्ञानचारित्रत्रयं भवतीति**

आगे उन्नीस दोहापर्यंत निश्चय और व्यवहार मोक्ष-मार्गका व्याख्यान करते है—[**जीवानां**] जीवों के [**मोक्षस्य हेतुः**] मोक्षके कारण [**वरं**] उत्कृष्ट [**दर्शनं ज्ञानं चारित्रं**] दर्शन ज्ञान और चारित्र हैं [**तानि पुनः**] फिर वे [**त्रीण्यपि**] तीनों ही [**निश्चयेन**] निश्चयकर [**आत्मानं**] आत्माको ही [**मन्यस्व**] जाने [**एवं**] ऐसा [**उक्तं**] श्रीवीतरागदेवने कहा है, ऐसा हे प्रभाकरभट्ट; तू जान ॥ **भावार्थ**—भेदरत्नत्रयरूप व्यवहार-मोक्ष-मार्ग साधक है, और अभेदरत्नत्रयरूप निश्चय-मोक्षमार्ग साधने योग्य है । इस प्रकार निश्चय व्यवहारमोक्ष-मार्ग का साध्य-साधकभाव, सुवर्ण सुवर्ण-पाषाण-की तरह जानना । ऐसा ही कथन श्रीद्रव्यसंग्रहमे कहा है । "सम्मद्दंसण" इत्यादि । इसका अभिप्राय यह है कि सम्यग्दर्शन सम्यग्ज्ञान सम्यक्चारित्र ये तीनो ही व्यवहारनयकर मोक्षके कारण जानने, और निश्चयसे उन तीनोमयी एक आत्मा ही मोक्षका कारण है ॥१२॥

आगे निश्चयरत्नत्रयरूप परिणत हुआ निज शुद्धात्मा ही मोक्षका मार्ग है, ऐसा कहते हैं—[**य एव**] जो [**आत्मना**] अपनेसे [**आत्मानं**] आपको [**पश्यति**] देखता है, [**जानाति**] जानता है, [**अनुचरति**] आचरण करता है, [**स एव**] वही विवेकी [**दर्शनं ज्ञानं चारित्रं**] दर्शन ज्ञान चारित्ररूप परिणत हुआ [**जीवः**] जोव [**मोक्षस्य कारणं**] मोक्षका कारण है ॥ **भावार्थ**—जो सम्यग्दृष्टी जीव अपने आत्माको आपकर निर्विकल्परूप देखता है, अथवा तत्त्वार्थश्रद्धानकी अपेक्षा चंचलता और मलीनता

---

१. पाठान्तरः—भवतीति = भवति ।

मोक्खहं कारणु निश्चयेन मोक्षस्य कारणं एक एव सो जि स एव निश्चयरत्नत्रय-परिणतो जोव इति । तथाहि । यः कर्ता निजात्मानं मोक्षस्य कारणभूतेन आत्मना कृत्वा पश्यति निर्विकल्परूपेणावलोकयति । अथवा तत्त्वार्थश्रद्धानापेक्षया चलमलिना-गाढपरिहारेण शुद्धात्मैवोपादेय इति रुचिरूपेण निश्चिनोति न केवलं निश्चिनोति वीतरागस्वसंवेदनलक्षणाभेदज्ञानेन जानाति परिच्छिनत्ति । न केवलं परिच्छिनत्ति । अनुचरति रागादिसमस्तविकल्पत्यागेन तत्रैव निजस्वरूपे स्थिरीभवतीति स निश्चय-रत्नत्रयपरिणतः पुरुष एव निश्चयमोक्षमार्गो भवतीति । अत्राह प्रभाकरभट्टः । तत्त्वार्थश्रद्धानरुचिरूपं सम्यग्दर्शनं मोक्षमार्गो भवति नास्ति दोषः, पश्यति निर्वि-कल्परूपेणावलोकयति इत्येवं यदुक्तं तत्सत्तावलोकदर्शनं कथं मोक्षमार्गो भवति यदि भवति चेत्तर्हि तत्सत्तावलोकदर्शनमभव्यानामपि विद्यते तेषामपि मोक्षो भवति स चागमविरोधः इति । परिहारमाह । तेषां निर्विकल्पसत्तावलोकदर्शनं बहिर्विषये विद्यते न चाभ्यन्तरशुद्धात्मतत्त्वविषये । कस्मादिति चेत् । तेषामभव्यानां मिथ्यात्वादिसप्त-प्रकृत्युपशमक्षयोपशमक्षयाभावात् शुद्धात्मोपादेय इति रुचिरूपं सम्यग्दर्शनमेव नास्ति चारित्रमोहोदयात् पुनर्वीतरागचारित्ररूपं निर्विकल्पशुद्धात्मसत्तावलोकनमपि न संभवतीति भावार्थः । निश्चयेनाभेदरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भव-तीत्यस्मिन्नर्थे संवादगाथामाह—"रयणत्तयं ण वट्टइ अप्पाणं मुइत्तु अण्णदवियम्हि । तम्हा तत्तियमइओ होदि हु मुक्खस्स कारणं आदा ।।" ।। १३ ।।

तथा शिथिलता इनका त्यागकर शुद्धात्मा ही उपादेय है, इस प्रकार रुचिरूप निश्चय करता है, वीतराग स्वसंवेदनलक्षण ज्ञानसे जानता है, और सब रागादिक विकल्पोंके त्यागसे निज स्वरूपमें स्थिर होता है, सो निश्चयरत्नत्रयको परिणत हुआ पुरुष ही मोक्षका मार्ग है। ऐसा कथन सुनकर प्रभाकरभट्टने प्रश्न किया कि हे प्रभो; तत्त्वार्थश्रद्धान रुचिरूप सम्यग्दर्शन वह मोक्षका मार्ग है, इसमें तो दोष नहीं और तुमने कहा कि जो देखे वह दर्शन, जानें वह ज्ञान, और आचरण करे वह चारित्र है। सो यह देखनेरूप दर्शन कैसे मोक्षका मार्ग हो सकता है ? और जो कभी देखने का नाम दर्शन कहो तो देखना अभव्यको भी होता है, उसके मोक्ष-मार्ग तो नहीं माना है ? यदि अभव्यके मोक्ष-मार्ग होवे, तो आगमसे विरोध आवे । आगममें तो यह निश्चय है कि अभव्यका मोक्ष नहीं होता । उसका समाधान यह है कि अभव्योंके देखनेरूप जो दर्शन है, वह बाह्यपदार्थोंका है, अंतरंग शुद्धात्मतत्त्वका दर्शन तो अभव्योंके नहीं होता, उसके मिथ्यात्व आदि सात प्रकृतियोंका उपशम क्षयोपशम क्षय नहीं है, तथा शुद्धात्मा ही उपादेय हैं, ऐसी रुचिरूप सम्यग्दर्शन भी उसके नहीं है, और चारित्रमोहके उदयसे वीतराग चारित्ररूप निर्विकल्प शुद्धात्मका सत्तावलोकन भी उसके कभी नहीं है । तात्पर्य यह है, निश्चयकर अभेदरत्नत्रयको परिणत हुआ निज शुद्धात्मा ही मोक्षका मार्ग है । ऐसी ही द्रव्यसंग्रहमे साक्षीभूत गाथा कही है। "रयणत्तयं" इत्यादि । उसका

---

१. पाठान्तरः—भवति = भवतु ।

अथ भेदरत्नत्रयात्मकं व्यवहारमोक्षमार्गं दर्शयति —

जं बोल्लइ ववहारु-णउ दंसणु णाणु चरित्तु ।
तं परियाणहि जीव तुहुँ जें परु होहि पवित्तु ॥१४॥

यद् ब्रूते व्यवहारनयः दर्शनं ज्ञानं चारित्रम् ।
तत् परिजानीहि जीव त्वं येन परः भवसि पवित्रः ॥१४॥

जं इत्यादि । जं यत् बोल्लइ **ब्रूते । कोऽसौ कर्ता ।** ववहारणउ **व्यवहारनयः । यत् किं ब्रूते ।** दंसणु णाणु चरित्तु **सम्यग्दर्शनज्ञानचारित्रत्रयं** त **पूर्वोक्तं भेदरत्नत्रयस्वरूपं** परियाणहि **परि समन्तात् जानीहि ।** जीव तुहुं हे **जीव त्वं कर्ता ।** जें **येन भेदरत्नत्रयपरिज्ञानेन** परु होहि **परः उत्कृष्टो भवसि त्वम् । पुनरपि किंविशिष्टस्त्वम् ।** पवित्तु **पवित्रः सर्वजनपूज्य इति । तद्यथा । हे जीव सम्यग्दर्शनज्ञानचारित्ररूपनिश्चयरत्नत्रयलक्षणनिश्चयमोक्षमार्गसाधकं व्यवहारमोक्षमार्गं जानीहि । त्वं येन ज्ञातेन कथंभूतो भविष्यसि । परंपरया पवित्रः परमात्मा भविष्यसि इति । व्यवहारनिश्चयमोक्षमार्गस्वरूपं कथ्यते । तद्यथा । वीतरागसर्वज्ञप्रणीतषड्द्रव्यादिसम्यक्श्रद्धानज्ञानव्रताद्यनुष्ठानरूपो व्यवहारमोक्षमार्गः निजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठान-**

अर्थ ऐसा है कि रत्नत्रय आत्माको छोड़कर अन्य (दूसरी) द्रव्योंमें नहीं रहता, इसलिये मोक्षका कारण उन तीनमयी निज आत्मा ही है ॥१३॥

आगे भेदरत्नत्रयस्वरूप-व्यवहार वह परम्पराय मोक्षका मार्ग है, ऐसा दिखलाते हैं।— [**जीव**] हे जीव, [**व्यवहारनयः**] व्यवहारनय [**यत्**] जो [**दर्शनं ज्ञानं चारित्रं**] दर्शन ज्ञान चारित्र इन तीनों को [**ब्रूते**] कहता है, [**तत्**] उस व्यवहाररत्नत्रयको [**त्वं**] तू [**परिजानीहि**] जान, [**येन**] जिससे कि [**परः पवित्रः**] उत्कृष्ट अर्थात् पवित्र [**भवसि**] होवे ॥ **भावार्थ**—हे जीव, तू तत्त्वार्थका श्रद्धान, शास्त्रका ज्ञान, और अशुभ क्रियाओंका त्यागरूप सम्यग्दर्शन ज्ञान-चारित्र व्यवहारमोक्ष मार्गको जान, क्योंकि ये निश्चयरत्नत्रयरूप निश्चयमोक्ष-मार्गके साधक हैं, इनके जाननेसे किसी समय परम पवित्र परमात्मा हो जायगा। पहले व्यवहाररत्नत्रयकी प्राप्ति हो जावे, तब ही निश्चयरत्नत्रयकी प्राप्ति हो सकती है, इसमें संदेह नहीं है। जो अनन्त सिद्ध हुए और होवेंगे वे पहले व्यवहाररत्नत्रयको पाकर निश्चयरत्नत्रयरूप हुए। व्यवहार साधन है, और निश्चय साध्य है। व्यवहार और निश्चय मोक्ष-मार्गका स्वरूप कहते हैं—वीतराग सर्वज्ञदेवके कहे हुए छह द्रव्य, सात तत्त्व, नौ पदार्थ, पंचास्तिकाय, इनका श्रद्धान, इनके स्वरूपका ज्ञान, और शुभ क्रियाका आचरण, यह व्यवहारमोक्ष-मार्ग है, और निज शुद्ध आत्माका सम्यक श्रद्धान स्वरूपका ज्ञान, और स्वरूपका आचरण यह निश्चयमोक्ष-मार्ग है। साधनके बिना सिद्धि नहीं होती, इसलिये व्यवहारके विना निश्चयकी प्राप्ति नहीं होती। यह कथन सुनकर शिष्यने प्रश्न किया कि हे प्रभो; निश्चयमोक्ष-मार्ग जो निश्चयरत्नत्रय वह तो निर्विकल्प है, और व्यवहाररत्नत्रय विकल्प सहित है, सो यह विकल्प-दशा निर्विकल्पपनेकी साधन कैसे हो सकती है? इस कारण उसको साधक मत कहो। अब इसका समाधान करते हैं। जो अनादिकालका यह जीव विषय कषायोंसे मलीन हो रहा है, सो व्यवहार-साधनके बिना उज्ज्वल नहीं हो सकता, जब मिथ्यात्व अव्रत कषायादिककी क्षीणतासे

निश्चयमार्गः अथवा साधको व्यवहारमोक्षमार्गः, साध्यो निश्चयमोक्षमार्गः। अत्राह शिष्यः। निश्चयमोक्षमार्गो निर्विकल्पः तत्काले सविकल्पमोक्षमार्गो नास्ति कथं साधको भवतीति। अत्र परिहारमाह। भूतनैगमनयेन परंपरया भवतीति। अथवा सविकल्पनिर्विकल्पभेदेन निश्चयमोक्षमार्गो द्विधा, तत्रानन्तज्ञानरूपोऽहमित्यादि सविकल्परूपसाधको भवति, निर्विकल्पसमाधिरूपो साध्यो भवतीति भावार्थः॥ सविकल्पनिर्विकल्पनिश्चयमोक्षमार्गविषये संवादगाथामाह—"जं पुण सगयं तच्चं सवियप्पं होइ तह य अवियप्पं। सवियप्पं सासवयं णिरासवं विगयसंकप्पं।"॥१४॥ एवं पूर्वोक्तैकोनविंशतिसूत्रप्रमितमहास्थलमध्ये निश्चयव्यवहारमोक्षमार्गप्रतिपादनरूपेण सूत्रत्रयं गतम्। इदानीं चतुर्दशसूत्रपर्यन्तं व्यवहारमोक्षमार्गप्रथमावयवभूतव्यवहारसम्यक्त्वं मुख्यवृत्त्या प्रतिपादयति। तद्यथा——

जाणवि इत्यादि । जाणवि सम्यग्ज्ञानेन ज्ञात्वा न केवलं ज्ञात्वा मण्णवि तत्त्वार्थश्रद्धानलक्षणपरिणामेन मत्वा श्रद्धाय । कम् । अप्पु परु आत्मानं च परं च जो यः कर्ता परभाउ परभावं चएइ त्यजति सो स पूर्वोक्तः णिउ निजः सुद्धउ भावडउ शुद्धो भावो णाणिहिं चरणु हवेइ ज्ञानिनां पुरुषाणां चरणं भवतीति । तद्यथा । वीतरागसहजानन्दैकस्वभावं स्वद्रव्यं तद्विपरीतं परद्रव्यं च संशयविपर्ययानध्यवसायरहितेन ज्ञानेन पूर्वं ज्ञात्वा शङ्कादिदोषरहितेन सम्यक्त्वपरिणामेन श्रद्धाय च यः कर्ता मायामिथ्यानि-

[मन्यस्व] तू माना ॥ भावार्थ—जो द्रव्य है, वह सत्ता लक्षण है, उत्पाद व्यय ध्रौव्यरूप है, और सभी द्रव्य गुण पर्यायको धारण करते हैं, गुण पर्यायके बिना कोई नहीं है । अथवा सब ही द्रव्य सप्तभंगीस्वरूप हैं, ऐसा द्रव्योंका स्वरूप जो निःसंदेह जाने, आप और परको पहचाने, ऐसा जो आत्माका भाव (परिणाम) वह सम्यग्ज्ञान है । सारांश यह है, कि व्यवहारनयकर विकल्प सहित अवस्थामे तत्त्वके विचारके समय आप और परका जानपना ज्ञान कहा है, और निश्चयनयकर वीतराग निर्विकल्प समाधिसमय पदार्थोंका जानपना मुख्य नही लिया, केवल स्वसंवेदनज्ञान हो निश्चयसम्यग्ज्ञान है । व्यवहारसम्यग्ज्ञान तो परम्पराय मोक्षका कारण है, और निश्चयसम्यग्ज्ञान साक्षात् मोक्षका कारण है ॥ २९ ॥

आगे निज और परद्रव्यको जानकर रागादिरूप जो परद्रव्यमे संकल्प विकल्प हैं, उनके त्यागसे जो निजस्वरूपमें निश्चलता होती है, वही ज्ञानी जीवोंके सम्यक्चारित्र है, ऐसा कहते हैं— सम्यग्ज्ञानसे [**आत्मानं च परं**] आपको और परको [**ज्ञात्वा**] जानकर और सम्यग्दर्शनसे [**मत्वा**] आप और परको प्रतीति करके [**यः**] जो [**परभावं**] परभावको [**त्यजति**] छोड़ता है [**सः**] वह [**निजः शुद्धः भावः**] आत्माका निज शुद्धभाव [**ज्ञानिनां**] ज्ञानी पुरुषोंके [**चरणं**] चारित्र [**भवति**] होता है ॥ **भावार्थ**—वीतराग सहजानंद अद्वितीय स्वभाव जो आत्मद्रव्य उससे विपरीत पुद्गलादि परद्रव्योंको सम्यग्ज्ञानसे पहले तो जानें, वह सम्यग्ज्ञान संशय विमोह और विभ्रम इन तीनोंसे रहित है । तथा शंकादि दोषोंसे रहित जो सम्यग्दर्शन है, उससे आप और परकी श्राद्ध

ज्ञानख्यातिपूजालाभप्रभृतिसमस्तचिन्ताजालत्यागेन निजशुद्धात्मस्वरूपे परमानन्दसुखरसास्वादतृप्तो भूत्वा तिष्ठति स पुरुष एवाभेदेन निश्चयचारित्रं भवतीति भावार्थः ॥३०॥

एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये निश्चयव्यवहारमोक्षमार्गमुख्यत्वेन सूत्रत्रयं षड्द्रव्यश्रद्धानलक्षणव्यवहारसम्यक्त्वव्याख्यानमुख्यत्वेन सूत्राणि चतुर्दश, सम्यग्ज्ञानचारित्रमुख्यत्वेन सूत्रद्वयमिति समुदायेनैकोनविंशतिसूत्रस्थलं समाप्तम् ।

अथानन्तरमभेदरत्नत्रयव्याख्यानमुख्यत्वेन सूत्राष्टकं कथ्यते, तत्रादौ तावत् रत्नत्रयभक्तभव्यजीवस्य लक्षणं प्रतिपादयति—

जो भत्तउ रयण-त्तयहँ तसु मुणि लक्खणु एउ ।
अप्पा मिल्लिवि गुण-णिलउ तासु वि अण्णु ण झेउ ॥३१॥

यः भक्तः रत्नत्रयस्य तस्य मन्यस्व लक्षणं एतत् ।
आत्मानं मुक्त्वा गुणनिलयं तस्यापि अन्यत् न ध्येयम् ॥३१॥

जो इत्यादि । जो यः भत्तउ भक्तः । कस्य । रयणत्तयहं रत्नत्रयसंयुक्तस्य तसु तस्य जीवस्य मुणि मन्यस्व जानीहि हे प्रभाकरभट्ट । किं जानीहि । लक्खणु लक्षणं एउ इदमग्रे वक्ष्यमाणम् । इदं किम् । अप्पा मिल्लिवि आत्मानं मुक्त्वा । किंविशिष्टम् । गुणणिलउ गुणनिलयं गुणगृहं तासु वि तस्यैव जीवस्य अण्णु ण झेउ निश्चयेनान्यद्बहिर्द्रव्यं ध्येयं न भवतीति । तथाहि । व्यवहारेण वीतरागसर्वज्ञप्रणीत-

---

करे, अच्छी तरह जानके प्रतीति करे, और माया मिथ्या निदान इन तीन शल्योंको आदि लेकर समस्त चिंता-समूहके त्यागसे निज शुद्धात्मस्वरूपमे तिष्ठ है, वह परम आनंद अतीन्द्रीय सुखरसके आस्वादसे तृप्त हुआ पुरुष ही अभेदनयसे निश्चयचारित्र है ॥ ३० ॥

इस प्रकार मोक्ष, मोक्षका फल, मोक्षका मार्ग इनको कहनेवाले दूसरे महाधिकारमे निश्चय व्यवहाररूप निर्वाणके पंथकी मुख्यतासे तीन दोहोंमे व्याख्यान किया, और चौदह दोहोमे छह द्रव्यकी श्रद्धारूप व्यवहारसम्यक्त्वका व्याख्यान किया, तथा दो दोहोंमें सम्यग्ज्ञान सम्यक्‌चारित्रका मुख्यतासे वर्णन किया । इस प्रकार उन्नीस दोहोका स्थल पूरा हुआ ।

आगे अभेदरत्नत्रयके व्याख्यानकी मुख्यतासे आठ दोहा-सूत्र कहते है, उनमेंसे पहले रत्नत्रयके भक्त भव्यजीवके लक्षण कहते हैं—[यः] जो जीव [रत्नत्रयस्य भक्तः] रत्नत्रयका भक्त है [तस्य] उसका [इदं लक्षणं] यह लक्षण [मन्यस्व] जानना, हे प्रभाकरभट्ट; रत्नत्रय धारकके ये लक्षण हैं । [गुणनिलयं] गुणोके समूह [आत्मानं मुक्त्वा] आत्माको छोड़कर [तस्यापि अन्यत्] आत्मासे अन्य बाह्य द्रव्यको [न ध्येयं] न ध्यावे, निश्चयनयसे एक आत्मा ही ध्यावने योग्य है, अन्य नही ॥ भावार्थ—व्यवहारनयकर वीतराग सर्वज्ञके कहे हुए शुद्धात्मतत्त्व आदि छह द्रव्य, सात तत्त्व, नौ पदार्थ, पदार्थ, पंच अस्तिकायका श्रद्धान जानने योग्य है, और हिंसादि पाप त्याग करने योग्य हैं, व्रत शीलादि पालने योग्य हैं, ये लक्षण व्यवहाररत्नत्रयके है, सो व्यवहारका नाम भेद हैं, वह भेदरत्नत्रय आराधने योग्य है, उसके प्रभावसे निश्चयरत्नत्रयकी प्राप्ति है । वीतराग

शुद्धात्मतत्त्वप्रभृतिषड्द्रव्यपञ्चास्तिकायसप्ततत्त्वनवपदार्थविषये सम्यक् श्रद्धानज्ञाना-हिंसाविव्रतशीलपरिपालनरूपस्य भेदरत्नत्रयस्य निश्चयेन वीतरागसदानन्दैकरूपसुख-सुधारसास्वादपरिणतनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणरूपस्याभेदरत्नत्रयस्य च योऽसौ भक्तस्तस्येदं लक्षणं जानीहि । इदं किम् । यद्यपि व्यवहारेण सविकल्पाव-स्थायां चित्तस्थितिकरणार्थं देवेन्द्रचक्रवर्त्यादिविभूतिविशेषकारणं परंपरया शुद्धात्म-प्राप्तिहेतुभूतं पञ्चपरमेष्ठिरूपस्तववस्तुस्तवगुणस्तवादिकं वचनेन स्तुत्यं भवति मनसा च तदक्षररूपादिकं प्राथमिकानां ध्येयं भवति, तथापि पूर्वोक्तनिश्चयरत्नत्रय-परिणतिकाले केवलज्ञानाद्यनन्तगुणपरिणतः स्वशुद्धात्मैव ध्येय इति । अत्रेदं तात्पर्यम् । योऽसावनन्तज्ञानादिगुणः शुद्धात्मा ध्येयो भणितः स एव निश्चयेनो-पादेय इति ॥३१॥

अथ ये ज्ञानिनो निर्मलरत्नत्रयमेवात्मानं मन्यन्ते शिवशब्दवाच्यं ते मोक्षपदा-राधकाः सन्तो निजात्मानं ध्यायन्तीति निरूपयति—

जे रयण-त्तउ णिम्मलउ णाणिय अप्पु भणंति ।
ते आराहय सिव-पयहँ णिय-अप्पा झायंति ॥३२॥

ये रत्नत्रयं निर्मलं ज्ञानिनः आत्मानं भणन्ति ।
ते आराधकाः शिवपदस्य निजात्मानं ध्यायन्ति ॥३२॥

जे इत्यादि । ये केचन रयणत्तउ रत्नत्रयम् । कथंभूतम् । णिम्मलउ निर्मलं रागादिदोषरहितम् । कथंभूता ये । णाणिय ज्ञानिनः । किं कुर्वन्ति । अप्पु भणंति पूर्वोक्तरत्नत्रयस्वरूपमेवात्मानं, आत्मस्वरूपं कर्मतापन्नं भणंति मन्यन्ते ते आराहय

सदा आनंदरूप जो निज शुद्धात्मा आत्मीक सुखरूप सुधारसके आस्वाद कर परिणत हुआ उसका सम्यक् श्रद्धान ज्ञान आचरणरूप अभेदरत्नत्रय है, उसका जो भक्त (आराधक) उसके ये लक्षण हैं, यह जानो । वे कौनसे लक्षण है—यद्यपि व्यवहारनयकर सविकल्प अवस्थामे चित्तके स्थिर करनेके लिये पंचपरमेष्ठीका स्तवन करता है, जो पंचपरमेष्ठीका स्तवन देवेन्द्र चक्रवर्ती आदि विभूतिका कारण है, और परम्पराय शुद्ध आत्मतत्त्वकी प्राप्तिका कारण है, सो प्रथम अवस्थामें भव्यजीवोंको पंचपरमेष्ठी ध्यावने योग्य हैं, उनके आत्माका स्तवन, गुणोकी स्तुति, वचनसे उनकी अनेक तरहकी स्तुति करनी, और मनसे उनके नामके अक्षर तथा उनका रूपादिक ध्यावने योग्य हैं, तो भी पूर्वोक्त निश्चयरत्नत्रयकी प्राप्तिके समय केवलज्ञानादि अनन्तगुणरूप परिणत जो निज शुद्धात्मा वही आराधने योग्य है, अन्य नही । तात्पर्य यह है कि ध्यान करने योग्य या तो निज आत्मा है, या पंचपरमेष्ठी हैं, अन्य नहीं, प्रथम अवस्थामें तो पंचपरमेष्ठीका ध्यान करना योग्य है, और निर्विकल्पदशामें निजस्वरूप ही ध्यावने योग्य है, निजरूप ही उपादेय हैं ॥३१॥

आगे जो ज्ञानी निर्मल रत्नत्रयको ही आत्मस्वरूप मानते हैं, और अपनेको ही शिव जानते हैं, वे ही मोक्षपदके धारक हुए निज आत्माको ध्यावते है, ऐसा निरूपण करते हैं—[ये ज्ञानिनः]

ते पूर्वोक्ताः पुरुषाः आराधका भवन्ति । कस्य । सिवपयहं शिवपदस्य शिवशब्द-वाच्य मोक्षपदस्य । मोक्षपदाराधकाः सन्तः किं कुर्वन्ति । णियअप्पा झायंति निजात्मानं कर्मतापन्नं ध्यायन्ति इति । तथा च ये केचन वीतरागस्वसंवेदनज्ञानिनः परमात्मानं सम्यक्श्रद्धानज्ञानानुष्ठानलक्षणं निश्चयरत्नत्रयमेवाभेदनयेन निजशुद्धात्मानं मन्यन्ते ते शिवशब्दवाच्यमोक्षपदाराधका भवन्ति । आराधकाः सन्तः किं ध्यायन्ति । विशुद्धज्ञानदर्शनं स्वशुद्धात्मस्वरूपं निश्चयनयेन ध्यायन्ति भावयन्तीत्यभिप्रायः ॥३२॥

अथात्मानं गुणस्वरूपं रागादिदोषरहितं ये ध्यायन्ति ते शीघ्रं नियमेन मोक्षं लभन्त इति प्रकटयति—

अप्पा गुणमउ णिम्मलउ अणुदिणु जे झायंति ।
ते पर णियमें परम-मुणि लहु णिव्वाणु लहंति ॥३३॥

आत्मानं गुणमयं निर्मलं अनुदिनं ये ध्यायन्ति ।
ते परं नियमेन परममुनयः लघु निर्वाणं लभन्ते ॥३३॥

अप्पा इत्यादि । अप्पा आत्मानं कर्मतापन्नम् । कथंभूतम् गुणमउ गुणमयं केवलज्ञानाद्यनन्तगुणनिर्वृत्तम् । पुनरपि कथंभूतम् । णिम्मलउ निर्मलं भावकर्मद्रव्यकर्मनोकर्ममलरहितं अणुदिणु दिनं दिनं प्रति अनुदिनमनवरतमित्यर्थः । इत्थंभूतमात्मानं जे झायंति ये केचन ध्यायन्ति ते पर ते एव नान्ये णियमे निश्चयेन । किंविशिष्टास्ते । परममुणि परममुनयः लहु लघु शीघ्रं लहंति लभन्ते । किं लभन्ते । णिव्वाणु निर्वाणमिति । अत्राह प्रभाकरभट्टः । अत्रोक्तं भवद्भिर्य एव शुद्धात्मध्यानं कुर्वन्ति त

जो ज्ञानी [**निर्मलं रत्नत्रयं**] निर्मल रागादि दोष रहित रत्नत्रयको [**आत्मानं**] आत्मा [**भणंति**] कहते हैं [**ते**] वे [**शिवपदस्य आराधकाः**] शिवपदके आराधक हैं, और वे ही [**निजात्मानं**] मोक्षपदके आराधक हुए अपने आत्माको [**ध्यायंति**] ध्यावते हैं ॥ **भावार्थ**—जो कोई वीतराग स्वसंवेदनज्ञानी सम्यग्दर्शन सम्यग्ज्ञान सम्यक्चारित्ररूप आत्माको मानते हैं, वे ही मोक्षपदके आराधक हुए निश्चयनयकर केवल निजरूपको ही ध्यावते हैं ॥३२॥

आगे यह व्याख्यान करते हैं—जो अनन्त गुणरूप रागादि दोष रहित निज आत्माको ध्यावते हैं, वे निश्चयमे शीघ्र ही मोक्षको पाते है, [**ये**] जो पुरुष [**गुणमयं**] केवलज्ञानादि अनन्त गुणरूप [**निर्मलं**] भावकर्म द्रव्यकर्म नोकर्म मल रहित निर्मल [**आत्मानं**] आत्माको [**अनुदिनं**] निरन्तर [**ध्यायंति**] ध्यावते है, [**ते परं**] वे ही [**परममुनय**] परममुनि [**नियमेन**] निश्चयकर [**निर्वाणं**] निर्वाणको [**लघु**] शीघ्र [**लभंते**] पाते है ॥ **भावार्थ**—यह कथन श्रीगुरुने कहा, तब प्रभाकरभट्टने पूछा कि हे प्रभो; तुमने कहा कि जो शुद्धात्माका ध्यान करते हैं, वे ही मोक्षको पाते हैं, दूसरा नहीं। तथा चारित्रसारादिक ग्रन्थोंमें ऐसा कहा है, जो द्रव्यपरमाणु और भावपरमाणुका ध्यान करें वे केवलज्ञानको पाते है। इस विषयमे मुझको सन्देह है। तब श्रीयोगीन्द्रदेव समाधान करते है—द्रव्यपरमाणुसे द्रव्यकी सूक्ष्मता और भावपरमाणुसे भावकी सूक्ष्मता कही गई है।

एव मोक्षं लभन्ते न चान्ये । चारित्रसारादौ पुनर्भणितं द्रव्यपरमाणुं भावपरमाणुं वा ध्यात्वा केवलज्ञानमुत्पादयन्तीत्यत्र विषये अस्माकं संदेहोऽस्ति । अत्र श्रीयोगीन्द्रदेवा परिहारमाहुः । तत्र द्रव्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वं ग्राह्यं न च पुद्गलद्रव्यपरमाणुः । तथा चोक्तं सर्वार्थसिद्धिटिप्पणिके । द्रव्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वमिति । तद्यथा । द्रव्यमात्मद्रव्यं तस्य परमाणुशब्देन सूक्ष्मावस्था ग्राह्या । सा च रागादिविकल्पोपाधिरहिता तस्य सूक्ष्मत्वं कथमिति चेत्, निर्विकल्पसमाधिविषयत्वेनेन्द्रियमनोविकल्पातीतत्वात् । भावशब्देन स्वसंवेदनपरिणामः तस्य भावस्य परमाणुशब्देन सूक्ष्मावस्था ग्राह्या । सूक्ष्मा कथमिति चेत् । वीतरागनिर्विकल्पसमरसीभावविषयत्वेन पञ्चेन्द्रियमनोविषयातीतत्वादिति । पुनरप्याह । इदं परद्रव्यावलम्बनं ध्यानं निषिद्धं किल भवद्भिः निजशुद्धात्मध्यानेनैव मोक्षः [१]कुत्रापि भणितमास्ते । परिहारमाह—'अप्पा झायहि णिम्मलउ' इत्यत्रैव ग्रन्थे निरन्तरं भणितमास्ते, ग्रन्थान्तरे च समाधिशतकादौ पुनश्चोक्तं तैरेव पूज्यपादस्वामिभिः—"आत्मानमात्मा आत्मन्येवात्मनासौ क्षणमुपजनयन् स स्वयंभूः प्रवृत्तः" अस्यार्थः । आत्मानं कर्मतापन्नं आत्मा कर्ता आत्मन्येवाधिकरणभूते असौ पूर्वोक्तात्मा आत्मना करणभूतेन क्षणमन्तर्मुहूर्तमात्रं उपजनयन् निर्विकल्पसमाधिनाराधयन् स स्वयंभूः प्रवृत्तः सर्वज्ञो जात इत्यर्थः । ये च तत्र द्रव्यभावपरमाणुध्येयलक्षणे शुक्लध्याने द्व्यधिकचत्वारिंशद्विकल्पा भणितास्तिष्ठन्ति

उसमें पुद्गल परमाणुका कथन नहीं है। तत्त्वार्थसूत्रकी सर्वार्थसिद्धि टीकामें भी ऐसा ही कथन है, द्रव्यपरमाणुसे द्रव्यकी सूक्ष्मता और भावपरमाणुसे भावकी सूक्ष्मता समझना, अन्य द्रव्यका कथन न लेना। यहाँ निज द्रव्य तथा निज गुण पर्यायका ही कथन है, अन्य द्रव्यका प्रयोजन नहीं है। द्रव्य अर्थात् आत्मद्रव्य उसकी सूक्ष्मता वह द्रव्यपरमाणु कहा जाता है। वह रागादि विकल्पकी उपाधिसे रहित है, उसको सूक्ष्मपना कैसे हो सकता है? ऐसा शिष्यने प्रश्न किया। उसका समाधान इस तरह है--कि मन इन्द्रियोंके अगोचर होनेसे सूक्ष्म कहा जाता है, तथा भाव (स्वसंवेदनपरिणाम) भी परमसूक्ष्म हैं, वीतराग निर्विकल्प परमसमरसीभावरूप हैं, वहाँ मन और इन्द्रियोंकी गम्य नहीं हैं, इसलिये सूक्ष्म है। ऐसा कथन सुनकर फिर शिष्यने पूछा, कि तुमने परद्रव्यके आलम्बनरूप ध्यानका निषेध किया, और निज शुद्धात्माके ध्यानसे ही मोक्ष कहा। ऐसा कथन किस जगह कहा है? इसका समाधान यह है—"अप्पा झायहि णिम्मलउ" निर्मल आत्माको ध्यावो, ऐसा कथन इस ही ग्रंथमें पहले कहा है, और समाधिशतकमें भी श्रीपूज्यपादस्वामीने कहा है "आत्मानम्" इत्यादि। अर्थात् जीवपदार्थ अपने स्वरूपको अपनेमें ही अपने करके एक क्षणमात्र भी निर्विकल्प समाधिकर आराधता हुआ वह सर्वज्ञ वीतराग हो जाता है। जिस शुक्लध्यानमें द्रव्यपरमाणुकी सूक्ष्मता और भावपरमाणुकी सूक्ष्मता ध्यान करने योग्य है, ऐसे शुक्लध्यानमें निजवस्तु और निजभावका ही सहारा है, परवस्तुका नहीं। सिद्धान्तमें शुक्लध्यानके ब्यालीस भेद कहे हैं, वे अर्वाचीन वृत्तिसे गौणरूप जानना, मुख्य वृत्तिसे न जानना। उसका दृष्टांत—जैसे

१. पाठान्तर—कुत्रापि = कुत्र।

ते पुनरनीहितवृत्त्या ग्राह्याः । केन दृष्टान्तेनेति चेत् । यथा प्रथमौपशमिकसम्यक्त्वग्रहणकाले परमागमप्रसिद्धानधःप्रवृत्तिकरणादिविकल्पान् जीवः करोति न चात्रेहादिपूर्वकत्वेन स्मरणमस्ति तथात्र शुक्लध्याने चेति । इदमत्र तात्पर्यम् । प्राथमिकानां चित्तस्थितिकरणार्थं विषयकषायदुर्ध्यानवञ्चनार्थं च परंपरया मुक्तिकारणमर्हदादिपरद्रव्यं ध्येयम्, पश्चात् चित्ते स्थिरीभूते साक्षान्मुक्तिकारण स्वशुद्धात्मतत्त्वमेव ध्येयं नास्त्येकान्तः, एवं साध्यसाधकभावं ज्ञात्वा ध्येयविषये विवादो न कर्तव्यः इति ॥३३॥

अथ सामान्यग्राहकं निर्विकल्पं सत्तावलोकदर्शनं कथयति--

सयल-पयत्थहँ जं गहणु जीवहँ अग्गिमु होइ ।
वत्थु-विसेस-विवज्जियउ तं णिय-दंसणु जोइ ॥३४॥

सकलपदार्थानां यद् ग्रहणं जीवानां अग्रिमं भवति ।
वस्तुविशेषविवर्जितं तत् निजदर्शनं पश्य ॥३४॥

सयल इत्यादि । सयलपयत्थहं सकलपदार्थानां जं गहणु यद् ग्रहणमवलोकनम् । कस्य । जीवहं जीवस्य अथवा बहुवचनपक्षे 'जीवहं' जीवानाम् । कथंभूतमवलोकनम् । अग्गिमु अग्रिमं सविकल्पज्ञानात्पूर्वं होइ भवति । पुनरपि कथंभूतम् । वत्थुविसेसविवज्जियउ वस्तुविशेषविवर्जितं शुक्लमिदमित्यादिविकल्परहितं तं तत्पूर्वोक्तलक्षणं णियदंसणु निज आत्मा तस्य दर्शनमवलोकनं जोइ पश्य जानीहीति । अत्राह प्रभाकरभट्टः । निजात्मा तस्य दर्शनमवलोकनं दर्शनमिति व्याख्यातं भवद्भिरिदं तु

उपशमसम्यक्त्वके ग्रहणके समय परमागममे प्रसिद्ध जो अधःकरणादि भेद हैं, उनको जीव करता है, वे वांछापूर्वक नहीं होते, सहज ही होते हैं, वैसे ही शुक्लध्यानमें भी ऐसे ही जानना । तात्पर्य यह है कि प्रथम अवस्थामे चित्तके थिर करनेके लिए और विषयकषायरूप खोटे ध्यानके रोकनेके लिये परम्पराय मुक्तिके कारणरूप अरहंत आदि पंचपरमेष्ठी ध्यान करने योग्य हैं, बादमे चित्तके स्थिर होनेपर साक्षात् मुक्तिका करण जो निज शुद्धात्मतत्त्व है, वही ध्यावने योग्य है । इस प्रकार साध्य-साधकभावको जानकर ध्यावने योग्य वस्तुमें विवाद नहीं करना, पंचपरमेष्ठीका ध्यान साधक है, और आत्मध्यान साध्य है, यह निःसंदेह जानना ॥३३॥

आगे सामान्य ग्राहक निर्विकल्प सत्तावलोकनरूप दर्शनको कहते है --[**यत्**] जो [**जीवानां**] जीवोंके [**अग्रिमं**] ज्ञानके पहले [**सकलपदार्थानां**] सब पदार्थोंका [**वस्तुविवर्जितं**] यह सफेद है, इत्यादि भेद रहित [**ग्रहणं**] सामान्यरूप देखना, [**तत्**] वह [**निजदर्शनं**] दर्शन है, [**पश्य**] उसको तू जान ।। **भावार्थ**--यहाँ प्रभाकरभट्ट पूछता है, कि आपने जो कहा कि निजात्माका देखना वह दर्शन है, ऐसा बहुत बार तुमने कहा है, अब सामान्य अवलोकनरूप दर्शन कहते हैं । ऐसा दर्शन तो मिथ्यादृष्टियोंके भी होता है, उनको भी मोक्ष कहनी चाहिये ? इसका समाधान-- चक्षुदर्शन, अचक्षुदर्शन, अवधिदर्शन, केवलदर्शन ये दर्शनके चार भेद हैं । इन चारोंमें मनकर जो देखना वह अचक्षुदर्शन है, जो आँखोंसे देखना वह चक्षुदर्शन है। इन चारोमेंसे आत्माका अवलोकन

सत्तावलोकदर्शनं मिथ्यादृष्टीनामप्यस्ति तेषामपि मोक्षो भवतु । परिहारमाह । चक्षुरचक्षुरवधिकेवलभेदेन चतुर्धा दर्शनम् । अत्र चतुष्टयमध्ये मानसमचक्षुर्दर्शनमात्मग्राहकं भवति, तच्च मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयजनिततत्त्वार्थश्रद्धानलक्षणसम्यक्त्वाभावात् शुद्धात्मतत्त्वमेवोपादेयमिति श्रद्धानाभावे सति तेषां मिथ्यादृष्टीनां न भवत्येवेति भावार्थः ॥३४॥

अथ छद्मस्थानां सत्तावलोकदर्शनपूर्वकं ज्ञानं भवतीति प्रतिपादयति—

दंसणपुव्वु हवेइ फुडु जं जीवहँ विण्णाणु ।
वत्थु-विसेसु मुणंतु जिय तं मुणि अविचलु णाणु ॥३५॥

दर्शनपूर्वं भवति स्फुटं यत् जीवानां विज्ञानम् ।
वस्तुविशेषं जानन् जीव तत् मन्यस्व अविचलं ज्ञानम् ॥३५॥

दंसण पुव्वु इत्यादि । दंसणपुव्वु सामान्यग्राहकनिर्विकल्पसत्तावलोकदर्शनपूर्वकं हवेइ भवति फुडु स्फुटं जं यत् जीवहं जीवानाम् । किं भवति । विण्णाणु विज्ञानम् । किं कुर्वन् सन् । वत्थुविसेसु मुणंतु वस्तुविशेषं वर्णसंस्थानादिविकल्पपूर्वकं जानन् । जिय हे जीव । तं तत् मुणि मन्यस्व जानीहि । किं जानीहि अविचलु णाणु अविचलं संशयविपर्ययानध्यवसायरहितं ज्ञानमिति । तत्रेदं दर्शनपूर्वकं ज्ञानं व्याख्यातम् । यद्यपि शुद्धात्मभावनाव्याख्यानकाले प्रस्तुतं न भवति तथापि भणितं

छद्मस्थअवस्थामें मनसे होता है. और वह आत्म-दर्शन मिथ्यात्व आदि सात प्रकृतियोंके उपशम, क्षयोपशम, तथा क्षयसे होता है। सो सम्यग्दृष्टिके तो यह दर्शन तत्त्वार्थश्रद्धानरूप होनेसे मोक्षका कारण है, जिसमे शुद्ध-आत्म-तत्त्व ही उपादेय है, और मिथ्यादृष्टियोंके तत्त्वश्रद्धान नहीं होनेसे आत्माका दर्शन नही होता। मिथ्यादृष्टियोंके स्थूलरूप परद्रव्यका देखना जानना मन और इंद्रियोंके द्वारा होता है, वह सम्यग्दर्शन नहीं है, इसलिये मोक्षका कारण भी नही है। सारांश यह है—कि तत्त्वार्थश्रद्धानके अभावसे सम्यक्त्वका अभाव है, और सम्यक्त्वके अभावसे मोक्षका अभाव है ॥३४॥

आगे केवलज्ञानके पहले छद्मस्थोंके पहले दर्शन होता है, उसके बाद ज्ञान होता है, और केवली भगवान्‌के दर्शन और ज्ञान एक साथ ही होते हैं—आगे पीछे नहीं होते, यह कहते हैं—[यत्] जो [जीवानां] जीवोंके [विज्ञानं] ज्ञान है, वह [स्फुटं] निश्चयकरके [दर्शनपूर्वं] दर्शनके बादमे [भवति] होता है, [तत् ज्ञानं] वह ज्ञान [वस्तुविशेषं जानन्] वस्तुकी विस्तीर्णताको जाननेवाला है, उस ज्ञानको [जीव] हे जीव [अविचलं] संशय विमोह विभ्रमसे रहित [मन्यस्व] तू जान ॥ **भावार्थ**—जो सामान्यको ग्रहण करे, विशेष न जाने, वह दर्शन है, तथा जो वस्तुका विशेष वर्णन आकार जाने वह ज्ञान है। यह दर्शन ज्ञानका व्याख्यान किया। यद्यपि वह व्यवहारसम्यग्ज्ञान शुद्धात्माकी भावनाके व्याख्यानके समय प्रशंसा योग्य नहीं है, तो भी प्रथम अवस्थामें प्रशंसा योग्य है, ऐसा भगवानने कहा है। क्योंकि चक्षु अचक्षु अवधि केवलके भेदसे दर्शनोपयोग चार तरहका

भगवता। कस्मादिति चेत्। चक्षुरचक्षुरवधिकेवलभेदेन दर्शनोपयोगश्चतुर्विधो भवति।। तत्र चतुष्टयमध्ये द्वितीयं यदचक्षुर्दर्शनं मानसरूपं निर्विकल्पं यथा भव्यजीवस्य दर्शनमोहचारित्रमोहोपशमक्षयोपशमक्षयलाभे सति शुद्धात्मानुभूतिरुचिरूपं वीतरागसम्यक्त्वं भवति तथैव च शुद्धात्मानुभूतिस्थिरतालक्षणं वीतरागचारित्रं भवति तदा काले तत्पूर्वोक्तं सत्तावलोकलक्षणं मानसं निर्विकल्पदर्शनं कर्तृ पूर्वोक्तनिश्चयसम्यक्त्वचारित्रबलेन निर्विकल्पनिजशुद्धात्मानुभूतिध्यानेन सहकारिकारणं भवति पूर्वोक्तभव्यजीवस्य न चाभव्यस्य। कस्मात्। निश्चयसम्यक्त्वचारित्राभावादिति भावार्थः ।।३५।।

अथ परमध्यानारूढो ज्ञानी समभावेन दुःखं सुखं सहमानः स एवाभेदेन निर्जराहेतुर्भण्यते इति दर्शयति—

> दुक्खु वि सुक्खु सहंतु जिय णाणिउ झाण-णिलीणु।
> कम्महँ णिज्जर-हेउ तउ वुच्चइ संग-विहीणु ।।३६।।
> दुःखमपि सुखं सहमानः जीव ज्ञानी ध्याननिलीनः।
> कर्मणः निर्जराहेतुः तपः उच्यते संगविहीनः ।।३६।।

दुक्खु वि इत्यादि। दुक्खु वि सुक्खु सहंतु दुःखमपि सुखमपि समभावेन सहमानः सन् जिय हे जीव। कोऽसौ कर्ता। णाणिउ वीतरागस्वसंवेदनज्ञानी। किंविशिष्टः। झाण-णिलीणु वीतरागचिदानन्दैकाग्र्यध्याननिलीनो रतः स एवाभेदेन कम्महं णिज्जरहेउ शुभाशुभकर्मणो निर्जराहेतुरुच्यते न केवलं ध्यानपरिणतपुरुषो

होता है। उन चार भेदोंमे दूसरा भेद अचक्षुदर्शन मनसम्बन्धी निर्विकल्प भव्यजीवोंके दर्शनमोह चारित्रमोहके उपशम तथा क्षयके होनेपर शुद्धात्मानुभूति रुचिरूप वीतराग सम्यक्त्व होता है, और शुद्धात्मानुभूतिमें स्थिरतारूप वीतरागचारित्र होता है, उस समय पूर्वोक्त सत्ताके अवलोकनरूप मनसम्बन्धी निर्विकल्पदर्शन निश्चयचारित्रके बलसे विकल्प रहित निज शुद्धात्मानुभूतिके ध्यानकर सहकारी कारण होता है। इसलिये व्यवहारसम्यग्दर्शन और व्यवहारसम्यग्ज्ञान भव्यजीवके ही होता है, अभव्यके सर्वथा नहीं, क्योंकि अभव्यजीव मुक्तिका पात्र नहीं है। जो मुक्तिका पात्र होता है, उसीके व्यवहाररत्नत्रयकी प्राप्ति होती है। व्यवहाररत्नत्रय परम्पराय मोक्षका कारण है, और निश्चयरत्नत्रय साक्षात् मुक्तिका कारण है, ऐसा तात्पर्य हुआ ।।३५।।

आगे परमध्यानमे आरूढ़ ज्ञानी जीव समभावसे दुःख सुखको सहता हुआ अभेदनयसे निर्जराका कारण होता है, ऐसा दिखाते है—[**जीव**] हे जोव, [**ज्ञानी**] वीतरागस्वसंवेदनज्ञानी [**ध्याननिलीनः**] आत्मध्यानमे लीन [**दुःखं अपि सुखं**] दुःख और सुखको [**सहमानः**] समभावोसे सहता हुआ अभेदनयसे [**कर्मणो निर्जराहेतुः**] शुभ अशुभ कर्मोंकी निर्जराका कारण है, ऐसा भगवान्ने [**उच्यते**] कहा है, और [**संगविहीनः तपः**] बाह्य अभ्यन्तर परिग्रह रहित परद्रव्यकी इच्छाके निरोधरूप बाह्य अभ्यन्तर अनशनादि बारह प्रकारके तपरूप भी वह ज्ञानी है ।। **भावार्थ**—

निर्जराहेतुरुच्यते तउ परद्रव्येच्छानिरोधरूपं बाह्याभ्यन्तरलक्षणं द्वादशविधं तपश्च। किंविशिष्टः स तपोधनस्तत्तपश्च। संगविहिणु संगविहीनो बाह्याभ्यन्तरपरिग्रहरहित इति। अत्राह प्रभाकरभट्टः। ध्यानेन निर्जरा भणिता भवद्भिः उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमिति ध्यानलक्षणं, उत्तमसंहननाभावे कथं ध्यानमिति। भगवानाह। उत्तमसंहननेन यद्ध्यानं भणितं तदपूर्वगुणस्थानादिषूपशमक्षपकश्रेण्योर्यत् शुक्लध्यानं तदपेक्षया भणितम्। अपूर्वगुणस्थानादधस्तनगुणस्थानेषु धर्मध्यानस्य निषेधकं न भवति। तथा चोक्तं तत्त्वानुशासने ध्यानग्रन्थे—'यत्पुनर्वज्रकायस्य ध्यानमित्यागमे वचः। श्रेण्योर्ध्यानं प्रतीत्योक्तं तन्नाधस्तान्निषेधकम्॥'' किं च। रागद्वेषाभावलक्षणं परमं यथाख्यातरूपं स्वरूपे चरणं निश्चयचारित्रं भणन्ति

यहाँ प्रभाकरभट्टने प्रश्न किया, कि हे प्रभो; आपने ध्यानसे निर्जरा कही, वह ध्यान एकाग्र चित्तका निरोधरूप उत्तम संहननवाले मुनके होता है, जहाँ उत्तमसंहनन ही नही है, वहाँ ध्यान किस तरहसे हो सकता है? उसका समाधान श्रीगुरु कहते है—उत्तम संहननवाले मुनिके जो ध्यान कहा है, वह आठवें गुणस्थानसे लेकर उपशम क्षपकश्रेणीवालोंके जो शुक्लध्यान होता है, उसकी अपेक्षा कहा गया है। उपशमश्रेणी वज्रवृषभनाराच, वज्रनाराच, नाराच इन तीन संहननवालोंके होती है, उनके शुक्लध्यानका पहला पाया है, वे ग्यारहवें गुणस्थानसे नीचे आते हैं, और क्षपकश्रेणी एक वज्रवृषभनाराच संहननवालेके ही होती है, वे आठवें गुणस्थानमें क्षपकश्रेणी माँड़ते (प्रारंभ करते) है, उनके आठवें गुणस्थानमें शुक्लध्यानका पहला पाया [भेद] होता है, वह आठवें नववें दशवें तथा दशवेंसे बारहवें गुणस्थानमें स्पर्श करते है, ग्यारहवेंमें नही, तथा बारहवमें शुक्लध्यानका दूसरा पाया होता है, उसके प्रसादसे केवलज्ञान पाता है, और उसी भवमे मोक्षको जाता है। इसलिये उत्तम सहननका कथन शुक्लध्यानकी अपेक्षासे है। आठवें गुणस्थानसे नीचेके चौथेसे लेकर सातवेंतक शुक्लध्यान नहीं होता, धर्मध्यान छहों संहननवालोंके है, श्रेणीके नीचे धर्मध्यान ही है, उसका निषेध किसी संहननमें नही है। ऐसा ही कथन तत्त्वानुशासन नामक ग्रन्थमे कहा है ''यत्पुनः'' इत्यादि। उसका अर्थ ऐसा है, कि जो वज्रकायके ही ध्यान होता है, ऐसा आगमका वचन है, वह दोनों श्रेणियोमें शुक्लध्यान होनेकी अपेक्षा है, और श्रेणीके नीचे जो धर्मध्यान है, उसका निषेध [न होना] किसी संहननमें नहीं कहा है, यह निश्चयसे जानना। राग द्वेषके अभावरूप उत्कृष्ट यथाख्यातस्वरूप स्वरूपाचरण ही निश्चयचारित्र है, वह इस समय पंचमकालमें भरतक्षेत्रमें नहीं है, इसलिये साधुजन अन्य चारित्रका आचरण करो। चारित्रके पाँच भेद है, सामायिक, छेदोपस्थापना, परिहारविशुद्धि, सूक्ष्मसांपराय, यथाख्यात। उनमे इस समय इस क्षेत्रमें सामायिक छेदोपस्थापना ये दो ही चारित्र होते हैं, अन्य नहीं, इसलिये इनको ही आचरो। तत्त्वानुशासन मे भी कहा है ''चरितारो'' इत्यादि। इसका अर्थ ऐसा है, कि इस समय यथाख्यातचारित्रके आचरण करनेवाले मौजूद नहीं है, तो क्या हुआ अपनी शक्तिके अनुसार तपस्वीजन सामायिक छेदोपस्थापनाका आचरण करो। फिर श्रीकुंदकुंदाचार्यने भी मोक्षपाहुड़मे ऐसा ही कहा है ''अज्ज वि''। उसका तात्पर्य यह है, कि अब भी इस पंचमकालमे मन वचन कायकी शुद्धतासे आत्माका ध्यान करके यह जीव इन्द्र पदको पाता है, अथवा लौकांतिकदेव होता है, और वहाँसे च्युत होकर

इदानीं तदभावेऽन्यच्चारित्रमाचरन्तु तपोधनाः । तथा चोक्तं तत्रैवम्—"चरितारो न सन्त्यद्य यथाख्यातस्य संप्रति । तत्किमन्ये यथाशक्तिमाचरन्तु तपस्विनः ।" पुनश्चोक्तं श्रीकुन्दकुन्दाचार्यदेवैः मोक्षप्राभृते—अज्ज वि तियरणसुद्धा अप्पा झाऊण लहहिं इंदत्तं । लोयंतियदेवत्तं तत्थ चुवा णिव्वुदिं जंति ।।" । अयमत्र भावार्थः । यथादित्रिकसंहननलक्षणवीतरागयथाख्यातचारित्राभावेऽपीदानीं शेषसंहननेनापि शेषचारित्रमाचरन्ति तपस्विनः तथादिकत्रिकसंहननलक्षणशुक्लध्यानाभावेऽपि शेषसंहनेनापि शेषचारित्रमाचरन्ति तपश्विनः तथा त्रिकसंहननलक्षणशुक्लध्यानाभावेऽपि शेषसंहनेनापि संसारस्थितिच्छेदकारणं परंपरया मुक्तिकारणं च धर्मध्यानमाचरन्तीति ।।३६।।

अथ सुखदुःखं सहमानः सन् येन कारणेन समभावं करोति मुनिस्तेन कारणेन पुण्यपापद्वयसंवरहेतुर्भवतीति दर्शयति—

बिण्णि वि जेण सहंतु मुणि मणि सम-भाउ करेइ ।
पुण्णहँ पावहँ तेण जिय संवर-हेउ हवेइ ।।३७।।

द्वे अपि येन सहमानः मुनिः मनसि समभावं करोति ।
पुण्यस्य पापस्य तेन जीव संवरहेतुः भवति ।।३७।।

बिण्णि वि इत्यादि । बिण्णि वि द्वे अपि सुख दुःखे जेण येन कारणेन सहंतु सहमानः सन् । कोऽसौ कर्ता । मुणि मुनिः स्वसंवेदनप्रत्यक्षज्ञानी । मणि अविक्षिप्तमनसि । समभाउ समभावं सहजशुद्धज्ञानानन्दैकरूपं रागद्वेषमोहरहितं परिणामं कर्मतापन्नं करेइ करोति परिणमति पुण्णहं पावहं पुण्यस्य पापस्य संबन्धी तेण तेन

मनुष्यभव धारण करके मोक्षको पाता है। अर्थात् जो इस समय पहलेके तीन संहनन तो नहीं हैं, परन्तु अर्धनाराच, कीलक, सृपाटिका, ये आगेके तीन हैं, इन तीनोंसे सामायिक छेदोपस्थापनाका आचरण करो, तथा धर्मध्यानको आचरो। धर्मध्यानका अभाव छहों संहननोंमें नहीं है, शुक्लध्यान पहलेके तीन संहननोंमें ही होता है, उनमें भी पहला पाया (भेद) उपशमश्रेणी संबंधी तीनों संहननोंमें है, और दूसरा तीसरा चौथा पाया प्रथम संहननवाले ही के होता है, ऐसा नियम है। इसलिये अब शुक्लध्यानके अभावमें भी हीन संहननवाले इस धर्मध्यानको आचरो। यह धर्मध्यान परम्पराय मुक्तिका मार्ग है, संसारकी स्थितिका छेदनेवाला है। जो कोई नास्तिक इस समय धर्मध्यानका अभाव मानते हैं, वे झूठ बोलनेवाले हैं, इस समय धर्मध्यान है, शुक्लध्यान नहीं है ।। ३६ ।।

आगे जो मुनिराज सुख दुःखको सहते हुए समभाव रखते हैं, अर्थात् सुखमें तो हर्ष नहीं करते, और दुःखमें खेद नहीं करते, जिनके सुख दुःख दोनों ही समान हैं, वे ही साधु पुण्यकर्म पापकर्मके संवर [रोकने] के कारण हैं, आनेवाले कर्मोंको रोकते हैं, ऐसा दिखलाते हैं—[येन] जिस कारण [द्वे अपि सहमानः]] सुख दुःख दोनोंको ही सहता हुआ [मुनिः] स्वसंवेदन प्रत्यक्षज्ञानी [मनसि] निश्चित मनमें [समभावं] समभावोको [करोति] धारण करता है, अर्थात्

कारणेन जिय **हे जीव** संवरहेउ **संवरहेतुः कारणं** हवेइ **भवतीति** । **अयमत्र तात्पर्यार्थः । कर्मोदयवशात् सुखदुःखे जातेऽपि योऽसौ रागादिरहितमनसि विशुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मसंवित्तिं न त्यजति स पुरुष एवाभेदनयेन द्रव्यभावरूपपुण्यपापसंवरस्य हेतुः कारणं भवतीति** ॥३७॥

अथ यावन्तं कालं रागादिरहितपरिणामेन स्वशुद्धात्मस्वरूपे तन्मयो भूत्वा तिष्ठति तावन्तं कालं संवरनिर्जरं करोतीति प्रतिपादयति—

अच्छइ जित्तिउ कालु मुणि अप्प-सरूवि णिलीणु ।
संवर-णिज्जर जाणि तुहुँ सयल-वियप्प-विहीणु ॥३८॥

तिष्ठति यावन्तं कालं मुनिः आत्मस्वरूपे निलीनः ।
संवरनिर्जरां जानीहि त्वं सकलविकल्पविहीनम् ॥३८॥

अत्थ(च्छ)इ **इत्यादि** । अत्थ(च्छ)इ **तिष्ठति । किं कृत्वा तिष्ठति** । जित्तिउ कालु **यावन्तं कालं प्राप्य । क्व तिष्ठति** । अप्पसरूवि **निजशुद्धात्मस्वरूपे । कथंभूतः सन्** णिलीणु **निश्चयेन लीनो द्रवीभूतो वीतरागनित्यानन्दैकपरमसमरसीभावेन परिणतः** हे प्रभाकरभट्ट **इत्थंभूतपरिणामपरिणतं तपोधनमेवाभेदेन** संवरणिज्जर जाणि तुहुं **संवरनिर्जरास्वरूपं जानीहि त्वम् । पुनरपि कथंभूतम्** । सयलवियप्पविहीणु **सकलविकल्पहीनं ख्यातिपूजालाभप्रभृतिविकल्पजालावलीरहितमिति । अत्र विशेषव्याख्यानं यदेव पूर्वसूत्रद्वयभणितं तदेव ज्ञातव्यम् । कस्मात् । तस्यैव निर्जरासंवरव्याख्यानस्योपसंहारोऽयमित्यभिप्रायः** ॥३८॥ **एवं मोक्षमोक्षमार्गमोक्षफलादिप्रति-**

राग द्वेष मोह रहित स्वाभाविक शुद्ध ज्ञानानन्दस्वरूप परिणमन करता है, विभावरूप नहीं परिणमता, [**तेन**] इसी कारण [**जीव**] हे जीव, वह मुनि [**पुण्यस्य पापस्य संवरहेतुः**] सहजमें ही पुण्य और पाप इन दोनोंके संवरका कारण [**भवति**] होता है ॥ **भावार्थ—**कर्मके उदयसे सुख दुःख उत्पन्न होनेपर भी जो मुनीश्वर रागादि रहित मनमें शुद्ध ज्ञानदर्शनस्वरूप अपने निज शुद्ध स्वरूपको नहीं छोड़ता है, वही पुरुष अभेदनयकर द्रव्य भावरूप पुण्य पापके संवरका कारण है ॥३७॥

आगे जिस समय जितने कालतक रागादि रहित परिणामोंकर निज शुद्धात्मस्वरूपमें तन्मय हुआ ठहरता है, तबतक संवर और निर्जराको करता है, ऐसा कहते हैं—[**मुनिः**] मुनिराज [**यावन्तं कालं**] जबतक [**आत्मस्वरूपे निलीनः**] आत्मस्वरूपमे लीन हुआ [**तिष्ठति**] रहता है, अर्थात् वीतराग नित्यानन्द परम समरसीभावकर परिणमता हुआ अपने स्वभावमें तल्लीन होता है, उस समय हे प्रभाकरभट्ट; [**त्वं**] तू [**सकलविकल्पविहीनं**] समस्त विकल्प समूहोंसे रहित अर्थात् ख्याति (अपनी बड़ाई) पूजा (अपनी प्रतिष्ठा) लाभको आदि देकर विकल्पोंसे रहित उस मुनिको [**संवरनिर्जरा**] संवर निर्जरा स्वरूप [**जानीहि**] जान । यहाँपर भावार्थरूप विशेष व्याख्यान जो कि पहले दो सूत्रोंमें कहा था, वही जानो । इस प्रकार संवर निर्जराका व्याख्यान संक्षेपरूपसे कहा गया है

पादकद्वितीयमहाधिकारोक्तसूत्राष्टकेनाभेदरत्नत्रयव्याख्यानमुख्यत्वेन स्थलं समाप्तम् । अत ऊर्ध्वं चतुर्दशसूत्रपर्यन्तं परमोपशमभावमुख्यत्वेन व्याख्यानं करोति ।

तथाहि—

कम्मु पुरक्किउ सो खवइ अहिणव पेसु ण देइ ।
संगु मुएविणु जो सयलु उवसम-भाउ करेइ ॥३९॥

कर्म पुराकृतं स क्षपयति अभिनवं प्रवेशं न ददाति ।
संगं मुक्त्वा य सकलं उपशमभावं करोति ॥३९॥

कम्मु इत्यादि । कम्मु पुरक्किउ कर्म पुराकृतं सो खवइ स एव वीतरागस्वसंवेदनतत्त्वज्ञानी क्षपयति । पुनरपि किं करोति, अहिणव पेसु ण देइ अभिनवं कर्म प्रवेशं न ददाति । स कः । संगु मुएविणु जो सयलु संगं बाह्याभ्यन्तरपरिग्रहं मुक्त्वा यः कर्ता समस्तम् । पश्चात्किं करोति । उवसमभाउ करेइ जीवितमरणलाभालाभसुखदुःखादिसमताभावलक्षणं समभावं करोति । तद्यथा । स एव पुराकृतं कर्म क्षपयति नवतरं संवृणोति य एव बाह्याभ्यन्तरपरिग्रहं मुक्त्वा सर्वशास्त्रं पठित्वा च शास्त्रफलभूत वीतरागपरमानन्दैकसुखरसास्वादरूपं समभावं करोतीति भावार्थः । तथा-चोक्तम्—"साम्यमेवादराद्भाव्यं किमन्यैर्ग्रन्थविस्तरैः । प्रक्रियामात्रमेवेदं वाङ्मयं विश्वमस्य हि ।" ॥३९॥

अथ यः समभावं करोति तस्यैव निश्चयेन सम्यग्दर्शनज्ञानचारित्राणि नान्यस्येति दर्शयति—

दसणु णाणु चरित्तु तसु जो सम-भाउ करेइ ।
इयरहँ एक्कु वि अत्थि णवि जिणवरु एउ भणेइ ॥४०॥

॥३८॥ इस तरह मोक्ष मोक्ष-मार्ग और मोक्ष-फलका निरूपण करनेवाले दूसरे महाधिकारमें आठ दोहा-सूत्रोंसे अभेदरत्नत्रयके व्याख्यानकी मुख्यतासे अन्तरस्थल पूरा हुआ ।

आगे चौदह दोहोंमें परम उपशमभावकी मुख्यतासे व्याख्यान करते हैं—[स] वही वीतराग स्वसंवेदन ज्ञानी [पुराकृतं कर्म] पूर्व उपार्जित कर्मोंको [क्षपयति] क्षय करता है, और [अभिनवं] नये कर्मोंको [प्रवेशं] प्रवेश [न ददाति] नहीं होने देता, [य] जो कि [सकलं] सब [संगं] बाह्य अभ्यन्तर परिग्रहको [मुक्त्वा] छोड़कर [उपशमभावं] परम शान्तभावको [करोति] करता है, अर्थात् जीवन, मरण, लाभ, अलाभ, सुख, दुःख, शत्रु, मित्र, तृण, कांचन इत्यादि वस्तुओंमें एकसा परिणाम रखता है ॥ भावार्थ—जो मुनिराज सकल परिग्रहको छोड़कर सब शास्त्रोंका रहस्य जानके वीतराग परमानन्द सुखरसका आस्वादी हुआ समभाव करता है, वही साधु पूर्वके कर्मोंका क्षय करता है, और नवीन कर्मोंको रोकता है । ऐसा ही कथन पद्मनन्दिपच्चीसीमें भी है । "साम्यमेव" इत्यादि । इसका तात्पर्य यह है, कि आदरसे समभावको ही धारण करना चाहिये, अन्य ग्रन्थके विस्तारोंसे क्या, समस्त पंथ तथा सकल द्वादशांग इस समभावरूप सूत्रकी ही टीका है ॥३९॥

आगे जो जीव समभावको करता है, उसीके निश्चयसे सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र

दर्शनं ज्ञानं चारित्रं तस्य यः समभावं करोति ।
इतरस्य एकमपि अस्ति नैव जिनवरः एवं भणति ॥४०॥

दंसणु इत्यादि । दंसणु णाणु चरित्तु **सम्यग्दर्शनज्ञानचारित्रत्रयं** तसु **निश्चयनयेन तस्यैव भवति । कस्य ।** जो समभाउ करेइ **यः कर्ता समभावं करोति** इयरहं **इतरस्य समभावरहितस्य** एक्कु वि अत्थि णवि **रत्नत्रयमध्ये** नास्त्येकमपि जिणवरु एउ भणेइ **जिनवरो वीतरागः सर्वज्ञ एवं भणतीति । तथाहि । निश्चयनयेन निजशुद्धात्मैवोपादेय इति रुचिरूपं सम्यग्दर्शनं तस्यैव निजशुद्धात्मसंवित्तिसमुत्पन्नवीतरागपरमानन्दमधुररसास्वादोऽयमात्मा निरन्तराकुलत्वोत्पादकत्वात् कटुकरसास्वादाः कामक्रोधादय इति भेदज्ञानं तस्यैव भवति स्वरूपे चरणं चारित्रमिति वीतरागचारित्रं तस्यैव भवति । तस्य कस्य । वीतरागनिर्विकल्पपरमसामायिकभावनानुकूलं निर्दोषिपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपं** यः **समभावं करोतति भावार्थ** ॥४०॥

अथ यदा ज्ञानी जीव उपशाम्यति तदा संयतो भवति कामक्रोधादिकषायवशं गतः पुनरसंयतो भवतीति निश्चिनोति—

जांवइ णाणिउ उवसमइ तामइ संजदु होइ ।
होइ कसायहँ वसि गयउ जीउ असंजदु सो ॥४१॥

यावत् ज्ञानी उपशाम्यति तावत् संयतो भवति ।
भवति कषायाणां वशं[1] गतः जीवः असंयतः स एव ॥४१॥

जांवइ इत्यादि । जांवइ **यदा काले** णाणिउ **ज्ञानी जीवः** उवसमइ **उपशाम्यति** तामइ **तदा काले** संजदु होइ **संयतो भवति** । होइ **भवति** कसायहं वसि गयउ

होता है, अन्यके नहीं, ऐसा दिखलाते है—[**दर्शन ज्ञानं चारित्रं**] सम्यग्दर्शन ज्ञान चारित्र [**तस्य**] उसीके निश्चयसे होते हैं, [**यः**] जो यति [**समभावं**] समभाव [**करोति**] करता है, [**इतरस्य**] दूसरे समभाव रहित जीवके [**एकं अपि**] तीन रत्नोंमेसे एक भी [**नैव अस्ति**] नहीं है, [**एवं**] इस प्रकार [**जिनवरः**] जिनेन्द्रदेव [**भणति**] कहते हैं ॥ **भावार्थ**—निश्चयनयसे निज शुद्धात्मा ही उपादेय है, ऐसी रुचिरूप सम्यग्दर्शन उस समभावके धारकके होता है, और निज शुद्धात्माकी भावनासे उत्पन्न हुआ जो वीतराग परमानंद मधुर रसका आस्वाद उस स्वरूप आत्मा है, तथा हमेशा आकुलतासे उपजानेवाले काम क्रोधादिक हैं, वे महा कटुक रसरूप अत्यंत विरस है, ऐसा जानना, वह सम्यग्ज्ञान और स्वरूपके आचरणरूप वीतरागचारित्र भी उसी समभावके धारण करनेवालेके ही होता है, जो मुनीश्वर वीतराग निर्विकल्प परम सामायिकभावकी भावनाके अनुकूल (सन्मुख) निर्दोष परमात्माके यथार्थ श्रद्धान यथार्थ ज्ञान और स्वरूपका यथार्थ आचरणरूप अखंडभव धारण करता है, उसीके परमसमाधिकी सिद्धि होती है ॥४०॥

आगे ऐसा कहते हैं कि जिस समय ज्ञानी जीव शांतभावको धारण करता है, उसी समय संयमी होता है, तथा जब क्रोधादि कषायके वश होता है, तब असंयमी होता है— [**यदा**] जिस

१. पाठान्तरः—वशं गतः = संगतः ।

कषायवशं गतः जीउ जीवः । कथंभूतो भवति । असंजदु **असंयतः । कोऽसौ । सोइ स एव पूर्वोक्तजीव इति । अयमत्र भावार्थः । अनाकुलत्वलक्षणस्य स्वशुद्धात्मभावनोत्थपारमार्थिकसुखस्यानुकूलपरमोपशमे यदा ज्ञानी तिष्ठति तदा संयतो भवति तद्विपरीत परमाकुलत्वोत्पादककामक्रोधादौ परिणतः पुनरसंयतो भवतीति । तथा चोक्तम्—"अकसायं तु चरित्तं कषायवसगदो असंजदो होदि । उवसमइ जम्हि काले तक्काले संजदो होदि" ॥४१॥**

अथ येन कषाया भवन्ति मनसि तं मोहं त्यजेति प्रतिपादयति—

जेण कसाय हवंति मणि सो जिय मिल्लहि मोहु ।
मोह-कसाय-विवज्जयउ पर पावहि सम-बोहु ॥४२॥

येन कषाया भवन्ति मनसि तं जीव मुञ्च मोहम् ।
मोहकषायविवर्जितः परं प्राप्नोषि समबोधम् ॥४२॥

जेण इत्यादि । जेण येन वस्तुना वस्तुनिमित्तेन मोहेन वा । किं भवति । कसाय हवंति **क्रोधादिकषाया भवन्ति । क्व भवन्ति ।** मणि **मनसि** सो **तं** जिय **हे जीव** मिल्लहि **मुञ्च । कम् । तं पूर्वोक्तं** मोहु **मोहं मोहनिमित्तपदार्थं चेति । पश्चात् किं लभते त्वम् ।** मोहकषायविवज्जिउ **मोहकषायविवर्जितः सन्** पर **परं नियमेन** पावहि **प्राप्नोषि । कं कर्मतापन्नम् । समबोहु समबोधं रागद्वेषरहितं ज्ञानमिति । तथाहि । निर्मोहनिजशुद्धात्मध्यानेन निर्मोहस्वशुद्धात्मतत्त्वविपरीतं हे जीव मोहं मुञ्च,**

समय [**ज्ञानी जीव**] ज्ञानी जीव [**उपशाम्यति**] शांतभावको प्राप्त होता है, [**तदा**] उस समय [**संयतः भवति**] संयमी होता है, और [**कषायाणां**] क्रोधादि कषायोंके [**वशे गत**] आधीन हुआ [**स एव**] वही जीव [**असंयतः**] असंयमी [**भवति**] होता है ॥ **भावार्थ**—आकुलता रहित निज शुद्धात्माकी भावनासे उत्पन्न हुए निर्विकल्प (असली) सुखका कारण जो परम शांतभाव उसमें जिस समय ज्ञानी ठहरता है, उसी समय संयमी कहलाता है, और आत्मभावनामे परम आकुलताके उपजानेवाले काम क्रोधादिक अशुद्ध भावोंमें परिणमता हुआ जीव असंयमी होता है, इसमें कुछ संदेह नहीं है। ऐसा दूसरी जगह भी कहा है 'अकसायं' इत्यादि। अर्थात् कषायका जो अभाव है, वही चारित्र है, इसलिये कषायके आधीन हुआ जीव असंयमी होता है, और जब कषायोंको शांत करता है, तब संयमी कहलाता है ॥४१॥

आगे जिस मोहसे मनमें कषायें होती हैं, उस मोहको तू छोड़, ऐसा वर्णन करते है—[**जीव**] हे जीव; [**येन**] जिस मोहसे अथवा मोहके उत्पन्न करनेवाली वस्तुसे [**मनसि**] मनमे [**कषाया**] कषाय [**भवंति**] होवें, [**तं मोहं**] उस मोहको अथवा मोह निमित्तक पदार्थको [**मुंच**] छोड़, [**मोहकषायविवर्जित.**] फिर मोहको छोड़नेसे मोह कषाय रहित हुआ तू [**परं**] नियमसे [**समबोधं**] राग द्वेष रहित ज्ञानको [**प्राप्नोषि**] पावेगा ॥ **भावार्थ**—निर्मोह निज शुद्धात्माके ध्यानसे निर्मोह निज शुद्धात्मतत्त्वसे विपरीत मोहको हे जीव छोड़। जिस मोहसे अथवा मोह करनेवाले पदार्थसे कषाय रहित परमात्मतत्त्वरूप ज्ञानानंद स्वभावके विनाशक क्रोधादि कषाय होते हैं, इन्हींसे

येन मोहेन मोहनिमित्तवस्तुना वा निष्कषायपरमात्मतत्त्वविनाशकाः क्रोधादिकषाया भवन्ति पश्चान्मोहकषायाभावे सति रागादिःरहितं विशुद्धज्ञानं लभसे त्वमित्यभिप्रायः। तथा चोक्तम्––"तं वत्थुं मुत्तव्वं जं पडि उपज्जए कसायग्गी। तं वत्थुमल्लिएज्जो (तद् वस्तु अंगीकरोति, इति टिप्पणी) जत्थुवसम्मो कसायाणं ॥" ॥४२॥

अथ हेयोपादेयतत्त्वं ज्ञात्वा परमोपशमे स्थित्वा येषां ज्ञानिनां स्वशुद्धात्मनि रतिस्त एव सुखिन इति कथयति––

तत्तातत्तु मुणेवि मणि जे थक्का सम-भावि।
ते पर सुहिया इत्थु जगि जहँ रइ अप्प-सहावि ॥४३॥

तत्त्वातत्त्वं मत्वा मनसि ये स्थिताः समभावे।
ते परं सुखिनः अत्र जगति येषां रतिः आत्मस्वभावे ॥४३॥

तत्तातुत्तु इत्यादि। तत्तातत्तु मुणेवि अन्तस्तत्त्वं बहिस्तत्त्वं मत्वा। क्व। मणि मनसि जे ये केचन वीतरागस्वसंवेदनप्रत्यक्षज्ञानिनः थक्का स्थिता। क्व। समभावि परमोपशमपरिणामे ते पर त एव सुहिया सुखिनः इत्थु जगि अत्र जगति। के ते। जहं रइ येषां रति.। क्व। अप्पसहावि स्वकीयशुद्धात्मस्वभावे इति। तथाहि। यद्यपि व्यवहारेणानादिबन्धनबद्धं तिष्ठति तथापि शुद्धनिश्चयेन प्रकृतिस्थित्यनुभाग-प्रदेशबन्धरहितं, यद्यप्यशुद्धनिश्चयेन स्वप्रकृतशुभाशुभकर्मफलभोक्ता तथापि शुद्धद्रव्या-

---

संसार है, इसलिये मोह कषायके अभाव होनेपर ही रागादि रहित निर्मल ज्ञानको तू पा सकेगा। ऐसा दूसरी जगह भी कहा है। "तं वत्थु" इत्यादि। अर्थात् वह वस्तु मन वचन कायसे छोड़नी चाहिये, कि जिससे कषायरूपी अग्नि न उत्पन्न हो, तथा उस वस्तुको अंगीकार करना चाहिये जिससे कषायें शांत हो। तात्पर्य यह है, कि विषयादिक सब सामग्री और मिथ्यादृष्टि पापियोंका संग सब तरहसे मोहकषायको उपजाते हैं, इससे ही मनमें कषायरूपी अग्नि दहकती रहती है। वह सब प्रकारसे छोड़ना चाहिये, और सत्संगति तथा शुभ सामग्री (कारण) कषायोंको उपशमाती है,— कषायरूपी अग्निको बुझाती है, इसलिये उस संगति वगैरः को अंगीकार करना चाहिये ॥ ४२ ॥

आगे हेयोपादेय तत्त्वको जानकर परम शांतभावमें स्थित होकर जिनके निःकषायभाव हुआ और निजशुद्धात्मामें जिनको लीनता हुई, वे ही ज्ञानी परम सुखी हैं, ऐसा कथन करते हैं— [ये] जो कोई वीतराग स्वसंवेदन प्रत्यक्षज्ञानी जीव [**तत्त्वातत्त्वं**] आराधने योग्य निज पदार्थ और त्यागने योग्य रागादि सकल विभावोंको [**मनसि**] मनमें [**मत्वा**] जानकर [**समभावे स्थिता**] शांत-भावमें तिष्ठते है, और [**येषां रतिः**] जिनकी लगन [**आत्मस्वभावे**] निज शुद्धात्म स्वभावमें हुई है, [**ते परं**] वे ही जीव [**अत्र जगति**] इस संसारमें [**सुखिनः**] सुखी है ॥ **भावार्थ**—यद्यपि यह आत्मा व्यवहारनयकर अनादिकालसे कर्मबंधनकर बँधा है; तो भी शुद्धनिश्चयनयकर प्रकृति, स्थित अनुभाग प्रदेश—इन चार तरहके बंधनोंसे रहित है, यद्यपि अशुद्धनिश्चयनयसे अपने उपार्जन किये शुभ अशुभ कर्मोंके फलका भोक्ता है, तो भी शुद्धद्रव्यार्थिकनयसे निज शुद्धात्मतत्त्वकी भावनासे

र्थिकनयेन निजशुद्धात्मतत्त्वभावनोत्थवीतरागपरमानन्दैकसुखामृतभोक्ता, यद्यपि व्यवहारेण कर्मक्षयानन्तरं मोक्षभाजनं भवति तथापि शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन सदा मुक्तमेव, यद्यपि व्यवहारेणेन्द्रियजनितज्ञानदर्शनसहितं तथापि निश्चयेन सकलोविमलकेवलज्ञानदर्शनस्वभावं, यद्यपि व्यवहारेण स्वोपात्तदेहमात्रं तथापि निश्चयेन लोकाकाशप्रमितासंख्येयप्रदेशं, यद्यपि व्यवहारेणोपसंसंहारविस्तारसहितं तथापि मुक्तावस्थायामुपसंहारविस्ताररहितं चरमशरीरप्रमाणप्रदेशं, यद्यपि पर्यायार्थिकनयेनोत्पादव्ययध्रौव्ययुक्तं तथापि द्रव्यार्थिकनयेन निरयटङ्कोत्कीर्णज्ञायकैकस्वभावं निजशुद्धात्मद्रव्यं पूर्वं ज्ञात्वा तद्विलक्षणं परद्रव्यं च निश्चित्य पश्चात् समस्तमिथ्यात्वरागादिविकल्पत्यागेन वीतरागचिदानन्दैकस्वभावे स्वशुद्धात्मतत्त्वे ये रतास्त एव धन्या इति भावार्थः। तथा चोक्तं परमात्मतत्त्वलक्षणे श्रीपूज्यपादस्वामिभिः—"नाभावो[1] सिद्धिरिस्टा न निजगुणहुतिस्तत्तपोभिनं युक्तैः"। अस्त्यात्मानादिबद्धः स्वकृतजफलभुक् तत्क्षयान्मोक्षभागी। ज्ञाता द्रष्टा स्वदेहप्रमितिरुपशमाहारविस्तारधर्मा। ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः" ॥४३॥

अथ योऽसावेवोपशामभावं करोति तस्य निन्दाद्वारेण स्तुतिं त्रिकलेन कथयति—

उत्पन्न हुए वीतराग परमानंद सुखरूप अमृतका ही भोगनेवाला है, यद्यपि व्यवहारनयसे कर्मोंके क्षय होनेके बाद मोक्ष का पात्र है, तो भी शुद्ध पारिणामिक परमभावग्राहक शुद्ध द्रव्यार्थिकनयसे सदा मुक्त ही है, यद्यपि व्यवहारनयकर इंद्रियजनित मति आदि क्षयोपशमिकज्ञान तथा चक्षु आदि दर्शन सहित है तो भी निश्चयनयसे सकल विमल केवलज्ञान और केवलदर्शन स्वभाववाला है, यद्यपि व्यवहारनयकर यह जीव नामकर्मसे प्राप्त देहप्रमाण है, तो भी निश्चयनयसे लोकाकाशप्रमाण असंख्यातप्रदेशी है, यद्यपि व्यवहारनयसे प्रदेशोके संकोच विस्तार सहित है, तो भी सिद्ध-अवस्था में संकोच विस्तारसे चरमशरीरप्रमाण प्रदेशवाला है, और यद्यपि पर्यायार्थिकनयसे उत्पाद व्यय ध्रौव्यकर सहित है, तो भी द्रव्यार्थिकनयकर टंकोत्कीर्ण ज्ञानके अखण्ड स्वभावसे ध्रुव ही है। इस तरह पहिले निज शुद्धात्मद्रव्यको अच्छी तरह जानकर और आत्मस्वरूपसे विपरीत पुद्गलादि परद्रव्योंको भो अच्छी तरह निश्चय करके अर्थात् आप परका निश्चय करके बाद मे समस्त मिथ्यात्व रागादि विकल्पोंको छोड़कर वीतराग चिदानंद स्वभाव शुद्धात्मतत्त्वमें जो लीन हुए है, वे ही धन्य हैं। ऐसा ही कथन परमात्मतत्त्वके लक्षणमें श्रीपूज्यपादस्वामीने कहा है, "नाभाव" इत्यादि। अर्थात् यह आत्मा व्यवहारनयकर अनादिका बँधा हुआ है, और अपने किये हुये कर्मोंके फलका भोक्ता है, उन कर्मोंके क्षयसे माक्षपदका भोक्ता है, ज्ञाता है, देखनेवाला है, अपनी देहके प्रमाण हैं, संसार-अवस्थामें प्रदेशोके संकोच विस्तारको धारण करता है, उत्पाद व्यय ध्रौव्य सहित है, और अपने गुण पर्याय सहित है। इस प्रकार आत्माके जाननेसे ही साध्यकी सिद्धि है, दूसरी तरह नहीं है ॥ ४३ ॥

आगे जो संयमी परम शांतभावका हो कर्ता है, उसकी निंदाद्वारा स्तुति तीन गाथाओंमे करते हैं—

१. यह श्लोक अपूर्ण है, भाषा में 'नाभाव' आदि लिखा है।

बिण्णि वि दोस हवंति तसु जो सम-भाउ करेइ ।
बंधु जि णिहणइ अप्पणउ अणु जगु गहिलु करेइ ॥४४॥
द्वौ अपि दोषौ भवतः तस्य यः समभावं करोति ।
बन्धं एव निहन्ति आत्मीयं अन्यत् जगद् ग्रहिलं करोति ॥४४॥

बिण्णि वि इत्यादि । बिण्णि वि **द्वावपि । द्वौ कौ ।** दोस **दोषौ** हवंति **भवतः** तसु **यस्य तपोधनस्य** जो समभाउ करेइ **यः समभावं करोति रागद्वेषत्यागं करोति । तौ दोषौ** बंधु जिणिहणइ **बन्धमेव निहन्ति । कथंभूतं बन्धम् ।** अप्पणउ **आत्मीयं** अणु पुनः जगु **जगत् प्राणिगणं** गहिल करेइ **ग्रहिलं पिशाचसमानं विकलं करोति । अयमत्र भावार्थः । समशब्देनात्राभेदनयेन रागादिरहित आत्मा भण्यते, तेन कारणेन योऽसौ समं करोति वीतरागचिदानन्दैकस्वभावं निजात्मानं परिणमति तस्य दोषद्वयं भवति । कथमिति चेत् । प्राकृतभाषया बन्धुशब्देन ज्ञानावरणादिबन्धा भण्यन्ते गोत्रं च येन कारणेनोपशमस्वभावेन परमात्मस्वरूपेण परिणतः सन् ज्ञानावरणादिकर्मबन्धं निहन्ति तेन कारणेन स्तवनं भवति, अथवा येन कारणेन बन्धुशब्देन गोत्रमपि भण्यति तेन कारणेन बन्धुघाती लोकव्यवहारभाषया निन्दापि भवतीति । तथा चोक्तम् । लोकव्यवहारे ज्ञानिनां लोकः पिशाचो भवति लोकस्याज्ञानिजनस्य ज्ञानी पिशाच इति ॥४४॥**

अथ— **अण्णु वि दोसु हवेइ तसु जो सम-भाउ करेइ ।**
सत्तु वि मिल्लिवि अप्पणउ परहं णिलीणु हवेइ ॥४५॥

आगे जो संयमी परम शांतभावका ही कर्ता है, उसकी निंदाद्वारा स्तुति तीन गाथाओंमें करते हैं—[**यः**] जो साधु [**समभावं**] राग द्वेषके त्यागरूप समभावको [**करोति**] करता है, [**तस्य**] उस तपोधनके [**द्वौ अपि दोषौ**] दो दोष [**भवतः**] होते हैं । [**आत्मीयं बंधं एव निहंति**] एक तो अपने बंधको नष्ट करता है, [**पुनः**] दूसरे [**जगत् ग्रहिलं करोति**] जगत्के प्राणियोंको बावला-पागल बना देता है ॥ **भावार्थ**—यह निंदाद्वारा स्तुति है । प्राकृत भाषामे बंधु शब्दसे ज्ञानावरणादि **कर्मबंध** भी लिया जाता है, तथा भाईको भी कहते हैं । यहाँपर बंधु-हत्या निंद्य है, इससे एक तो बंधु-हत्याका दोष आया तथा दूसरा दोष यह है, कि जो कोई इनका उपदेश सुनता है, वह वस्त्र आभूषणका त्यागकर नग्न दिगंबर हो जाता है । कपड़े उतारकर नंगा हो जाना उसे लोग गहला-पागल कहते हैं । ये दोनों लोकव्यवहारमे दोष है, इन शब्दोके ऐसे अर्थ ऊपरसे निकाले हैं । परंतु दूसरे अर्थमें कोई दोष नहीं है, स्तुति हो है । क्योंकि कर्मबंध नाश करने ही योग्य है, तथा जो समभावका धारक है, वह आप नग्न दिगम्बर हो जाता है, और अन्यको दिगम्बर कर देता है, सो मूढ़ लोग निंदा करते हैं । यह दोष नही है गुण ही है । मूढ़ लोगोंके जाननेमें ज्ञानीजन बावले हैं, और ज्ञानियोंके जाननेमें जगतके जन बावले हैं । क्योंकि ज्ञानी जगतसे विमुख हैं, तथा जगत् ज्ञानियोंसे विमुख है ॥४४॥

आगे समभावके धारक मुनिकी फिर भी निंदा-स्तुति करते हैं—[**यः**] जो [**समभावं**]

अन्यः अपि दोषो भवति तस्य यः समभावं करोति ।
शत्रुमपि मुक्त्वा आत्मीयं परस्य निलीनः भवति ॥४५॥

अण्णु वि इत्यादि । अण्णु वि न केवलं पूर्वोक्त अन्योऽपि दोसु **दोषः** हवेइ **भवति** तसु **तस्य तपोधनस्य । यः किं करोति ।** जो समभाउ **करेइ यः कर्ता समभावं करोति । पुनरपि किं करोति ।** सत्तु वि मिल्लिवि **शत्रुमपि**[1] **मुञ्चति । कथंभूतं शत्रुम् ।** अप्पणउ **आत्मीयम् । पुनश्च किं करोति ।** परहं णिलीणु हवेइ **परस्यापि लीनः अधीनो भवति इति । अयमत्र** भावार्थः । **यो रागादिरहितस्य समभावलक्षणस्य निजपरमात्मनो** भावनां **करोति स** पुरुषः **शत्रुशब्दवाच्यं ज्ञानावरणादिकर्मरूपं निश्चयशत्रुं मुञ्चति परशब्दवाच्यं परमात्मानमाश्रयति च तेन कारणेन तस्य स्तुतिर्भवति । अथवा यथा लोकव्यवहारेण बन्धनबद्धं निजशत्रुं मुक्त्वा कोऽपि केनापि कारणेन तस्यैव परशब्दवाच्यस्य शत्रोरधीनो भवति तेन कारणेन स निन्दां लभते तथा शब्दच्छलेन तपोधनोऽपीति ॥४५॥**

अथ—

अण्णु वि दोसु हवेइ तसु जो समभाउ करेइ ।
वियलु हवेविणु इक्कलउ उप्परि जगहँ चडेइ ॥४६॥

अन्यः अपि दोषो भवति तस्य यः समभावं करोति ।
विकलः भूत्वा एकाकी उपरि जगतः आरोहति ॥४६॥

अण्णु वि इत्यादि । अण्णु वि **न केवलं पूर्वोक्तोऽन्योऽपि** दोसु **दोषः** हवेइ **भवति ।** तसु **तस्य तपस्विनः । यः किं करोति ।** जो समभाउ करेइ **यः कर्ता**

समभावको [**करोति**] करता है, [**तस्य**] उस तपोधनके [**अन्य अपि दोषः**] दूसरा भी दोष [**भवति**] है । क्योंकि [**परस्य निलीनः**] परके आधीन [**भवति**] होता है, और [**आत्मीयं अपि**] अपने आधीन भी [**शत्रुं**] शत्रुको [**मुंचति**] छोड़ देता है ॥ **भावार्थ**—जो तपोधन धन धान्यादिका राग त्यागकर परम शांतभावको आदरता है, राजा रंकको समान जानता है, उसके दोष कभी नहीं हो सकता । सदा स्तुतिके योग्य है, तो भी शब्दकी योजनासे निंदाद्वारा स्तुति की गई है वह इस तरहसे है कि शत्रु शब्दसे कहे गये जो ज्ञानावरणादि कर्म-शत्रु उनको छोड़कर पर शब्दसे कहे गये परमात्माका आश्रय करता है । इसमें निंदा क्या हुई, बल्कि स्तुति ही हुई । परंतु लोकव्यवहारमें अपने अधीन शत्रुको छोड़कर किसी कारणसे पर शब्दसे कहे गये शत्रुके आधीन आप होता है, इसलिये लौकिक-निंदा हुई; यह शब्दके छलसे निंदा-स्तुति की गई । वह शब्दके श्लेष होनेसे रूपअलंकार कहा गया है ॥४५॥

आगे समदृष्टिको फिर भी निंदा-स्तुति करते हैं—[**य**] जो तपस्वी महामुनि [**समभावं**] समभावको [**करोति**] करता है, [**तस्य**] उसके [**अन्य अपि**] दूसरा भी [**दोषः**] दोष [**भवति**] होता है, जोकि [**विकलः भूत्वा**] शरीर रहित होके अथवा बुद्धि धन वगैर. से भ्रष्ट होकर [**एकाकी**] अकेला [**जगतः उपरि**] लोकके शिखरपर अथवा सबके ऊपर [**आरोहति**] चढ़ता है ॥ **भावार्थ**—

---

१. पाठान्तरः—मुञ्चति = मुक्त्वा ।

समभावं करोति । पुनरपि किं करोति । वियलु हवेविणु **विकलः कलरहितः शरीररहितो भूत्वा इक्कलउ एकाकी पश्चात्** उप्परि जगहं **चडेइ** उपरितनभागे जगतो लोकस्यारोहणं करोतीति । अयमत्राभिप्रायः । यः तपस्वी रागादिविकल्परहितस्य परमोपशमरूपस्य निजशुद्धात्मनो भावनां करोति स कलशब्दवाच्यं शरीरं मुक्त्वा लोकस्योपरि तिष्ठति तेन कारणेन स्तुतिं लभते अथवा यथा कोऽपि लोकमध्ये चित्तविकलो भूतः सन् निन्दां लभते तथा शब्दच्छलेन तपोधनोऽपीति ॥४६॥

अथ स्थलसंख्याबाह्यं प्रक्षेपकं कथयति—

> **जा णिसि सयलहँ देहियहँ जोग्गिउ तहिँ जग्गेइ ।**
> **जहिँ पुणु जग्गइ सयलु जगु सा णिसि मणिवि सुवेइ ॥४६*१॥**
> या निशा सकलानां देहिनां योगी तस्यां जागर्ति ।
> यत्र पुनः जागर्ति सकलं जगत् तां निशां मत्वा स्वपिति ॥४६*१॥

जा णिसि इत्यादि । जा णिसि **या वीतरागपरमानन्दैकसहजशुद्धात्मावस्था मिथ्यात्वरागाद्यन्धकारावगुण्ठिता सती रात्रिः प्रतिभाति । केषाम् ।** सयलहं देहियहं **सकलानां स्वशुद्धात्मसंवित्तिरहितानां देहिनाम् ।** जोग्गिउ तहि **जग्गेइ परमयोगी वीतरागनिर्विकल्पस्वसंवेदनज्ञानरत्नप्रदीपप्रकाशेन मिथ्यात्वरागादिविकल्पजालान्धकारमपसार्य स तस्यां तु शुद्धात्मना जागर्ति ।** जहि पुणु जग्गइ सयलु जगु **यत्र पुनः**

जो तपस्वी रागादि रहित परम उपशमभावरूप निज शुद्धात्माकी भावना करता है, उसको शब्दके छलमे तो निंदा है, कि विकल अर्थात् बुद्धि वगैर मे भ्रष्ट होकर लोक अर्थात् लोकोंके ऊपर चढ़ता है। यह लोक-निंदा हुई। लेकिन असलमें ऐसा अर्थ है, कि विकल अर्थात् शरीर से रहित होकर तीन लोकके शिखर (मोक्ष) पर विराजमान हो जाता है। यह स्तुति ही है। क्योंकि जो अनंत सिद्ध हुए, तथा होंगे, वे शरीर रहित निराकार होके जगत् के शिखर पर विराजे हैं ॥४६॥

आगे स्थलसंख्या के सिवाय क्षेपक दोहा कहते है—[**या**] जो [**सकलानां देहिनां**] सब संसारी जीवोंकी [**निशा**] रात है, [**तस्यां**] उस रातमे [**योगी**] परम तपस्वी [**जागर्ति**] जागता है, [**पुनः**] और [**यत्र**] जिसमे [**सकलं जगत्**] सब संसारी जीव [**जागर्ति**] जाग रहे हैं, [**तां**] उस दशाको [**निशां मत्वा**] योगी रात मानकर [**स्वपिति**] योग निद्रामे सोता है ॥ **भावार्थ—**जो जीव वीतराग परमानंदरूप सहज शुद्धात्माकी अवस्थामे रहित हैं, मिथ्यात्व रागादि अन्धकार से मंडित है, इसलिए इन सबोंको वह परमानन्द अवस्था रात्रिके समान मालूम होती है। कैसे ये जगत के जीव हैं, कि आत्म-ज्ञानसे रहित हैं, अज्ञानी हैं, और अपने स्वरूपसे विमुख है, जिनके जाग्रत-दशा नहीं हैं, अचेत सो रहे हैं, ऐसी रात्रि मे वह परमयोगी वीतराग निर्विकल्प स्वसंवेदन ज्ञानरूपी रत्नदीपके प्रकाशसे मिथ्यात्व रागादि विकल्प-जालरूप अन्धकारको दूरकर अपने स्वरूपमें सावधान होनेसे सदा जागता है। तथा शुद्धात्माके ज्ञानसे रहित शुभ अशुभ मन, वचन, कायके परिणमनरूप व्यापारवाले स्थावर जंगम सकल अज्ञानी जीव परमात्मतत्त्वकी भावनासे परान्मुख हुए विषय-

शुभाशुभमनोवाक्कायपरिणामव्यापारे परमात्मतत्त्वभावनापराङ्मुखः सन् अमज्जागर्ति स्वशुद्धात्मपरिज्ञानरहितः सकलोऽज्ञानी जनः सा णिसि मणिवि सुवेइ तां रात्रिं मत्वा त्रिगुप्तिगुप्तः सन् वीतरागनिर्विकल्पपरमसमाधियोगनिद्रायां स्वपिति निद्रां करोतीति । अत्र बहिर्विषये शयनमेवोपशमो भण्यत इति तात्पर्यार्थः ॥४६*१॥

अथ ज्ञानी पुरुषः परमवीतरागरूपं समभावं मुक्त्वा बहिर्विषये रागं न गच्छतीति दर्शयति—

णाणि मुएप्पिणु भाउ समु कित्थु वि जाइ ण राउ ।
जेण लहेसइ णाणमउ तेण जि अप्प-सहाउ ॥४७॥

ज्ञानी मुक्त्वा भावं शमं क्वापि याति न रागम् ।
येन लभिष्यति ज्ञानमयं तेन एव आत्मस्वभावम् ॥४७॥

णाणि इत्यादि । णाणि परमात्मरागाद्यास्रवयोर्भेदज्ञानी मुएप्पिणु मुक्त्वा । कम् । भाउ भावम् । कथंभूतं भावम् । समु उपशमं पञ्चेन्द्रियविषयाभिलाषरहितं वीतरागपरमाह्लादसहितम् । कित्थु वि जाइ ण राउ तं पूर्वोक्तं समभावं मुक्त्वा क्वापि बहिर्विषये रागं न याति न गच्छति । कस्मादिति चेत् । जेण लहेसइ येन कारणेन लभिष्यति भाविकाले प्राप्स्यति । कम् । णाणमउ ज्ञानमयं केवलज्ञाननिर्वृत्तं केवलज्ञानान्तर्भूतानन्तगुणं । तेण जि तेनैव समभावेन अप्पसहाउ निर्दोषिपरमात्मस्वभावमिति । इदमत्र तात्पर्यम् । ज्ञानी पुरुषः शुद्धात्मानुभूतिलक्षणं समभावं विहाय बहि-

कषायरूप अविद्यामे सदा सावधान है, जाग रहे हैं, उस अवस्थामे विभावपर्यायके स्मरण करनेवाले महामुनि सावधान (जागते) नही रहते । इसलिए संसारको दशासे सोते हुए मालूम पड़ते हैं । जिनको आत्मस्वभावके सिवाय विषय-कषायरूप प्रपंच मालूम भी नहीं है । उस प्रपंचको रात्रिके समान जानकर उसमें याद नही रखते, मन, वचन, कायकी तीन गुप्तिमे अचल हुए वीतराग निर्विकल्प परम समाधिरूप योग-निद्रामे मगन हो रहे हैं । सारांश यह है, कि ध्यानी मुनियोंकी आत्मस्वरूप ही गम्य है, प्रपंच गम्य नही है, और जगतके प्रपंची मिथ्यादृष्टि जीव उनकी आत्मस्वरूपकी गम्य नहीं है, अनेक प्रपंचोंमे (झगड़ोंमे) लगे हुए हैं । प्रपंचकी सावधानी रखनेको भूल जाना वही परमार्थ है, तथा बाह्य विषयोंमें जाग्रत होना ही भूल है ॥४६*१॥

आगे जो ज्ञानी पुरुष है, वे परमवीतरागरूप समभावको छोड़कर शरीरादि परद्रव्यमे राग नहीं करते, ऐसा दिखलाते है—[**ज्ञानी**] निजपरके भेदका जाननेवाला ज्ञानी मुनि [**शमं भावं**] समभावको [**मुक्त्वा**] छोड़कर [**क्वापि**] किसी पदार्थमें [**रागं न याति**] राग नहीं करता, [**येन**] इसी कारण [**ज्ञानमयं**] ज्ञानमयी निर्वाणपद [**प्राप्स्यति**] पावेगा, [**तेनैव**] और उसी समभावसे [**आत्मस्वभावं**] केवलज्ञान पूर्ण आत्मस्वभावको आगे पावेगा । **भावार्थ**—जो अनन्त सिद्ध हुए वे समभावके प्रसादसे हुए हैं, और जो होवेंगे, इसी भावसे होंगे । इसलिए ज्ञानी समभावके सिवाय अन्य भावोंमे राग नहीं करते । इस समभावके बिना अन्य उपायसे शुद्धात्माका लाभ नही है । एक समभाव हो भवसागरसे पार होनेका उपाय है । **समभाव** उसे

१. पाठान्तरः—लभिष्यति = लप्स्यते

भावे रागं न गच्छति येन कारणेन समभावेन विना शुद्धात्मलाभो न भवतीति ॥४७॥

अथ ज्ञानी कमप्यन्यं न भणति न प्रेरयति न स्तौति न निन्दतीति प्रतिपादयति—

मणइ भणावइ णवि थुणइ णिंदइ णाणि ण कोइ ।
सिद्धिहिँ कारणु भाउ समु जाणंतउ पर सोइ ॥४८॥

भणति भाणयति नैव स्तौति निन्दति ज्ञानी न कमपि ।
सिद्धेः कारणं भावं समं जानन् परं तमेव ॥४८॥

भणइ इत्यादि । भणइ भणति नैव भणावइ नैवान्यं भाणयति न भणन्तं प्रेरयति णवि थुणइ नैव स्तौति णिंदइ णाणि ण कोइ निन्दति ज्ञानी न कमपि । किं कुर्वन् सन् । सिद्धिहिं कारणु भाउ समु जाणंतउ पर सोइ जानन् । कम् । परं भाव परिणामम् । कथंभूतम् । समु समं रागद्वेषरहितम् । पुनरपि कथंभूतं कारणम् । कस्याः । सिद्धेः परं नियमेन सोइ तमेव सिद्धिकारणं परिणाममिति । इदमत्र तात्पर्यम् । परमोपेक्षासंयमभावनारूपं विशुद्ध-ज्ञानदर्शननिजशुद्धात्मतत्त्वसम्यक्श्रद्धान-ज्ञानानुभूतिलक्षणं साक्षात्सिद्धिकारणं कारणसमयसारं जानन् त्रिगुप्तावस्थायां अनुभवन् सन् भेदज्ञानी पुरुषः परं प्राणिनं न भणति न प्रेरयति न स्तौति न च निन्दतीति ॥४८॥

अथ बाह्याभ्यन्तरपरिग्रहेच्छायापञ्चेन्द्रियविषयभोगाकांक्षादेहमूर्च्छाव्रताविसंकल्पविकल्परहितेन निजशुद्धात्मध्यानेन योऽसौ निजशुद्धात्मानं जानाति स परिग्रहविषयदेहव्रताव्रतेषु रागद्वेषौ न करोतीति चतुःकलं प्रकटयति—

कहते है, जा पंचेन्द्रोके विषयोंका अभिलाषासे रहित वीतराग परमानंदसहित निर्विकल्प निजभाव हो ॥४७॥

आगे कहते है, कि ज्ञानीजन समभावका स्वरूप जानता हुआ न किसीसे पढ़ता है, न किसीको पढ़ाता है, न किसोको प्रेरणा करता है, न किसोको स्तुति करता है, न किसोकी निंदा करता है—[ज्ञानी] निर्विकल्प ध्यानी पुरुष [कमपि न] न किसीका [भणति] शिष्य होकर पढ़ता है, न गुरु होकर किसीको [भाणयति] पढ़ाता है, [नैव स्तौति निंदति] न किसीको स्तुति करता है, न किसीकी निंदा करता है, [सिद्धेः कारणं] मोक्षका कारण [समं भावं] एक समभावको [परं] निश्चयसे [जानन्] जानता हुआ [तमेव] केवल आत्मस्वरूपमे अचल हो रहा है, अन्य कुछ भी शुभ अशुभ कार्य नहीं करता ॥ भावार्थ—परमोपेक्षा संयम अर्थात् तीन गुप्तिमें स्थिर परम समाधि उसमे आरूढ़ जो परमसंयम उसकी भावनारूप निर्मल यथार्थ सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र वही जिसका लक्षण है, ऐसा मोक्षका कारण जो समयसार उसे जानता हुआ, अनुभवता हुआ, अनुभवी पुरुष न किसी प्राणीको सिखाता है, न किसीसे सीखता है, न स्तुति करता है, न निंदा करता है। जिसके शत्रु मित्र सुख दुःख सब एक समान हैं ॥४८॥

आगे बाह्य अंतरंग परिग्रहकी इच्छासे पाँच इंद्रियोंके विषय-भोगोंका वांछक हुआ देहमे

गंथहँ उप्परि परम-मुणि देसु वि करइ ण राउ ।
गंथहँ जेण वियाणियउ भिण्णउ अप्प-सहाउ ॥४९॥

ग्रन्थस्य उपरि परममुनिः द्वेषमपि करोति न रागम् ।
ग्रन्थाद् येन विज्ञातः भिन्नः आत्मस्वभावः ॥४९॥

गंथहं इत्यादि । गंथहँ उप्परि ग्रन्थस्य बाह्याभ्यन्तरपरिग्रहस्योपरि अथवा ग्रन्थ रचनारूपशास्त्रस्योपरि परममुणि **परमतपस्वी** देसु वि करइ ण **द्वेषमपि न करोति न** राउ **रागमपि । येन तपोधनेन किं कृतम् ।** गंथहं जेण वियाणियउ भिण्णउ अप्पसहाउ **ग्रन्थात्सकाशाद्येन विज्ञातो भिन्न आत्मस्वभाव इति । तद्यथा । मिथ्यात्वं, स्त्र्यादिवेदकांक्षारूपवेदत्रयं, हास्यरत्यरतिशोकभयजुगुप्सारूपं नोकषायषट्कं, क्रोधमान-मायालोभरूपं कषायचतुष्टयं चेति चतुर्दशाभ्यन्तरपरिग्रहाः, क्षेत्रवास्तुहिरण्यसुवर्ण-धनधान्यदासीदासकुप्यभाण्डरूपा बाह्यपरिग्रहाः इत्थंभूतान् बाह्याभ्यन्तरपरिग्रहान् जगत्त्रये कालत्रयेऽपि मनोवचनकायैः कृतकारितानुमतैश्च त्यक्त्वा शुद्धात्मोपलम्भ-लक्षणे वीतरागनिर्विकल्पसमाधौ स्थित्वा च यो बाह्याभ्यन्तरपरिग्रहाद्भिन्नमात्मानं जानाति स परिग्रहस्योपरि रागद्वेषौ न करोति । अत्रेदं व्याख्यानं एवं गुणविशिष्ट-निर्ग्रन्थस्यैव शोभते न च सपरिग्रहस्येति तात्पर्यार्थः ॥४९॥**

अथ—

विसयहँ उप्परि परम-मुणि देसु वि करइ ण राउ ।
विसयहँ जेण वियाणियउ भिण्णउ अप्प-सहाउ ॥५०॥

विषयाणां उपरि परममुनिः द्वेषमपि करोति न रागम् ।
विषयेभ्यः येन विज्ञातः भिन्नः आत्मस्वभाव ॥५०॥

ममता नहीं करता, तथा मिथ्यात्व अव्रत आदि समस्त संकल्प विकल्पोंसे रहित जो निज शुद्धात्मा उसे जानता है, वह परिग्रहमें तथा विषय देहसंबंधी व्रत अव्रतमें राग द्वेष नहीं करता, ऐसा चार—सूत्रोंसे प्रगट करते हैं—[**ग्रंथस्य उपरि**] अंतरङ्ग बाह्य परिग्रहके ऊपर अथवा शास्त्रके ऊपर जो [**परममुनिः**] परम तपस्वी [**रागं द्वेषमपि न करोति**] राग और द्वेष नहीं करता है [**येन**] जिस मुनिने [**आत्मस्वभावः**] आत्माका स्वभाव [**ग्रंथात्**] ग्रंथसे [**भिन्नः विज्ञातः**] जुदा जान लिया है ॥ **भावार्थ**—मिथ्यात्व, वेद, राग, द्वेष, हास्य, रति, अरति, शोक, भय, जुगुप्सा, क्रोध, मान, माया, लोभ—ये चौदह अंतरङ्ग परिग्रह और क्षेत्र, वास्तु (घर), हिरण्य, सुवर्ण, धन, धान्य, दासी, दास, कुप्य, भांडरूप दस बाह्य परिग्रह—इस प्रकार चौबीस तरहके बाह्य अभ्यंतर परिग्रहोंको तीन जगतमें, तीनों कालोंमें, मन, वचन, काय, कृत कारित अनुमोदनासे छोड़ और शुद्धात्माकी प्राप्तिरूप वीतराग निर्विकल्प समाधिमें ठहरकर परवस्तुसे अपनेको भिन्न जानता है, वो ही परिग्रहके ऊपर रागद्वेष नहीं करता है । यहांपर ऐसा व्याख्यान निर्ग्रंथ मुनिको ही शोभा देता है, परिग्रहधारीको नहीं शोभा देता है, ऐसा तात्पर्य जानना ॥४९॥

विसयहं इत्यादि । विसयहं उप्परि विषयाणामुपरि परममुणि परममुनिः देसु वि करइ ण राउ द्वेषमपि नापि करोति न च रागमपि । येन किं कृतम् । विसयहं जेण वियाणिउ विषयेभ्यो येन विज्ञातः । कोऽसौ विज्ञातः । भिण्णउ अप्पसहाउ आत्मस्वभावः । कथंभूतो भिन्न इति । तथा च । द्रव्येन्द्रियाणि भावेन्द्रियाणि द्रव्येन्द्रियभावेन्द्रियग्राह्यान् विषयांश्च दृष्ट-श्रुतानुभूतान् जगत्त्रये कालत्रयेऽपि मनोवचनकायैः कृतकारितानुमतैश्च त्यक्त्वा निजशुद्धात्मभावनासमुत्पन्नवीतरागपरमानन्दैकरूपसुखामृतरसास्वादेन तृप्तो भूत्वा यो विषयेभ्यो भिन्नं शुद्धात्मानमनुभवति स मुनिपञ्चेन्द्रियविषयेषु रागद्वेषौ न करोति । अत्र यः पञ्चेन्द्रियविषयसुखान्निवर्त्य स्वशुद्धात्मसुखे तृप्तो भवति तस्यैवेदं व्याख्यानं शोभते न च विषयासक्तस्येति भावार्थः ॥५०॥

अथ—

देहहँ उप्परि परम-मुणि देसु वि करइ ण राउ ।
देहहँ जेण वियाणियउ भिण्णउ अप्प-सहाउ ॥५१॥

देहस्य उपरि परममुनिः द्वेषमपि करोति न रागम् ।
देहाद् येन विज्ञातः भिन्नः आत्मस्वभावः ॥५१॥

देहहं इत्यादि । देहह उप्परि देहस्योपरि परममुणि परममुनिः देसु वि करइ ण राउ द्वेषमपि न करोति न रागमपि । येन किं कृतम् । देहहं जेण वियाणियउ देहात्सकाशाद्येन विज्ञातः । कोऽसौ । भिण्णउ अप्पसहाउ आत्मस्वभावः । कथंभूतो

आगे विषयोंके ऊपर वीतरागता दिखलाते हैं—[परममुनिः] महामुनि [विषयाणां उपरि] पाँच इन्द्रियोंके स्पर्शादि विषयोंपर [रागमपि द्वेषं] राग और द्वेष [न करोति] नहीं करता, अर्थात् मनोज्ञ विषयोंपर राग नहीं करता और अनिष्ट विषयोंपर द्वेष नहीं करता, क्योंकि [येन] जिनसे [आत्मस्वभावः] अपना स्वभाव [विषयेभ्यः] विषयोंसे [भिन्नः विज्ञातः] जुदा समझ लिया है। इसलिये वीतराग दशा धारण कर ली है ॥ भावार्थ—द्रव्येन्द्री भावेन्द्री और इन दोनोंसे ग्रहण करने योग्य देखे सुने अनुभव किये जो रूपादि विषय हैं, उनको मन, वचन, काय, कृत कारित अनुमोदनासे छोड़कर और निज शुद्धात्माकी भावनासे उत्पन्न वीतराग परमानन्दरूप अतींद्रियसुखके रसके आस्वादनेसे तृप्त होकर विषयोंसे भिन्न अपने आत्माको जो मुनि अनुभवता है, वो ही विषयोंमें राग द्वेष नहीं करता। यहाँपर तात्पर्य यह है, कि जो पंचेन्द्रियोंके विषय-सुखसे निवृत्त होकर निज शुद्ध आत्म-सुखमें तृप्त होता है, उसीको यह व्याख्यान शोभा देता है, और विषयाभिलाषीको नहीं शोभता ॥५०॥

आगे साधु देहके ऊपर भी राग द्वेष नहीं करता—[परममुनिः] महामुनि [देहस्य उपरि] मनुष्यादि शरीरके ऊपर भी [रागमपि द्वेषं] राग और द्वेषको [न करोति] नहीं करता अर्थात् शुभ शरीरसे राग नहीं करता, अशुभ शरीरसे द्वेष नहीं करता, [येन] जिसने [आत्मस्वभावः] निज-

विज्ञातः । तस्माद्देहाद्भिन्न इति । तथाहि—"सपरं बाधासहिदं विच्छिण्णं बंधकारणं विसमं । जं इंदिएहिं लद्धं तं सुक्खं दुक्खमेव तहा ॥" इति गाथाकथितलक्षणं दृष्ट-श्रुतानुभूतं यद्देहजनितसुखं तज्जगत्त्रये कालत्रयेऽपि मनोवचनकायैः कृतकारितानुमतैश्च त्यक्त्वा वीतरागनिर्विकल्पसमाधिबलेन पारमार्थिकानाकुलत्वलक्षणसुख-परिणते निजपरमात्मनि स्थित्वा च य एव देहाद्भिन्नं स्वशुद्धात्मानं जानाति स एव देहस्योपरि रागद्वेषौ न करोति । अत्र य एव सर्वप्रकारेण देहममत्वं त्यक्त्वा देहसुखं नानुभवति तस्यैवेदं व्याख्यानं शोभते नापरस्येति तात्पर्यार्थः ॥५१॥

अथ—

वित्ति-णिवित्तिहिँ परम-मुणि देसु वि करइ ण राउ ।
बंधहँ हेउ वियाणियउ एयहँ जेण सहाउ ॥५२॥

वृत्तिनिवृत्त्योः परममुनिः द्वेषमपि करोति न रागम् ।
बन्धस्य हेतुः विज्ञातः एतयोः येन स्वभावः ॥५२॥

वित्तिणिवित्तिहिं इत्यादि । वित्तिणिवित्तिहि **वृत्तिनिवृत्तिविषये व्रताव्रतविषये** परममुणि **परममुनिः** देसु वि करइ ण राउ **द्वेषमपि न करोति न च रागम्** । **येन किं कृतम्** । बंधहं हेउ वियाणियउ **बन्धस्य हेतुर्विज्ञातः** । **कोऽसौ** । एयहं जेण सहाउ **एतयोर्व्रताव्रतयोः स्वभावो येन विज्ञात इति** । अथवा पाठान्तरम् । "**भिण्णउ जेण वियाणियउ एयहं अप्पसहाउ भिन्नो येन विज्ञातः । कोऽसौ । आत्मस्वभावः ।**

स्वभाव [**देहात्**] देहसे [**भिन्नः विज्ञातः**] भिन्न जान लिया है । देह तो जड़ है, आत्मा चैतन्य है, जड़ चैतन्यका क्या सम्बन्ध ? ॥ **भावार्थ**—इन इन्द्रियोसे जो सुख उत्पन्न हुआ है, वह दुःखरूप ही है । ऐसा कथन श्रीप्रवचनसारमें कहा है । 'सपरम' इत्यादि । इसका तात्पर्य ऐसा है, कि जो इन्द्रियोसे सुख प्राप्त होता है, वह सुख दुःखरूप ही है, क्योकि वह सुख परवस्तु है, निजवस्तु नही है, बाधा सहित है, निराबाध नही है, नाशके लिये हुए है, जिसका नाश हो जाता है, बन्धका कारण है, और विषम है । इसलिये इन्द्रियसुख दुःखरूप ही है, ऐसा इस गाथामे जिसका लक्षण कहा गया है, ऐसे देहजनित सुखका मन वचन, काय, कृत, कारित अनुमोदनासे छोड़े । वीतराग-निर्विकल्पसमाधिके बलसे आकुलता रहित परमसुख निज परमात्मामे स्थित होकर जो महामुनि देहसे भिन्न अपने शुद्धात्माको जानता है, वही देहके ऊपर राग द्वेष नही करता । जो सब तरह देहसे निर्ममत्व होकर देहके सुखको नही अनुभवता, उसीके लिए यह व्याख्यान शोभा देता है, और देहबुद्धिवालोको नही शोभता ऐसा अभिप्राय जानना ॥५१॥

आगे प्रवृत्ति और निवृत्तिमे भी महामुनि राग द्वेष नही करता, ऐसा कहते है—[**परममुनिः**] महामुनि [**वृत्तिनिवृत्त्योः**] प्रवृत्ति और निवृत्तिमे [**रागं अपि द्वेषं**] राग और द्वेषको [**न करोति**] नही करता, [**येन**] जिसने [**एतयोः**] इन दोनोका [**स्वभावः**] स्वभाव [**बंधस्य हेतुः**] कर्म-बंधका कारण [**विज्ञातः**] जान लिया है ॥ **भावार्थ**—व्रत अव्रतमे परममुनि राग द्वेष नही करता जिसने इन दोनोका स्वभाव बन्धका कारण जान लिया है । अथवा पाठातर होनेसे ऐसा

काभ्याम् । एताभ्यां व्रताव्रतविकल्पाभ्यां सकाशादिति । तथाहि । येन व्रताव्रतविकल्पौ पुण्यपापबन्धकारणभूतौ स शुद्धात्मनि स्थितः सन् व्रतविषये रागं न करोति तथा चाव्रतविषये द्वेषं न करोतीति । अत्राह प्रभाकरभट्टः । हे भगवन् यदि व्रतस्योपरि रागतात्पर्यं नास्ति तर्हि व्रतं निषिद्धमिति । भगवानाह । व्रत कोऽर्थः । सर्वनिवृत्तिपरिणामः । तथा चोक्तम्––'हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम्' अथवा । "रागद्वेषौ प्रवृत्तिः स्यान्निवृत्तिस्तन्निषेधनम् । तौ च बाह्यार्थसंबन्धौ तस्मात्तांस्तु परित्यजेत् ॥" प्रसिद्धं पुनर्हिंसादिव्रतं एकदेशेन व्यवहारेणेति । कथमेकदेशव्रतमिति चेत् । तथाहि । जीवघाते निवृत्तिर्जीवदयाविषये प्रवृत्तिः, असत्यवचनविषये निवृत्तिः सत्यवचनविषये प्रवृत्तिः अदत्तादानविषये निवृत्तिः दत्तादानविषये प्रवृत्तिरित्यादिरूपेणैकदेशं व्रतम् । रागद्वेषरूपसंकल्पविकल्पकल्लोलमालारहिते त्रिगुप्तिगुप्तपरमसमाधौ पुनः शुभाशुभत्यागात्परिपूर्णं व्रतं भवतीति । कश्चिदाह ।

अर्थ होता है, कि जिसने आत्माका स्वभाव भिन्न जान लिया है। अपना स्वभाव प्रवृत्ति निवृत्तिसे रहित है। जहाँ व्रत अव्रतका विकल्प नही है। ये व्रत अव्रत पुण्य पापरूप बंधके कारण हैं। ऐसा जिसने जान लिया, वह आत्मामे तल्लीन हुआ व्रत अव्रतमें रागद्वेष नही करता। ऐसा कथन सुनकर प्रभाकरभट्टने पूछा, हे भगवन्, जो व्रतपर राग नहीं करे, तो व्रत क्यों धारण करे? ऐसे कथन में व्रतका निषेध होता है। तब योगीन्द्राचार्य कहते हैं, कि व्रतका अर्थ यह है, कि सब शुभ अशुभ भावोसे निवृत्ति परिणाम होना। ऐसा ही अन्य ग्रंथोंमे भी "रागद्वेषौ" इत्यादिसे कहा है। अर्थ यह है कि राग और द्वेष दोनों प्रवृत्तियाँ है, तथा इनका निषेध वह निवृत्ति है। ये दोनों अपने नही हैं, अन्य पदार्थके संबधसे हैं। इसलिये इन दोनोंको छोड़े। अथवा "हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्या विरतिर्व्रतं" ऐसा कहा गया है। इसका अर्थ यह है, कि प्राणियोंको पीड़ा देना, झूठ वचन बोलना, परधन हरना, कुशीलका सेवन और परिग्रह इनसे जो विरक्त होना, वही व्रत है। ये अहिसादि व्रत प्रसिद्ध हैं, वे व्यवहारनयकर एकोदेशरूप व्रत है। यही दिखलाते हैं—जीवघातमे निवृत्ति, जीवदयामें प्रवृत्ति, असत्य वचनमे निवृत्ति, सत्य वचन मे प्रवृत्ति, अदत्तादान (चोरी) से निवृत्ति, अचौर्यमें प्रवृत्ति इत्यादि स्वरूपसे एकोदेशव्रत कहा जाता है, और राग द्वेषरूप सकल्प विकल्पोंकी कल्लोलोंसे रहित तीन गुप्तिसे गुप्त समाधिमे शुभाशुभके त्यागसे परिपूर्ण व्रत होता है। अर्थात् अशुभकी निवृत्ति और शुभको प्रवृत्तिरूप एकोदेशव्रत और शुभ अशुभ दोनोंका हो त्याग होना वह पूर्ण व्रत है। इसलिये प्रथम अवस्थामे व्रतका निषेध नही है एकादेश व्रत है, और पूर्ण अवस्थामे सर्वदेश व्रत है। यहांपर कोई यदि प्रश्न करे, कि व्रतसे क्या प्रयाजन? आत्मभावनासे ही मोक्ष होता है। भरतजी महाराजने क्या व्रत धारण किया था? वे तो दो घड़ीमें हो केवलज्ञान पाकर मोक्ष गये। इसका समाधान ऐसा है, कि भरतेश्वरने पहले जिनदीक्षा धारण की, शिरके केशलुञ्चन किये, हिंसादि पापोंकी निवृत्तिरूप पाँच महाव्रत आदरे। फिर एक अंतर्मुहूर्तमे समस्त विकल्प रहित मन, वचन, काय रोकनेरूप निज शुद्धात्मध्यान उसमें ठहरकर निर्विकल्प हुए। वे शुद्धात्माका ध्यान, देखे सुने और भोगे हुए भोगोंकी वांछारूप निदान बन्धादि विकल्पोंसे रहित ऐसे ध्यानमे तल्लीन

व्रतेन किं प्रयोजनमात्मभावनया मोक्षो भविष्यति । भरतेश्वरेण किं व्रतं कृतम्, घटिकाद्वयेन मोक्षं गतः इति । अथ परिहारमाह । भरतेश्वरोऽपि पूर्वं जिनदीक्षाप्रस्तावे लोचानन्तरं हिंसाविनिवृत्तिरूपं महाव्रतविकल्पं कृत्वान्तर्मुहूर्ते गते सति दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबन्धादिविकल्परहिते मनोवचनकायनिरोधलक्षणे निजशुद्धात्मध्याने स्थित्वा पश्चान्निर्विकल्पो जातः । परं किंतु तस्य स्तोककालत्वान्महाव्रतप्रसिद्धिर्नास्ति । अथेवं मतं वयमपि तथा कुर्मोऽवसानकाले । नैव वक्तव्यम् । यद्येकस्यान्धस्य कथंचिन्निधानलाभो जातस्तर्हि किं सर्वेषां भवतीति भावार्थः । तथा चोक्तम्—"पुव्वमभाविदजोगो मरणे आराहओ जदि वि कोई । खन्नगनिधिदिट्ठंतं तं खु पमाणं ण सव्वत्थ ॥" ॥५२॥

एवं मोक्षमोक्षफलमोक्षमार्गप्रतिपादकमहाधिकारमध्ये परमोपशमभावव्याख्यानोपलक्षणत्वेन चतुर्दशसूत्रैः स्थलं समाप्तम् । अथानन्तरं निश्चयनयेन पुण्यपापे द्वे समाने इत्याद्युपलक्षणत्वेन चतुर्दशसूत्रपर्यन्तं व्याख्यानं क्रियते । तद्यथा—योऽसौ विभावस्वभावपरिणामौ निश्चयनयेन बन्धमोक्षहेतुभूतौ न जानाति स एव पुण्यपापद्वयं करोति न चान्य इति मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति—

बंधहँ मोक्खहँ हेउ णिउ जो णवि जाणइ कोइ ।
सो पर मोहिं करइ जिय पुण्णु वि पाउ वि दोइ ॥५३॥

बन्धस्य मोक्षस्य हेतुः निजः यः नैव जानाति कश्चित् ।
स परं मोहेन करोति जीव पुण्यमपि पापमपि द्वे अपि ॥५३॥

बंधहं इत्यादि । बंधहं बन्धस्य मोक्खहं मोक्षस्य हेउ हेतुः कारणम् । कथं-

---

होकर केवली हुए । जब राज छोड़ा, और मुनि हुए तभी केवली हुए, तब भरतेश्वरने अंतर्मुहूर्तमें केवलज्ञान प्राप्त किया । इसलिये महाव्रतकी प्रसिद्धि नहीं हुई । इसपर कोई मूर्ख ऐसा विचार लेवे कि जैसा उनको हुआ वैसे हमको भी होवेगा । ऐसा विचार ठीक नहीं है । यदि किसी एक अन्धेको किसी तरहसे निधिका लाभ हुआ, तो क्या सभीको ऐसा हो सकता है ? सबको नहीं होता । भरत सरीखे भरत ही हुए । इसलिये अन्य भव्यजीवोंको यही योग्य है, कि तप संयमका साधन करना ही श्रेष्ठ है । ऐसा ही "पुव्वं" इत्यादि गाथासे दूसरी जगह भी कहा है । अर्थ ऐसा है, कि जिसने पहले तो योगका अभ्यास नहीं किया, और मरणके समय जो कभी आराधक हो जावे, तो यह बात ऐसी जानना, कि जैसे किसी अन्धे पुरुषको निधिका लाभ हुआ हो । ऐसी बात सब जगह प्रमाण नहीं हो सकती । कभी कहींपर होवे तो होवे ॥ ५२ ॥

इस तरह मोक्ष, मोक्षका फल, और मोक्षके मार्गके कहनेवाले दूसरे महाधिकारमें परम उपशांतभावके व्याख्यानकी मुख्यतासे अन्तरस्थलमें चौदह दोहे पूर्ण हुए ।

आगे निश्चयनयकर पुण्य पाप दोनों ही समान हैं । ऐसा चौदह दोहोंमें कहते हैं । जो कोई स्वभावपरिणामको मोक्षका कारण और विभावपरिणामको बंधका कारण निश्चयसे ऐसा भेद नहीं

भूतम् । णिउ निजविभावस्वभावहेतुस्वरूपम् । जो णवि जाणइ कोइ यो नैव जानाति कश्चित् । सो पर स एव मोहिं मोहेन करइ करोति जिय हे जीव पुण्णु वि पाउ वि पुण्यमपि पापमपि । कतिसंख्योपेते अपि । दो द्वे अपीति । तथाहि । निजशुद्धात्मानुभूतिरुचिविपरीतं मिथ्यादर्शनं स्वशुद्धात्मप्रतीतिविपरीतं मिथ्याज्ञानं निजशुद्धात्मद्रव्यनिश्चलस्थितिविपरीतं मिथ्याचारित्रमित्येतत्त्रयं कारणं, तस्मात्-त्रयाद्विपरीतं भेदाभेदरत्नत्रयस्वरूपं मोक्षस्य कारणमिति योऽसौ न जानाति स एव पुण्यपापद्वयं निश्चयनयेन हेयमपि मोहवशात्पुण्यमुपादेयं करोति पापं हेयं करोतीति भावार्थः ॥५३॥

अथ सम्यग्दर्शनज्ञानचारित्रपरिणतमात्मानं योऽसौ मुक्तिकारणं न जानाति स पुण्यपापद्वयं करोतीति दर्शयति––

दंसण-णाण-चरित्तमउ जो णवि अप्पु मुणेइ ।
मोक्खहँ कारणु भणिवि जिय सो पर ताइँ करेइ ॥५४॥

दर्शनज्ञानचारित्रमयं यः नैवात्मानं मनुते ।
मोक्षस्य कारणं भणित्वा जीव स परं ते करोति ॥५४॥

दंसणणाणचरित्त इत्यादि । दंसणणाणचरित्तमउ सम्यग्दर्शनज्ञानचारित्रमयं जो णवि अप्पु मुणेइ यः कर्ता नैवात्मानं मनुते जानाति । किं कृत्वा न जानाति । मोक्खहं कारणु भणिवि मोक्षस्य कारणं भणित्वा मत्वा जिय हे जीव सो पर ताइं करेइ स एव पुरुषस्ते पुण्यपापे द्वे करोतीति । तथाहि––निजशुद्धात्मभावनोत्थवीत-

---

जानता है, वही पुण्य पापका कर्ता होता है, अन्य नहीं, ऐसा मनमें धारणकर यह गाथा-सूत्र कहते हैं––[यः कश्चित्] जो कोई जीव [बंधस्य मोक्षस्य हेतुः] बंध और मोक्षका कारण [निजः] अपना विभाव और स्वभाव परिणाम है, ऐसा भेद [नैव जानाति] नहीं जानता है, [स एव] वही [पुण्यमपि पापमपि] पुण्य और पाप [द्वे अपि] दोनोंको ही [मोहेन] मोहसे [करोति] करता है ॥ भावार्थ––निज शुद्धात्माकी अनुभूतिकी रुचिसे विपरीत जो मिथ्यादर्शन, निज शुद्धात्माके ज्ञानसे विपरीत मिथ्याज्ञान, और निज शुद्धात्मद्रव्यमें निश्चल स्थिरतासे उलटा जो मिथ्या-चारित्र इन तीनोंको बंधका कारण और इन तीनोंसे रहित भेदाभेद रत्नत्रयस्वरूप मोक्षका कारण ऐसा जो नहीं जानता है, वही मोहके वशसे पुण्य पापका कर्ता होता है। पुण्यको उपादेय जानके करता है, पापको हेय समझता है ॥५३॥

आगे सम्यग्दर्शन सम्यग्ज्ञान सम्यक्चारित्ररूप परिणमता जो आत्मा वह ही मुक्तिका कारण है, जो ऐसा भेद नहीं जानता है, वही पुण्य पाप दोनोंका कर्ता है, ऐसा दिखलाते हैं––[यः] जो [दर्शनज्ञानचारित्रमयं] सम्यग्दर्शन ज्ञान चारित्रमयी [आत्मानं] आत्माको [नैव मनुते] नहीं जानता, [स एव] वही [जीव] हे जीव; [ते] उन पुण्य पाप दोनोंको [मोक्षस्य कारणं] मोक्षके कारण [भणित्वा] जानकर [करोति] करता है ॥ भावार्थ––निज शुद्धात्माकी भावनासे

रागसहजानन्दैकरूपसुखरसास्वादरुचिरूपं सम्यग्दर्शनं, तत्रैव स्वशुद्धात्मनि वीतराग-सहजानन्दैकस्वसंवेदनपरिच्छित्तिरूपं सम्यग्ज्ञानं, वीतरागसहजानन्दैकपरमसमरसीभावेन तत्रैव निश्चलस्थिरत्वं सम्यक्चारित्रं, इत्येतैस्त्रिभिः परिणतमात्मानं योऽसौ मोक्षकारणं न जानाति स एव पुण्यमुपादेयं करोति पापं हेयं च करोतीति । यस्तु पूर्वोक्तरत्नत्रयपरिणतमात्मानमेव मोक्षमार्गं जानाति तस्य तु सम्यग्दृष्टेर्यद्यपि संसार-स्थितिच्छेदकारणेन सम्यक्त्वादिगुणेन परंपरया मुक्तिकारणं तीर्थंकरनामकर्म-प्रकृत्यादिकमनीहितवृत्त्या विशिष्टपुण्यमास्रवति तथाप्यसौ तदुपादेयं न करोतीति भावार्थः ॥५४॥

अथ योऽसौ निश्चयेन पुण्यपापद्वयं समानं न मन्यते स मोहेन मोहितः सन् संसारं परिभ्रमतीति कथयति—

जो णवि मण्णइ जीउ समु पुण्णु वि पाउ वि दोइ ।
सो चिरु दुक्खु सहंतु जिय मोहिँ हिंडइ लोइ ॥५५॥

यः नैव मन्यते जीवः समाने पुण्यमपि पापमपि द्वे ।
स चिरं दुःखं सहमानः जीव मोहेन हिण्डते लोके ॥५५॥

जो इत्यादि । जो णवि मण्णइ यः कर्ता नैव मन्यते जीउ जीवः । किं न मन्यते । समु समाने । के । पुण्णु वि पाउ वि दोइ पुण्यमपि पापमपि द्वे सो स जीवः चिरु दुक्खु सहंतु चिरं बहुतरं कालं दुःखं सहमानः सन् जिय हे जीव मोहि हिंडइ लोइ **मोहेन मोहितः सन् हिण्डते भ्रमति । क्व । लोके संसारे इति । तथा च ।**

उत्पन्न जो वीतराग सहजानंद एकरूप सुखरसका आस्वाद उसको रुचिरूप सम्यग्दर्शन, उसी शुद्धात्मामें वीतराग नित्यानंद स्वसंवेदनरूप सम्यग्ज्ञान और वीतरागपरमानंद परम समरसीभावकर उसीमें निश्चय स्थिरतारूप सम्यक्चारित्र—इन तीनों स्वरूप परिणत हुआ जो आत्मा उसको जो जीव मोक्षका कारण नहीं जानता, वह ही पुण्यको आदरने योग्य जानता है, और पापको त्यागने योग्य जानता है। तथा जो सम्यग्दृष्टी जीव रत्नत्रयस्वरूप परिणत हुए आत्माको ही मोक्षका मार्ग जानता है, उसके यद्यपि संसारकी स्थितिके छेदनका कारण, और सम्यक्त्वादि गुणसे परम्पराय मुक्तिका कारण ऐसी तीर्थंकरनामप्रकृति आदि शुभ (पुण्य) प्रकृतियोंको (कर्मोंको) अवाछित-वृत्तिसे ग्रहण करता है, तो भी उपादेय नहीं मानता है। कर्मप्रकृतियोंको त्यागने योग्य ही समझता है ॥५४॥

आगे जो निश्चयनयसे पुण्य पाप दोनोंको समान नहीं मानता, वह मोहसे मोहित हुआ संसारमें भटकता है, ऐसा कहते है—[**यः**] जो [**जीवः**] जीव [**पुण्यमपि पापमपि द्वे**] पुण्य और पाप दोनोंको [**समाने**] समान [**नैव मन्यते**] नहीं मानता, [**सः**] वह जीव [**मोहेन**] मोहसे मोहित हुआ [**चिरं**] बहुत कालतक [**दुःखं सहमानः**] दुःख सहता हुआ [**लोके**] संसारमें [**हिंडते**] भटकता है ॥ **भावार्थ**—यद्यपि असद्भूत (असत्य) व्यवहारनयसे द्रव्यपुण्य और द्रव्यपाप ये दोनों एक दूसरेसे भिन्न हैं, और अशुद्धनिश्चयनयसे भावपुण्य और भावपाप ये दोनों भी आपसमें भिन्न हैं,

यद्यप्यसद्भूतव्यवहारेण द्रव्यपुण्यपापे परस्परभिन्ने भवतस्तथैवाशुद्धनिश्चयेन भावपुण्यपापे भिन्ने भवतस्तथापि शुद्धनिश्चयनयेन पुण्यपापरहितशुद्धात्मनः सकाशाद्विलक्षणे सुवर्णलोहनिगलवद्बन्धं प्रति समाने एव भवतः । एवं नयविभागेन योऽसौ पुण्यपापद्वयं समानं न मन्यते स निर्मोहशुद्धात्मनो विपरीतेन मोहेन मोहितः सन् संसारे परिभ्रमति इति । अत्राह प्रभाकरभट्टः । तर्हि ये केचन पुण्यपापद्वयं समानं कृत्वा तिष्ठन्ति तेषां किमिति दूषणं दीयते भवद्भिरिति । भगवानाह । यदि शुद्धात्मानुभूतिलक्षणं त्रिगुप्तिगुप्तवीतरागनिर्विकल्पपरमसमाधिं लब्ध्वा तिष्ठन्ति तदा संमतमेव । यदि पुनस्तथाविधामवस्थामलभमाना अपि सन्तो गृहस्थावस्थायां दानपूजादिकं त्यजन्ति तपोधनावस्थायां षडावश्यकादिकं च त्यक्त्वोभयभ्रष्टाः सन्तः तिष्ठन्ति तदा दूषणमेवेति तात्पर्यम् ॥५५॥

अथ येन पापफलेन जीवो दुःखं प्राप्य दुःखविनाशार्थं धर्माभिमुखो भवति तत्पापमपि समीचीनमिति दर्शयति––

वर जिय पावइँ सुन्दरइँ णाणिय ताइँ भणंति ।
जीवहँ दुक्खइँ जणिवि लहु सिवमइँ जाइँ कुणंति ॥५६॥

वरं जीव पापानि सुन्दराणि ज्ञानिनः तानि भणन्ति ।
जीवानां दुःखानि जनित्वा लघु शिवमतिं यानि कुर्वन्ति ॥५६॥

वर जिय इत्यादि । वर जिय वरं किंतु हे जीव पावइं सुन्दरइं पापानि सुन्दराणि समीचीनानि भणति कथयन्ति । के । णाणिय ज्ञानिनः तत्त्ववेदिनः । कानि ।

तो भी शुद्ध निश्चयनयकर पुण्य पाप रहित शुद्धात्मासे दोनों ही भिन्न हुए बंधरूप हानेसे दोनों समान ही हैं । जैसे सोनेकी बेड़ी और लोहेकी बेड़ी ये दोनों ही बंधका कारण हैं––इससे समान हैं । इस तरह नयविभागसे जो पुण्य पापको समान नहीं मानता, वह निर्मोही शुद्धात्मासे विपरीत जो मोहकर्म उससे मोहित हुआ संसारमे भ्रमण करता है । ऐसा कथन सुनकर प्रभाकरभट्ट बोला, यदि ऐसा ही है, तो कितने हो परमतवादी पुण्य पापको समान मानकर स्वच्छंद हुए रहते हैं, उनको तुम दोष क्यों देते हो ? तब योगीन्द्रदेवने कहा––जब शुद्धात्मानुभूतिस्वरूप तीन गुप्तिसे गुप्त वीतरागनिर्विकल्पसमाधिको पाकर ध्यानमें मग्न हुए पुण्य पापको समान जानते हैं, तब तो जानना योग्य है । परन्तु जो मूढ़ परमसमाधिको न पाकर भी गृहस्थ-अवस्थामें दान पूजा आदि शुभ क्रियाओंको छोड़ देते हैं, और मुनि पदमें छह आवश्यककर्मोंका छोड़ते है, वे दोनो बातोंसे भ्रष्ट हैं । न तो यती हैं, न श्रावक हैं । वे निंदा योग्य ही हैं । तब उनको दोष ही है, ऐसा जानना ॥५५॥

आगे जिस पापके फलसे यह जीव नरकादिमे दुःख पाकर उस दुःखके दूर करनेके लिये धर्मके सम्मुख होता है, वह पापका फल भो श्रेष्ठ (प्रशंसा योग्य) है, ऐसा दिखलाते हैं–– [जीव] हे जीव, [यानि] जो पापके उदय [जीवानां] जीवोंको [दुःखानि जनित्वा] दुःख

ताइं तानि पूर्वोक्तानि पापानि । कथंभूतानि । जीवहं दुक्खइं जणिवि लहु सिवमइं जाइं कुर्णति जीवानां दुःखानि जनित्वा लघु शीघ्रं शिवमतिं मुक्तियोग्यमतिं यानि कुर्वन्ति । अयमत्राभिप्रायः । यत्र भेदाभेदरत्नत्रयात्मकं श्रीधर्मं लभते जीवस्तत्पापजनितदुःखमपि श्रेष्ठमिति कस्मादिति चेत् । 'आर्ता नरा धर्मपरा भवन्ति' इति वचनात् ।।५६।।

अथ निदानबन्धोपार्जितानि पुण्यानि जीवस्य राज्यादिविभूतिं दत्त्वा नारकादिदुःखं जनयन्तीति हेतोः समीचीनानि न भवन्तीति कथयति—

मं पुणु पुण्णइँ भल्लाइं णाणिय ताइँ भणंति ।
जीवहँ रज्जइँ देवि लहु दुक्खइँ जाइँ जणंति ।।५७।।

देकर [लघु] शीघ्र ही [शिवमतिं] मोक्षके जाने योग्य उपायोंमें बुद्धि [कुर्वन्ति] कर देवे, तो [तानि पापानि] वे पाप भी [वरं सुंदराणि] बहुत अच्छे हैं, ऐसा [ज्ञानिनः] ज्ञानी [भणंति] कहते हैं ।। भावार्थ—कोई जीव पाप करके नरकमें गया, वहाँ पर महान दुःख भोगे, उससे कोई समय किसी जीवके सम्यक्त्वकी प्राप्ति हो जाती है । क्योंकि उस जगह सम्यक्त्वकी प्राप्तिके तीन कारण हैं । पहला तो यह है, कि तीसरे नरकतक देवता उसे संबोधनेको (चेतावने को) जाते है, सो कभी कोई जीवके धर्म सुननेसे सम्यक्त्व उत्पन्न हो जावे, दूसरा कारण—पूर्वभवका स्मरण और तीसरा नरककी पीड़ाकरि दुःखी हुआ नरकको महान् दुःखका स्थान जान नरकके कारण जो हिंसा, झूठ, चोरी, कुशील, परिग्रह और आरंभादिक हैं, उनको खराब जानके पापसे उदास होवे । तीसरे नरकतक ये तीन कारण हैं । आगेके चौथे, पाँचवें, छठें, सातवें नरकमे देवोंका गमन न होनेसे धर्म-श्रवण तो है नहीं, लेकिन जातिस्मरण है, तथा वेदनाकर दुःखी होके पापसे भयभीत होना—ये दो ही कारण है । इन कारणोंको पाकर किसी जीवके सम्यक्त्व उत्पन्न हो सकता है । इस नयसे कोई भव्यजीव पापके उदयसे खोटी गतिमें गया, और वहाँ जाकर यदि सुलट जावे, तथा सम्यक्त्व पावे, तो वह कुगति भी बहुत श्रेष्ठ है । यही श्रीयोगिन्द्राचार्यने मूलमे कहा है—जो पाप जीवोंको दुःख प्राप्त कराके फिर शीघ्र ही मोक्षमार्गमे बुद्धिको लगावे, तो वे अशुभ भी अच्छे हैं । तथा जो अज्ञानी जीव किसी समय अज्ञान तपसे देव भी हुआ और देवसे मरके एकेंद्री हुआ तो वह देव-पर्याय पाना किस कामका । अज्ञानीके देव-पद पाना भी वृथा है । जो कभी ज्ञानके प्रसादसे उत्कृष्ट देव होके बहुत कालतक सुख भोगके देवसे मनुष्य होकर मुनिव्रत धारण करके मोक्षको पावे, तो उसके समान दूसरा क्या होगा । जो नरकसे भी निकलकर कोई भव्यजीव मनुष्य होके महाव्रत धारण करके मुक्ति पावे, तो वह भी अच्छा है । ज्ञानी पुरुष उन पापियोंको भी श्रेष्ठ कहते हैं, जो पापके प्रभावसे दुःख भोगकर उस दुःखसे डरके दुःखके मूलकारण पापको जानके उस पापसे उदास होवें, वे प्रशंसा करने योग्य हैं, और पापी जीव प्रशंसाके योग्य नहीं हैं, क्योंकि पाप-क्रिया हमेशा निंदनीय है । भेदाभेदरत्नत्रयस्वरूप श्रीवीतरागदेवके धर्मको जो धारण करते हैं वे श्रेष्ठ हैं । यदि सुखी धारण करे तो भी ठीक और दुःखी धारण करे तब भी ठीक । क्योंकि शास्त्रका वचन है, कि कोई महाभाग दुःखी हुए हों धर्ममे लवलीन होते हैं ।।५६।।

आगे निदानबंधसे उपार्जन किये हुए पुण्यकर्म जीवको राज्यादि विभूति देकर नरकादि दुःख

मा पुनः पुण्यानि भद्राणि ज्ञानिनः तानि भणन्ति ।
जीवस्य राज्यानि दत्त्वा लघु दुःखानि यानि जनयन्ति ॥५७॥

मं पुणु इत्यादि । मं पुणु मा पुनः न पुनः पुण्णइं भल्लाइं **पुण्यानि भद्रानि भवन्तीति** णाणिय ताइं भणंति **ज्ञानिनः पुरुषास्तानि पुण्यानि कर्मतापन्नानि भणन्ति । यानि किं कुर्वन्ति ।** जीवहं रज्जइं देवि लहु दुक्खइं जाइं जणंति **यानि पुण्यकर्माणि जीवस्य राज्यानि दत्त्वा लघु शीघ्रं दुःखानि जनयन्ति । तद्यथा । निजशुद्धात्मभावनोत्थवीतरागपरमानन्दैकरूपसुखानुभवविपरीतेन दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबन्धपूर्वकज्ञानतपोदानादिना यान्युपार्जितानि पुण्यकर्माणि तानि हेयानि । कस्मादिति चेत् । निदानबन्धोपार्जितपुण्येन भवान्तरे राज्यादिविभूतौ लब्धायां तु भोगान् त्यक्तुं न शक्नोति तेन पुण्येन नरकादिदुःखं लभते । रावणादिवत् । तेन कारणेन पुण्यानि हेयानीति । ये पुनर्निदानरहितपुण्यसहिताः पुरुषास्ते भवान्तरे राज्यादिभोगे लब्धेऽपि भोगांस्त्यक्त्वा जिनदीक्षां गृहीत्वा चोर्ध्वगतिगामिनो भवन्ति बलदेवादिवदिति भावार्थः । तथा चोक्तम्—'ऊर्ध्वगा बलदेवाः स्युर्निर्निदाना भवान्तरे ।** इत्यादिवचनात् ॥५७॥

अथ निर्मलसम्यक्त्वाभिमुखानां मरणमपि भद्रं, तेन विना पुण्यमपि समीचीनं न भवतीति प्रतिपादयति—

वर णिय-दंसण-अहिमुहउ मरणु वि जीव लहेसि ।
मा णिय-दंसण-विम्मुहउ पुण्णु वि जीव करेसि ॥५८॥

उत्पन्न कराते हैं, इसलिये अच्छे नहीं हैं—[**पुनः**] फिर [**तानि पुण्यानि**] वे पुण्य भी [**मा भद्राणि**] अच्छे नहीं हैं, [**यानि**] जो [**जीवस्य**] जीवको [**राज्यानि दत्त्वा**] राज देकर [**लघु**] शीघ्र ही [**दुःखानि**] नरकादि दुःखोंको [**जनयंति**] उपजाते हैं, [**ज्ञानिनः**] ऐसा ज्ञानीपुरुष [**भणंति**] कहते हैं ॥ **भावार्थ**—निज शुद्धात्माकी भावनासे उत्पन्न जो वीतराग परमानन्द अतीन्द्रियसुखका अनुभव उससे विपरीत जो देखे सुने भोगे इन्द्रियोंके भोग उनकी वाछारूप निदानबंधपूर्वक दान आदिकसे उपार्जन किये जो पुण्यकर्म हैं, वे हेय हैं। क्योंकि वे निदानबन्धसे उपार्जन किये पुण्यकर्म जीवको दूसरे भवमें राजसम्पदा देते हैं । उस राज्यविभूतिको अज्ञानी जीव पाकर विषय भोगोंको छोड़ नहीं सकता, उससे नरकादिकके दुःख पाता है, रावणकी तरह इसलिये अज्ञानियोंके पुण्य-कर्म भी होता है, और जो निदानबन्ध रहित ज्ञानी पुरुष हैं, वे दूसरे भवमें राज्यादि भोगोंको पाते हैं, तो भी भोगोंको छोड़कर जिनराजकी दीक्षा धारण करते हैं। धर्मको सेवनकर ऊर्ध्वगतिगामी बलदेव आदिककी तरह होते हैं। ऐसा दूसरी जगह भी कहा है, कि भवान्तरमें निदानबन्ध नहीं करते हुए जो महामुनि हैं, वे महान् तपकर स्वर्गलोक जाते हैं। वहांसे चयकर बलभद्र होते हैं । वे देवोंसे अधिक सुख भोगकर राज्यका त्याग करके मुनिव्रतको धारणकर या तो केवलज्ञान पाके मोक्षको ही पधारते हैं, या बड़ी ऋद्धिके धारी देव होते हैं, फिर मनुष्य होकर मोक्षको पाते हैं ॥५७॥

वरं निजदर्शनाभिमुखः मरणमपि जीव लभस्व ।
मा निजदर्शनविमुखः पुण्यमपि जीव करिष्यसि ॥५८॥

वर इत्यादि । वर णियदंसणअहिमुहउ **वरं किंतु निजदर्शनाभिमुखः सन्** मरणु वि जीव लहेसि **मरणमपि हे जीव । लभस्व भज ।** मा णियदंसणविम्मुहउ **मा पुनर्निजदर्शनविमुखः सन्** पुण्णु वि जीव करेसि **पुण्यमपि हे जीव करिष्यसि । तथा च स्वकीयनिर्दोषिपरमात्मानभूतिरुचिरूपं त्रिगुप्तिगुप्तलक्षणनिश्चयचारित्राविनाभूतं वीतरागसंज्ञं निश्चयसम्यक्त्वं भण्यते तदभिमुखः सन् हे जीव मरणमपि लभस्व दोषो नास्ति तेन विना पुण्यं मा कार्षीरिति । अत्र सम्यक्त्वरहिता जीवाः पुण्यसहिता अपि पापजीवा भण्यन्ते । सम्यक्त्वसहिताः पुनः पूर्वभवान्तरोपार्जितपापफलं भुञ्जाना अपि पुण्यजीवा भण्यन्ते येन कारणेन, तेन कारणेन सम्यक्त्वसहितानां मरणमपि भद्रम् । सम्यक्त्वरहितानां च पुण्यमपि भद्रं न भवति । कस्मात् । तेन निदानबद्धपुण्येन भवान्तरे भोगान् लब्ध्वा पश्चान्नरकादिकं गच्छन्तीति भावार्थः । तथा चोक्तम्— "वरं नरकवासोऽपि सम्यक्त्वेन हि संयुतः । न तु सम्यक्त्वहीनस्य निवासो दिवि राजते ॥" ॥५८॥**

आगे ऐसा कहते हैं, कि निर्मल सम्यक्त्वधारी जीवोंको मरण भी सुखकारी है, उनका मरना अच्छा है, और सम्यक्त्वके बिना पुण्यका उदय भी अच्छा नहीं है—[**जीव**] हे जीव, [**निजदर्शनाभिमुखः**] जो अपने सम्यग्दर्शनके सन्मुख होकर [**मरणमपि**] मरणको भी [**लभस्व वरं**] पावे, तो अच्छा है, परन्तु [**जीव**] हे जीव, [**निजदर्शनविमुखः**] अपने सम्यग्दर्शनसे विमुख हुआ [**पुण्यमपि**] पुण्य भी [**करिष्यसि**] करे [**मा वरं**] तो अच्छा नहीं ॥ **भावार्थ—** निर्दोष निज परमात्माकी अनुभूतिकी रुचिरूप तीन गुप्तिमयी जो निश्चयचारित्र उससे अविनाभावी (तन्मयी) जो वीतराग निश्चयसम्यक्त्व उसके सन्मुख हुआ हे जीव, तो तू मरण भी पावे, तो, दोष नहीं, और उस सम्यक्त्वके बिना मिथ्यात्व अवस्थामें पुण्य भी करे तो अच्छा नहीं है। जो सम्यक्त्व रहित मिथ्यादृष्टि जीव पुण्य सहित हैं, तो भी पापी ही कहे हैं। तथा जो सम्यक्त्व सहित हैं, वे पहले भवमें उपार्जन किये हुए पापके फलसे दुःख दारिद्र भोगते हैं, तो भी पुण्याधिकारी ही कहे हैं। इसलिये जो सम्यक्त्व सहित हैं, उनका मरना भी अच्छा। मरकर ऊपरको जावेंगे और सम्यक्त्व रहित हैं, उनका पुण्य-कर्म भी प्रशंसा योग्य नहीं है। वे पुण्यके उदयसे क्षुद्र (नीच) देव तथा क्षुद्रमनुष्य होके संसार-वनमें भटकेंगे। यदि पूर्वके पुण्यको यहाँ भोगते हैं, तो तुच्छ फल भोगके नरक-निगोदमें पड़ेंगे। इसलिए मिथ्यादृष्टियोंका पुण्य भी भला नहीं है। निदानबंध पुण्यसे भवान्तरमें भोगोंको पाकर पीछे नरकमें जावेंगे। सम्यग्दृष्टी प्रथम मिथ्यात्व अवस्थामें किये हुए पापोंके फलसे दुःख भोगते हैं, लेकिन अब सम्यक्त्व मिला है, इसलिये सदा सुखी ही होवेंगे। आयुके अंतमें नरकसे निकलके मनुष्य होकर ऊर्ध्वगति ही पावेंगे, और मिथ्यादृष्टी जो पुण्यके उदयसे देव भी हुए हैं, तो भी देवलोकसे आकर एकेंद्री होवेंगे। ऐसा दूसरी जगह भी "वरं" इत्यादि श्लोकसे कहा है, कि सम्यक्त्व सहित नरकमें रहना भी अच्छा, और सम्यक्त्व रहितका स्वर्गमें निवास भी नहीं शोभा देता ॥५८॥

अथ तमेवार्थं पुनरपि द्रढयति—

जे णिय-दंसण-अहिमुहा सोक्खु अणंतु लहंति ।
तिं विणु पुण्णु करंता वि दुक्खु अणंतु सहंति ॥५९॥

ये निजदर्शनाभिमुखाः सौख्यमनन्तं लभन्ते ।
तेन विना पुण्यं कुर्वाणा अपि दुःखमनन्तं सहन्ते ॥५९॥

जे णिय इत्यादि । जे ये केचन णियदंसणअहिमुहा **निजदर्शनाभिमुखास्ते पुरुषाः** सोक्खु अणंतु लहंति **सौख्यमनन्तं लभन्ते । अपरे केचन** तिं विणु पुण्णु करंता वि **तेन सम्यक्त्वेन विना पुण्यं कुर्वाणा अपि ।** दुक्खु अणंतु सहंति **दुःखमनन्तं सहन्त इति । तथाहि निजशुद्धात्मतत्त्वोपलब्धिरुचिरूपनिश्चयसम्यक्त्वाभिमुखा ये ते केचनास्मिन्नेव भवे** धर्मपुत्रभीमार्जुनादिवद**क्षयसुखं लभन्ते, ये केचन** पुनर्नकुलसहदेवादिवत् **स्वर्गसुखं लभन्ते । ये तु सम्यक्त्वरहितास्ते पुण्यं कुर्वाणा अपि दुःखमनन्तमनुभवन्तीति तात्पर्यम् ॥५६॥**

अथ निश्चयेन पुण्यं निराकरोति—

पुण्णेण होइ विहवो विहवेण मओ मएण मइ-मोहो ।
मइ-मोहेण य पावं ता पुण्णं अम्ह मा होउ ॥६०॥

पुण्येन भवति विभवो विभवेन मदो मदेन मतिमोहः ।
मतिमोहेन च पापं तस्मात् पुण्यं अस्माकं मा भवतु ॥६०॥

पुण्णेण इत्यादि । पुण्णेण होइ विहवो **पुण्येन विभवो विभूतिर्भवति,** विहवेण मओ **विभवेन मदोऽहंकारो गर्वो भवति,** मएण मइमोहो **विज्ञानाद्यष्टविधमदेन मतिमोहो मतिभ्रंशो विवेकमूढत्वं भवति ।** मइमोहेण य पावं **मतिमूढत्वेन पापं**

अब इसी बातको फिर भी दृढ़ करते हैं—[**ये**] जो [**निजदर्शनाभिमुखा**] सम्यग्दर्शनके सन्मुख हैं, वे [**अनन्तं सुखं**] अनन्त सुखको [**लभन्ते**] पाते हे, [**तेन विना**] और जो जोव सम्यक्त्व रहित हैं, वे [**पुण्यं कुर्वाणा अपि**] पुण्य भी करते हैं, तो भी पुण्यके फलसे अल्प सुख पाके संसारमें [**अनंतं दुःखं**] अनन्त दुःख [**सहंते**] भोगते हैं ॥ **भावार्थ**—निज शुद्धात्माकी प्राप्तिरूप निश्चयसम्यक्त्वके सन्मुख हुए जो सत्पुरुष हैं, वे इसी भवमें युधिष्ठिर, भीम, अर्जुनकी तरह अविनाशी सुखको पाते हैं, और कितने ही नकुल सहदेवको तरह अहमिंद्र-पदके सुख पाते हैं। तथा जो सम्यक्त्वसे रहित मिथ्यादृष्टीजीव पुण्य भी करते हैं, तो भी मोक्षके अधिकारी नहीं हैं, संसारीजीव ही हैं, यह तात्पर्य जानना ॥५९॥

आगे निश्चयसे मिथ्यादृष्टियोंके पुण्यका निषेध करते है—[**पुण्येन**] पुण्यसे घरमे [**विभवः**] धन [**भवति**] होता है, और [**विभवेन**] धनसे [**मदः**] अभिमान [**मदेन**] मानसे [**मतिमोहः**] बुद्धिभ्रम होता है, [**मतिमोहेन**] बुद्धिके भ्रम होनेसे (अविवेकसे) [**पापं**] पाप होता है, [**तस्मात्**] इसलिये [**पुण्यं**] ऐसा पुण्य [**अस्माकं**] हमारे [**मा भवतु**] न होवे ॥ **भावार्थ**—

भवति, ता पुण्णं अम्ह मा **होउ तस्मादित्थंभूतं पुण्यं अस्माकं मा भूदिति । तथा च । इदं पूर्वोक्तं पुण्यं भेदाभेदरत्नत्रयाराधनारहितेन दृष्टश्रु तानुभूतभोगाकांक्षा-रूपनिदानबन्धपरिणामसहितेन जीवेन यदुपार्जितं पूर्वभवे तदेव मदमहंकारं जनयति बुद्धिविनाशं च करोति । न च पुनः सम्यक्त्वादिगुणसहितं** भरतसगररामपाण्डवा-**दिपुण्यबन्धवत् । यदि पुनः सर्वेषां मदं जनयति तर्हि ते कथं पुण्यभाजनाः सन्तो मदाहंकारादिविकल्पं त्यक्त्वा मोक्षं गताः इति भावार्थः ।। तथा चोक्तं चिरन्तनानां निरहंकारत्वम्—**"सत्यं वाचि मतौ श्रुतं हृदि दया शौर्यं भुजे विक्रमे लक्ष्मीर्दानम-नूनमर्थिनिचये मार्गे गतिर्निर्वृतेः । येषां प्रागजनीह तेऽपि निरहंकाराः श्रुतेर्गोचराश्-चित्रं संप्रति लेशतोऽपि न गुणास्तेषां तथाप्युद्धताः ।।" ।।६०।।

अथ देवशास्त्रगुरुभक्त्या मुख्यवृत्त्या पुण्यं भवति न च मोक्ष इति प्रतिपादयति—

देवहं सत्थहं मुणिवरहँ भत्तिए पुण्णु हवेइ ।
कम्म-क्खउ पुणु होइ णवि अज्जउ संति भणेइ ।।६१।।

देवानां शास्त्राणां मुनिवराणां भक्त्या पुण्यं भवति ।
कर्मक्षयः पुनः भवति नैव आर्यः शान्तिः भणति ।।६१।।

देवहं इत्यादि । देवहं सत्थहं मुणिवरहं भत्तिए पुण्णु हवेइ **देवशास्त्रमुनीनां भक्त्या पुण्यं भवति** कम्मक्खउ पुणु होइ णवि**कर्म क्षयः पुनर्मुख्यवृत्त्या नैव**

भेदाभेदरत्नत्रयकी आराधनासे रहित, देखे सुने अनुभव किये भोगोंकी वांछारूप निदानबंधके परिणामों सहित जो मिथ्यादृष्टी संसारी अज्ञानी जीव है, उसने पहले उपार्जन किये भोगोंकी वांछा-रूप पुण्य उसके फलसे प्राप्त हुई घरमे सम्पदा होनेसे अभिमान (घमड) होता है, अभिमानने बुद्धि भ्रष्ट होती है, बुद्धि भ्रष्टकर पाप कमाता है, और पापसे भव भवमें अनंत दुःख पाता है । इसलिये *मिथ्यादृष्टियोंका पुण्य पापका ही कारण है । जो सम्यक्त्वादि गुण सहित भरत, सगर, राम पांडवा-*दिक विवेकी जीव हैं, उनको पुण्यबंध अभिमान नही उत्पन्न करता, परम्पराय मोक्षका कारण है । जैसे अज्ञानियोके पुण्यका फल विभूति गर्वका कारण है, वैसे सम्यग्दृष्टियोंके नहीं है । वे सम्यग्दृष्टि पुण्यके पात्र हुए चक्रवर्ती आदिकी विभूति पाकर मद अहंकारादि विकल्पोंका छोडकर मोक्षको गये *अर्थात् सम्यग्दृष्टिजीव* चक्रवर्ती बलभद्र-पदमें भी निरहंकार रहे । ऐसा ही कथन आत्मानुशासन ग्रन्थमे श्रीगुणभद्राचार्यने किया है, कि पहले समयमें ऐसे सत्पुरुष हो गये हैं, कि जिनके वचनमें सत्य, बुद्धिमें शास्त्र, मनमे दया, पराक्रमरूप भुजाओंमे शूरवीरता, याचकोंमें पूर्ण लक्ष्मीका दान, और मोक्षमार्गमें गमन है, वे निरभिमानी हुए, जिनके किसी गुणका अहंकार नहीं हुआ । उनके नाम शास्त्रोंमें प्रसिद्ध हैं, परंतु अब बड़ा अचंभा है, कि इस पंचमकालमें लेशमात्र भी गुण नहीं हैं, तो भी उनके उद्धतपना है, यानी गुण तो रंचमात्र भी नही, और अभिमानमे बुद्धि रहती है ।।६०।।

आगे देव गुरु शास्त्रकी भक्तिसे मुख्यतासे तो पुण्यबंध होता है, उससे परम्पराय मोक्ष होता है, साक्षात् मोक्ष नही, ऐसा कहते है—**[देवानां शास्त्राणां मुनिवराणां]** श्रीवीतरागदेव, द्वादशांग शास्त्र

भवति । एवं कोऽसौ भणति । अज्जउ आर्यः । किं नामा । सन्ति शान्ति. भणेइ भणति कथयति इति । तथाहि । सम्यक्त्वपूर्वकदेवशास्त्रगुरुभक्तया मुख्यवृत्त्या पुण्यमेव भवति न च मोक्षः । अत्राह प्रभाकरभट्टः । यदि पुण्यं मुख्यवृत्त्या मोक्षकारणं न भवत्युपादेयं च न भवति तर्हि भरतसगररामपाण्डवादयोऽपि निरन्तरं पञ्चपरमेष्ठिगुणस्मरणदानपूजादिना निर्भरभक्ताः सन्त. किमर्थं पुण्योपार्जनं कुर्युरिति । भगवानाह । यथा कोऽपि रामदेवादिपुरुषविशेषो देशान्तरस्थितसीतादिस्त्रीसमीपागतानां पुरुषाणां तदर्थं संभाषणदानसन्मानादिकं करोति तथा तेऽपि महापुरुषाः वीतरागपरमानन्दैकरूपमोक्षलक्ष्मीसुखसुधारसपिपासिताः सन्तः संसारस्थितिविच्छेदकारणं विषयकषायोत्पन्नदुर्ध्यानविनाशहेतुभूतं च परमेष्ठिसंबन्धिगुणस्मरणदानपूजादिकं कुर्युरिति । अयमत्र भावार्थः । तेषां पञ्चपरमेष्ठिभक्त्यादिपरिणतानां कुटुम्बिनां पलालवदनीहितं पुण्यमास्रवतीति ।। ६१।।

अथ देवशास्त्रमुनीनां योऽसौ निन्दां करोति तस्य पापबन्धो भवतीति कथयति–

देवहँ सुत्थहँ मुणिवरहँ जो विद्देसु करेइ ।
णियमेँ पाउ हवेइ तसु जेँ संसारु भमेइ ।।६२।।

और दिगम्बर साधुओंको [भक्त्या] भक्ति करनेसे [पुण्यं भवति] मुख्यतासे पुण्य होता है, [पुनः] लेकिन [कर्मक्षयः] तत्काल कर्मोंका क्षय [नैव भवति] नहीं होता, ऐसा [आर्यः शांतिः] शांति नाम आर्य अथवा कपट रहित संत पुरुष [भणति] कहते हैं ।। भावार्थ—सम्यक्त्वपूर्वक जो देव गुरु शास्त्रकी भक्ति करता है, उसके मुख्य तो पुण्य ही होता है, और परम्पराय मोक्ष होता है। जो सम्यक्त्व रहित मिथ्यादृष्टी है, उनके भाव-भक्ति तो नहीं है, लौकिक बाहिरी भक्ति होती है, उससे पुण्यका ही बंध है, कर्मका क्षय नहीं है। ऐसा कथन सुनकर श्रीयोगीन्द्रदेवसे प्रभाकरभट्टने प्रश्न किया। हे प्रभो, जो पुण्य मुख्यतासे मोक्षका कारण नहीं है, तो त्यागने योग्य ही है, ग्रहण योग्य नहीं है। जो ग्रहण योग्य नही है, तो भरत, सगर, राम पांडवादिक महान् पुरुषोंने निरंतर पंचपरमेष्ठीके गुणस्मरण क्यों किये ? और दान पूजादि शुभ क्रियाओंसे पूर्ण होकर क्यो पुण्यका उपार्जन किया ? तब श्रीगुरुने उत्तर दिया—कि जैसे परदेशमे स्थित कोई रामादिक पुरुष अपनी प्यारी सीता आदि स्त्रीके पाससे आये हुए किसी मनुष्यसे बातें करता है—उसका सम्मान करता है, और दान करता है, ये सब कारण अपनी प्रियाके हैं, कुछ उसके प्रसादके कारण नही है। उसी तरह वे भरत, सगर, राम, पांडवादि महान् पुरुष वीतराग परमानंदरूप मोक्षसे लक्ष्मीके सुख अमृत-रसके प्यासे हुए संसारकी स्थितिके छेदनेके लिये विषय कषायकर उत्पन्न हुए आर्त रौद्र खोटे ध्यानोंके नाशका कारण श्रीपंचपरमेष्ठीके गुणोंका स्मरण करते हैं, और दान पूजादिक करते हैं, परंतु उनकी दृष्टि केवल निज परिणतिपर है, परवस्तुपर नहीं है। पंचपरमेष्ठीकी भक्ति आदि शुभ क्रियाको परिणत हुए जो भरत आदिक हैं, उनके बिना चाहे पुण्यप्रकृतिका आस्रव होता है। जैसे किसानकी दृष्टि अन्नपर है, तृण भूसादिपर नही है। बिना चाहा पुण्यका बंध सहजमें ही हो जाता है। वह उनको संसारमें नहीं भटका सकता है। वे तो शिवपुरीके ही पात्र हैं ।।६१।।

देवानां शास्त्राणां मुनिवराणां यो विद्वेषं करोति ।
नियमेन पापं भवति तस्य येन संसारं भ्रमति ॥६२॥

देवहं इत्यादि । देवहं सत्थहं मुणिवरहं जो विद्देसु **करेइ देवशास्त्रमुनीनां साक्षात्पुण्यबन्धहेतुभूतानां परंपरया मुक्तिकारणभूतानां च योऽसौ विद्वेषं करोति । तस्य किं भवति ।** णियमे पाउ हवेइ तसु **नियमेन पापं भवति तस्य । येन पापबन्धेन किं भवति ।** जें संसारु भमेइ **येन पापेन संसारं भ्रमतीति । तद्यथा । निजपरमात्मपदार्थोपलम्भरुचिरूपं निश्चयसम्यक्त्वकारणस्य तत्त्वार्थश्रद्धानरूपव्यवहारसम्यक्त्वस्य विषयभूतानां देवशास्त्रयतीनां योऽसौ निन्दां करोति स मिथ्यादृष्टि र्भवति । मिथ्यात्वेन पापं बध्नाति, पापेन चतुर्गतिसंसारं भ्रमतीति भावार्थः ॥६२॥**

अथ पूर्वसूत्र द्वयोक्तं पुण्यपापफलं दर्शयति—

पावें णारउ तिरिउ जिउ पुण्णें अमरु वियाणु ।
मिस्सें माणुस-गइ लहइ दोहि वि खइ णिव्वाणु ॥६३॥

पापेन नारकः तिर्यग् जीव पुण्येनामरो विजानीहि ।
मिश्रेण मनुष्यगतिं लभते द्वयोरपि क्षये निर्वाणम् ॥६३॥

पावें इत्यादि । पावें **पापेन** णारउ तिरिउ **नारको भवति तिर्यग्भवति । कोऽसौ ।** जिउ **जीवः** पुण्णें अमरु वियाणु **पुण्येनामरो देवो भवतीति जानीहि ।** मिस्सें माणुसगइ लहइ **मिश्रेण पुण्यपापद्वयेन** मनुष्य**गतिं लभते ।** दोहि वि **खइ** णिव्वाणु

आगे देव शास्त्र गुरुकी जो निंदा करता है, उसके महान् पापका बंध होता है, वह पापी पापके प्रभावसे नरक निगोदादि खोटी गतिमें अनंतकाल तक भटकता है—[**देवानां शास्त्राणां मुनिवराणां**] वीतरागदेव, जिनसूत्र, और निर्ग्रंथमुनियोंसे [**य**] जो जीव [**विद्वेषं**] द्वेष [**करोति**] करता है, [**तस्य**] उसके [**नियमेन**] निश्चयसे [**पापं**] पाप [**भवति**] होता है, [**येन**] जिस पापके कारणसे वह जीव [**संसारं**] संसारमें [**भ्रमति**] भ्रमण करता है। अर्थात् परम्पराय मोक्षके कारण और साक्षात् पुण्यबंधके कारण जो देव शास्त्र गुरु हैं, इनकी जो निंदा करता है, उसके नियमसे पाप होता है, पापसे दुर्गतिमें भटकता है ॥ **भावार्थ**—निज परमात्मद्रव्यकी प्राप्तिकी रुचि वही निश्चयसम्यक्त्व, उसका कारण तत्त्वार्थश्रद्धानरूप व्यवहारसम्यक्त्व, उसके मूल अरहंत देव, निर्ग्रन्थ गुरु, और दयामयी धर्म, इन तीनोंकी जो निंदा करता है, वह मिथ्यादृष्टी होता है। वह मिथ्यात्वका महान् पाप बाँधता है। उस पापसे चतुर्गति संसारमें भ्रमता है ॥६२॥

आगे पहले दो सूत्रोंमें कहे गये पुण्य और पाप फल हैं, उनको दिखाते हैं—[**जीवः**] यह जीव [**पापेन**] पापके उदयसे [**नारकः तिर्यग्**] नरकगति और तिर्यंचगति पाता है, [**पुण्येन**] पुण्यसे [**अमरः**] देव होता है, [**मिश्रेण**] पुण्य और पाप दोनोंके मेलसे [**मनुष्यगतिं**] मनुष्यगतिको [**लभते**] पाता है, और [**द्वयोरपि क्षये**] पुण्य पाप दोनोंके ही नाश होनेसे [**निर्वाणं**]

द्वयोरपि कर्मक्षयेऽपि निर्वाणमिति । तद्यथा । सहजशुद्धज्ञानानन्दैकस्वभावात्परमात्मनः सकाशाद्विपरीतेन छेदनादिनारकतिर्यग्गतिदुःखदानसमर्थेन पापकर्मोदयेन नारकतिर्यग्गतिभाजनो भवति जीवः । तस्मादेव शुद्धात्मनो विलक्षणेन पुण्योदयेन देवो भवति । तस्मादेव शुद्धात्मनो विपरीतेन पुण्यपापद्वयेन मनुष्यो भवति । तस्यैव विशुद्धज्ञानदर्शनस्वभावस्य निजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण शुद्धोपयोगेन मुक्तो भवतीति तात्पर्यार्थः । तथा चोक्तम्–"पावेण णरयतिरियं गम्मइ धम्मेण देवलोयम्मि । मिस्सेण माणुसत्तं दोण्हं पि खएण णिव्वाणं ।।" ।।६३।।

अथ निश्चयप्रतिक्रमणप्रत्याख्यानालोचनस्वरूपे स्थित्वा व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनां त्यजन्तीति त्रिकलेन कथयति—

वंदणु णिंदणु पडिकमणु पुण्णहँ कारणु जेण ।
करइ करावइ अणुमणइ एक्कु वि णाणि ण तेण ।।६४।।

वन्दनं निन्दनं प्रतिक्रमणं पुण्यस्य कारणं येन ।
करोति कारयति अनुमन्यते एकमपि ज्ञानी न तेन ।।६४।।

वंदणु इत्यादि । वंदणु णिंदणु पडिकमणु **वन्दननिन्दनप्रतिक्रमणत्रयम् । किंविशिष्टम् ।** पुण्णहं कारणु **पुण्यस्य कारणं** जेण **येन कारणेन** करइ करावइ अणुमणइ **करोति कारयति अनुमोदयति,** एक्कु वि **एकमपि,** णाणि ण तेण **ज्ञानी पुरुषो**

मोक्षको पाता है, ऐसा [**विजानीहि**] जानो ।। **भावार्थ**—सहज शुद्ध ज्ञानानंद स्वभाव जो परमात्मा है, उससे विपरीत जो पापकर्म उसके उदयसे नरक तिर्यंचगतिका पात्र होता है, आत्मस्वरूपसे विपरीत शुभ कर्मोंके उदयसे देव होता है, दोनोंके मेलसे मनुष्य होता है, और शुद्धात्मस्वरूपसे विपरीत इन दोनों पुण्य पापोंके क्षयसे निर्वाण (मोक्ष) मिलता है । मोक्षका कारण एक शुद्धोपयोग है, वह शुद्धोपयोग निज शुद्धात्मतत्त्वके सम्यक् श्रद्धान ज्ञान आचरणरूप है । इसलिये इस शुद्धोपयोगके बिना किसी तरह भी मुक्ति नहीं सकती, यह सारांश जानो । ऐसा ही सिद्धान्त-ग्रन्थोंमें भी हरएक जगह कहा गया है । जैसे—यह जीव पापसे नरक तिर्यंचगतिको जाता है, और धर्म (पुण्य) से देवलोकमें जाता है, पुण्य पाप दोनोंके मेलसे मनुष्यदेहको पाता है, और दोनोंके क्षयसे मोक्ष पाता है ।।६३।।

आगे निश्चयप्रतिक्रमण, निश्चयप्रत्याख्यान, और निश्चयआलोचनारूप जो शुद्धोपयोग उसमें ठहरकर व्यवहारप्रतिक्रमण, व्यवहारप्रत्याख्यान, और व्यवहार आलोचनारूप शुभोपयोगको छोड़े, ऐसा कहते हैं—[**वंदनं**] पंचपरमेष्ठीकी वंदना, [**निंदनं**] अपने अशुभ कर्मकी निंदा, और [**प्रतिक्रमणं**] अपराधोंकी प्रायश्चित्तादि विधिसे निवृत्ति, ये सब [**येन पुण्यस्य कारणं**] जो पुण्यके कारण हैं, मोक्षके कारण नहीं हैं, [**तेन**] इसीलिये पहली अवस्थामें पापके दूर करनेके लिये ज्ञानी पुरुष इनको करता है, कराता है, और करते हुएको भला जानता है तो भी निर्विकल्प शुद्धोपयोग अवस्थामें [**ज्ञानी**] ज्ञानी जीव [**एकमपि**] इन तीनोंमेंसे एक भी [**न करोति**]

न तेन कारणेनेति । तथाहि । शुद्धनिर्विकल्पपरमात्मतत्त्वभावनाबलेन दृष्टश्रुतानुभूतभोगाकांक्षास्मरणरूपाणामतीतरागादिदोषाणां निराकरणं निश्चयप्रतिक्रमणं भवति, वीतरागचिदानन्दैकानुभूतिभावनाबलेन भाविभोगाकांक्षारूपाणां रागादीनां त्यजनं निश्चयप्रत्याख्यानं भण्यते, निजशुद्धात्मोपलम्भबलेन वर्तमानोदयागतशुभाशुभनिमित्तानां हर्षविषादादिपरिणामानां निजशुद्धात्मद्रव्यात् पृथक्करणं निश्चयालोचनमिति । इत्थंभूते निश्चयप्रतिक्रमणप्रत्याख्यानालोचनत्रये स्थित्वा योऽसौ व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनत्रयं तन्त्रयानुकूलं वन्दननिन्दनादिशुभोपयोगं च त्यजन् स ज्ञानी भण्यते न चान्य इति भावार्थः ।।६४।।

अथ—

वंदणु णिंदणु पडिकमणु णाणिहिँ एहु ण जुत्तु ।
एक्कु जि मेल्लिवि णाणमउ सुद्धउ भाउ पवित्तु ।।६५।।

वन्दनं निन्दनं प्रतिक्रमणं ज्ञानिनां इदं न युक्तम् ।
एकमेव मुक्त्वा ज्ञानमयं शुद्धं भाव पवित्रम् ।।६५।।

वंदणु णिंदणु पडिकमणु **वन्दननिन्दनप्रतिक्रमणत्रयम्** । णाणिहु एहु ण जुत्तु **ज्ञानिनामिदं न युक्तम्** । **किं कृत्वा** । एक्कुजि मेल्लिवि **एकमेव मुक्त्वा** । **एकम्** । णाणमउ सुद्धउ भाउ पवित्तु **ज्ञानमय शुद्धभाव पवित्रमिति । तथाहि ।**

न तो करता, [**कारयति**] न कराता है, और न [**अनुमन्यते**] करते हुएको भला जानता है ।। **भावार्थ—**केवल शुद्ध स्वरूपमें जिसका चित्त लगा हुआ है, ऐसा निर्विकल्प परमात्मतत्त्वकी भावनाके बलसे देखे सुने और अनुभव किये भोगोंकी वांछारूप जो भूतकालके रागादि दोष उनका दूर करना वह **निश्चयप्रतिक्रमण,** वीतराग चिदानन्द शुद्धात्माकी अनुभूतिको भावनाके बलसे होनेवाले भोगोंकी वांछारूप रागादिकका त्याग वह **निश्चयप्रत्याख्यान;** और निज शुद्धात्माको प्राप्तिके बलसे वर्तमान उदयमे आये जो शुभ अशुभके कारण हर्ष विषादादि अशुद्ध परिणाम उनको निज शुद्धात्मद्रव्यसे जुदा करना वह **निश्चयआलोचन;** इस तरह निश्चयप्रतिक्रमण प्रत्याख्यान और आलोचनामें ठहरकर जो कोई व्यवहारप्रतिक्रमण, व्यवहारप्रत्याख्यान, व्यवहारआलोचना, इन तोनोंके अनुकूल वन्दना निंदा आदि शुभोपयोग है, उनको छोड़ना है वही ज्ञानी कहा जाता है, अन्य नहीं । सारांश यह है कि ज्ञानी जीव तो पहले तो अशुभको त्यागकर शुभमे प्रवृत्त होता है, बाद शुभको भी छोड़के शुद्धमें लग जाता है। पहले किये हुए अशुभ कर्मोंकी निवृत्ति वह **व्यवहारप्रतिक्रमण,** अशुभपरिणाम होनेवाले हैं, उनका रोकना वह **व्यवहारप्रत्याख्यान,** और वर्तमानकालमें शुभकी प्रवृत्ति अशुभको निवृत्ति वह **व्यवहारआलोचन** है । व्यवहारमे तो अशुभका त्याग शुभका अंगोकार होता है, और निश्चयमे शुभ अशुभ दोनोंका हो त्याग होता है ।।६४।।

आगे इसी कथनको दृढ़ करते हैं—[**वंदन निंदनं प्रतिक्रमणं**] वंदना, निंदा, और प्रतिक्रमण [**इदं**] ये तीनों [**ज्ञानीनां**] पूर्ण ज्ञानियोका [**युक्तं न**] ठीक नहीं हैं, [**एकमेव**] एक [**ज्ञानमयं**] ज्ञानमय [**शुद्धं पवित्रं भावं**] पवित्र शुद्ध भावको [**मुक्त्वा**] छोड़कर अर्थात् इसके

पञ्चेन्द्रियभोगाकांक्षाप्रभृतिसमस्तविभावरहितः शून्यः केवलज्ञानाद्यनन्तगुणपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिर्विकल्पसमाधिसमुत्पन्नसहजानन्दपरमसमरसीभावलक्षणसुखामृतरसास्वादेन भरितावस्थो योऽसौ ज्ञानमयो भावः तं भावं मुक्त्वाऽन्यद्व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनत्रयं तदनुकूलं वन्दननिन्दनादिशुभोपयोगविकल्पजालं च ज्ञानिनां युक्तं न भवतीति तात्पर्यम् ॥६५॥

अथ—

> **वंदउ णिंदउ पडिकमउ भाउ असुद्धउ जासु ।**
> **पर तसु संजमु अत्थि णवि जं मण-सुद्धि ण तासु ॥६६॥**
> वन्दतां निन्दतु प्रतिक्रामतु भावः अशुद्धो यस्य ।
> परं तस्य संयमोऽस्ति नैव यस्मात् मनः शुद्धिर्न तस्य ॥६६॥

वंदउ इत्यादि । वंदउ णिंदउ पडिकमउ **वन्दननिन्दनप्रतिक्रमणं करोतु** । भाउ असुद्धउ जासु **भावः परिणामः न शुद्धो यस्य,** पर **परं नियमेन** तसु **तस्य पुरुषस्य** संजमु अत्थि णवि **संयमोऽस्ति नैव । कस्मान्नास्ति ।** जं **यस्मात् कारणात्** मणसुद्धि ण तासु **मनःशुद्धिर्न तस्येति । तद्यथा । नित्यानन्दैकरूपस्वशुद्धात्मानुभूतिप्रतिपक्षैर्विषयकषायाधीनैः ख्यातिपूजालाभविमनोरथशतसहस्रविकल्पजालमालाप्रपञ्चोत्पन्नैरपध्यानैर्यस्य चित्तं रञ्जितं वासितं तिष्ठति तस्य द्रव्यरूपं वन्दननिन्दनप्रतिक्रमणादिकं कुर्वाणस्यापि भावसंयमो नास्ति इत्यभिप्रायः ॥६६॥ एवं मोक्षमोक्षफलमोक्षमार्गा-**

सिवाय ज्ञानीको कोई कार्य करना योग्य नहीं है ॥ **भावार्थ**—पाँच इन्द्रियोंके भोगोंकी वांछाको आदि लेकर सम्पूर्ण विभावोंसे रहित जो केवलज्ञानादि अनंतगुणरूप परमात्मतत्त्व उसके सम्यक् श्रद्धान ज्ञान आचरणरूप निर्विकल्प समाधिसे उत्पन्न जो परमानन्द परमसमरसीभाव वही हुआ अमृत-रस उसके आस्वादसे पूर्ण जो ज्ञानमयीभाव उसे छोडकर अन्य व्यवहारप्रतिक्रमण प्रत्याख्यान आलोचनाके अनुकूल वंदन निंदनादि शुभोपयोग विकल्प-जाल हैं, वे पूर्ण ज्ञानीको करने योग्य नहीं है। प्रथम अवस्थामें ही हैं, आगे नहीं है ॥६५॥

आगे इसी बातको दृढ़ करते हैं—[**वंदतु निंदतु प्रतिक्रामतु**] निःशंक वंदना करो, निंदा करो, प्रतिक्रमणादि करो लेकिन [**यस्य**] जिसके [**अशुद्धो भावः**] जबतक अशुद्ध परिणाम हैं, [**तस्य**] उसके [**परं**] नियमसे [**संयमः**] संयम [**नैव अस्ति**] नहीं हो सकता, [**यस्मात्**] क्योंकि [**तस्य**] उसके [**मनःशुद्धिः न**] मनकी शुद्धता नहीं है। जिसका मन शुद्ध नहीं, उसके संयम कहाँसे हो सकता है ? ॥ **भावार्थ**—नित्यानन्द एकरूप निज शुद्धात्माकी अनुभूतिके प्रतिपक्षी (उलटे) जो विषय कषाय उनके आधीन आर्त रौद्र खोटे ध्यानोंकर जिसका चित्त रँगा हुआ है, उसके द्रव्यरूप व्यवहार-वंदना निदान प्रतिक्रमणादि क्या कर सकते हैं ? जो वह बाह्य-क्रिया करता है, तो भी उसके भावसंयम नहीं है। सिद्धान्तमें उसे असंयमी कहते हैं। कैसे हैं, वो आर्त रौद्र स्वरूप खोटे ध्यान अपनी बड़ाई प्रतिष्ठा और लाभादि सैकड़ों मनोरथोंके विकल्पोंकी मालाके

विप्रतिपादकद्वितीयमहाधिकारमध्ये निश्चयनयेन पुण्यपापद्वयं समानमित्यादिव्याख्यानमुख्यत्वेन चतुर्दशसूत्रस्थलं समाप्तम्। अथानन्तरं शुद्धोपयोगादिप्रतिपादनमुख्यत्वेनैकाधिकचत्वारिंशत्सूत्रपर्यंतं व्याख्यानं करोति। तत्रान्तरस्थलचतुष्टयं भवति। तद्यथा। प्रथमसूत्रपञ्चकेन शुद्धोपयोगव्याख्यानं करोति, तदनन्तरं पञ्चदशसूत्रपर्यन्तं वीतरागस्वसंवेदनज्ञानमुख्यत्वेन व्याख्यानम्, अत ऊर्ध्वं सूत्राष्टकपर्यन्तं परिग्रहत्यागमुख्यत्वेन व्याख्यानं, तदनन्तरं त्रयोदशसूत्रपर्यन्तं केवलज्ञानादिगुणस्वरूपेण सर्वे जीवाः समाना इति मुख्यत्वेन व्याख्यानं करोति। तद्यथा।

रागादिविकल्पनिवृत्तिस्वरूपशुद्धोपयोगे संयमादयः सर्वे गुणास्तिष्ठन्तीति प्रतिपादयति—

सुद्धहँ संजमु सीलु तउ सुद्धहँ दंसणु णाणु।
सुद्धहँ कम्मक्खउ हवइ सुद्धउ तेण पहाणु ॥६७॥

शुद्धानां संयमः शीलं तपः शुद्धानां दर्शनं ज्ञानम्।
शुद्धानां कर्मक्षयो भवति शुद्धो तेन प्रधानः ॥६७॥

सुद्धहं इत्यादि। सुद्धहं शुद्धोपयोगिनां संजमु इन्द्रियसुखाभिलाषनिवृत्तिबलेन षड्जीवनिकायहिंसानिवृत्तिबलेनात्मना आत्मनि संयमनं नियमनं संयमः स पूर्वोक्तः शुद्धोपयोगिनामेव। अथवोपेक्षासंयमापहृतसंयमौ वीतरागसरागापरनामानौ तावपि

(पंक्तिके) प्रपंच कर उत्पन्न हुए है। जबतक ये चित्रमे है, तबतक बाह्य-क्रिया क्या कर सकती है? कुछ नहीं कर सकती ॥६६॥

इस तरह मोक्ष मोक्ष-फल मोक्षमार्गादिका कथन करनेवाले दूसरे महा अधिकारमें निश्चयनयसे पुण्य पाप दोनों समान हैं, इस व्याख्यानकी मुख्यतासे चौदह दोहे कहे। आगे शुद्धोपयोगके कथनकी मुख्यतासे इकतालीस दोहोंमें व्याख्यान करते है, और आठ दोहोमे परिग्रहत्यागके व्याख्यानकी मुख्यतासे कहते हैं, तथा तेरह दोहोंमे केवलज्ञानादि गुणस्वरूपकर सब जीव समान हैं, ऐसा व्याख्यान है।

अब प्रथम ही रागादि विकल्पकी निवृत्तिरूप शुद्धोपयोगमें संयमादि सब गुण रहते हैं, ऐसा वर्णन करते है—[**शुद्धानां**] शुद्धोपयोगियोके ही [**संयमः शील तप.**] पाँच इन्द्री छट्टे मनको रोकनेरूप संयम शील और तप [**भवति**] होते है, [**शुद्धानां**] शुद्धोंके ही [**दर्शनं ज्ञानं**] सम्यग्दर्शन और वीतरागस्वसंवेदनज्ञान और [**शुद्धानां**] शुद्धोपयोगियोके ही [**कर्मक्षयः**] कर्मोंका नाश होता है, [**तेन**] इसलिये [**शुद्धः**] शुद्धोपयोग ही [**प्रधानः**] जगतमे मुख्य है ॥ **भावार्थ**—शुद्धोपयोगियोंके पांच इंद्री छट्ठे मनका रोकना, विषयाभिलाषकी निवृत्ति, और छह कायके जीवोंकी हिंसासे निवृत्ति, उसके बलसे आत्मामे निश्चल रहना, उसका नाम **संयम है**, वह होता है, अथवा उपेक्षासंयम अर्थात् तीन गुप्तिमें आरूढ़ और उपहृतसंयम अर्थात् पाँच समितिका पालना, अथवा सरागसंयम अर्थात् शुभोपयोगरूप संयम और वीतरागसंयम अर्थात् शुद्धोपयोगरूप परमसंयम वह र शुद्ध चेतनोपयोगियोंके ही होता है। **शील** अर्थात् अपनेसे अपने आत्मामें प्रवृत्ति करना यह

तेषामेव संभवतः। अथवा सामायिकच्छेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसंपराययथाख्यातभेदेन पञ्चधा संयमः सोऽपि लभ्यते तेषामेव। सीलु स्वात्मना कृत्वा स्वात्मनिवृत्तिर्वर्तनं इति निश्चयव्रतं, व्रतस्य रागादिपरिहारेण परिरक्षणं निश्चयशीलं तदपि तेषामेव। तउ द्वादशविधतपश्चरणबलेन परद्रव्येच्छानिरोधं कृत्वा शुद्धात्मनि प्रतपनं विजयनं तप इति। तदपि तेषामेव। सुद्धहं शुद्धोपयोगिनां दंसणु छद्मस्थावस्थायां स्वशुद्धात्मनि रुचिरूपं सम्यग्दर्शनं केवलज्ञानोत्पत्तौ सत्यां तस्यैव फलभूतं अनीहितविपरीताभिनिवेशरहितं परिणामलक्षणं क्षायिकसम्यक्त्वं केवलदर्शनं वा तेषामेव। णाणु वीतरागस्वसंवेदनज्ञानं तस्यैव फलभूतं केवलज्ञानं वा सुद्धहं शुद्धोपयोगिनामेव। कम्मक्खउ परमात्मस्वरूपोपलब्धिलक्षणो द्रव्यभावकर्मक्षयः हवइ तेषामेव भवति। सुद्धउ शुद्धोपयोगपरिणामस्तदाधारपुरुषो वा तेण पहाणु येन कारणेन पूर्वोक्तः संयमादयो गुणाः शुद्धोपयोगे लभ्यन्ते तेन कारणेन स एव प्रधान उपादेयः इति तात्पर्यम्। तथा चोक्तं शुद्धोपयोगफलम्—"सुद्धस्स य सामण्णं भणियं सुद्धस्स दंसणं णाणं। सुद्धस्स य णिव्वाणं सो च्चिय सुद्धो णमो तस्स ॥" ॥६७॥

अथ निश्चयेन स्वकीयशुद्धभाव एव धर्म इति कथयति—

भाउ विसुद्धउ अप्पणउ धम्मु भणेविणु लेहु।
चउ-गइ-दुक्खहँ जो धरइ जीउ पडंतउ एहु ॥६८॥

निश्चयशील, रागादिके त्यागनेसे शुद्ध भावकी रक्षा करना वह भी निश्चयशील है, और देवांगना, मनुष्यनी, तिर्यंचनी, तथा काठ पत्थर चित्रामादिको अचेतन स्त्री-ऐसे चार प्रकारकी स्त्रियोंका मन, वचन, काय, कृत, कारित, अनुमोदनासे त्याग करना, वह व्यवहारशील है, ये दोनों शील शुद्ध चित्तवालोंके ही होते हैं। **तप** अर्थात् बारह तरहका तप उसके बलसे भावकर्म द्रव्यकर्म नोकर्मरूप सब वस्तुओंमें इच्छा छोड़कर शुद्धात्मामें मग्न रहना, काम क्रोधादि शत्रुओंके वशमें न होना, प्रतापरूप विजयरूप जितेंद्री रहना। यह तप शुद्ध चित्तवालोंके ही होता है। **दर्शन** अर्थात् साधक अवस्थामें तो शुद्धात्मामें रुचिरूप सम्यग्दर्शन और केवली अवस्थामें उस सम्यग्दर्शनका फलरूप संशय, विमोह, विभ्रम रहित निज परिणामरूप क्षायिकसम्यक्त्व केवलदर्शन यह भी शुद्धोंके ही होता है। **ज्ञान** अर्थात् वीतराग स्वसंवेदनज्ञान और उसका फल केवलज्ञान वह भी शुद्धोपयोगियोंके ही होता है, और कर्मक्षय अर्थात् द्रव्यकर्म भावकर्म और नोकर्मका नाश तथा परमात्मस्वरूपकी प्राप्ति वह भी शुद्धोपयोगियोंके ही होती है। इसलिये शुद्धोपयोग-परिणाम और उन परिणामोंका धारण करनेवाला पुरुष ही जगत्में प्रधान है। क्योंकि संयमादि सब गुण शुद्धोपयोगमें ही पाये जाते हैं। इसलिये शुद्धोपयोगके समान अन्य नहीं है, ऐसा तात्पर्य जानना। ऐसा ही अन्य ग्रन्थोंमें हरएक जगह "सुद्धस्स" इत्यादिसे कहा गया है। उसका भावार्थ यह है, कि शुद्धोपयोगीके ही मुनि-पद कहा है, और उसीके दर्शन ज्ञान कहे हैं। उसीके निर्वाण है, और वही शुद्ध अर्थात् रागादि रहित है। उसीको हमारा नमस्कार है ॥६७॥

आगे यह कहते हैं कि निश्चयसे अपना शुद्ध भाव ही धर्म है—[**विशुद्धः भावः**] मिथ्यात्व

भावो विशुद्धः आत्मीयः धर्मं भणित्वा लाहि।
चतुर्गतिदुःखेभ्यः यो धरति जीवं पतन्तमिमम् ॥६८॥

भाउ इत्यादि । भाउ **भावः परिणामः । कथंभूतः ।** विसुद्धउ **विशेषेण शुद्धो मिथ्यात्वरागादिरहितः** अप्पणउ **आत्मीयः** धम्मु भणेविणु लेहु **धर्मं भणित्वा मत्वा प्रगृह्णीथाः । यो धर्मः किं करोति ।** चउगइदुक्खहं जो धरइ **चतुर्गतिदुःखेभ्यः सकाशात् उद्धृत्य यः कर्ता धरति । कं धरति ।** जीउ पडंतउ एहु **जीवमिमं प्रत्यक्षीभूतं संसारे पतन्तमिति । तद्यथा । धर्मशब्दस्य व्युत्पत्तिः क्रियते । संसारे पतन्तं प्राणिनमुद्धृत्य नरेन्द्रनागेन्द्रदेवेन्द्रवन्द्ये मोक्षपदे धरतीति धर्मं इति धर्मशब्देनात्र निश्चयेन जीवस्य शुद्धपरिणाम एव ग्राह्यः । तस्य तु मध्ये वीतरागसर्वज्ञप्रणीतनयविभागेन सर्वे धर्मा अन्तर्भूता लभ्यन्ते । तथा अहिंसालक्षणो धर्मः, सोऽपि जीवशुद्धभावं विना न संभवति । सागारानगारलक्षणो धर्मः सोऽपि तथैव उत्तमक्षमादिदशविधो धर्मः सोऽपि जीवशुद्धभावमपेक्षते । 'सद्दृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा विदुः' इत्युक्तं यद्धर्मलक्षणं तदपि तथैव । रागद्वेषमोहरहितः परिणामो धर्मः सोऽपि जीवशुद्धस्वभाव एव । वस्तुस्वभावो धर्मः सोऽपि तथैव । तथा चोक्तम्–"धम्मो वत्थुसहावो" इत्यादि । एवंगुणविशिष्टो-धर्मश्चतुर्गतिदुःखेषु पतन्तं जीवं धरतीति धर्मः । अत्राह शिष्यः । पूर्वसूत्रे भणितं शुद्धोपयोगमध्ये संयमादयः सर्वे गुणा लभ्यन्ते । अत्र तु भणितमात्मनः शुद्धपरिणाम एव**

रागादिस रहित शुद्ध परिणाम है, वही [**आत्मीयः**] अपना है, और अशुद्ध परिणाम अपने नहीं है, सो शुद्ध भावको ही [**धर्मं भणित्वा**] धर्म समझकर [**गृह्णीथाः**] अंगीकार करो। [**यः**] जो आत्मधर्म [**चतुर्गतिदुःखेभ्यः**] चारो गतियोके दुःखोंसे [**पतंतं**] संसारमे पडे हुए। [**इमं जीवं**] इस जीवको निकालकर [**धरति**] आनंद-स्थानमे रखता **है** ॥ **भावार्थ**—धर्म शब्दका शब्दार्थ ऐसा है, कि संसारमें पड़ते हुए प्राणियोंको निकालकर मोक्ष-पदमे रखे, वह धर्म है, वह मोक्ष-पद देवेन्द्र नागेन्द्र नरेन्द्रोकर वंदने योग्य है। जो आत्माका निज स्वभाव है वही धर्म है, उसीमे जिनभाषित सब धर्म पाये जाते हैं। जो दयास्वरूप धर्म है, वह भी जीवके शुद्ध भावोंके विना नही होता, यति श्रावकका धर्म भी शुद्ध भावोंके बिना नहीं होता, उत्तम क्षमादि दशलक्षणधर्म भी शुद्ध भाव बिना नही हो सकता, और रत्नत्रयधर्म भी शुद्ध भावोंके विना नही हो सकता। ऐसा ही कथन जगह जगह ग्रंथोमें है, "सद्दृष्टि" इत्यादि श्लोकसे—उसका अर्थ यह है, कि धर्मके ईश्वर भगवान्ने सम्यग्दर्शन, ज्ञान, चारित्र इन तीनोको धर्म कहा है। जिस धर्मके ये ऊपर कहे गये लक्षण हैं, वह राग, द्वेष, मोह रहित परिणाम-धर्म है, वह जीवका स्वभाव ही है, क्योकि वस्तुका स्वभाव ही धर्म है। ऐसा दूसरी जगह भी "धम्मो" इत्यादि गाथासे कहा है, कि जो आत्म-वस्तुका स्वभाव है, वह धर्म है, उत्तम क्षमादि भावरूप दस प्रकारका धर्म है, रत्नत्रय धर्म है, और जीवोंकी रक्षा यह धर्म है। यह जिन-भाषित धर्म चतुर्गतिके दुःखोंमे पड़ते हुए जीवोको उद्धारता है। यहाँ शिष्यने प्रश्न किया, कि जो पहले दोहेमे तो तुमने शुद्धोपयोगमे संयमादि सब गुण कहे, और यहाँ आत्माका शुद्ध परिणाम ही धर्म कहा है, उसमें धर्म पाये जाते है, तो पहले दोहेमे और इसमें क्या भेद है? उसका

धर्मः, तत्र सर्वे धर्माश्च लभ्यन्ते । को विशेषः । परिहारमाह । तत्र शुद्धोपयोगसंज्ञा मुख्या, अत्र तु धर्मसंज्ञा मुख्या एतावान् विशेषः । तात्पर्यं तदेव । तेन कारणेन सर्वप्रकारेण शुद्धपरिणाम एव कर्तव्य इति भावार्थः ॥६८॥

अथ विशुद्धभाव एव मोक्षमार्ग इति दर्शयति—

सिद्धिहिँ केरा पंथडा भाउ विसुद्धउ एक्कु ।
जो तसु भावहँ मुणि चलइ सो किम होइ विमुक्कु ॥६९॥
सिद्धेः संबन्धी पन्थाः भावो विशुद्ध एकः ।
यः तस्माद्भावात् मुनिश्चलति स कथं भवति विमुक्तः ॥६९॥

सिद्धिहि इत्यादि । सिद्धिहि केरा सिद्धेर्मुक्तेः संबन्धी पंथडा पन्था मार्गः । कोऽसौ । भाउ भावः परिणामः कथंभूतः । विसुद्धउ विशुद्धः एक्कु एक एवाद्वितीयः । जो तसु भावहं मुणि चलइ यस्तस्माद्भावान्मुनिश्चलति । सो किम होइ विमुक्कु स मुनिः कथं मुक्तो भवति न कथमपीति । तद्यथा । योऽसौ समस्तशुभाशुभसंकल्पविकल्परहितो जीवस्य शुद्धभावः स एव निश्चयरत्नत्रयात्मको मोक्षमार्गः । यस्तस्मात् शुद्धात्मपरिणामान्मुनिश्च्युतो भवति स कथं मोक्षं लभते किंतु नैव । अत्र येन कारणेन निजशुद्धात्मानुभूतिपरिणाम एव मोक्षमार्गस्तेन कारणेन मोक्षार्थिना स एव निरन्तरं कर्तव्य इति तात्पर्यार्थः ॥६९॥

अथ क्वापि देशे गच्छ किमप्यनुष्ठानं कुरु तथापि चित्तशुद्धिं विना मोक्षो नास्तीति प्रकटयति—

जहिँ भावइ तहिँ जाहि जिय जं भावइ करि तं जि ।
केम्वइ मोक्खु ण अत्थि पर चित्तहँ सुद्धि ण जं जि ॥७०॥

समाधान—पहले दोहेमें तो शुद्धोपयोग मुख्य कहा था, और इस दोहेमें धर्म मुख्य कहा है । शुद्धोपयोगका ही नाम धर्म है, तथा धर्म का नाम ही शुद्धोपयोग है । शब्दका भेद है, अर्थका भेद नहीं है । दोनोंका तात्पर्य एक है । इसलिए सब तरह शुद्ध परिणाम ही कर्तव्य है, वही धर्म है ॥६८॥

आगे शुद्ध भाव ही मोक्षका मार्ग है, दिखलाते हैं—[सिद्धेः सम्बन्धी] मुक्तिका [पंथाः] मार्ग [एकः विशुद्धः भावः] एक शुद्ध भाव ही है । [यः मुनिः] जो मुनि [तस्मात् भावात्] उस शुद्ध भावसे [चलति] चलायमान हो जावे, तो [सः] वह [कथं] कैसे [विमुक्तः] मुक्त [भवति] हो सकता है ? किसी प्रकार नहीं हो सकता ॥ भावार्थ—जो समस्त शुभाशुभ संकल्प विकल्पोंसे रहित जीवका शुद्ध भाव है, वही निश्चयरत्नत्रयस्वरूप मोक्षका मार्ग है । जो मुनि शुद्धात्म परिणामसे च्युत हो जावे, वह किस तरह मोक्षको पा सकता है ? नहीं पा सकता । मोक्षका मार्ग एक शुद्ध भाव ही है, इसलिये मोक्षके इच्छुकको वही भाव हमेशा करना चाहिये ॥६९॥

आगे यह प्रकट करते हैं, कि किसी देशमें जावो, चाहे जो तप करो, तो भी चित्तकी शुद्धिके

यत्र भाति तत्र याहि जीव यद् भाति कुरु तदेव ।
कथमपि मोक्ष नास्ति परं चित्तस्य शुद्धिर्न यदेव ॥७०॥

जहिं भावइ इत्यादि । जहिं भावइ तहिं **यत्र देशे प्रतिभाति तत्र** जाहि गच्छ जिय **हे जीव** । जं भावइ करि तं जि **यदनुष्ठानं प्रतिभाति कुरु तदेव** । केम्वइ मोक्खु ण अत्थि **कथमपि केनापि प्रकारेण मोक्षो नास्ति पर परं नियमेन । कस्मात्** । चित्तहं सुद्धि ण **चित्तस्य शुद्धिर्न** जं जि **यस्मादेव कारणात्** इति । तथाहि। **ख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपदुर्ध्यानैः** शुद्धात्मानुभूतिप्रतिपक्षभूतैर्यावत्कालं चित्तं रञ्जितं **मूर्च्छितं तन्मयं तिष्ठति तावत्कालं हे जीव क्वापि देशान्तरं गच्छ किमप्यनुष्ठानं कुरु तथापि मोक्षो नास्तीति । अत्र कामक्रोधादिभिरपध्यानैर्जीवो भोगानुभवं विनापि शुद्धात्मभावनाच्युतः सन् भावेन कर्माणि बध्नाति तेन कारणेन निरन्तरं चित्तशुद्धिः कर्तव्येति भावार्थः ॥ तथा चोक्तम्—"कंखिदकलुसिदभूदो हु कामभोगेहिं मुच्छिदो जीवो । णवि भुंजंतो भोगे बंधदि भावेण कम्माणि ॥" ७०॥**

अथ शुभाशुभशुद्धोपयोगत्रयं कथयति—

सुह-परिणामेँ धम्मु पर असुहेँ होउ अहम्मु ।
दोहिँ वि एहिँ विवज्जियउ सुद्धु ण बंधइ कम्मु ॥७१॥

शुभपरिणामेन धर्मः परं अशुभेन भवति अधर्मः ।
द्वाभ्यामपि एताभ्यां विवर्जितः शुद्धो न बध्नाति कर्म ॥

सुह इत्यादि पदखण्डनारूपेण व्याख्यान क्रियते । सुहपरिणामे धम्मु पर शुभ-

---

बिना मोक्ष नहीं है—[**जीव**] हे जीव, [**यत्र**] जहाँ [**भाति**] तेरी इच्छा हो [**तत्र**] उसी देशमे [**याहि**] जा, और [**यत्**] जो [**भाति**] अच्छा लगे, [**तदेव**] वही [**कुरु**] कर, [**परं**] लेकिन [**यदेव**] जबतक [**चित्तस्य शुद्धिः न**] मनकी शुद्धि नहीं है, तबतक [**कथमपि**] किसी तरह [**मोक्षो नास्ति**] मोक्ष नहीं हो सकता **भावार्थ**—बड़ाई, प्रतिष्ठा, परवस्तुका लाभ, और देखे सुने भोगे हुए भोगोंकी वांछारूप खोटे ध्यान, (जो कि शुद्धात्मज्ञानके शत्रु है) इनसे जबतक यह चित्त रँगा हुआ है, अर्थात् विषय-कषायोसे तन्मयी है, तबतक हे जीव; किसी देशमे जा, तीर्थादिकोंमे भ्रमण कर, अथवा चाहे जैसा आचरण कर, किसी प्रकार मोक्ष नहीं है । सारांश यह है, कि काम-क्रोधादि खोटे ध्यानसे यह जीव भोगोंके सेवनके बिना भी शुद्धात्म-भावनासे च्युत हुआ, अशुद्ध भावोंसे कर्मोंको बाँधता है । इसलिए हमेशा चित्तकी शुद्धता रखनी चाहिये । ऐसा ही कथन दूसरी जगह भी "कंखिद" इत्यादि गाथासे कहा है, इस लोक और परलोकके भोगोंका अभिलाषी और कषायोंसे कालिमारूप हुआ अवर्तमान विषयोका वांछक और वर्तमान विषयोंमे अत्यन्त आसक्त हुआ अति मोहित होनेसे भोगोंको नहीं भोगता हुआ भी अशुद्ध भावोसे कर्मोंको बाँधता है ॥७०॥

आगे शुभ अशुभ और शुद्ध इन तीन उपयोगोंको कहते हैं-[**शुभपरिणामेन**] दान पूजादि शुभ

परिणामेन धर्मः पुण्यं भवति मुख्यवृत्त्या । असुहें होइ अहम्मु अशुभपरिणामेन भवत्यधर्मः पापम् । दोहिं वि एहिं विवज्जियउ द्वाभ्यां एताभ्यां शुभाशुभपरिणामाभ्यां विवर्जितः । कोऽसौ । सुद्ध शुद्धो मिथ्यात्वरागादिरहितपरिणामस्तत्परिणतपुरुषो वा । किं करोति । ण बंधइ न बध्नाति । किम् । कम्मु ज्ञानावरणादिकर्मेति । तद्यथा । कृष्णोपाधिपीतोपाधिस्फटिकवदयमात्मा क्रमेण शुभाशुभशुद्धोपयोगरूपेण परिणामत्रयं परिणमति । तेन तु मिथ्यात्वविषयकषायाद्यवलम्बनेन पापं बध्नाति । अर्हत्सिद्धाचार्योपाध्यायसाधुगुणस्मरणदानपूजादिना संसारस्थितिच्छेदपूर्वकं तीर्थकरनामकर्मादिविशिष्टगुणपुण्यमनोहितवृत्त्या बध्नाति । शुद्धात्मावलम्बनेन शुद्धोपयोगेन तु केवलज्ञानाद्यनन्तगुणरूपं मोक्षं च लभते इति । अत्रोपयोगत्रयमध्ये मुख्यवृत्त्या शुद्धोपयोग एवोपादेय इत्यभिप्रायः ॥७१॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये सूत्रपञ्चकेन शुद्धोपयोगव्याख्यानमुख्यत्वेन प्रथमान्तरस्थलं गतम् ॥

अत ऊर्ध्वं तस्मिन्नेव महास्थलमध्ये पञ्चदशसूत्रपर्यन्तं वीतरागस्वसंवेदनज्ञानी मुख्यत्वेन व्याख्यानं क्रियते । तद्यथा—

दाणिं लब्भइ भोउ पर इंदत्तणु वि तवेण ।
जम्मण-मरण-विवज्जियउ पउ लब्भइ णाणेण ॥७२॥

परिणामोंसे [धर्मः] पुण्यरूप व्यवहारधर्म [परं] मुख्यतासे [भवति] होता है, [अशुभेन] विषय कषायादि अशुभ परिणामोंसे [अधर्मः] पाप होता है. [अपि] और [एताभ्यां] इन [द्वाभ्यां] दोनोंसे [विवर्जित] रहित [शुद्धः] मिथ्यात्व रागादि रहित शुद्ध परिणाम अथवा परिणामधारी पुरुष [कर्म] ज्ञानावरणादि कर्मको [न] नहीं [बध्नाति] बाँधता ॥ **भावार्थ—** जैसे स्फटिकमणि शुद्ध उज्ज्वल है, उसके जो काला डंक लगावें, तो काला मालूम होता है, और पीला डंक लगावें तो पीला भासता है, और यदि कुछ भी न लगावें, तो शुद्ध स्फटिक ही है उसी तरह यह आत्मा क्रमसे अशुभ शुभ शुद्ध इन परिणामोसे परिणत होता है। उनमेसे मिथ्यात्व और विषय कषायादि अशुभके अवलम्बन (सहायता) से तो पापको ही बाँधता है, उसके फलसे नरक निगोदादिके दुःखोंको भोगता है और अरहंत, सिद्ध, आचार्य, उपाध्याय, साधु इन पांच परमेष्ठियोंके गुणस्मरण और दानपूजादि शुभ क्रियाओंसे संसारकी स्थितिका छेदनेवाला जो तीर्थंकरनामकर्म उसको आदि ले विशिष्ट गुणरूप पुण्यप्रकृतियोंको अवांछीक वृत्तिसे बाँधता है। तथा केवल शुद्धात्मा अवलम्बनरूप शुद्धोपयोगसे उसी भवमें केवलज्ञानादि अनंतगुणरूप मोक्षको पाता है। इन तीन प्रकारके उपयोगोंमेंसे सर्वथा उपादेय तो शुद्धोपयोग ही है, अन्य नहीं है। और शुभ अशुभ इन दोनोंमेंसे अशुभ तो सब प्रकारसे निषिद्ध है, नरक निगोदका कारण है, किसी तरह उपादेय नहीं है—हेय है, तथा शुभोपयोग प्रथम अवस्थामे उपादेय है, और परम अवस्थामे उपादेय नहीं है, हेय है ॥७१॥

इस प्रकार इकतालीस दोहोंके महास्थलमें पाँच दोहोमें शुद्धोपयोगका व्याख्यान किया।

दानेन लभ्यते भोगः परं इन्द्रत्वमपि तपसा ।
जन्ममरणविवर्जितं पदं लभ्यते ज्ञानेन ।।७२।।

दाणिं इत्यादि । दाणिं लब्भइ भोउ पर **दानेन लभ्यते पञ्चेन्द्रियभोगः परं नियमेन** । इंदत्तणु वि तवेण **इन्द्रत्वमपि तपसा लभ्यते** । जम्मणमरणविवज्जियउ **जन्ममरणविवर्जितं** पउ **पदं स्थानं** लब्भइ **लभ्यते प्राप्यते** । **केन** । णाणेण **वीतरागस्वसंवेदनज्ञानेनेति । तथाहि** । आहाराभयभैषज्यशास्त्रदानेन सम्यक्त्वरहितेन भोगो लभ्यते । सम्यक्त्वसहितेन तु यद्यपि परंपरया निर्वाणं लभ्यते तथापि विविधाभ्युदयरूपः पञ्चेन्द्रियभोग एव । सम्यक्त्वसहितेन तपसा तु यद्यपि निर्वाणं लभ्यते तथापि देवेन्द्रचक्रवर्त्यादिविभूतिपूर्वकेणैव । वीतरागस्वसंवेदनसम्यग्ज्ञानेन सविकल्पेन यद्यपि देवेन्द्रचक्रवर्त्यादिविभूतिविशेषो भवति तथापि निर्विकल्पेन मोक्ष एवेति । अत्राह प्रभाकरभट्टः । हे भगवान् यदि विज्ञानमात्रेण मोक्षो भवति तर्हि सांख्यादयो वदन्ति ज्ञानमात्रादेव मोक्षः तेषां किमिति दूषणं दीयते भवद्भिरिति । भगवानाह । अत्र वीतरागनिर्विकल्पस्वसंवेदनसम्यग्ज्ञानमिति भणितं तिष्ठति तेन वीतरागविशेषणेन चारित्रं लभ्यते सम्यग्विशेषणेन सम्यक्त्वमपि लभ्यते पानकवदेकस्यापि मध्ये त्रयमस्ति । तेषां मते तु वीतरागविशेषणं नास्ति सम्यग्विशेषणं च नास्ति ज्ञानमात्रमेव । तेन दूषणं भवतीति भावार्थः ।।७२।।

अथ तमेवार्थं विपक्ष दूषणद्वारेण द्रढयति--

आगे पन्द्रह दोहोंमे वीतरागस्वसंवेदनज्ञानकी मुख्यतासे व्याख्यान करते है-- [**दानेन**] दानसे [**परं**] नियम करके [**भोगः**] पांच इंद्रियोंके भोग [**लभ्यते**] प्राप्त होते है, [**अपि**] और [**तपसा**] तपसे [**इंद्रत्वं**] इंद्र-पद मिलता है, तथा [**ज्ञानेन**] वीतरागस्वसंवेदनज्ञानसे [**जन्ममरणविवर्जितं**] जन्म जरा मरणसे रहित [**पदं**] जो मोक्ष-पद वह [**लभ्यते**] मिलता है ॥ **भावार्थ**--आहार अभय औषध और शास्त्र इन चार तरहके दानोंको यदि सम्यक्त्व रहित करे, तो भोगभूमिके सुख पाता है, तथा सम्यक्त्व सहित दान करे, तो परम्पराय मोक्ष पाता है। यद्यपि प्रथम अवस्थामे देवेन्द्र चक्रवर्ती आदिकी विभूति भी पाता है, तो भी निर्विकल्पस्वसंवेदनज्ञानकर मोक्ष ही है। यहाँ प्रभाकरभट्टने प्रश्न किया, कि हे भगवन्, जो ज्ञानमात्रसे ही मोक्ष होता है, तो सांख्यादिक भी ऐसा ही कहते है, कि ज्ञानसे ही मोक्ष है, उनको क्यो दूषण देते हो ? तब श्रीगुरुने कहा--इस जिनशासनमे वीतरागनिर्विकल्प स्वसंवेदन सम्यग्ज्ञान कहा गया है, सो वीतराग कहनेसे वीतराग-चारित्र भी आ जाता है, और सम्यक् पदके कहनेसे सम्यक्त्व भी आ जाता है। जैसे एक चूर्णमे अथवा पाकमें अनेक औषधियाँ आ जाती है, परन्तु वस्तु एक ही कहलाती है, उसी तरह वीतराग-निर्विकल्प स्वसंवेदनज्ञानके कहनेसे सम्यग्दर्शन ज्ञान चारित्र ये तीनो आ जाते हैं। सांख्यादिकके मतमें वीतराग विशेषण नहीं है, और सम्यक् विशेषण नहीं है, केवल ज्ञानमात्र ही कहते हैं, सो वह मिथ्याज्ञान है, इसलिये दूषण देते हैं, यह जानना ।।७२।।

देउ णिरंजणु इउँ भणइ णाणिं मुक्खु ण भंति ।
णाण-विहीणा जीवडा चिरु संसारु भमंति ।।७३।।

देवः निरञ्जन एवं भणति ज्ञानेन मोक्षो न भ्रान्तिः ।
ज्ञानविहीना जीवाः चिरं संसारं भ्रमन्ति ।।७३।।

देउ इत्यादि देउ देवः किंविशिष्टः । णिरंजणु **निरञ्जनः अनन्तज्ञानादिगुणसहितोऽष्टादशदोषरहितश्च इउं** भणइ **एवं भणति । एवं किम् ।** णाणि मुक्खु **वीतरागनिर्विकल्पस्वसंवेदनरूपेण सम्यग्ज्ञानेन मोक्षो भवति ।** ण भंति **न भ्रांतिः संदेहो नास्ति ।** णाणविहीणा जीवडा **पूर्वोक्तस्वसंवेदनज्ञानेन विहीना जीवा** चिरु संसारु भमंति **चिरं बहुतरं कालं संसारं परिभ्रमन्ति इति । अत्र वीतरागस्वसंवेदनज्ञानमध्ये यद्यपि सम्यक्त्वादित्रयमस्ति तथापि सम्यग्ज्ञानस्यैव मुख्यता । विवक्षितो मुख्य इति वचनादिति भावार्थः ।।७३।।**

अथ पुनरपि तमेवार्थं दृष्टान्तदार्ष्टान्तिकाभ्यां निश्चिनोति—

णाण-विहीणहँ मोक्ख-पउ जीव म कासु वि जोइ ।
बहुएँ सलिल-विरोलियइँ करु चोप्पडउ ण होइ ।।७४।।

ज्ञानविहीनस्य मोक्षपदं जीव मा कस्यापि अद्राक्षीः ।
बहुना सलिलविलोडितेन करः चिक्कणो न भवति ।।७४।।

णाण इत्यादि । णाणविहीणहं **ख्यातिपूजालाभादिदुष्टभावपरिणतचित्तं मम कोऽपि न जानातीति मत्वा वीतरागपरमानन्दैकसुखरसानुभवरूपं चित्तशुद्धिमकुर्वाणस्य बहिरङ्गबकवेषेण लोकरञ्जनं मायास्थानं तदेव शल्यं तत्प्रभृतिसमस्तविकल्प-**

आगे इसी अर्थको विपक्षीको दूषण देकर दृढ़ करते हैं—[**निरंजन**] अनन्त ज्ञानादि गुण सहित, और अठारह दोष रहित, जो [**देवः**] सर्वज्ञ वीतरागदेव है, वे [**एवं**] ऐसा [**भणति**] कहते है, कि [**ज्ञानेन**] वीतरागनिर्विकल्प स्वसंवेदनरूप सम्यग्ज्ञान से हो [**मोक्ष**] मोक्ष **है,** [**न भ्रांतिः**] इसमे संदेह नहीं है । और [**ज्ञानविहीनाः**] स्वसंवेदनज्ञानकर रहित जो [**जीवाः**] जीव हैं, वे [**चिरं**] बहुत कालतक [**संसारं**] संसारमें [**भ्रमंति**] भटकते है ।। **भावार्थ**—यहाँ वीतरागस्वसंवेदनज्ञानमे यद्यपि सम्यक्त्वादि तीनों हैं, तो भी मुख्यता सम्यग्ज्ञानकी हो है । क्योंकि श्रीजिनवचनमे ऐसा कथन किया है, कि जिसका कथन किया जावे, वह मुख्य होता है, अन्य गौण होता है, ऐसा जानना ।।७३।।

आगे फिर भी इसी कथनको दृष्टांत और दार्ष्टांतसे निश्चित करते हैं—[**ज्ञानविहीनस्य**] जो सम्यग्ज्ञानकर रहित मलिन चित्त है, अर्थात् अपनी बड़ाई प्रतिष्ठा लाभादि दुष्ट भावोसे जिसका चित्त परिणत हुआ है, और मनमें ऐसा जानता है, कि हमारी दुष्टताको कोई नही जान सकता, ऐसा समझकर वीतराग परमानंद सुखरसके अनुभवरूप चित्तकी शुद्धिको नही करता, तथा बाहरसे बगुलाकासा भेष मायाचाररूप लोकरंजनके लिये धारण किया है, यही सत्य है, इसी भेषसे हमारा

कल्लोलमालात्यागेन निजशुद्धात्मसंवित्तिनिश्चयेन संज्ञानेन सम्यग्ज्ञानेन विना मोक्खपउ मोक्षपदं स्वरूपं जीव हे जीव म कासु वि जोइ मा कस्याप्यद्राक्षीः । दृष्टान्तमाह । बहुएं सलिलविरोलियइं बहुनापि सलिलेन मथितेन करु करो हस्तः चोप्पडउ ण होइ चिक्कनः स्निग्धो न भवतीति । अत्र यथा बहुतरमपि सलिले मथितेऽपि हस्तः स्निग्धो न भवति, तथा वीतरागशुद्धात्मानुभूतिलक्षणेन ज्ञानेन विना बहुनापि तपसा मोक्षो न भवतीति तात्पर्यम् ॥७४॥

अथ निश्चयनयेन यन्निजात्मबोधज्ञानबाह्यं ज्ञानं तेन प्रयोजनं नास्तीत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति—

जं णिय-बोहहं बाहिरउ णाणु वि कज्जु ण तेण ।
दुक्खहं कारणु जेण तउ जीवहँ होइ खणेण ॥७५॥

यत् निजबोधाद्बाह्यं ज्ञानमपि कार्यं न तेन ।
दुःखस्य कारणं येन तपः जीवस्य भवति क्षणेन ॥७५॥

जं इत्यादि । जं यत् णियबोहहं बाहिरउ दानपूजातपश्चरणादिकं कृत्वापि दृष्टश्रुतानुभूतभोगाकांक्षावासितचित्तेन रूपलावण्यसौभाग्यबलदेववासुदेवकामदेवेन्द्रादिपदप्राप्तिरूपभावि-भोगाशाकरणं यन्निदानबन्धस्तदेव शल्यं तत्प्रभृतिसमस्तमनोरथविकल्पज्वालावलीरहितत्वेन विशुद्धज्ञानदर्शनस्वभावनिजात्मावबोधो निजबोधः

कल्याण होगा, इत्यादि अनेक विकल्पोंको कल्लोलोंसे अपवित्र है, ऐसे [कस्यापि] किसी अज्ञानीके [मोक्षपदं] मोक्ष-पदवी [जीव] हे जीव, [मा द्राक्षीः] मत देख अर्थात् विना सम्यग्ज्ञानके मोक्ष नहीं होता । उसका दृष्टांत कहते हैं । [बहुना] बहुत [सलिलविलोडितेन] पानीके मथनेसे भी [करः] हाथ [चिक्कणो] चीकना [न भवति] नही होता। क्योंकि जलमे चिकनापन है ही नही । जैसे जलमे चिकनाई नहीं है, वैसे बाहिरो भेषमे सम्यग्ज्ञान नही है । सम्यग्ज्ञानके विना महान् तप करो, तो भी मोक्ष नही होता । क्योंकि सम्यग्ज्ञानका लक्षण वीतराग शुद्धात्माकी अनुभूति है, वही मोक्षका मूल है । वह सम्यग्ज्ञानसम्यग्दर्शनादिसे भिन्न नही है, तीनो एक है ॥७४॥

आगे निश्चयकर आत्मज्ञानसे बहिर्मुख बाह्य पदार्थोंका ज्ञान है, उससे प्रयोजन नहीं सधता, ऐसा अभिप्राय मनमें रखकर कहते हैं—[यत्] जो [निजबोधात्] आत्मज्ञानसे [बाह्यं] बाहर (रहित) [ज्ञानमपि] शास्त्र वगैरका ज्ञान भी है, [तेन] उस ज्ञानसे [कार्यं न] कुछ काम नही [येन] क्योंकि [तपः] वीतरागस्वसंवेदनज्ञान रहित तप [क्षणेन] शीघ्र ही [जीवस्य] जीवको [दुःखस्य कारणं] दुःखका कारण [भवति] होता है ॥ भावार्थ—निदानबध आदि तीन शल्योंको आदि ले समस्त विषयाभिलाषरूप मनोरथोंके विकल्पजालरूपी अग्निकी ज्वालाओंसे रहित जो निज सम्यग्ज्ञान है, उससे रहित बाह्य पदार्थोंका शास्त्रद्वारा ज्ञान हैं, उससे कुछ काम नही । कार्य तो एक निज आत्माके जाननेसे है । यहाँ शिष्यने प्रश्न किया, कि निदानबंध रहित आत्मज्ञान तुमने बतलाया, उसमें निदानबंध किसे कहते है ? उसका समाधान—जो देखे सुने और भोगे हुए

तस्मान्निजबोधाद्बाह्यम् । णाणु वि कज्जु ण तेण **शास्त्राविजनितं ज्ञानमपि यत्तेन कार्यं नास्ति । कस्मादिति चेत्** । दुक्खहं कारणु दुःखस्य कारणं जेण **येन कारणेन** तउ **वीतरागस्वसंवेदनरहितं** तपः जीवहं **जीवस्य** होइ **भवति** खणेण **क्षणमात्रेण कालेनेति । अत्र यद्यपि शास्त्रजनितं ज्ञानं स्वशुद्धात्मपरिज्ञानरहितं तपश्चरणं च मुख्यवृत्त्या पुण्यकारणं भवति तथापि मुक्तिकारणं न भवतीत्यभिप्रायः ॥७५॥**

अथ येन मिथ्यात्वरागादिवृद्धिर्भवति तदात्मज्ञानं न भवतीति निरूपयति—

तं णिय-णाणु जि होइ ण वि जेण पवड्ढइ राउ ।
दिणयर-किरणहँ पुरउ जिय किं विलसइ तम-राउ ॥७६॥

तत् निजज्ञानमेव भवति नापि येन प्रवर्धते रागः ।
दिनकरकिरणानां पुरतः जीव किं विलसति तमोरागः ॥७६॥

तं इत्यादि । तं तत् णियणाणु जि होइ ण वि **निजज्ञानमेव न भवति वीतराग-नित्यानन्दैकस्वभावनिजपरमात्मतत्त्वपरिज्ञानमेव न भवति** । **येन ज्ञानेन किं भवति** । जेण पवड्ढइ **येन प्रवर्धते । कोऽसौ ।** राउ **शुद्धात्मभावनासमुत्पन्नवीतरागपरमा-नन्दप्रतिबन्धकपञ्चेन्द्रियविषयाभिलाषरागः । अत्र दृष्टान्तमाह** । दिणयरकिरणहं पुरउ जिय **दिनकरकिरणानां पुरतो हे जीव** किं विलसइ **किं विलसति किं शोभते**

इन्द्रियोंके भोगोंसे जिसका चित्त रंग रहा है, ऐसा अज्ञानी जीव रूप-लावण्य सौभाग्यका अभिलाषी वासुदेव चक्रवर्ती-पदके भोगोंकी वांछा करे, दान पूजा तपश्चरणादिकर भोगोंकी अभिलाषा करे, वह निदानबंध है, सो यह बड़ो शल्य (काँटा) है। इस शल्यसे रहित जो आत्मज्ञान उसके बिना शब्द-शास्त्रादिका ज्ञान मोक्षका कारण नहीं है। क्योंकि वीतरागस्वसंवेदनज्ञान रहित तप भी दुःखका कारण है। ज्ञान रहित तपसे जो संसारकी सम्पदायें मिलती है, वे क्षणभंगुर हैं। इसलिये यह निश्चय हुआ, कि आत्मज्ञानसे रहित जो शास्त्रका ज्ञान और तपश्चरणादि हैं; उनसे मुख्यताकर पुण्यका बंध होता है। उस पुण्यके प्रभावसे जगत्‌की विभूति पाता है, वह क्षणभंगुर है। इसलिये अज्ञानियोंका तप और श्रुत यद्यपि पुण्यका कारण है, तो भी मोक्षका कारण नही है ॥७५॥

आगे जिससे मिथ्यात्व रागादिककी वृद्धि हो, वह आत्मज्ञान नही है, ऐसा निरूपण करते हैं— [**जीव**] हे जीव, [**तत्**] वह [**निजज्ञानं एव**] वीतराग नित्यानंद अखंडस्वभाव परमात्म-तत्त्वका परिज्ञान ही [**नापि**] नही [**भवति**] है, [**येन**] जिससे [**रागः**] परद्रव्यमे प्रीति [**प्रवर्धते**] बढ़े, [**दिनकरकिरणानां पुरतः**] सूर्यकी किरणोंके आगे [**तमोरागः**] अन्धकारका फैलाव [**किं विलसति**] कैसे शोभायमान हो सकता है ? नही हो सकता ॥ **भावार्थ**—शुद्धात्माको भावनासे उत्पन्न जो वीतराग परम आनंद उसके शत्रु पंचेन्द्रियोंके विषयोंकी अभिलाषा जिसमें हो, वह निज (आत्म) ज्ञान नही है। अज्ञान ही है। जिस जगह वीतरागभाव है, वही सम्यग्ज्ञान है। इसी बातको दृष्टांत देकर दृढ़ करते हैं, सो सुनो। हे जीव, जैसे सूर्यके प्रकाशके आगे अन्धेरा नही शोभा देता, वैसे ही आत्मज्ञानमें विषयोंकी अभिलाषा [इच्छा] नहीं शोभती। यह

अपि तु नैव । कोऽसौ । तमराउ तमोरागस्तमोव्याप्तरिति । अत्रेदं तात्पर्यम् । यस्मिन् शास्त्राभ्यासज्ञाने जातेऽप्यनाकुलत्वलक्षणपारमार्थिकसुखप्रतिपक्षभूता आकुलत्वोत्पादका रागादयो वृद्धिं गच्छन्ति तन्निश्चयेन ज्ञानं न भवति । कस्मात् । विशिष्टमोक्षफलाभावादिति ।।७६।।

अथ ज्ञानिनां निजशुद्धात्मस्वरूपं विहाय नान्यत्किमप्युपादेयमिति दर्शयति--

अप्पा मिल्लिवि णाणियहँ अण्णु ण सुंदरु वत्थु ।
तेण ण विसयहँ मणु रमइ जाणंतहँ परमत्थु ।।७७।।

आत्मानं मुक्त्वा ज्ञानिनां अन्यन्न सुन्दरं वस्तु ।
तेन न विषयेषु मनो रमते जानतां परमार्थम् ।।७७।।

अप्पा इत्यादि । अप्पा मिल्लिवि **शुद्धबुद्धैकस्वभावं परमात्मपदार्थं मुक्त्वा** णाणियहं **ज्ञानिनां मिथ्यात्वरागादिपरिहारेण निजशुद्धात्मद्रव्यपरिज्ञानपरिणतानां** अण्णु ण सुंदरु वत्थु **अन्यन्न सुन्दरं समीचीनं वस्तु प्रतिभाति येन कारणेन** तेण ण विसयहं मणु रमइ **तेन कारणेन शुद्धात्मोपलब्धिप्रतिपक्षभूतेषु पञ्चेन्द्रियविषयरूपकामभोगेषु मनो न रमते । किं कुर्वताम् ।** जाणंतहं **जानतां** परमत्थु **वीतरागसहजानन्दैकपारमार्थिकसुखाविनाभूतं परमात्मानमेवेति तात्पर्यम् ।।७७।।**

अथ तमेवार्थं दृष्टान्तेन समर्थयति--

निश्चयसे जानना । शास्त्रका ज्ञान होनेपर भी जो निराकुलता न हो, और आकुलतासे उपजानेके वाले आत्मीक-सुखके वैरी रागादिक जो वृद्धिको प्राप्त हो, तो वह ज्ञान किस कामका ? ज्ञान तो वह है, जिससे आकुलता मिट जावे । इससे यह निश्चय हुआ, कि बाह्य पदार्थोंका ज्ञान मोक्ष-फलके अभावसे कार्यकारी नही है ।। ७६ ।।

आगे ज्ञानी जीवोंके निज शुद्धात्मभावके बिना अन्य कुछ भी आदरने योग्य नहीं है, ऐसा दिखलाते है--[**आत्मानं**] आत्माको [**मुक्त्वा**] छोड़कर [**ज्ञानिनां**] ज्ञानियोंको [**अन्यद् वस्तु**] अन्य वस्तु [**सुन्दरं न**] अच्छो नही लगती, [**तेन**] इसलिये [**परमार्थं जानतां**] परमात्म-पदार्थको जाननेवालोका [**मनः**] मन [**विषयाणां**] विषयोंमे [न **रमते**] नहीं लगता ।। **भावार्थ--** मिथ्यात्व रागादिकके छोड़नेसे निज शुद्धात्म द्रव्यके यथार्थ ज्ञानकर जिनका चित्त परिणत हो गया है, ऐसे ज्ञानियोको शुद्ध बुद्ध परम स्वभाव परमात्माको छोड़के दूसरी कोई भी वस्तु सुन्दर नही भासती । इसोलिये उनका मन कभी विषय-वासनामे नहीं रमता । ये विषय **कैसे हैं** । जो कि शुद्धात्माकी प्राप्तिके शत्रु है । ऐसे ये **भव-भ्रमणके कारण है, काम-भोगरूप पाँच** इन्द्रियोंके विषय उनमे मूढ जीवोंका ही मन रमता है, सम्यग्दृष्टीका मन नहीं रमता । **कैसे हैं** सम्यग्दृष्टी, जिन्होने वीतराग सहजानन्द अखंड सुखमे तन्मय परमात्मतत्त्वको जान लिया **है** । इसलिये यह निश्चय **हुआ**, कि जो विषय-वासनाके अनुरागी है, वे अज्ञानी हैं, और जो ज्ञानीजन हैं, वे विषय-विकारसे सदा विरक्त ही हैं ।। ७७ ।।

आगे इसी कथनको दृष्टांतसे दृढ़ करते हैं--[**ज्ञानमयं आत्मानं**] केवलज्ञानादि अनंतगुणमयी

अप्पा मिल्लिवि णाणमउ चित्ति ण लग्गइ अण्णु ।
मरगउ जें परियाणियउ तहुँ कच्चें कउ गण्णु ॥७८॥

आत्मानं मुक्त्वा ज्ञानमयं चित्ते न लगति अन्यत् ।
मरकतः येन परिज्ञातः तस्य काचेन।कुतो गणना ॥७८॥

अप्पा इत्यादि । अप्पा मिल्लिवि **आत्मानं मुक्त्वा** । **कथंभूतम्** । णाणमउ **ज्ञानमयं केवलज्ञानान्तर्भूतानन्तगुणमयं** चित्ति **मनसि** ण लग्गइ **न लगति न रोचते न प्रतिभाति** । **किम्** । अण्णु **निजपरमात्मस्वरूपादन्यत्** । **अत्रार्थे दृष्टान्तमाह** । मरगउ जें परियाणियउ **मरकतरत्नविशेषो येन परिज्ञातः** । तहुं **तस्य रत्नपरीक्षा-परिज्ञानसहितस्य पुरुषस्य** कच्चें कउ गण्णु **काचेन किं गणनं किमपेक्षा तस्येत्यभि-प्रायः** ॥७८॥

अथ कर्मफलं भुञ्जानः सन् योऽसौ रागद्वेषं करोति स कर्म बध्नातीति कथयति—

भुंजंतु वि णिय-कम्म-फलु मोहइँ जो जि करेइ ।
भाउ असुंदरु सुंदरु वि सो पर कम्मु जणेइ ॥७९॥

भुञ्जानोऽपि निजकर्मफलं मोहेन य एव करोति ।
भावं असुन्दरं सुन्दरमपि स परं कर्म जनयति ॥७९॥

भुंजंतु वि इत्यादि । भुंजंतु वि **भुञ्जानोऽपि** । **किम्** । णियकम्मफलु **वीतराग-परमाह्लादरूपशुद्धात्मानुभूतिविपरीतं निजोपार्जितं शुभाशुभकर्मफलं** मोहइं **निर्मोह-शुद्धात्मप्रतिकूलमोहोदयेन** जो जि करेइ **य एव पुरुषः करोति** । **कम्** । भाउ **भावं परिणामम्** । **किंविशिष्टम्** असुंदरु सुंदरु वि **अशुभं शुभमपि** सो पर **स एव भावः** कम्मु जणेइ **शुभाशुभं कर्म जनयति** । **अयमत्र भावार्थः** । **उदयागते कर्मणि योऽसौ**

आत्माको [**मुक्त्वा**] छोड़कर [**अन्यत्**] दूसरी वस्तु [**चित्ते**] ज्ञानियोंके मनमे [**न लगति**] नहीं रुचती । उसका दृष्टांत यह है, कि [**येन**] जिसने [**मरकतः**] मरकतमणि [रत्न] [**परिज्ञातः**] जान लिया, [**तस्य**] उसको [**काचेन**] काँचसे [**किं गणनं**] क्या प्रयोजन है ? ॥ **भावार्थ**— जिसने रत्न पा लिया, उसको काँचके टुकड़ोंकी क्या जरूरत है ? उसी तरह जिसका चित्त आत्मामें लग गया, उसके दूसरे पदार्थोंकी वाछा नही रहती ॥ ७८ ॥

आगे कर्म-फलको भोगता हुआ जो राग द्वेष करता है, वह कर्मोंको बाँधता है— [**य एव**] जो जीव [**निजकर्मफलं**] अपने कर्मोंके फलको [**भुंजानोऽपि**] भोगता हुआ भी [**मोहेन**] मोहसे [**असुन्दरं सुन्दरं अपि**] भले और बुरे [**भावं**] परिणामोंको [करोति] करता है, [**सः**] वह [**परं**] केवल [**कर्म जनयति**] कर्मको उपजाता [बाँधता] है ॥ **भावार्थ**—वीतराग परम आह्लादरूप शुद्धात्माकी अनुभूतिसे विपरीत जो अशुद्ध रागादिक विभाव उनसे उपार्जन किये गये शुभ अशुभ कर्म उनके फलको भोगता हुआ जो अज्ञानी जीव मोहके उदयसे हर्ष विषाद भाव करता है, वह नये कर्मोंका बंध करता है । सारांश यह है, कि जो निज स्वभावसे च्युत हुआ उदयमे

स्वस्वभावच्युतः सन् रागद्वेषौ करोति स एव कर्म बध्नाति ॥७९॥

अथ उदयागते कर्मानुभवे योऽसौरागद्वेषौ न करोति स कर्म न बध्नातीति कथयति—

भुंजंतु वि णिय-कम्म-फलु जो तहिँ राउ ण जाइ ।
सो णवि बंधइ कम्मु पुणु संचिउ जेण विलाइ ॥८०॥

भुञ्जानोऽपि निजकर्मफलं यः तत्र रागं न याति ।
स नैव बध्नाति कर्म पुनः संचितं येन विलीयते ॥८०॥

भुंजंतु वि इत्यादि । भुंजंतु वि **भुञ्जानोऽपि । किम् ।** णियकम्मफलु **निजकर्मफलं निजशुद्धात्मोपलम्भाभावेनोपार्जितं पूर्वं यत्** शुभाशुभं **कर्म** तस्य फलं जो **यो जीवः** तहिं **तत्र कर्मानुभवप्रस्तावे** राउ ण जाइ रागं न **गच्छति वीतरागचिदानन्दैकस्वभावशुद्धात्मतत्त्वभावनोत्पन्नसुखामृततृप्तः सन् रागद्वेषौ न करोति** सो **सः जीवः** णवि बंधइ **नैव बध्नाति । किं न बध्नाति ।** कम्मु **ज्ञानावरणादि कर्म** पुणु **पुनरपि । येन कर्मबन्धाभावपरिणामेन किं भवति ।** संचिउ जेण विलाइ **पूर्वसंचितं कर्म येन वीतरागपरिणामेन विलयं विनाशं गच्छतीति । अत्राह** प्रभाकरभट्टः **। कर्मोदयफलं भुञ्जानोऽपि ज्ञानी कर्मणापि न बध्यते इति सांख्यादयोऽपि वदन्ति तेषां किमिति दूषण दीयते भवद्भिरिति । भगवानाह । ते निजशुद्धात्मानुभूतिलक्षणं वीतरागचारित्रनिरपेक्षा वदन्ति तेन कारणेन तेषां दूषणमिति तात्पर्यम् ॥८०॥**

आये हुए कर्मोंमें राग द्वेष करता है, वही कर्मोंको बाँधता है ॥ ७९ ॥

आगे जो उदयप्राप्त कर्मोंमें राग द्वेष नहीं करता, वह कर्मोंको भी नहीं बाँधता, ऐसा कहते हैं—[**निजकर्मफलं**] अपने बाँधे हुए कर्मोंके फलको [**भुंजानोऽपि**] भोगता हुआ भी [**तत्र**] उस फलके भोगनेमें [**यः**] जो जीव [**रागं**] राग द्वेषको [**न याति**] नहीं प्राप्त होता [**सः**] वह [**पुनः कर्म**] फिर कर्मको [**नैव**] नहीं [**बध्नाति**] बाँधता, [**येन**] जिस कर्मबंधाभाव परिणामसे [**संचितं**] पहले बाँधे हुए कर्म भी [**विलीयते**] नाश हो जाते है ॥ **भावार्थ**—निज शुद्धात्माके ज्ञानके अभावसे उपार्जन किये जो शुभ अशुभ कर्म उनके फलको भोगता हुआ भी वीतराग चिदानंद परमस्वभावरूप शुद्धात्मतत्त्वको भावनासे उत्पन्न अतीन्द्रियसुखरूप अमृतसे तृप्त हुआ जो रागी द्वेषी नहीं होता, वह जीव फिर ज्ञानावरणादि कर्मोंको नहीं बाँधता है, और नये कर्मोंका बंधका अभाव होनेसे प्राचीन कर्मोंकी निर्जरा ही होती है । यह संवरपूर्वक निर्जरा ही मोक्षका मूल है ? ऐसा कथन सुनकर प्रभाकरभट्टने प्रश्न किया, कि हे प्रभो, "कर्मके फलको भोगता हुआ भी ज्ञानसे नहीं बँधता" ऐसा सांख्य आदिक भी कहते हैं, उनको तुम दोष क्यों देते हो ? उसका समाधान श्रीगुरु करते हैं—हम तो आत्मज्ञान संयुक्त ज्ञानी जीवोंकी अपेक्षासे कहते हैं, वे ज्ञानके प्रभावसे कर्म-फल भोगते हुए भी राग द्वेष भाव नहीं करते । इसलिये उनके नये बंधका अभाव है, और जो मिथ्यादृष्टि ज्ञानभावसे बाह्य पूर्वोपाजितकर्म-फलको भोगते हुए रागी द्वेषी होते हैं, उनके अवश्य बंध होता है । इस तरह सांख्य नहीं कहता, वह वीतरागचारित्रसे रहित कथन

अथ यावत्कालमणुमात्रमपि रागं न मुञ्चति तावत्कालं कर्मणा न मुच्यते इति प्रतिपादयति—

जो अणु-मेत्तु वि राउ मणि जाम ण मिल्लइ एत्थु ।
सो णवि मुच्चइ ताम जिय जाणंतु वि परमत्थु ॥८१॥

यः अणुमात्रमपि रागं मनसि यावत् न मुञ्चति अत्र ।
स नैव मुच्यते तावात् जोव जानन्नपि परमार्थम् ॥८१॥

जो इत्यादि । जो यः कर्ता अणुमेत्तु वि अणुमात्रमपि सूक्ष्ममपि राउ रागं वीतरागसदानन्दैकशुद्धात्मनो विलक्षणं पञ्चेन्द्रियविषयसुखाभिलाषरागं मणि मनसि जाम ण मिल्लइ यावन्तं कालं न मुञ्चति एत्थु अत्र जगति सो णवि मुच्चइ स जीवो नैव मुच्यते ज्ञानावरणादिकर्मणा ताव तावन्तं कालं जिय हे जीव । किं कुर्वन्नपि । जाणंतु वि वीतरागानुष्ठानरहितः सन् शब्दमात्रेण जानन्नपि । कं जानन् । परमत्थु परमार्थशब्दवाच्यनिजशुद्धात्मतत्त्वमिति । अयमत्र भावार्थः । निजशुद्धात्मस्वभावज्ञानेऽपि शुद्धात्मोपलब्धिलक्षणवीतरागचारित्रभावनां विना मोक्षं न लभत इति ॥८१॥

अथ निर्विकल्पात्मभावनाशून्यः शास्त्रं पठन्नपि तपश्चरणं कुर्वन्नपि परमार्थं न वेत्तीति कथयति—

बुज्झइ सत्थइँ तउ चरइ पर परमत्थु ण वेइ ।
ताव ण मुंचइ जाम णवि इहु परमत्थु मुणेइ ॥८२॥

बुध्यते शास्त्राणि तपः चरति परं परमार्थं न वेत्ति ।
तावत् न मुच्यते यावत् नैव एनं परमार्थं मनुते ॥८२॥

बुज्झइ इत्यादि । बुज्झइ बुध्यते । कानि सत्थइँ शास्त्राणि न केवलं शास्त्राणि बुध्यते तउ चरइ तपश्चरति पर परं किंतु परमत्थु ण वेइ परमार्थं न वेत्ति न

करता है । इसलिये उन सांख्यादिकोंको दूषण दिया जाता है । यह तात्पर्य जानना ॥८०॥

आगे जबतक परमाणुमात्र भी रागको नहीं छोड़ता—धारण करता है, तबतक कर्मोंसे नहीं छूटता, ऐसा कथन करते हैं—[यः] जो जीव [अणुमात्रं अपि] थोड़ा भी [रागं] राग [मनसि] मनमेंसे [यावत्] जबतक [अत्र] इस संसारमें [न मुंचति] नहीं छोड़ देता है, [तावत्] तबतक [जीव] हे जीव, [परमार्थं] निज शुद्धात्मतत्त्वको [जानन्नपि] शब्दसे केवल जानता हुआ भी [नैव] नहीं [मुच्यते] मुक्त होता ॥ भावार्थ—जो वीतराग सदा आनंदरूप शुद्धात्मभावसे रहित पंचेन्द्रियोंके विषयोंकी इच्छा रखता है, मनमें थोड़ासा भी राग रखता है, वह आगमज्ञानसे आत्माको शब्दमात्र जानता हुआ भी वीतरागचारित्रकी भावनाके बिना मोक्षको नहीं पाता ॥८१॥

आगे जो निर्विकल्प आत्म-भावनासे शून्य है, वह शास्त्रको पढ़ता हुआ भी तथा तपश्चरण करता हुआ भी परमार्थको नहीं जानता है, ऐसा कहते हैं—[शास्त्राणि] शास्त्रोंको [बुध्यते]

जानाति। कस्मान्न वेत्ति। यद्यपि व्यवहारेण परमात्मप्रतिपादकशास्त्रेण ज्ञायते तथापि निश्चयेन वीतरागस्वसंवेदनज्ञानेन परिच्छिद्यते। यद्यप्यनशनादिद्वादशविधतपश्चरणेन बहिरङ्गसहकारिकारणभूतेन साध्यते तथापि निश्चयेन निर्विकल्पशुद्धात्मविश्रान्तिलक्षणवीतरागचारित्रसाध्यो योऽसौ परमार्थशब्दवाच्यो निजशुद्धात्मा तत्र निरन्तरानुष्ठानाभावात् ताव ण मुंचइ तावन्तं कालं न मुच्यते। केन। कर्मणा जाम णत्ति इहु परमत्थु मुणेइ यावन्तं कालं नैवैनं पूर्वोक्तलक्षणं परमार्थं मनुते जानाति श्रद्धत्ते सम्यगनुभवतीति। इदमत्र तात्पर्यम्। यथा प्रदीपेन विवक्षितं वस्तु निरीक्ष्य गृहीत्वा च प्रदीपस्त्यज्यते तथा शुद्धात्मतत्त्वप्रतिपादकशास्त्रेण शुद्धात्मतत्त्वं ज्ञात्वा गृहीत्वा च प्रदीपस्थानीयः शास्त्रविकल्पस्त्यज्यत इति ॥८२॥

अथ योऽसौ शास्त्रं पठन्नपि विकल्पं च मुञ्चति निश्चयेन देहस्थं शुद्धात्मानं न मन्यते स जडो भवतीति प्रतिपादयति--

सत्थु पढंतु वि होइ जडु जो ण हणेइ वियप्पु।
देहि वसंतु वि णिम्मलउ णवि मण्णइ परमप्पु ॥८३॥

शास्त्रं पठन्नपि भवति जडः यः न हन्ति विकल्पम्।
देहे वसन्तमपि निर्मलं नैव मन्यते परमात्मानम् ॥८३॥

सत्थु इत्यादि। सत्थु पढंतु वि शास्त्रं पठन्नपि होइ जडु स जडो भवति यः

जानता है, [तपः चरति] और तपस्या करता है, [परं] लेकिन [परमार्थं] परमात्माको [नवेत्ति] नहीं जानता है, [यावत्] और जबतक [एवं] पूर्व कहे हुए [परमार्थं] परमात्माको [नैव मनुते] नहीं जानता, या अच्छी तरह अनुभव नहीं करता है, [तावत्] तबतक [न मुच्यते] नहीं छूटता॥ **भावार्थ**—यद्यपि व्यवहारनयसे आत्मा अध्यात्मशास्त्रोंसे जाना जाता है, तो भी निश्चयनयसे वीतरागस्वसंवेदनज्ञान ही से जानने योग्य है, यद्यपि बाह्य सहकारीकारण अनशनादि बारह प्रकारके तपसे साधा जाता है, तो भी निश्चयनयसे निर्विकल्पवीतरागचारित्र ही से आत्माकी सिद्धि है। जिस वीतरागचारित्रका शुद्धात्मामें विश्राम होना ही लक्षण है। सो वीतरागचारित्रके आगमज्ञानसे तथा बाह्य तपसे आत्मज्ञानकी सिद्धि नहीं है। जबतक निज शुद्धात्मतत्त्वके स्वरूपका आचरण नहीं है, तबतक कर्मोंसे नहीं छूट सकता। यह निःसन्देह जानना, जबतक परमतत्त्वको न जाने, न श्रद्धा करे, न अनुभवे, तबतक कर्मबन्धसे नहीं छूटता। इससे यह निश्चय हुआ, कि कर्मबंधसे छूटनेका कारण एक आत्मज्ञान ही है, और शास्त्रका ज्ञान भी आत्मज्ञानके लिए ही किया जाता है, जैसे दीपकसे वस्तुको देखकर वस्तुको उठा लेते हैं, और दीपकका छोड़ देते हैं, उसी तरह शुद्धात्मतत्त्वके उपदेश करनेवाले जो अध्यात्मशास्त्र उनसे शुद्धात्मतत्त्वको जानकर उस शुद्धात्मतत्त्वका अनुभव करना चाहिए, और शास्त्रका विकल्प छोड़ना चाहिये। शास्त्र तो दीपकके समान है, तथा आत्मवस्तु रत्नके समान है॥८२॥

आगे जो शास्त्रको पढ़ करके भी विकल्पको नहीं छोड़ता, और निश्चयसे शुद्धात्माको नहीं

किं करोति । जो ण हणेइ वियप्पु यः कर्ता शास्त्राभ्यासफलभूतस्य रागादिविकल्परहितस्य निजशुद्धात्मस्वभावस्य प्रतिपक्षभूतं मिथ्यात्वरागादिविकल्पं न हन्ति । न केवलं विकल्पं न हन्ति । देहि वसंतु वि देहे वसन्तमपि णिम्मलउ निर्मलं कर्ममलरहितं णवि मण्णइ नैव मन्यते न श्रद्धत्ते । कम् । परमप्पु निजपरमात्मानमिति । अत्रेदं व्याख्यानं ज्ञात्वा त्रिगुप्तसमाधिं कृत्वा च स्वयं भावनीयम् । यदा तु त्रिगुप्तिगुप्तसमाधिं कर्तुं नायाति तदा विषयकषायवञ्चनार्थं शुद्धात्मभावनास्मरणदृढीकरणार्थं च बहिर्विषये व्यवहारज्ञानवृद्ध्यर्थं च परेषां कथनीयं किंतु तथापि परप्रतिपादनव्याजेन मुख्यवृत्त्या स्वकीयजीव एव संबोधनीयः । कथमिति चेत् । इदमनुपपन्नमिदं व्याख्यानं न भवति मदीयमनसि यदि समीचीनं न प्रतिभाति तर्हि त्वमेव स्वयं किं न भावयसीति तात्पर्यम् ॥८३॥

अथ बोधार्थं शास्त्रं पठन्नपि यस्य विशुद्धात्मप्रतीतिलक्षणो बोधो नास्ति स मूढो भवतीति प्रतिपादयति—

बोह-णिमित्तें सत्थु किल लोइ पढिज्जइ इत्थु ।
तेण वि बोहु ण जासु वरु सो किं मूढु ण तत्थु ॥८४॥

बोधनिमित्तेन शास्त्रं किल लोके पठ्यते अत्र ।
तेनापि बोधो न यस्य वरः स किं मूढो न तथ्यम् ॥८४॥

बोह इत्यादि । बोधनिमित्तेन किल शास्त्रं लोके पठ्यते अत्र तेनैव कारणेन

मानता जो कि शुद्धात्मदेव देहरूपी देवालयमें मौजूद है, उसे न ध्यावता है, वह मूर्ख है. ऐसा कहते है—[य] जो जीव [शास्त्रं] शास्त्रको [पठन्नपि] पढ़ता हुआ भी [विकल्पं] विकल्पको [न [हंति] नही दूर करता, (मेटता) वह [जडो भवति] मूर्ख है, जो विकल्प नही मेंटता, वह [देहे] शरीरमे [वसंतमपि] रहते हुए भी [निर्मलं परमात्मानं] निर्मल परमात्माको [नैव-मन्यते] नही श्रद्धानमे लाता ॥ भावार्थ—शास्त्रके अभ्यासका तो फल यह है, कि रागादि विकल्पोंको दूर करना, और निज शुद्धात्माको ध्यावना । इसलिए इस व्याख्यानको जानकर तीन गुप्तिमें अचल हो परमसमाधिमें आरूढ होके निजस्वरूपका ध्यान करना । लेकिन जबतक तोन गुप्तियाँ न हों, परमसमाधि न आवे, (हो सके) तबतक विषय कषायोंके हटानेके लिये परजीवोंका धर्मोपदेश देना, उसमें भो परके उपदेशके बहानेसे मुख्यताकर अपना जीव हीको संबोधना । वह इस तरह है, कि परको उपदेश देते अपनेको समझावे । जो मार्ग दूसरोंको छुड़ावे, वह आप कैसे करे । इससे मुख्य संबोधन अपना ही है । परजीवोंको ऐसा ही उपदेश है, जो यह बात मेरे मनमें अच्छी नही लगती, तो तुमको भी भली नहीं लगती होगी, तुम भी अपने मनमें विचार करो ॥८३॥

आगे ज्ञानके लिए शास्त्रको पढ़ते हुए भी जिसके आत्म-ज्ञान नहीं, वह मूर्ख है, ऐसा कथन करते हैं—[अत्र लोके] इस लोकमें [किल] नियमसे [बोधनिमित्तेन] ज्ञानके निमित्त [शास्त्रं]

बोधो न यस्य कथंभूतः । वरो विशिष्टः । स किं मूढो न भवति किंतु भवत्येव तथ्यमिति । तद्यथा । अत्र यद्यपि लोकव्यवहारेण कविगमकवादिवाग्मित्वादिलक्षण-शास्त्रजनितो बोधो भण्यते तथापि निश्चयेन परमात्मप्रकाशकाध्यात्मशास्त्रोत्पन्नो वीतरागस्वसंवेदनरूपः स एव बोधो ग्राह्यो न चान्यः । तेनानुबोधेन विना शास्त्रे पठितेऽपि मूढो भवतीति । अत्र यः कोऽपि परमात्मबोधजनकमल्पशास्त्रं ज्ञात्वापि वीतरागभावनां करोति स सिद्धयतीति । तथा चोक्तम्---"वीरा वेरग्गपरा थोवं पि हु सिक्खिऊण सिज्झंति । ण हु सिज्झंति विरागेण विणा पढिदेसु वि सव्वसत्थेसु ।।" परं किन्तु---"अक्खरडा जोयंतु ठिउ अप्पि ण दिण्णउ चित्तु । कणविरहियउ पलालु जिमु पर संगहिउ बहुत्तु ।।" इत्यादि पाठमात्रं गृहीत्वा परेषां बहुशास्त्रज्ञानिनां दूषणा न कर्तव्या । तैर्बहुश्रुतैरप्यन्येषामल्पश्रुततपोधनानां दूषणा न कर्तव्या । कस्मा-दिति चेत् । दूषणे कृते सति परस्परं रागद्वेषोत्पत्तिर्भवति तेन ज्ञानतपश्चरणादिकं नश्यतीति भावार्थः ।।८४।।

अथ वीतरागस्वसंवेदनज्ञानरहितानां तीर्थभ्रमणेन मोक्षो न भवतीति कथयति--

तित्थइँ तित्थु भमंताइँ मूढहँ मोक्खु ण होइ ।
णाण-विवज्जिउ जेण जिय मुणिवरु होइ ण सोइ ।।८५।।

शास्त्र [पठ्यते] पढ़े जाते हैं, [तेनापि] परंतु शास्त्रके पढ़नेसे भी [यस्य] जिसको [वरः बोधः न] उत्तम ज्ञान नहीं हुआ, [स] वह [किं] क्या [मूढः न] मूर्ख नहीं है ? [तथ्यं] मूर्ख ही है इसमें संदेह नहीं ।। **भावार्थ**—इस लोकमें यद्यपि लोक व्यवहारसे नवीन कविताका कर्ता कवि, प्राचीन काव्योंकी टीकाके कर्त्ताको गमक, जिससे वादमें कोई न जीत सके ऐसा वादित्व, और श्रोताओं के मनको अनुरागी करनेवाला शास्त्रका वक्ता होनेरूप वाग्मित्व, इत्यादि लक्षणोंवाला शास्त्रजनित ज्ञान होता है, तो भी निश्चयनयसे वीतरागस्वसंवेदनरूप ही ज्ञानकी अध्यात्म-शास्त्रोमें प्रशंसा की गयी है । इसलिये स्वसंवेदन ज्ञानके बिना शास्त्रोंके पढ़े हुए भी मूर्ख है । और जो कोई परमात्मज्ञानके उत्पन्न करनेवाला छोटे थोड़े शास्त्रोंको भी जानकर वीतराग स्वसंवेदनज्ञानकी भावना करते हैं, वे मुक्त हो जाते हैं । ऐसा ही कथन ग्रन्थोंमे हरएक जगह कहा है, कि वैराग्यमें लगे हुए जो मोहशत्रुको जीतनेवाले हैं, वे थोड़े शास्त्रोंको ही पढ़कर सुधर जाते हैं—मुक्त हो जाते हैं, और वैराग्यके बिना सब शास्त्रोंको पढ़ते हुए भी मुक्त नहीं होते । यह निश्चय जानना परंतु यह कथन अपेक्षासे है । इस बहानेसे शास्त्र पढ़नेका अभ्यास नहीं छोड़ना, और जो विशेष शास्त्रके पाठी हैं, उनको दूषण न देना । जो शास्त्रके अक्षर बता रहा है, और आत्मामें चित्त नहीं लगाया वह ऐसे जानना कि जैसे किसीने कण रहित बहुत भूसेका ढेर कर लिया हो, वह किसी कामका नहीं है । इत्यादि पीठिकामात्र सुनकर जो विशेष शास्त्रज्ञ हैं, उनकी निंदा नहीं करनी, और जो बहुश्रुत हैं, उनको भी अल्प शास्त्रज्ञोंकी निंदा नहीं करनी चाहिए । क्योंकि परके दोष ग्रहण करनेसे राग द्वेषकी उत्पत्ति होती है, उससे ज्ञान और तपका नाश होता है, यह निश्चयसे जानना ।।८४।।

आगे वीतरागस्वसंवेदनज्ञानसे रहित जीवोंको तीर्थ-भ्रमण करनेसे भी मोक्ष नहीं है ऐसा कहते

तीर्थं तीर्थं भ्रमतां मूढानां मोक्षो न भवति।
ज्ञानविवर्जितो येन जीव मुनिवरो भवति न स एव ॥८५॥

तीर्थं तीर्थं प्रति भ्रमतां मूढात्मनां मोक्षो न भवति। कस्मादिति चेत्। ज्ञानविवर्जितो येन कारणेन हे जीव मुनिवरो न भवति स एवेति। तथाहि। निर्दोषिपरमात्मभावनोत्पन्नवीतरागपरमाह्लादस्यन्दिसुन्दरानन्दरूपनिर्मलनीरपूरप्रवाहनिर्झर - ज्ञानदर्शनादिगुणसमूहचन्दनादिद्रुमवनराजितं देवेन्द्रचक्रवर्तिगणधरादिभव्यजीवतीर्थयात्रिकसमूहश्रवणसुखकरदिव्यध्वनिरूपराजहंसप्रभृतिविविधपक्षिकोलाहलमनोहरं यदर्हद्वीतरागसर्वज्ञस्वरूपं तदेव निश्चयेन गङ्गादितीर्थं न लोकव्यवहारप्रसिद्धं गङ्गादिकम्। परमनिश्चयेन तु जिनेश्वरपरमतीर्थसदृशं संसारतरणोपायकारणभूतत्वाद्वीतरागनिर्विकल्पपरमसमाधिरतानां निजशुद्धात्मतत्त्वस्मरणमेव तीर्थं, व्यवहारेण तु तीर्थंकरपरमदेवादिगुणस्मरणहेतुभूतं मुख्यवृत्त्या पुण्यबन्धकारणं तन्निर्वाणस्थानादिकं च तीर्थमिति। अयमत्र भावार्थः। पूर्वोक्तं निश्चयतीर्थं श्रद्धानपरिज्ञानानुष्ठानरहितानामज्ञानिनां शेषतीर्थं मुक्तिकारणं न भवतीति ॥८५॥

अथ ज्ञानिनां तथैवाज्ञानिनां च यतीनामन्तरं दर्शयति—

णाणिहिँ मूढहँ मुणिवरहँ अंतरु होइ महंतु।
देहु वि मिल्लइ णाणियउ जीवहँ भिण्णु मुणंतु ॥८६॥

ज्ञानिनां मूढाना मुनिवराणां अन्तरं भवति महत्।
देहमपि मुञ्चति ज्ञानी जीवाद्भिन्नं मन्यमानः ॥८६॥

हे—[**तीर्थं तीर्थं**] तीर्थ तीर्थ प्रति [**भ्रमतां**] भ्रमण करनेवाले [**मूढानां**] मूर्खोंको [**मोक्षः**] मुक्ति [**न भवति**] नहीं होती, [**जीव**] हे जीव, [**येन**] क्योंकि जो [**ज्ञानविवर्जितः**] ज्ञानरहित है, [**स एव**] वह [**मुनिवरः न भवति**] मुनीश्वर नहीं हैं, संसारी हैं। मुनीश्वर तो वे ही है, जो समस्त विकल्पजालोंसे रहित होके अपने स्वरूपमें रमे, वे ही मोक्ष पाते हैं॥ **भावार्थ**—निर्दोष परमात्माकी भावनासे उत्पन्न हुआ जो वीतराग परम आनन्दरूप निर्मल जल उसके धारण करनेवाले और ज्ञान दर्शनादि गुणोंके समूहरूपी चंदनादि वृक्षोंके वनोंसे शोभित तथा देवेन्द्र चक्रवर्ती गणधरादि भव्यजीवरूपी तीर्थ-यात्रियोंके कानोंको सुखकारी ऐसी दिव्यध्वनिसे शोभायमान और अनेक मुनिजनरूपी राजहंसोंको आदि लेकर नाना तरहके पक्षियोंके शब्दोंसे महामनोहर जो अरहंत वीतराग सर्वज्ञ वे ही निश्चयसे महातीर्थ हैं, उनके समान अन्य तीर्थ नहीं हैं। वे ही संसारके तरनेके कारण परमतीर्थ हैं। जो परम समाधिमें लीन महामुनि है, उनके वे ही तीर्थ हैं, निश्चयसे निज शुद्धात्मतत्त्वके ध्यानके समान दूसरा कोई तीर्थ नहीं है, और व्यवहारनयसे तीर्थंकर परमदेवादिके गुणस्मरणके कारण मुख्यतासे शुभ बंधके कारण ऐसे जो कैलास, सम्मेदशिखर आदि निर्वाणस्थान हैं, वे भी व्यवहारमात्र तीर्थ कहे हैं। जो तीर्थ-तीर्थ प्रतिभ्रमण करे, और निज तीर्थका जिसके श्रद्धान परिज्ञान आचरण नहीं हो, वह अज्ञानी है। उसके तीर्थ भ्रमनेसे मोक्ष नहीं हो सकता ॥८५॥

ज्ञानिनां मूढानां च मुनिवराणां अन्तरं विशेषो भवति । कथंभूतम् । महत् । कस्मादिति चेत् । देहमपि मुञ्चति । कोऽसौ । ज्ञानी । किं कुर्वन् सन् । जीवात्स-काशाद्भिन्नं मन्यमानो जानन् इति । तथा च । वीतरागस्वसंवेदनज्ञानी पुत्रकलत्रादि-बहिर्द्रव्यं तावद्दूरे तिष्ठतु शुद्धबुद्धैकस्वभावात् स्वशुद्धात्मस्वरूपात्सकाशात् पृथग्भूतं जानन् स्वकीयदेहमपि त्यजति। मूढात्मा पुनः स्वीकरोति इति तात्पर्यम् ॥८६॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये पञ्चदशसूत्रैर्वीतरागस्वसंवेदनज्ञानमुख्यत्वेन द्वितीयमन्तरस्थलं समाप्तम् । तदनन्तरं तत्रैव महास्थलमध्ये सूत्राष्टकपर्यन्तं परिग्रहत्यागव्याख्यानमुख्यत्वेन तृतीयमन्तरस्थलं प्रारभ्यते ।

तद्यथा--

लेणहँ इच्छइ मूढु पर भुवणु वि एहु असेसु ।
बहु विह-धम्म-मिसेण जिय दोहिँ वि एहु विसेसु ॥८७॥

लातुं इच्छति मूढः परं भुवनमपि एतद् अशेषम् ।
बहुविधधर्ममिषेण जीव द्वयोः अपि एष विशेषः ॥८७॥

लातुं ग्रहीतुं **इच्छति** । कोऽसौ । **मूढो** बहिरात्मा । **परं** कोऽर्थः, नियमेन । किम् । **भुवनमप्येतत्तु अशेषं** समस्तम् । केन कृत्वा । **बहुविधधर्ममिषेण** व्याजेन । हे **जीव द्वयोरप्येष विशेषः** । कयोर्द्वयोः । पूर्वोक्तसूत्रकथितज्ञानि जीवस्यात्र सूत्रोक्त पुनरज्ञानि-

---

आगे ज्ञानी और अज्ञानी यतियोंमे बहुत बड़ा भेद दिखलाते हैं—[**ज्ञानिनां**] सम्यग्दृष्टी भावलिंगी [**मूढानां**] मिथ्यादृष्टी द्रव्यलिंगी [**मुनिवराणां**] मुनियोंमें [**महत् अन्तरं**] बड़ाभारी भेद [**भवति**] है । [**ज्ञानी**] क्योंकि ज्ञानी मुनि तो [**देहं अपि**] शरीरको भी [**जीवाद्भिन्नं**] जीव से जुदा [**मन्यमानः**] जानकर [**मुंचति**] छोड़ देते है, अर्थात् शरीरका भी ममत्व छोड़ देते है, तो फिर पुत्र स्त्री आदिका क्या कहना है ? ये तो प्रत्यक्षसे जुदे हैं, और द्रव्यलिंगीमुनि लिंग (भेष) में आत्म-बुद्धिको रखता है ॥ **भावार्थ**—वीतरागस्वसंवेदनज्ञानी महामुनि मन वचन काय इन तीनोंसे अपनेको भिन्न जानता है, द्रव्यकर्म भावकर्म नोकर्मादिकसे जिसको ममता नहीं है, पिता माता पुत्र कलत्रादिकी तो बात अलग रहे जो अपने आत्म-स्वभावसे निज देहको ही जुदा जानता है । जिसके परवस्तुमें आत्मभाव नहीं है । और मूढात्मा परभावोंको अपने जानता है । यही ज्ञानी और अज्ञानीमे अन्तर है । परको अपना मानें वह बँधता है, और न मानें वह मुक्त होता है । यह निश्चयसे जानना ॥८६॥ इस प्रकार इकतालीस दोहोंके महास्थलके मध्यमे पन्द्रह दोहोंमे वीतराग-स्वसंवेदनज्ञानकी मुख्यतासे दूसरा अन्तरस्थल समाप्त हुआ ।

अब परिग्रहत्यागके व्याख्यानको आठ दोहोमें कहते हैं— [**द्वयोः अपि**] ज्ञानी और अज्ञानी इन दोनोंमें [**एष विशेष**.] इतना ही भेद है, कि [**मूढ**] अज्ञानीजन [**बहुविधधर्ममिषेण**] अनेक तरहके धर्मके बहानेसे [**एतद् अशेषं**] इस समस्त [**भुवनं अपि**] जगत्को ही [**परं**] नियमसे [**लातुं इच्छति**] लेनेकी इच्छा करता है, अर्थात् सब संसारके भोगोकी इच्छा करता है, तपश्चरणादि

जीवस्य च । तथाहि । वीतरागसहजानन्दैकसुखास्वादरूपः स्वशुद्धात्मैव उपादेय इति रुचिरूपं सम्यग्दर्शनं, तस्यैव परमात्मानः समस्तमिथ्यात्वरागाद्यास्रवेभ्यः पृथग्रूपेण परिच्छित्तिरूपं सम्यग्ज्ञानं, तत्रैव रागादिपरिहाररूपेण निश्चलचित्तवृत्तिः सम्यक्चारित्रम् इत्येवं निश्चयरत्नत्रयस्वरूपं तत्त्रयात्मकमात्मानमरोचमानस्तथैवाजानन्नभावयंश्च मूढात्मा । किं करोति । समस्तं जगद्धर्मव्याजेन ग्रहीतुमिच्छति, पूर्वोक्तज्ञानी तु त्यक्तुमिच्छतीति भावार्थः ॥८७॥

अथ शिष्यकरणाद्यनुष्ठानेन पुस्तकाद्युपकरणेनाज्ञानी तुष्यति, ज्ञानी पुनर्बन्धहेतुं जानन् सन् लज्जां करोतीति प्रकटयति––

चेल्ला-चेल्ली-पुत्थियहिँ तूसइ मूढु णिभंतु ।
एयहिँ लज्जइ णाणियउ बंधहँ हेउ मुणंतु ॥८८॥

शिष्यार्जिकापुस्तकैः तुष्यति मूढो निर्भ्रान्तः ।
एतैः लज्जते ज्ञानी बन्धस्य हेतुं जानन् ॥८८॥

शिष्यार्जिकादीक्षादानेन पुस्तकप्रभृत्युपकरणैश्च तुष्यति संतोषं करोति । कोऽसौ । मूढः । कथं भूतः । निर्भ्रान्तिः एतैर्बहिर्द्रव्यैर्लज्जां करोति । कोऽसौ । ज्ञानी । किं कुर्वन्नपि । पुण्यबन्धहेतुं जानन्नपि । तथा च । पूर्वसूत्रोक्तसम्यग्दर्शनचारित्रलक्षणं निजशुद्धात्मस्वभावमश्रद्दधानो विशिष्टभेदज्ञानेनाजानंश्च तथैव वीतरागचारित्रेणाभावयंश्च मूढात्मा । किं करोति । पुण्यबन्धकारणमपि जिनदीक्षादानादिशुभानुष्ठानं

कायक्लेशसे स्वर्गादिके सुखोंको चाहता है, और ज्ञानीजन कर्मोंके क्षयके लिये तपश्चरणादि करता है, भोगोंका अभिलाषी नहीं है ॥ **भावार्थ**—वीतराग सहजानंद अखंडसुखका आस्वादरूप जो शुद्धात्मा वही आराधने योग्य है, ऐसी जो रुचि वह सम्यग्दर्शन, समस्त मिथ्यात्व रागादि आस्रवसे भिन्नरूप उसी परमात्माका जो ज्ञान, वह सम्यग्ज्ञान और उसीमें निश्चल चित्तकी वृत्ति वह सम्यक्चारित्र, यह निश्चयरत्नत्रयरूप जो शुद्धात्माकी रुचि जिसके नहीं, ऐसा मूढजन आत्माको नहीं जानता हुआ, और नहीं अनुभवता हुआ जगत्के समस्त भोगोंको धर्मके बहानेसे लेना चाहता है, तथा ज्ञानीजन समस्त भोगोंसे उदास है, जो विद्यमान भोग थे, वे सब छोड़ दिये और आगामी वांछा नहीं है ऐसा जानना ॥८७॥

आगे शिष्योंका करना, पुस्तकादिका संग्रह करना, इन बातोंसे अज्ञानी प्रसन्न होता है, और ज्ञानीजन इनको बंधके कारण जानता हुआ इनसे रागभाव नहीं करता, इनके संग्रहमे लज्जावान् होता है—[**मूढ**] अज्ञानीजन [**शिष्यार्जिकापुस्तकैः**] चेला चेली पुस्तकादिकसे [**तुष्यति**] हर्षित होता है, [**निर्भ्रान्तः**] इसमे कुछ संदेह नहीं है, [**ज्ञानी**] और ज्ञानीजन [**एतैः**] इन बाह्य पदार्थोंसे [**लज्जते**] शरमाता है, क्योंकि इन सबोंको [**बंधस्य हेतुं**] बंधका कारण [**जानन्**] जानता है ॥ **भावार्थ**—सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्ररूप जो निज शुद्धात्मा उसको न श्रद्धान करता, न जानता और न अनुभव करता जो मूढात्मा वह पुण्यबंधके कारण जिनदीक्षा दानादि शुभ आचरण और पुस्तकादि उपकरण उनको मुक्तिके कारण मानता है, और ज्ञानीजन इनको

पुस्तकाद्युपकरणं वा मुक्तिकारणं मन्यते । ज्ञानी तु यद्यपि साक्षात्पुण्यबन्धकारणं मन्यते परंपरया मुक्तिकारणं च तथापि निश्चयेन मुक्तिकारणं न मन्यते इति तात्पर्यम् ॥८८॥

अथ चट्टपट्टकुण्डिकाद्युपकरणैर्मोहमुत्पाद्य मुनिवराणां उत्पथे पात्यते[?] इति प्रतिपादयति—

चट्टहिँ पट्टहिँ कुंडियहिँ चेल्ला-चेल्लियएहिँ ।
मोहु जणेविणु मुणिवरहँ उप्पहि पाडिय तेहिँ ॥८९॥

चट्टैः पट्टैः कुण्डिकाभिः शिष्यार्जिकाभिः ।
मोहं जनयित्वा मुनिवराणां उत्पथे पातितास्ते ॥८९॥

चट्टपट्टकुण्डिकाद्युपकरणैः शिष्यार्जिकापरिवारैश्च कर्तृभूतैर्मोहं जनयित्वा । केषाम् । मुनिवराणां, पश्चादुन्मार्गे पातितास्ते तु तैः । तथाहि । तथा कश्चिदजीर्णभयेन विशिष्टाहारं त्यक्त्वा लङ्घनं कुर्वन्नास्ते पश्चादजीर्णप्रतिपक्षभूतं किमपि मिष्टौषधं गृहीत्वा जिह्वालाम्पट्येनौषधेनापि अजीर्णं करोत्यज्ञानी इति, न च ज्ञानीति, तथा कोऽपि तपोधनो विनीतवनितादिकं मोहभयेन त्यक्त्वा जिनदीक्षां गृहीत्वा च शुद्धबुद्धैकस्वभावनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनीरोगत्वप्रतिपक्षभूतमजीर्णरोगस्थानीयं मोहमुत्पाद्यात्मनः । किं कृत्वा । किमप्यौषधस्थानीयमुप-

---

साक्षात् पुण्यबंधके कारण जानता है, परम्पराय मुक्तिके कारण मानता है। यद्यपि व्यवहारनयकर बाह्य सामग्रीको धर्मका साधन जानता है, तो भी ऐसा मानता है, कि निश्चयनयसे मुक्तिके कारण नहीं हैं ॥८८॥

आगे कमंडलु पीछी पुस्तकादि उपकरण और शिष्यादिका संघ ये मुनियोंको मोह उत्पन्न कराके खोटे मार्गमें पटक देते हैं—[चट्टैः पट्टैः कुंडिकाभिः] पीछी कमंडल पुस्तक और [शिष्यार्जिकाभिः] मुनि श्रावकरूप चेला, अर्जिका, श्राविका इत्यादि चेली—ये संघ [मुनिवराणां] मुनिवरोंको [मोहं जनयित्वा] मोह उत्पन्न कराके [तैः] वे [उत्पथे] उन्मार्गमें (खोटे मार्गमें) [पातिताः] डाल देते हैं ॥ **भावार्थ**—जैसे कोई अजीर्णके भयसे मनोज्ञ आहारको छोड़कर लंघन करता है, पीछे अजीर्णको दूर करनेवाली कोई मीठी औषधिको लेकर जिह्वाका लपटी हाके मात्रासे अधिक लेके औषधिका ही अजीर्ण करता है, उसी तरह अज्ञानी कोई द्रव्यलिंगी यती विनयवान् पतिव्रता स्त्री आदिको मोहके डरसे छोड़कर जिनदीक्षा लेके अजीर्ण समान मोहके दूर करनेके लिये वैराग्य धारण करके औषधि समान जो उपकरणादि उनको ही ग्रहण करके उन्हीका अनुरागी (प्रेमी) होता है, उनकी वृद्धिसे सुख मानता है, वह औषधिका ही अजीर्ण करता है। मात्राप्रमाण औषधि लेवे, तो वह रोगको हर सके। यदि औषधिका ही अजीर्ण करे—मात्रासे अधिक लेवे, तो रोग नहीं जाता, उलटी रोगकी वृद्धि हो होती है। यह निःसंदेह जानना। इससे यह निश्चय हुआ जो परमोपेक्षासंयम अर्थात् निर्विकल्प परमसमाधिरूप तीन गुप्तिमयी परम शुद्धोपयोगरूप संयमके धारक है, उनके शुद्धात्माकी अनुभूतिसे विपरीत सब ही परिग्रह त्यागने योग्य हैं। शुद्धोपयोगी मुनियोंके कुछ भी परिग्रह नहीं है, और जिनके परमोपेक्षा संयम नहीं लेकिन व्यवहार संयम है, उनके भावसंयमकी

करणादिकं गृहीत्वा । कोऽसावज्ञानी न तु ज्ञानीति । इदमत्र तात्पर्यम् । परमोपेक्षा-संयमधरेण शुद्धात्मानुभूतिप्रतिपक्षभूतः सर्वोऽपि तावत्परिग्रहस्त्याज्य । परमोपेक्षा-संयमाभावे तु वीतरागशुद्धात्मानुभूतिभावसंयमरक्षणार्थं विशिष्टसंहननादिशक्त्यभावे सति यद्यपि तपःपर्यायशरीरसहकारिभूतमन्नपानसंयमशौचज्ञानोपकरणतृणमयप्रावर-णादिकं किमपि गृह्णाति तथापि ममत्वं न करोतीति । तथा चोक्तम्—"रम्येषु वस्तु-वनितादिषु वीतमोहो मुह्येद् वृथा किमिति संयमसाधनेषु । धीमान् किमामयभयात्प-रिहृत्य भुक्तिं पीत्वौषधं व्रजति जातुचिदप्यजीर्णम् ॥" ॥८९॥

अथ केनापि जिनदीक्षां गृहीत्वा शिरोलुञ्चनं कृत्वापि सर्वसंगपरित्यागमकुर्वतात्मा वञ्चित इति निरूपयति—–

केण वि अप्पउ वंचियउ सिरु लुंचिवि छारेण ।
सयल वि संग ण परिहरिय जिणवर-लिंगधरेण ॥९०॥

केनापि आत्मा वञ्चितः शिरो लुञ्चित्वा क्षारेण ।
सकला अपि संगा न परिहृता जिनवरलिङ्गधरेण ॥९०॥

केनाप्यात्मा वञ्चितः । किं कृत्वा । शिरोलुञ्चनं कृत्वा । केन । भस्मना । कस्मा-दिति चेत् । यतः सर्वेऽपि संगा न परिहृताः । कथंभूतेन भूत्वा । जिनवरलिङ्गधार-केणेति । तद्यथा । वीतरागनिर्विकल्पनिजानन्दैकरूपसुखरसास्वादपरिणतपरमात्मभाव-

---

व्यवहार संयम है, उनके भावसंयमकी रक्षाके निमित्त हीन संहननके होनेपर उत्कृष्ट शक्तिके अभाव-से यद्यपि तपका साधन शरीरकी रक्षाके निमित्त अन्न जलका ग्रहण होता है, उस अन्न जलके लेनेसे मल-मूत्रादिकी बाधा भी होती है, इसलिये शौचका उपकरण कमंडलु, और संयमोपकरण पीछी, और ज्ञानोपकरण पुस्तक इनको ग्रहण करते हैं, तो भी इनमें ममता नहीं है, प्रयोजनमात्र प्रथम अवस्थामें धारते हैं। ऐसा दूसरी जगह "रम्येषु" इत्यादिसे कहा है, कि मनोज्ञ स्त्री आदिक वस्तुओंमें जिसने मोह तोड दिया है, ऐसा महामुनि संयमके साधन पुस्तक पीछी कमंडलु आदि उपकरणोंमे वृथा मोहको कैसे कर सकता है ? कभी नहीं कर सकता। जैसे कोई बुद्धिमान पुरुष रोगके भयसे अजीर्णको दूर करना चाहे और अजीर्णके दूर करनेके लिये औषधिका सेवन करे, तो क्या मात्रासे अधिक ले सकता है ? ऐसा कभी नहीं करेगा, मात्राप्रमाण ही लेगा ॥८९॥

आगे ऐसा कहते है, जिसने जिनदीक्षा धरके केशोंका लोच किया, और सकल परिग्रहका त्याग नहीं किया, उसने अपनी आत्मा ही को वंचित किया—[**केनापि**] जिस किसीने [**जिनवर-लिंगधरेण**] जिनवरका भेष धारण करके [**क्षारेण**] भस्मसे [**शिरः**] शिरके केश [**लुंचित्वा**] लौंच किये, (उखाड़े) लेकिन [**सकला अपि संगाः**] सब परिग्रह [**न परिहृताः**] नहीं छोड़े, उसने [**आत्मा**] अपनी आत्माको ही [**वंचितः**] ठग लिया ॥ **भावार्थ**—वीतराग निर्विकल्पनिजानंद अखंडरूप सुखरस-का जो आस्वाद उस रूप परिणामी जो परमात्माको भावना वही हुआ तीक्ष्ण शस्त्र उससे बाहिरके

नास्वभावेन तीक्ष्णशस्त्रोपकरणेन बाह्याभ्यन्तरपरिग्रहकांक्षारूपप्रभृतिसमस्तमनोरथ-कल्लोलमालात्यागरूपं मनोमुण्डनं पूर्वमकृत्वा जिनदीक्षारूपं शिरोमुण्डनं कृत्वापि केनाप्यात्मा वञ्चितः। कस्मात्। सर्वसंगपरित्यागाभावादिति। अत्रेदं व्याख्यानं ज्ञात्वा स्वशुद्धात्मभावनोत्थवीतरागपरमानन्दपरिग्रहं कृत्वा तु जगत्त्रये कालत्रयेऽपि मनोवचनकायैः कृतकारितानुमतैश्च दृष्टश्रुतानुभूतनिःपरिग्रहशुद्धात्मानुभूतिविपरीत-परिग्रहकाङ्क्षास्त्वं त्यजेत्यभिप्रायः ॥९०॥

अथ ये सर्वसंगपरित्यागरूपं जिनलिङ्गं गृहीत्वापीष्टपरिग्रहान् गृह्णन्ति ते छर्दिं कृत्वा पुनरपि गिलन्ति तामिति प्रतिपादयति—

जे जिण-लिंगु धरेवि मुणि इट्ठ-परिग्गह लेंति।
छद्दि करेविणु ते जि जिय सा पुणु छद्दि गिलंति ॥९१॥

ये जिनलिङ्गं धृत्वापि मुनय इष्टपरिग्रहान् लान्ति।
छर्दिं कृत्वा ते एव जीव तां पुनः छर्दिं गिलन्ति ॥९१॥

ये केचन जिनलिङ्गं गृहीत्वापि मुनयस्तपोधना इष्टपरिग्रहान् लान्ति गृह्णन्ति। ते किं कुर्वन्ति। छर्दिं कृत्वा त एव हे जीव तां पुनश्छर्दिं गिलन्तीति। तथापि गृहस्थापेक्षया चेतनपरिग्रहः पुत्रकलत्रादिः, सुवर्णादिः पुनरचेतनः, साभरणवनितादि पुनर्मिश्रः। तपोधनापेक्षया छात्रादिः सचित्तः, पिच्छकमण्डल्वादिः पुनरचित्तः,

---

और अन्तरके परिग्रहोंकी वाञ्छा आदि ले समस्त मनोरथ उनकी कल्लोल मालाओंका त्यागरूप मनका मुण्डन वह तो नहीं किया, और जिनदीक्षारूप शिरोमुण्डन कर भेष रखा, सब परिग्रहका त्याग नहीं किया, उसने अपनी आत्मा ठगी। ऐसा कथन समझकर निज शुद्धात्माकी भावनासे उत्पन्न, वीतराग परम आनंदस्वरूपको अंगीकार करके तीनों काल तीनों लोकमें मन, वचन, काय, कृत, कारित, अनुमोदनाकर देखे सुने अनुभवे जो परिग्रह उनकी वांछा सर्वथा त्यागनी चाहिये। ये परिग्रह शुद्धात्माकी अनुभूतिसे विपरीत हैं ॥९०॥

आगे जो सर्वसंगके त्यागरूप जिनमुद्राको ग्रहण कर फिर परिग्रहको धारण करता है, वह वमन करके पीछे निगलता है, ऐसा कथन करते हैं—[ये] जो [मुनयः] मुनि [जिनलिंगं] जिन-लिंगको [धृत्वापि] ग्रहणकर [इष्टपरिग्रहान्] फिर भी इच्छित परिग्रहोंको [लांति] ग्रहण करते हैं, [जीव] हे जीव, [ते एव] वे ही [छर्दि कृत्वा] वमन करके [पुनः] फिर [तां छर्दि] उस वमनको पीछे [गिलंति] निगलते हैं ॥ **भावार्थ**—परिग्रहके तीन भेदोंमें गृहस्थकी अपेक्षा चेतन परिग्रह पुत्र कलत्रादि, अचेतन परिग्रह आभरणादि, और मिश्र परिग्रह आभरण सहित स्त्री पुत्रादि, साधुकी अपेक्षा सचित परिग्रह शिष्यादि, अचित्त परिग्रह पीछी कमंडलु पुस्तकादि, और मिश्र परिग्रह पीछी कमंडलु पुस्तकादि सहित शिष्यादि अथवा साधुके भावोंकी अपेक्षा सचित्त परि-ग्रह मिथ्यात्व रागादि, अचित परिग्रह द्रव्यकर्म नोकर्म, और मिश्र परिग्रह द्रव्यकर्म भावकर्म दोनों मिले हुए। अथवा वीतराग त्रिगुप्तिमें लीन ध्यानी पुरुषकी अपेक्षा सचित्त परिग्रह सिद्ध-परमेष्ठीका ध्यान, अचित्त परिग्रह पुद्गलादि पांच द्रव्यका विचार, और मिश्र परिग्रह गुणस्थान

उपकरणसहितश्छात्रादिस्तु मिश्रः । अथवा मिथ्यात्वरागादिरूपः सचित्तः, द्रव्यकर्म-नोकर्मरूपः, पुनरचित्तः द्रव्यकर्मभावकर्मरूपस्तु मिश्रः । वीतरागत्रिगुप्तसमाधिस्थ-पुरुषापेक्षया सिद्धरूपः सचित्तः पुद्गलादिपञ्चद्रव्यरूपः पुनरचित्तः गुणस्थानमार्गणा-स्थानजीवस्थानादिपरिणतः संसारी जीवस्तु मिश्रश्चेति । एवंविधबाह्याभ्यन्तरपरि-ग्रहरहितं जिनलिङ्गं गृहीत्वापि ये शुद्धात्मानुभूतिविलक्षणमिष्टपरिग्रहं गृह्णन्ति ते छर्दिताहारग्राहकपुरुषसदृशा भवन्तीति भावार्थः । तथा चोक्तम्—"त्यक्त्वा स्वकीय-पितृमित्रकलत्रपुत्रान् सक्तोऽन्यगेहवनितादिषु निर्मुमुक्षुः । दोर्भ्यां पयोनिधिसमुद्गतनक्र-चक्रं प्रोत्तीर्य गोष्पदजलेषु निमग्नवान् सः ॥" ॥९१॥

अथ ये ख्यातिपूजालाभनिमित्तं शुद्धात्मानं त्यजन्ति ते लोहकीलनिमित्तं देवं देवकुलं च दहन्तीति कथयति—

लाहहँ कित्तिहि कारणिण जे सिव-संगु चयंति ।
खीला-लग्गिवि ते वि मुणि देउलु देउ डहंति ॥९२॥

लाभस्य कीर्तेः कारणेन ये शिवसंगं त्यजन्ति ।
कीलानिमित्तं तेऽपि मुनयः देवकुलं देव दहन्ति ॥९२॥

लाभकीर्तिकारणेन ये केचन शिवसंगं शिवशब्दवाच्यं निजपरमात्मध्यानं त्यजन्ति ते मुनयस्तपोधनाः । किं कुर्वन्ति । लोहकीलिकाप्रायं निःसारेन्द्रियसुख-

---

मार्गणास्थान जीवसमासादिरूप ससारीजीवका विचार । इस तरह बाहिरके और अंतरके परिग्रहसे रहित जो जिनलिंग उसे ग्रहण कर जो अज्ञानी शुद्धात्माकी अनुभूतिसे विपरीत परिग्रहको ग्रहण करते है, वे वमन करके पीछे आहार करनेवालोंके समान निंदाके योग्य होते हैं। ऐसा दूसरी जगह भी कहा है, कि जो जीव अपने माता, पिता, पुत्र, मित्र, कलत्र इनको छोड़कर परके घर और पुत्रादिकमें मोह करते हैं, अर्थात् अपना परिवार छोड़कर शिष्य-शाखाओंमे राग करते हैं, वे भुजाओंसे समुद्रको तैरके गायके खुरसे बने हुए गढ़ेके जलमें डूबते हैं, कैसा है समुद्र, जिसमें जलचरोंके समूह प्रगट है, ऐसे अथाह समुद्रको तो बाहोंसे तिर जाता है, लेकिन गायके खुरके जलमें डूबता है। यह बड़ा अचंभा है। घरका ही संबंध छोड़ दिया तो पराये पुत्रोंसे क्या राग करना ? नही करना ॥९१॥

आगे जो अपनी प्रसिद्धि (बड़ाई) प्रतिष्ठा और परवस्तुका लाभ इन तीनोंके लिए आत्म-ध्यानको छोड़ते हैं, वे लोहेके कीलेके लिए देव तथा देवालयको जलाते हैं—[**ये**] जो कोई [**लाभस्य**] लाभ [**कीर्तेः कारणेन**] और कीर्तिके कारण [**शिवसंगं**] परमात्माके ध्यानको [**त्यजंति**] छोड़ देते है, [**ते अपि मुनयः**] वे ही मुनि [**कीलानिमित्तं**] लोहेके कीलेके लिए अर्थात् कीलेके समान असार इंद्रिय-सुखके निमित्त [**देवकुलं**] मुनिपद योग्य शरीररूपी देवस्थानको तथा [**देवं**] आत्मदेवको [**दहंति**] भवकी आतापसे भस्म कर देते हैं॥ **भावार्थ**—जिस समय ख्याति पूजा लाभके अर्थ शुद्धात्माकी भावनाको छोड़कर अज्ञान भावोंमें प्रवर्त होते है, उस समय ज्ञानावरणादि कर्मोंका बंध होता है। उस ज्ञानावरणादिके बंधसे ज्ञानादि गुणका आवरण होता

निमित्तं देवशब्दवाच्यं निजपरमात्मपदार्थं वहन्ति देवकुलशब्दवाच्यं दिव्यपरमौदारिकशरीरं च वहन्तीति। कथमिति चेत्। यदा ख्यातिपूजालाभार्थं शुद्धात्मभावनां त्यक्त्वा वर्तन्ते तदा ज्ञानावरणादिकर्मबन्धो भवति तेन ज्ञानावरणकर्मणा केवलज्ञानं प्रच्छाद्यते केवलदर्शनावरणेन केवलदर्शनं प्रच्छाद्यते वीर्यान्तरायेण केवलवीर्यं प्रच्छाद्यते मोहोदयेनानन्तसुखं च प्रच्छाद्यत इति। एवंविधानन्तचतुष्टयस्यालाभे परमौदारिकशरीरं च न लभन्त इति। यदि पुनरनेकभवे परिच्छेद्यं कृत्वा शुद्धात्मभावनां करोति तदा संसारस्थितिं छित्त्वाऽद्यकालेऽपि स्वर्गं गत्वागत्य शीघ्रं शाश्वतसुखं प्राप्नोतीति तात्पर्यम्। तथा चोक्तम्--"सग्गो तवेण सव्वो वि पावए किं तु झाणजोएण। जो पावइ सो पावइ परलोके सासयं सोक्खं॥" ॥९२॥

अथ यो बाह्याभ्यन्तरपरिग्रहेणात्मानं महान्तं मन्यते स परमार्थं न जानातीति दर्शयति—

अप्पउ मण्णइ जो जि मुणि गरुयउ गंथहि तत्थु।
सो परमत्थे जिणु भणइ णवि बुज्झइ परमत्थु॥९३॥

आत्मानं मन्यते य एव मुनिः गुरुकं ग्रन्थैः तथ्यम्।
स परमार्थेन जिनो भणति नैव बुध्यते परमार्थम्॥९३॥

आत्मानं मन्यते य एव मुनिः। कथंभूतं मन्यते। गुरुकं महान्तम्। कैः। ग्रन्थैर्बाह्याभ्यन्तरपरिग्रहैस्तथ्यं सत्यं स पुरुषः परमार्थेन वस्तुवृत्त्या नैव बुध्यते परमार्थमिति जिनो वदति। तथाहि। निर्दोषिपरमात्मविलक्षणैः पूर्वसूत्रोक्तसचित्ता-

---

है। केवलज्ञानावरणसे केवलज्ञान ढँक जाता है, मोहके उदयसे अनंतसुख, वीर्यांतरायके उदयसे अनंतबल, और केवलदर्शनावरणसे केवलदर्शन आच्छादित होता है। इस प्रकार अनंतचतुष्टयका आवरण हो रहा है। उस अनंतचतुष्टयके अलाभमें परमौदारिक शरीरको नहीं पाता, क्योंकि जो उसी भवमें मोक्ष जाता है, उसीके परमौदारिक शरीर होता है। इसलिये जो कोई समभावमें शुद्धात्माकी भावना करे, तो अभी स्वर्गमें जाकर पीछे विदेहोंमें मनुष्य होकर मोक्ष पाता है। ऐसा ही कथन दूसरी जगह शास्त्रोंमें लिखा है, कि तपसे स्वर्ग तो सभी पाते हैं, परन्तु जो कोई ध्यानके योगसे स्वर्ग पाता है, वह परभवमें सासते (अविनाशी) सुखको (मोक्षको) पाता है। अर्थात् स्वर्गसे आकर मनुष्य होके मोक्ष पाता है, उसीका स्वर्ग पाना सफल है, और जो कोरे (अकेले) तपसे स्वर्ग पाके फिर संसारमें भ्रमता है, उसका स्वर्ग पाना वृथा है॥९२॥

आगे जो बाह्य अभ्यंतर परिग्रहसे अपनेको महंत मानता है, वह परमार्थको नहीं जानता, ऐसा दिखलाते हैं—[य एव] जो [मुनिः] मुनि [ग्रंथैः] बाह्य परिग्रहसे [आत्मानं] अपनेको [गुरुकं] महंत (बड़ा) [मन्यते] मानता है, अर्थात् परिग्रहसे ही गौरव जानता है, [तथ्यं] निश्चयसे [सः] वही पुरुष [परमार्थेन] वास्तवमें [परमार्थं] परमार्थको [नैव बुध्यते] नहीं

चित्तमिश्रपरिग्रहैर्ग्रन्थरचनारूपशब्दशास्त्रैर्वा आत्मानं महान्तं मन्यते यः स परमार्थ-शब्दवाच्यं वीतरागपरमानन्दैकस्वभावं परमात्मानं न जानातीति तात्पर्यम् ॥९३॥

ग्रन्थेनात्मानं महान्तं मन्यमानः सन् परमार्थं कस्मान्न जानातीति चेत्—

बुज्झंतहँ परमत्थु जिय गुरु लहु अत्थि ण कोइ ।
जीवा सयल वि बंभु परु जेण वियाणइ सोइ ॥९४॥

बुध्यमानानां परमार्थं जीव गुरुः लघुः अस्ति न कोऽपि ।
जीवाः सकला अपि ब्रह्म परं येन विजानाति सोऽपि ॥९४॥

बुध्यमानानाम् । कम् । परमार्थम्, हे जीव गुरुत्वं लघुत्वं वा नास्ति । कस्मान्नास्ति । जीवाः सर्वेऽपि परमब्रह्मस्वरूपाः तदपि कस्मात् । येन कारणेन ब्रह्मशब्दवाच्यो मुक्तात्मा केवलज्ञानेन सर्वं जानाति यथा तथा निश्चयनयेन सोऽप्येको विवक्षितो जीवः संसारी सर्वं जानातीत्यभिप्रायः ॥९४॥ एवमेकचत्वारिं-शत्सूत्रप्रमितमहास्थलमध्ये परिग्रहपरित्यागव्याख्यानमुख्यतया सूत्राष्टकेन तृतीय-मन्तरस्थलं समाप्तम् ॥ अत ऊर्ध्वं त्रयोदशसूत्रपर्यन्तं शुद्धनिश्चयेन सर्वे जीवाः केवलज्ञानादिगुणैः समानास्तेन कारणेन षोडशवर्णिकासुवर्णवद्भेदो नास्तीति प्रतिपादयति ।

तद्यथा—

जानता, [**जिन भणति**] ऐसा जिनेश्वरदेव कहते है ॥ **भावार्थ**—निर्दोष परमात्मासे पराङ्मुख जो पूर्वसूत्रमे कहे गये सचित्त अचित्त मिश्र परिग्रह है, उनसे अपनेको महंत मानता है, जो मैं बहुत पढा हूँ। ऐसा जिसके अभिमान है, वह परमार्थ यानी वीतराग परमानंदस्वभाव निज आत्माको नही जानता। आत्म-ज्ञानसे रहित है, यह निःसंदेह जानो ॥ ९३ ॥

आगे शिष्य प्रश्न करता है, कि जो ग्रंथसे अपनेको महत मानता है, वह परमार्थको क्यो नही जानता ? । इसका समाधान आचार्य करते है।—[**जीव**] हे जीव, [**परमार्थं**] परमार्थको [**बुध्यमानानां**] समझनेवालोके [**कोऽपि**] कोई जीव, [**गुरु. लघुः**] बड़ा छोटा [**न अस्ति**] नहीं है, [**सकला अपि**] सभी [**जीवाः**] जीव [**परब्रह्म**] परमब्रह्मस्वरूप है, [**येन**] क्योकि निश्चयनयसे [**सोऽपि**] वह सम्यग्दृष्टी एक भी जीव [**विजानाति**] सबको जानता है ॥ **भावार्थ**— जो परमार्थको नही जानता, वह परिग्रहसे गुरुता समझता है, और परिग्रहके न होनेसे लघुपना जानता है, यही भूल है। यद्यपि गुरुता लघुता कर्मके आवरणसे जीवोंमे पायी जाती है, तो भी शुद्धनयसे सब समान हैं, तथा ब्रह्म अर्थात् सिद्धपरमेष्ठी केवलज्ञानसे सबको जानते हैं, सबको देखते हैं, उसी प्रकार निश्चयनयसे सम्यग्दृष्टी सब जीवोंको शुद्धरूप ही देखता है ॥ ९४ ॥ इस तरह इकतालीस दोहोंके महास्थलमे परिग्रह त्यागके व्याख्यानकी मुख्यतासे आठ दोहोंका तीसरा अंतरस्थल पूर्ण हुआ। आगे तेरह दोहोंतक शुद्ध निश्चयसे सब जीव केवलज्ञानादिगुणसे समान है, इसलिये सोलहवान (ताव) के सुवर्णकी तरह भेद नही है, सब जीव समान हैं, ऐसा निश्चय करते हैं।

वह ऐसे हैं—[**यः**] जो मुनि [**रत्नत्रयस्य**] रत्नत्रयकी [**भक्तः**] आराधना (सेवा) करनेवाला है, [**तस्य**] उसके [**इदं लक्षणं**] यह लक्षण [**मन्यस्व**] जानना कि [**कस्यामपि कुड्यां**]

जो भत्तउ रयण-त्तयह तसु मुणि लक्खणु एउ ।
अच्छउ कहिँ वि कुडिल्लियइ सो तसु करइ ण भेउ ॥९५॥

यः भक्तः रत्नत्रयस्य तस्य मन्यस्व लक्षणं इदम् ।
तिष्ठतु कस्यामपि कुड्यां स तस्य करोति न भेदम् ॥९५॥

जो इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । जो **यः** भत्तउ **भक्तः । कस्य ।** रयणत्तयहं **रत्नत्रयस्य** तसु **तस्य पुरुषस्य** मुणि **मन्यस्व जानीहि । किम् ।** लक्खणु एउ **लक्षणं इदं प्रत्यक्षीभूतम् । इदं किम् ।** अच्छउ कहिं वि कुडिल्लियइ **तिष्ठतु कस्यामपि कुड्यां** शरीरे सो तसु करइ ण भेउ **स ज्ञानी तस्य जीवस्य देहभेदेन भेदं न करोति । तथाहि । योऽसौ वीतरागस्वसंवेदनज्ञानी निश्चयस्य निश्चयरत्नत्रयलक्षणपरमात्मनो वा भक्तः तस्येदं लक्षणं जानीहि ।** हे प्रभाकरभट्ट **। क्वापि देहे तिष्ठतु जीवस्तथापि शुद्धनिश्चयेन षोडशवर्णिकासुवर्णवत्केवलज्ञानादिगुणैर्भेदं न करोतीति । अत्राह** प्रभाकरभट्टः **।** हे भगवन् जीवानां यदि **देहभेदेन भेदो नास्ति तर्हि यथा केचन वदन्त्येक एव जीवस्तन्मतमायातम् ।** भगवानाह **। शुद्धसंग्रहनयेन सेनावनादिवज्जात्यपेक्षया भेदो नास्ति व्यवहारनयेन पुनर्व्यक्त्यपेक्षया वने भिन्नभिन्नवृक्षवत् सेनायां भिन्नभिन्नहस्त्यश्वादिवद्भेदोऽस्तीति भावार्थः ॥९५॥**

अथ त्रिभुवनस्थजीवानां मूढा भेदं कुर्वन्ति, ज्ञानिनस्तु भिन्नभिन्नसुवर्णानां षोडशवर्णिकैकत्ववत्केवलज्ञानलक्षणेनैकत्वं जानन्तीति दर्शयति—

जीवहँ तिहुयण-संठियहँ मूढा भेउ करंति ।
केवल-णाणिं णाणि फुडु सयलु वि एक्कु मुणंति ॥९६॥

किसी शरीरमे जीव [**तिष्ठतु**] रहे, [**सः**] वह ज्ञानी [**तस्य भेदं**] उस जीवका भेद [**न करोति**] नहीं करता, अर्थात् देहके भेदसे गुरुता लघुताका भेद करता है, परंतु ज्ञानदृष्टिसे सबको समान देखता है ॥ **भावार्थ**—वीतराग स्वसंवेदनज्ञानी निश्चयरत्नत्रयका आराधकका ये लक्षण प्रभाकरभट्ट तू निःसंदेह जान, जो किसी शरीरमें कर्मके उदयसे जीव रहे, परंतु निश्चयसे शुद्ध बुद्ध (ज्ञानी) ही है । जैसे सोनेमें वान-भेद है, वैसे जीवोंमें वान-भेद नहीं है, केवलज्ञानादि अनंत गुणोंसे सब जीव समान हैं, ऐसा कथन सुनकर प्रभाकरभट्टने प्रश्न किया, हे भगवन्, जो जीवोंमें देहके भेदसे भेद नहीं है, सब समान हैं, तब जो वेदान्ती एक ही आत्मा मानते है, उनको क्यों दोष देते हो ? तब श्रीगुरु उसका समाधान करते हैं—कि शुद्धसंग्रहनयसे सेना एक ही कही जाती है, लेकिन सेनामें अनेक हैं, तो भी ऐसे कहते है, कि सेना आयी, सेना गयी, उसी प्रकार जातिकी अपेक्षासे जीवोंमें भेद नहीं है, सब एक जाति है, और व्यवहारनयसे व्यक्तिकी अपेक्षा भिन्न-भिन्न हैं, अनंत जीव हैं, एक नहीं है। जैसे वन एक कहा जाता है, और वृक्ष जुदे जुदे हैं, उसी तरह जातिसे जीवोंमें एकता है, लेकिन द्रव्य जुदे जुदे है, तथा जैसे सेना एक है, परन्तु हाथी घोड़े रथ सुभट अनेक हैं, उसी तरह जीवोंमें जानना ॥ ९५ ॥

जीवानां त्रिभुवनसंस्थितानां मूढा भेदं कुर्वन्ति।
केवलज्ञानेन ज्ञानिनः स्फुटं सकलमपि एकं मन्यन्ते ॥९६॥

जीवहं इत्यादि। जीवहं तिहुयणसंठियहं **श्वेतकृष्णरक्तादिभिन्नभिन्नवस्त्रैर्वेष्टितानां षोडशवर्णिकानां** भिन्नभिन्नसुवर्णानां यथा **व्यवहारेण वस्त्रवेष्टनभेदेन भेदः तथा त्रिभुवनसंस्थितानां जीवानां व्यवहारेण भेदं दृष्ट्वा निश्चयनयेनापि** मूढा भेउ करंति **मूढात्मानो भेदं कुर्वन्ति।** केवलणाणि **वीतरागसदानन्दैकसुखाविनाभूतकेवलज्ञानेन** [1]**वीतरागस्वसंवेदन** णाणि **ज्ञानिनः** फुडु स्फुटं **निश्चितं** सयलु वि **समस्तमपि जीवराशिं** एक्कु मुणंति **संग्रहनयेन समुदायं प्रत्येकं मन्यन्त इति** अभिप्रायः ॥९६॥

अथ केवलज्ञानादिलक्षणेन शुद्धसंग्रहनयेन सर्वे जीवाः समाना इति कथयति—

जीवा सयल वि णाण-मय जम्मण-मरण-विमुक्क।
जीव-पएसहिँ सयल सम सयल वि सगुणहिँ एक्क ॥९७॥

जीवाः सकला अपि ज्ञानमया जन्ममरण विमुक्ताः।
जीवप्रदेशैः सकलाः समाः सकला अपि स्वगुणैरेके ॥९७॥

जीवा इत्यादि। जीवा सयल वि णाणमय **व्यवहारेण लोकालोकप्रकाशकं निश्चयेन स्वशुद्धात्मग्राहकं यत्केवलज्ञानं तज्ज्ञानं यद्यपि व्यवहारेण केवलज्ञानावरणेन**

आगे तीन लोकमे रहनेवाले जीवोंका अज्ञानी भेद करते हैं। जीवपनेसे कोई कम बढ़ नहीं हैं, कर्मके उदयसे शरीर-भेद हैं, परन्तु द्रव्यकर सब समान हैं। जैसे सोनेमें वान-भेद है, वैसे ही परके संयोगसे भेद मालूम होता है, तो भी सुवर्णपनेमे सब समान हैं, ऐसा दिखलाते हैं—**[त्रिभुवनसंस्थितानां]** तीन भवनमें रहनेवाले **[जीवानां]** जीवोंका **[मूढाः]** मूर्ख ही **[भेदं]** भेद **[कुर्वंति]** करते हैं, और **[ज्ञानिनः]** ज्ञानी जीव **[केवलज्ञानेन]** केवलज्ञानसे **[स्फुटं]** प्रगट **[सकलमपि]** सब जीवोंको **[एकं मन्यंते]** समान जानते हैं॥ **भावार्थ**—व्यवहारनयकर सोलहवानके सुवर्ण भिन्न-भिन्न वस्त्रोंमे लपेटें तो वस्त्रके भेदसे भेद है, परन्तु सुवर्णपनेसे भेद नहीं है, उसी प्रकार तीन लोकमें तिष्ठे हुए जीवोंका व्यवहारनयसे शरीरके भेदसे भेद है, परन्तु जीवपनेसे भेद नहीं है। देहका भेद देखकर मूढ़ जीव भेद मानते हैं, और वीतराग स्वसंवेदनज्ञान जीवपनेसे सब जीवोंको समान मानता है। सभी जीव केवलज्ञानवेलिके कन्द सुख-पंक्ति है, कोई कम बढ़ नहीं है ॥९६॥

आगे केवलज्ञानादि लक्षणसे शुद्धसंग्रहनयकर सब जीव एक हैं, ऐसा कहते हैं—**[सकलाअपि]** सभी **[जीवाः]** जीव **[ज्ञानमयाः]** ज्ञानमयी हैं, और **[जन्ममरणविमुक्ताः]** **[जीवप्रदेशैः]** अपने अपने प्रदेशोंसे **[सकलाः समाः]** सब समान हैं, **[अपि]** और **[सकलाः]** सब जीव **[स्वगुणैः एके]** अपने केवलज्ञानादि गुणोंसे समान हैं॥ **भावार्थ**—व्यवहारसे लोक अलोकका प्रकाशक और निश्चयनयसे निज शुद्धात्मद्रव्यका ग्रहण करनेवाला जो केवलज्ञान वह यद्यपि व्यवहारनयसे केवलज्ञानावरणकर्मसे

---

१. पाठान्तरः—वीतरागस्वसंवेदन णाणी ज्ञानिनः = णाणी वीतरागस्वसंवेदनज्ञानिनः।

झंपितं तिष्ठति तथापि शुद्धनिश्चयेन तदावरणाभावात् पूर्वोक्तलक्षणकेवलज्ञानेन निवृत्तत्वात्सर्वेऽपि जीवा ज्ञानमयाः जम्ममरणविमुक्क व्यवहारनयेन यद्यपि जन्ममरणसहितास्तथापि निश्चयेन वीतरागनिजानन्दैकरूपसुखामृतमयत्वादनाद्यनिधनत्वाच्च शुद्धात्मस्वरूपाद्विलक्षणस्य जन्ममरणनिर्वर्तकस्य कर्मण उदयाभावाज्जन्ममरणविमुक्ताः। जीवपएसहिं सयल सम यद्यपि संसारावस्थायां व्यवहारेणोपसंहारविस्तारयुक्तत्वाद्देहमात्रा मुक्तावस्थायां तु किंचिदूनचरमशरीरप्रमाणास्तथापि निश्चयनयेन लोकाकाशप्रमितासंख्येयप्रदेशत्वहानिवृद्धयभावात् स्वकोयस्वकीयजोवप्रदेशैः सर्वे समानाः। सयल वि सगुणहिं एक्क यद्यपि व्यवहारेणाव्याबाधानन्तसुखादिगुणाः संसारावस्थायां कर्मझंपितास्तिष्ठन्ति, तथापि निश्चयेन कर्माभावात् सर्वेऽपि स्वगुणैरेकप्रमाणा इति। अत्र यदुक्तं शुद्धात्मनः स्वरूपं तदेवोपादेयमिति तात्पर्यम् ॥९७॥

अथ जीवानां ज्ञानदर्शनलक्षणं प्रतिपादयति—

जीवहँ लक्खणु जिणवरहि भासिउ दंसण-णाणु।
तेण ण किज्जइ भेउ तहँ जइ मणि जाउ विहाणु ॥९८॥

जीवानां लक्षणं जिनवरैः भाषितं दर्शनं ज्ञानं।
तेन न क्रियते भेद तेषां यदि मनसि जातो विभातः ॥९८॥

जीवहं इत्यादि। जीवहं लक्खणु जिणवरहिं भासिउ दंसणणाणु यद्यपि व्यवहारेण संसारावस्थायां मत्यादिज्ञान चक्षुरादिदर्शनं जोवानां लक्षणं भवति तथापि

ढँका हुआ है, तो भी शुद्ध निश्चयसे केवलज्ञानावरणका अभाव होनेसे केवलज्ञानस्वभावसे सभी जीव केवलज्ञानमयी हैं। यद्यपि व्यवहारनयकर सब संसारी जीव जन्म मरण सहित हैं, तो भी निश्चयनयकर वीतराग निजानंदरूप अतीन्द्रिय सुखमयी हैं, जिनको आदि भी नहीं और अन्त भी नहीं ऐसे हैं, शुद्धात्मस्वरूपसे विपरीत जन्म मरणके उत्पन्न करनेवाले जो कर्म उनके उदयके अभावसे जन्म मरण रहित है। यद्यपि संसारअवस्थामे व्यवहारनयकर प्रदेशोंका संकोच विस्तारको धारण करते हुए देहप्रमाण है, और मुक्त-अवस्थामे चरम (अन्तिम) शरीरसे कुछ कम देहप्रमाण हैं, तो भी निश्चयनयकर लोकाकाशप्रमाण असंख्यातप्रदेशी हैं, हानि-वृद्धि न होनेसे अपने प्रदेशोकर सब समान हैं, और यद्यपि व्यवहारनयसे संसार-अवस्थामे इन जीवोंके अव्याबाध अनन्त सुखादिगुण कर्मोंसे ढँके हुए हैं, तो भी निश्चयनयकर कर्मके अभावसे सभी जीव गुणोंकर समान हैं। ऐसा जो शुद्ध आत्माका स्वरूप है, वही ध्यान करने योग्य है ॥९७॥

आगे जीवोंका ज्ञान-दर्शन लक्षण कहते हैं—[जीवानां लक्षण] जीवोंका लक्षण [जिनवरैः] जिनेन्द्रदेवने [दर्शनं ज्ञानं] दर्शन और ज्ञान [भाषितं] कहा है, [तेन] इसलिए [तेषां] उन जीवोंमे [भेदः] भेद [न क्रियते] मत कर, [यदि] अगर [मनसि] तेरे मनमे [विभातः जातः] ज्ञानरूपी सूर्यका उदय हो गया है, अर्थात् हे शिष्य, तू सबको समान जान ॥ भावार्थ—यद्यपि व्यवहारनयसे संसारीअवस्थामें मत्यादि ज्ञान, और चक्षुरादि दर्शन जीवके लक्षण कहे हैं,

निश्चयेन केवलदर्शनं केवलज्ञानं च लक्षणं भावितम् । कैः जिनवरैः । तेण ण किज्जइ भेउ तहँ तेन कारणेन व्यवहारेण देहभेदेऽपि केवलज्ञानदर्शनरूपनिश्चय-लक्षणेन तेषां न क्रियते भेदः । यदि किम् । जइ मणि जाउ विहाणु यदि चेन्मनसि वीतरागनिर्विकल्पस्वसंवेदनज्ञानादित्योदयेन जातः । कोऽसौ । प्रभातसमय इति । अत्र यद्यपि [1]षोडशवर्णिकालक्षणं बहूनां सुवर्णानां मध्ये समानं तथाप्येकस्मिन् सुवर्णे गृहीते शेषसुवर्णानि सहैव नायान्ति । कस्मात् । भिन्नभिन्नप्रदेशत्वात् । तथा यद्यपि केवलज्ञानदर्शनलक्षणं समानं सर्वजीवानां तथाप्येकस्मिन् विवक्षितजीवे पृथक्कृते शेषजीवा सहैव नायान्ति । कस्मात् । भिन्नभिन्नप्रदेशत्वात् । तेन कारणेन ज्ञायते यद्यपि केवलज्ञानदर्शनलक्षणं समानं तथापि प्रदेशभेदोऽस्तीति भावार्थः ॥९८॥

अथ शुद्धात्मनां जीवजातिरूपेणैकत्वं दर्शयति—

बंभहँ भुवणि वसंताहँ जे णवि भेउ करंति ।
ते परमप्प-पयासयर जोइय विमलु मुणंति ॥९९॥

ब्रह्मणां भुवने वसतां ये नैव भेदं कुर्वन्ति ।
ते परमात्मप्रकाशकराः योगिन् विमलं मन्यन्ते ॥९९॥

बंभहं इत्यादि । बंभहं ब्रह्मणः शुद्धात्मनः । किं कुर्वतः । भुवणि वसंताहं भुवने त्रिभुवने वसंतः तिष्ठतः जे णवि भेउ करंति ये नैव भेदं कुर्वन्ति । केन । शुद्धसंग्रह-नयेन ते परमप्पपयासयर ते ज्ञानिनः परमात्मस्वरूपस्य प्रकाशकाः सन्त जोइय

तो भी निश्चयनयकर-केवलदर्शन केवलज्ञान ये ही लक्षण हैं, ऐसा जिनेंद्रदेवने वर्णन किया है । इस-लिये व्यवहारनयकर देह-भेदसे भी भेद नहीं है, केवलज्ञानदर्शनरूप निजलक्षणकर सब समान हैं, कोई भी बड़ा छोटा नहीं है । जो तेरे मनमें वीतराग निर्विकल्प स्वसंवेदन ज्ञानरूप सूर्यका उदय हुआ है, और मोह-निद्राके अभावसे आत्म-बोधरूप प्रभात हुआ है, तो तू सबोंको समान देख । जैसे यद्यपि सोलहवानीके सोने सब समान वृत्त है, तो भी उन सुवर्ण-राशियोंमें से एक सुवर्णको ग्रहण किया, तो उसके ग्रहण करनेसे सब सुवर्ण साथ नहीं आते, क्योंकि सबके प्रदेश भिन्न हैं, उसी प्रकार यद्यपि केवलज्ञान दर्शन लक्षण सब जीव समान हैं, तो भी एक जीवका ग्रहण करनेसे सबका ग्रहण नहीं होता । क्योंकि प्रदेश सबके भिन्न-भिन्न हैं, इससे यह निश्चय हुआ, कि यद्यपि केवलज्ञान दर्शन लक्षणसे सब जीव समान हैं, तो भी प्रदेश सबके जुदे जुदे हैं, यह तात्पर्य जानना ॥ ९८ ॥

आगे जातिके कथनसे सब जीवोंकी एक जाति है, परन्तु द्रव्य अनंत हैं, ऐसा दिखलाते हैं—

[**भुवने**] इस लोकमें [**वसन्तः**] रहनेवाले [**ब्रह्मण**] जीवोंका [**भेदं**] भेद [**नैव**] नहीं [**कुर्वंति**] करते हैं, [**ते**] वे [**परमात्मप्रकाशकराः**] परमात्माके प्रकाश करनेवाले [**योगिन्**] योगी, [**विमलं**] अपने निर्मल आत्माको [**जानंति**] जानते हैं । इसमें संदेह नहीं है ॥ **भावार्थ**—

---

१ पाठान्तरः—षोडशवर्णिकालक्षणं बहूनां सुवर्णानां मध्ये समानं = षोडशवर्णिकासमानानां बहूनां सुव-र्णानां मध्ये ।

हे योगिन् अथवा बहुवचनेन हे योगिनः । किं कुर्वन्ति । विमलु मुणंति विमलं संशयादिरहितं शुद्धात्मस्वरूपं मन्यन्ते जानन्तीति । तद्यथा । यद्यपि जीवराश्यपेक्षया तेषामेकत्वं भण्यते तथापि व्यक्त्यपेक्षया प्रदेशभेदेन भिन्नत्वं नगरस्य गृहादिपुरुषादिभेदवत् । कश्चिदाह । यथैकोऽपि चन्द्रमा बहुजलघटेषु भिन्नभिन्नरूपेण दृश्यते तथैकोऽपि जीवो बहुशरीरेषु भिन्नभिन्नरूपेण दृश्यत इति । परिहारमाह । बहुषु जलघटेषु चन्द्रकिरणोपाधिवशेन जलपुद्गला एव चन्द्राकारेण परिणता न चाकाशस्थचन्द्रमाः । अत्र दृष्टान्तमाह । यथा देवदत्तमुखोपाधिवशेन नानादर्पणानां पुद्गला एव नानामुखाकारेण परिणमन्ति न च देवदत्तमुखं नानारूपेण परिणमति । यदि परिणमति तदा दर्पणस्थं मुखप्रतिबिम्बं चेतनत्वं प्राप्नोति, न च तथा, तथैकचन्द्रमा अपि नानारूपेण न परिणमतीति । किं च न चैको ब्रह्मनामा कोऽपि दृश्यते प्रत्यक्षेण यश्चन्द्रवन्नानारूपेण भविष्यति इत्यभिप्रायः ॥९९॥

अथ सर्वजीवविषये समदर्शित्वं मुक्तिकारणमिति प्रकटयति—

राय-दोस बे परिहरिवि जे सम जीव णियंति ।
ते सम-भावि परिट्ठिया लहु णिव्वाणु लहंति ॥१००॥

यद्यपि जीव-राशिकी अपेक्षा जीवोंका एकता है, तो भी प्रदेशभेदसे प्रगटरूप सब जुदे जुदे है । जैसे वृक्ष जातिकर वृक्षोका एकपना है, तो भी सब वृक्ष जुदे जुदे हैं, और पहाड-जातिसे सब पहाडोंका एकत्व है, तो भी सब जुदे जुदे हैं, तथा रत्न-जातिसे रत्नोंका एकत्व है, परन्तु सब रत्न पृथक् पृथक् हैं, घट-जातिकी अपेक्षा सब घटोंका एकपना है, परन्तु सब जुदे जुदे हैं, और पुरुष-जातिकर सबकी एकता है, परन्तु सब अलग अलग हैं। उसी प्रकार जीव-जातिकी अपेक्षासे सब जीवोंका एकपना है, तो भी प्रदेशोंके भेदसे सब ही जीव जुदे जुदे हैं । इस पर कोई परवादी प्रश्न करता है, कि जैसे एक ही चन्द्रमा जलके भरे बहुत घड़ोंमें जुदा जुदा भासता है, उसी प्रकार एक ही जीव बहुत शरीरों में भिन्न भिन्न भास रहा है । उसका श्रीगुरु समाधान करते हैं—जो बहुत जलके घडोंमें चन्द्रमाकी किरणोंकी उपाधिसे जल-जातिके पुद्गल ही चन्द्रमाके आकारके परिणत हो गये है, लेकिन आकाशमें स्थित चन्द्रमा तो एक हो है, चन्द्रमा तो बहुत स्वरूप नहीं हो गया । उनका दृष्टात देते हैं । जैसे कोई देवदत्तनामा पुरुष उसके मुखकी उपाधि (निमित्त) से अनेक प्रकारके दर्पणोंसे शोभायमान काचका महल उसमे वे काचरूप पुद्गल ही अनेक मुखके आकारके परिणत हुए हैं, कुछ देवदत्तका मुख अनेकरूप नहीं परिणत हुआ है, मुख एक ही है । जो कदाचित् देवदत्त मुख अनेकरूप परिणमन करे, तो दर्पणमे तिष्ठते हुए मुखोंके प्रतिबिम्ब चेतन हो जावें । परन्तु चेतन नही होते, जड़ ही रहते हैं, उसी प्रकार एक चन्द्रमा भी अनेकरूप नहीं परिणमता । वे जलरूप पुद्गल ही चन्द्रमाके आकारमें परिणत हो जाते है । इसलिए ऐसा निश्चय समझना, कि जो कोई ऐसा कहते हैं, कि एक ही ब्रह्मके नानारूप दीखते है । यह कहना ठीक नहीं है । जीव जुदे जुदे है ॥ ९९ ॥

आगे ऐसा कहते हैं, कि सब हो जीव द्रव्यसे तो जुदे जुदे हैं, परन्तु जातिसे एक हैं, और गुणों-

रागद्वेषौ द्वौ परिहृत्य ये समान् जीवान् पश्यन्ति ।
ते समभावे प्रतिष्ठिता. लघु निर्वाणं लभन्ते ॥१००॥

राय इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । रायदोस बे परिहरिवि **वीतराग-निजानन्दैकस्वरूपस्वशुद्धात्मद्रव्यभावनाविलक्षणौ रागद्वेषौ परिहृत्य जे ये केचन** सम जीव णियंति **सर्वसाधारणकेवलज्ञानदर्शनलक्षणेन समानान् सदृशान् जीवान् निर्गच्छन्ति जानन्ति ते ते पुरुषाः । कथंभूताः ।** समभावि परिट्ठिया **जीवित-मरणलाभालाभसुखदुःखादिसमताभावनारूपे समभावे प्रतिष्ठिताः सन्तः** लहु णिव्वाणु लहंति लघु शीघ्रं **आत्यन्तिकस्वभावैकाचिन्त्याद्भुतकेवलज्ञानादिगुणास्पदं निर्वाणं लभन्त इति । अत्रेदं व्याख्यानं ज्ञात्वा रागद्वेषौ त्यक्त्वा च शुद्धात्मानुभूतिरूपा समभावना कर्तव्येत्यभिप्रायः ॥१००॥**

अथ सर्वजीवसाधारणं केवलज्ञानदर्शनलक्षणं प्रकाशयति—

जीवहँ दंसणु णाणु जिय लक्खणु जाणइ जो जि ।
देह-विभेएँ भेउ तहँ णाणि कि मण्णइ सो जि ॥१०१॥

जीवाना दर्शनं ज्ञानं जीव लक्षणं जानाति य एव ।
देहविभेदेन भेदं तेषां ज्ञानी किं मन्यते तमेव ॥१०१॥

जीवहं इत्यादि । जीवहं **जीवानां** दंसणु णाणु **जगत्त्रयकालत्रयवर्तिसमस्तद्रव्य-गुणपर्यायाणां क्रमकरणव्यवधानरहितत्वेन परिच्छित्तिसमर्थं विशुद्धदर्शनं ज्ञानं च ।**

कर समान हैं, ऐसी धारणा करना मुक्तिका कारण है—[**ये**] जो [**रागद्वेषौ**] राग और द्वेषको [**परिहृत्य**] दूर करके [**जीवाः समाः**] सब जीवोंको समान [**निर्गच्छंति**] जानते है, [**ते**] वे साधु [**समभावे**] समभावमे [**प्रतिष्ठिताः**] विराजमान [**लघु**] शीघ्र ही [**निर्वाणं**] मोक्षको [**लभंते**] पाते हैं ॥ **भावार्थ—**वीतराग निजानदस्वरूप जो निज आत्मद्रव्य उसकी भावनासे विमुख जो राग द्वेष उनको छोड़कर जो महान् पुरुष केवलज्ञान दर्शन लक्षणकर सब ही जीवोंको समान गिनते है, वे पुरुष समभावमें स्थित शीघ्र ही शिवपुरको पाते हैं । **समभावका लक्षण** ऐसा है, कि जीवित, मरण, लाभ, अलाभ, सुख, दुःखादि सबको समान जानें। जो अनन्त सिद्ध हुए और होवेंगे, यह सब समभावका प्रभाव है। समभावसे मोक्ष मिलता है। कैसा है वह मोक्षस्थान, जो अत्यंत अद्भुत अचिंत्य केवलज्ञानादि अनन्त गुणोका स्थान है। यहाँ यह व्याख्यान जानकर राग द्वेषको छोड़के शुद्धात्माके अनुभवरूप जो समभाव उसका सेवन सदा करना चाहिए। यही इस ग्रंथका अभिप्राय है ॥१००॥

आगे सब जीवोमे केवलज्ञान और केवलदर्शन साधारण लक्षण हैं, इनके बिना कोई जीव नहीं है। ये गुण शक्तिरूप सब जीवोमे पाये जाते हैं, ऐसा कहते हैं—[**जीवानां**] जीवोंके [**दर्शन ज्ञानं**] दर्शन और ज्ञान [**लक्षणं**] निज लक्षणको [**य एव**] जो कोई [**जानाति**] जानता है, [**जीव**] हे जीव, [**स एव ज्ञानी**] वही ज्ञानी [**देहविभेदेन**] देहके भेदसें [**तेषां भेदं**] उन जीवोंके भेद को

जिय हे जीव लक्खणु जो जि लक्षणं जानाति य एव देहविएं भेउतहं देहहिभेदेन भेदं तेषां जीवानां, देहोद्भवविषयसुखरसास्वादविलक्षणशुद्धात्मभावनारहितेन जीवेन यान्युपार्जितानि कर्माणि [1]तदुदयेनोत्पन्नेन देहभेदेन जीवानां भेदं णाणि कि मण्णइ वीतरागस्वसंवेदनज्ञानी किं मन्यते। नैव। कम्। सो जि तमेव पूर्वोक्तं देहभेदमिति। अत्र ये केचन ब्रह्माद्वैतवादिनो नानाजीवान्न मन्यन्ते तन्मतेन विवक्षितैकजीवस्य जीवितमरणसुखदुःखादिके जाते सर्वजीवानां तस्मिन्नेव क्षणे जीवितमरणसुखदुःखादिकं प्राप्नोति। कस्मादिति चेत्। एकजीवत्वादिति। न च तथा दृश्यते इति भावार्थः ॥१०१॥

अथ जीवानां निश्चयनयेन योऽसौ देहभेदेन भेदं करोति स जीवानां दर्शनज्ञानचारित्रलक्षणं न जानातीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं कथयति—

देह-विभेयइँ जो कुणइ जीवहँ भेउ विचित्तु।
सो णवि लक्खणु मुणइ तहँ दंसणु णाणु चरित्तु ॥१०२॥

देहविभेदेन यः करोति जीवानां भेदं विचित्रम्।
स नैव लक्षणं मनुते तेषां दर्शनं ज्ञानं चारित्रम् ॥१०२॥

देह इत्यादि। देहविभेयइं देहममत्वमूलभूतानां ख्यातिपूजालाभस्वरूपादीनां अपध्यानानां विपरीतस्य स्वशुद्धात्मध्यानस्याभावे यानि कृतानि कर्माणि तदुदयजनितेन देहभेदेन जो कुणइ यः करोति। कम्। जीवहं भेउ विचित्तु जीवानां भेदं विचित्रं

[किं मन्यते] क्या मान सकता है, नहीं मान सकता॥ भावार्थ—तीन लोक और तीन कालवर्ती समस्त द्रव्य गुण पर्यायोंको एक ही समयमें जाननेमे समर्थ जो केवलदर्शन केवलज्ञान है, उसे निज लक्षणोंसे जो कोई जानता है, वही सिद्ध-पद पाता है। जो ज्ञानी अच्छी तरह इन निज लक्षणोंको जान लेवे वह देहके भेदसे जीवोंका भेद नहीं मान सकता। अर्थात् देहसे उत्पन्न जो विषय-सुख उनके रसके आस्वादसे विमुख शुद्धात्माकी भावनासे रहित जो जीव उसने उपार्जन किये जो ज्ञानावरणादिकर्म, उनके उदयसे उत्पन्न हुए देहादिकके भेदसे जीवोंका भेद, वीतरागस्वसंवेदनज्ञानी कदापि नहीं मान सकता। देहमें भेद हुआ तो क्या, गुणसे सब समान हैं, और जीव-जातिकर एक है। यहाँ पर जो कोई ब्रह्माद्वैतवादी वेदान्ती नाना जीवोंको नहीं मानते हैं, और वे एक ही जीव मानते हैं, उनकी यह बात अप्रमाण है। उनके मतमे एक ही जीवके माननेसे बड़ा भारी दोष होता है। वह इस तरह है, कि एक जीवके जीने मरने सुख दुःखादिके होनेपर सब जीवोंके उसी समय जीवना, मरना, सुख, दुःखादि होना चाहिये, क्योंकि उनके मतमे वस्तु एक है। परन्तु ऐसा देखनेमे नहीं आता। इसलिये उनका वस्तु एक मानना वृथा है, ऐसा जानो ॥१०१॥

आगे जीव ही को जानते हैं, परंतु उसके लक्षण नहीं जानते, यह अभिप्राय मनमें रखकर व्याख्यान करते हैं—[यः] जो [देहविभेदेन] शरीरोंके भेदसे [जीवानां] जीवोंका [विचित्रं] नानारूप [भेदं] भेद [करोति] करता है, [स] वह [तेषां] उन जीवोंका [दर्शनं ज्ञान

---

[1] पाठान्तरः—तदुदयेनोत्पन्नेन = तदुदयोत्पन्नेन।

नरनारकादिदेहरूपं, सो णवि लक्खणु मुणइ तहं स नैव लक्षणं मनुते तेषां जीवानाम् । किंलक्षणम् । दंसणु णाणु चरित्तु सम्यग्दर्शनज्ञानचरित्रमिति । अत्र निश्चयेन सम्यग्दर्शनज्ञानचारित्रलक्षणानां जीवानां ब्राह्मणक्षत्रियवैश्यचाण्डालादिदेहभेदं दृष्ट्वा रागद्वेषौ न कर्तव्याविति तात्पर्यम् ॥१०२॥

अथ शरीराणि बादरसूक्ष्माणि विधिवशेन भवन्ति न च जीवा इति दर्शयति—

अंगइं सुहुमइं बादरइं विहि-वसिं होंति जे बाल ।
जिय पुणु सयल वि तित्तडा सव्वत्थ वि सय-काल ॥१०३॥

अङ्गानि सूक्ष्माणि बादराणि विधिवशेन भवन्ति ये बालाः ।
जीवाः पुनः सकला अपि तावन्तः सर्वत्रापि सदाकाले ॥१०३॥

अंगइं इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । अंगइं सुहुमइं बादरइं अङ्गानि सूक्ष्मबादराणि जीवानां विहिवसिं होंति विधिवशाद्भवन्ति अङ्गोद्भवपञ्चेन्द्रियविषयकांक्षामूलभूतानि दृष्टश्रुतानुभूतभोगवाञ्छारूपनिदानबन्धादीनि यान्यपध्यानानि, तद्विलक्षणा यासौ स्वशुद्धात्मभावना तद्रहितेन जीवेन यदुपार्जितं विधिसंज्ञं

चारित्रं] दर्शन ज्ञान चारित्र [लक्षणं] लक्षण [नैव मनुते] नहीं जानता, अर्थात् उसको गुणोंकी परीक्षा (पहचान) नही है ॥ भावार्थ—देहके ममत्वके मूल कारण ख्याति (अपनी बड़ाई) पूजा और लाभरूप जो आर्त रौद्रस्वरूप खोटे ध्यान उनसे निज शुद्धात्माका ध्यान उसके अभावसे इस जीवने उपार्जन किये जो शुभ अशुभ कर्म उनके उदयसे उत्पन्न जो शरीर है, उसके भेदसे भेद मानता है, उसको दर्शनादि गुणोंको गम्य नहीं है । यद्यपि पापके उदयसे नरक-योनि, पुण्यके उदयसे देवोंका शरीर और शुभाशुभ मिश्रसे नर-देह तथा मायाचारसे पशुका शरीर मिलता है, अर्थात् इन शरीरोंके भेदोंसे जीवोंकी अनेक चेष्टायें देखी जाती हैं, परंतु दर्शन ज्ञान लक्षणसे सब तुल्य हैं । उपयोग लक्षणके बिना कोई जीव नहीं है । इसलिये ज्ञानीजन सबको समान जानते हैं । निश्चयनयसे दर्शन ज्ञान चारित्र जीवोंके लक्षण हैं, ऐसा जानकर ब्राह्मण, क्षत्री, वैश्य, शूद्र चांडालादि देहके भेद देखकर राग द्वेष नहीं करना चाहिये । सब जीवोंसे मैत्रीभाव करना यही तात्पर्य है ॥१०२॥

आगे सूक्ष्य बादरशरीर जीवोके कर्मके सम्बंधसे होते हैं, सो सूक्ष्म बादर स्थावर जंगम ये सब शरीरके भेद हैं, जीव तो चिद्रूप है, सब भेदोंसे रहित है, ऐसा दिखलाते हैं—[सूक्ष्माणि] सूक्ष्म [बादराणि] और बादर [अंगानि] शरीर [ये] तथा जो [बालाः] बाल वृद्ध तरुणादि अवस्थायें [विधिवशेन] कर्मोंसे [भवंति] होती हैं, [पुनः] और [जीवाः] जीव तो [सकला अपि] सभी [सर्वत्र] सब जगह [सर्वकाले अपि] और सब कालमें [तावंतः] उतने प्रमाण ही अर्थात् असंख्यातप्रदेशी ही है ॥ भावार्थ—जीवोंके शरीर व बाल वृद्धादि अवस्थायें कर्मोंके उदयसे होती हैं । अर्थात् अंगोंसे उत्पन्न हुए जो पंचेंद्रियोंके विषय उनकी वांछा जिनका मूल कारण है, ऐसे देखे सुने भोगे हुए भोगोंकी वांछारूप निदान बंधादि खोटे ध्यान उनसे विमुख जो शुद्धात्माकी भावना उससे रहित इस जीवने उपार्जन किये शुभाशुभ कर्मोंके योगसे ये चतुर्गतिके शरीर होते हैं,

कर्म तद्वशेन भवन्त्येव । न केवलमङ्गानि भवन्ति जे बाल ये बालवृद्धादिपर्यायाः तेऽपि विधिवशेनैव । अथवा संबोधनं[1] हे बाल अज्ञान । जिय पुणु सयल वि तित्तडा **जीवाः पुनः सर्वेऽपि तत्प्रमाणा द्रव्यप्रमाणं प्रत्यनन्ताः, क्षेत्रापेक्षयापि पुनरेकैकोपि जीवो यद्यपि व्यवहारेण स्वदेहमात्रस्तथापि निश्चयेन लोकाकाशप्रमितासंख्येयप्रदेशप्रमाणः । क्व ।** सव्वत्थ वि **सर्वत्र लोके** । न **केवलं लोके** सयकाल **सर्वत्र कालत्रये तु । अत्र जीवानां बादरसूक्ष्मादिकं व्यवहारेण कर्मकृतभेदं दृष्ट्वा विशुद्धदर्शनज्ञानलक्षणापेक्षया निश्चयनयेन भेदो न कर्तव्य इत्यभिप्रायः ॥१०३॥**

अथ जीवानां शत्रुमित्रादिभेदं यः न करोति स निश्चयनयेन जीवलक्षणं जानातीति प्रतिपादयति—

सत्तु वि मित्तु वि अप्पु परु जीव असेसु विएइ ।
एक्कु करेविणु जो मुणइ सो अप्पा जाणेइ ॥१०४॥

शत्रुरपि मित्रमपि आत्मा परः जीवा अशेषा अपि एते ।
एकत्वं कृत्वा यो मनुते स आत्मानं जानाति ॥१०४॥

सत्तु वि इत्यादि । सत्तु वि **शत्रुरपि** मित्तु वि **मित्रमपि** अप्पु परु **आत्मा परोऽपि** जीव असेसु वि **जीवा अशेषा अपि** एइ **एते प्रत्यक्षीभूताः** एक्कु करेविणु जो मुणइ **एकत्वं कृत्वा यो मनुते शत्रुमित्रजीवितमरणलाभादिसमताभावनारूपवीतराग-**

और बाल वृद्धादि अवस्थायें होती हैं । ये अवस्थायें कर्मजनित हैं, जीवको नहीं हैं। हे अज्ञानी जीव, यह बात तू निःसंदेह जान। ये सभी जीव द्रव्य-प्रमाणसे अनंत हैं, क्षेत्रकी अपेक्षा एक एक जीव यद्यपि व्यवहारनयकर अपने मिले हुए देहके प्रमाण है, तो भी निश्चयनयकर लोकाकाशप्रमाण असख्यातप्रदेशी है। सब लोकमे सब कालमे जीवोंका यही स्वरूप जानना। बादर सूक्ष्मादि भेद कर्मजनित होना समझकर (देखकर) जीवोंके भेद मत जानो। विशुद्ध ज्ञान दर्शनकी अपेक्षा सब ही जीव समान हैं, कोई भी जीव दर्शन ज्ञान रहित नही है, ऐसा जानना ॥१०३॥

आगे जो जीवोंके शत्रु मित्रादि भेद नहीं करता है, वह निश्चयकर जीवका लक्षण जानता है, ऐसा कहते है—[**एते अशेषा अपि**] ये सभी [**जीवाः**] जीव हैं, उनमेसे [**शत्रुरपि**] कोई एक किसीका शत्रु भी है, [**मित्रं अपि**] मित्र भी है, [**आत्मा**] अपना है, और [**परः**] दूसरा है। ऐसा व्यवहारसे जानकर [**यः**] जो ज्ञानी [**एकत्वं कृत्वा**] निश्चयसे एकपना करके अर्थात् सबमें समदृष्टि रखकर [**मनुते**] समान मानता है, [**सः**] वही [**आत्मानं**] आत्माके स्वरूपको [**जानाति**] जानता है ॥ **भावार्थ**—इन संसारी जीवोंमे शत्रु आदि अनेक भेद दीखते हैं, परंतु जो ज्ञानी सबको एक दृष्टिसे देखता है—समान जानता है। शत्रु, मित्र, जीवित, मरण, लाभ, अलाभ आदि सबोंमें समभावरूप, जो वीतराग परमसामायिकचारित्र उसके प्रभावसे जो जीवोंको शुद्ध संग्रहनय-

---

१. पाठान्तरः—हे बाल अज्ञान = बाल हे अज्ञान ।

परमसामायिकं कृत्वा योऽसौ जीवानां शुद्धसंग्रहनयेनैकत्वं मन्यते सो अप्पा जाणेइ स वीतरागसहजानन्दैकस्वभावं शत्रुमित्रादिविकल्पकल्लोलमालारहितमात्मानं जानातीति भावार्थः ॥१०४॥

अथ योऽसौ सर्वजीवान् समानान्न मन्यते तस्य समभावो नास्तीत्यावेदयति—

जो णवि मण्णइ जीव जिय सयल वि एक्क-सहाव ।
तासु ण थक्कइ भाउ समु भव-सायरि जो णाव ॥१०५॥

यो नैव मन्यते जीवान् जीव सकलानपि एकस्वभावान् ।
तस्य न तिष्ठति भावः समः भवसागरे यः नौः ॥१०५॥

जो णवि इत्यादि । जो णवि मण्णइ यो नैव मन्यते । कान् । जीव जीवान् जिय हे जीव । कतिसंख्योपेतान् । सयल वि समस्तानपि । कथंभूतान्न मन्यते । एक्कसहाव वीतरागविकल्पसमाधौ स्थित्वा सकलविमलकेवलज्ञानादिगुणैर्निश्चयेनैकस्वभावान् । तासु ण थक्कइ भाउ समु तस्य न तिष्ठति समभावः । कथंभूतः । भवसायरि जो णाव संसारसमुद्रे यो नावस्तरणोपायभूता नौरिति । अत्रेदं व्याख्यानं ज्ञात्वा रागद्वेषमोहान् मुक्त्वा च परमोपशमभावरूपे शुद्धात्मनि स्थातव्यमित्यभिप्रायः ॥१०५॥

अथ जीवानां योऽसौ भेदः स कर्मकृत इति प्रकाशयति—

जीवहँ भेउ जि कम्म-किउ कम्मु वि जीउ ण होइ ।
जेण विभिण्णउ होइ तहँ कालु लहेविणु कोइ ॥१०६॥

जीवानां भेद एव कर्मकृतः कर्म अपि जीवो न भवति ।
येन विभिन्नः भवति तेभ्यः कालं लब्ध्वा कमपि ॥१०६॥

कर जानता है, सबको समान मानता है, वही अपने निज स्वरूपको जानता है। जो निजस्वरूप, वीतराग सहजानन्द एक स्वभाव तथा शत्रु मित्र आदि विकल्प—जालसे रहित है, ऐसे निजस्वरूपको समताभावके विना नही जान सकता ॥२०४॥

आगे जो सब जीवोंको समान नही मानता, उसके समभाव नहीं हो सकता, ऐसा कहते है—[जीव] हे जीव, [यः] जो [सकलानपि] सभी [जीवान्] जीवोंको [एकस्वभावान्] एक स्वभाववाले [नैव मन्यते] नहीं जानता, [तस्य] उस अज्ञानीके [समः भावः] समभाव [न तिष्ठति] नही रहता, [यः] जो समभाव [भवसागरे] संसार-समुद्रके तैरनेको [नौ] नावके समान है ॥ भावार्थ—जो अज्ञानी सब जीवोंको समान नहीं मानता, अर्थात् वीतराग निर्विकल्पसमाधिमें स्थित होकर सबको समान दृष्टिसे नहीं देखता, सकल ज्ञायक परम निर्मल केवलज्ञानादि गुणोंकर निश्चयनयसे सब जीव एकसे हैं, ऐसी जिसके श्रद्धा नहीं है, उसके समभाव नहीं उत्पन्न हो सकता। ऐसा निस्सन्देह जानो। कैसा है समभाव, जा संसार समुद्रसे तारनेके लिये जहाजके समान है। यहाँ ऐसा व्याख्यान जानकर राग द्वेष मोहको तजकर परमशान्तभावरूप शुद्धात्मासे लीन होना योग्य है॥ ०५॥

आगे जीवोंमें जो भेद हैं, वह सब कर्मजनित है, ऐसा प्रगट करते हैं—[जीवानां] जीवोंमें

जीवहं इत्यादि । जीवाहं जीवनां भेउ जि भेद एव कम्मकिउ निर्भेदशुद्धात्म-विलक्षणेन कर्मणा कृतः, कम्मु वि जीउ ण होइ ज्ञानावरणादिकर्मैव विशुद्धज्ञान-दर्शनस्वभावं जीवस्वरूपं न भवति । कस्मान्न भवतीति चेत् । जेण विभिण्णउ होइ तहं येन कारणेन विभिन्नो भवति तेभ्यः कर्मभ्यः । किं कृत्वा । कालु कलहेविणु कोइ वीतरागपरमात्मानुभूतिसहकारिकारणभूतं कमपि कालं लब्ध्वेति । अयमत्र भावार्थः । टङ्कोत्कीर्णज्ञायकैकशुद्धजीवस्वभावाद्विलक्षणं मनोज्ञामनोज्ञस्त्रीपुरुषादिजीवभेदं दृष्ट्वा रागाद्यपध्यानं न कर्तव्यमिति ॥१०६॥

अतः कारणात् शुद्धसंग्रहेण भेदं मा कार्षीरिति निरूपयति--

एक्कु करे मण बिण्णि करि मं करि वण्ण-विसेसु ।
इक्कइं देवइं जें वसइ तिहुयणु एहु असेसु ॥१०७॥

एकं गुरु मा द्वौ कुरु मा कुरु वर्णविशेषम् ।
एकेन देवेन येन वसति त्रिभुवनं एतद् अशेषम् ॥१०७॥

एक्कु करे इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । एक्कु करे सेनावनादि-वज्जीवजात्यपेक्षया सर्वमेकं कुरु । मण बिण्णि करि मा द्वौ कार्षीः । मं करि वण्णविसेसु मनुष्यजात्यपेक्षया ब्राह्मणक्षत्रियवैश्यशूद्रादिवर्णभेदं मा कार्षीः, यतः कारणात्

[भेदः] नर नारकादि भेद [कर्मकृत एव] कर्मोंसे ही किया गया है, और [कर्म अपि] कर्म भी [जीवः] जीव [न भवति] नहीं हो सकता । [येन] क्योंकि वह जीव [कमपि] किसी [कालं] समयको [लब्ध्वा] पाकर [तेभ्यः] उन कर्मोंसे [विभिन्नः] जुदा [भवति] हो जाता है । भावार्थ—कर्म शुद्धात्मासे जुदे हैं, शुद्धात्मा भेद-कल्पनासे रहित है । ये शुभाशुभकर्म जीवका स्वरूप नहीं हैं, जीवका स्वरूप तो निर्मल ज्ञान दर्शन स्वभाव है अनादिकालसे यह जीव अपने स्वरूपको भूल रहा है, इसलिये रागादि अशुद्धोपयोगसे कर्मको बाँधता है । सो कर्मका बन्ध अनादिकालका है । इस कर्मबन्धसे कोई एक जीव वीतराग परमात्माकी अनुभूतिके सहकारी कारणरूप जो सम्यक्त्वकी उत्पत्तिका समय उसको पाकर उन कर्मोंसे जुदा हो जाता है । कर्मोंसे छूटनेका यही उपाय है, जो जीवके भवस्थिति समीप (थोड़ी) रही हो, तभी सम्यक्त्व उत्पन्न होता है, और सम्यक्त्व उत्पन्न हो जावे, तभी कर्म-कलंकसे छूट सकता है । तात्पर्य यह है, कि जो टंकोत्कीर्ण ज्ञायक एक शुद्ध स्वभाव उससे विलक्षण जो स्त्री पुरुषादि शरीरके भेद उनको देखकर रागादि खोटे ध्यान नहीं करने चाहिये ॥१०६॥

आगे ऐसा कहते हैं, कि तू शुद्ध संग्रहनयकर जीवोंमें भेद मत कर—[एकं कुरु] हे आत्मन्, तू जातिकी अपेक्षा सब जीवोंको एक जान, [मा द्वौ कार्षीः] इसलिये राग और द्वेष मत कर, [वर्णविशेषं] मनुष्य जातिकी अपेक्षा ब्राह्मणादि वर्ण-भेदको भी [मा कार्षीः] मत कर, [येन] क्योंकि [एकेन देवेन] अभेदनयसे शुद्ध आत्माके समान [एतद् अशेषं] ये सब [त्रिभुवनं] तीन-लोकमें रहनेवाली जीव-राशि [वसति] ठहरी हुई है, अर्थात् जीवपनेसे सब एक हैं ॥ भावार्थ—सब जीवोंकी एक जाति है । जैसे सेना और वन एक है, वैसे जातिकी अपेक्षा सब जीव एक हैं । नर नारकादि भेद और ब्राह्मण, क्षत्री, वैश्य, शूद्रादि वर्ण-भेद सब कर्मजनित हैं, अभेदनयसे सब

इक्कइं देवइं एकेन देवेन अभेदनयापेक्षया शुद्धैकजीवद्रव्येण जें येन कारणेन वसइ वसति । किं कर्तृ । तिहुयणु त्रिभुवनं त्रिभुवनस्थो जीवराशिः एहु एषः प्रत्यक्षीभूतः । कतिसंख्योपेतः । असेसु अशेषं समस्त इति । त्रिभुवनग्रहणेन इह त्रिभुवनस्थो जीवराशिर्गृह्यते इति तात्पर्यम् । तथाहि । लोकस्तावदयं सूक्ष्मजीवैर्निरन्तरं भृतस्तिष्ठति । बादरैश्चाधारवशेन क्वचित् क्वचिदेव त्रसैः क्वचिदपि । तथा ते जीवाः शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन शक्त्यपेक्षया केवलज्ञानादिगुणरूपास्तेन कारणेन स एव जीवराशिः यद्यपि व्यवहारेण कर्मकृतस्तिष्ठति तथापि निश्चयनयेन शक्तिरूपेण परमब्रह्मस्वरूपमिति भण्यते, परमविष्णुरिति भण्यते, परमशिव इति च । तेनैव कारणेन स एव जीवराशिः केचन परब्रह्ममयं जगद्वदन्ति, केचन परमविष्णुमयं वदन्ति, केचन पुनः परमशिवमयमिति च । अत्राह शिष्यः । यद्येवंभूतं जगत्संमतं भवतां तर्हि परेषां किमिति दूषणं दीयते भवद्भिः । परिहारमाह । यदि पूर्वोक्तनयविभागेन केवलज्ञानादिगुणापेक्षया वीतरागसर्वज्ञप्रणीतमार्गेण मन्यन्ते तदा तेषां दूषणं नास्ति, यदि पुनरेकः पुरुषविशेषो व्यापी जगत्कर्ता ब्रह्मादिनामास्तीति

ब्राह्मण, क्षत्री, वैश्य, शूद्रादि वर्ण-भेद सब कर्मजनित है अभेदनयसे सब जीवोंको एक जानो । अनंत जीवोंकर यह लोक भरा हुआ है । उस जीव राशिमें भेद ऐसे है—जो पृथ्वीकायसूक्ष्म, जलकायसूक्ष्म अग्निकायसूक्ष्म, वायुकायसूक्ष्म, नित्यनिगोदसूक्ष्म, इतरनिगोदसूक्ष्म—इन छह तरहके सूक्ष्म जीवोंकर तो यह लोक निरन्तर भरा हुआ है, सब जगह इस लोकमे सूक्ष्म जीव हैं । और पृथ्वीकायबादर, जलकायबादर, अग्निकयबादर, वायुकायबादर, नित्यनिगोदबादर, इतरनिगोदबादर, और प्रत्येकवनस्पति—ये जहाँ आधार है वहाँ हैं । सो कही पाये जाते हैं, कहीं नहीं पाये जाते, परन्तु ये भी बहुत जगह हैं । इस प्रकार स्थावर तो तीनों लोकमें पाये जाते हैं, और दोइंद्री, तेइंद्री, चौइंद्री पंचेंद्री तिर्यंच ये मध्यलोकमें ही पाये जाते हैं, अधोलोक ऊर्ध्वलोकमें नही । उसमेंसे दोइन्द्री, तेइन्द्री, चौइन्द्री जीव कर्मभूमिमें ही पाये जाते हैं, भोगभूमिमें नहीं । भोगभूमिमे गर्भज पंचेन्द्री सैनी थलचर या नभचर ये दोनों जाति-तिर्यंच है । मनुष्य मध्यलोकमे ढाई द्वीप में पाये जाते हैं, अन्य जगह नहीं, देवलोकमें स्वर्गवासी देव देवो पाये जाते हैं, अन्य पंचेंद्री नही, पाताललोकमें ऊपरके भागमें भवनवासीदेव तथा व्यंतरदेव और नीचेके भागमें सात नरकोंके नारकी पंचेंद्री हैं, अन्य कोई नहीं और मध्यलोकमें भवनवासी व्यंतरदेव तथा ज्योतिषीदेव ये तीन जातिके देव और तिर्यंच पाये जाते हैं, इस प्रकार त्रसजीव किसी जगह हैं, किसी जगह नहीं हैं । इस तरह यह लोक जीवोंसे भरा हुआ है । सूक्ष्मस्थावरके विना तो लोकका कोई भाग खाली नही है, सब जगह सूक्ष्मस्थावर भरे हुए है, । ये सभी जीव शुद्ध पारिणामिक परमभाव ग्राहक शुद्ध द्रव्यार्थिकनयकर शक्तिकी अपेक्षा केवलज्ञानादि गुणरूप हैं । इसलिये यद्यपि यह जीव-राशि व्यवहारनयकर कर्माधीन है, तो भी निश्चयनयकर शक्तिरूप परब्रह्मस्वरूप है । इन जीवोंको ही परमविष्णु कहना, परमशिव कहना चाहिये । यही अभिप्राय लेकर कोई एक ब्रह्ममयी जगत् कहते हैं, कोई एक विष्णुमयी कहते हैं,

मन्यन्ते तदा तेषां दूषणम् । कस्मात् दूषणमिति चेत् । प्रत्यक्षादिप्रमाणबाधितत्वात् साधकप्रमाणप्रमेयचिन्ता तर्के विचारिता तिष्ठत्यत्र तु नोच्यते अध्यात्मशास्त्रत्वादित्यभिप्रायः ॥१०७॥ इति षोडशवर्णिकासुवर्णदृष्टान्तेन केवलज्ञानादिलक्षणेन सर्वे जीवाः समाना भवन्तीति व्याख्यानमुख्यतया त्रयोदशसूत्रैरन्तरस्थलं गतम् । एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये चतुर्भिरन्तरस्थलैः शुद्धोपयोगवीतरागस्वसंवेदनज्ञानपरिग्रहत्यागसर्वजीवसमानताप्रतिपादनमुख्यत्वेनैकचत्वारिंशत्सूत्रैर्महास्थलं समाप्तम् ।

अत ऊर्ध्वं 'परु जाणंतु वि' इत्यादि सप्ताधिकशतसूत्रपर्यन्ते स्थलसंख्याबहिर्भूतान् प्रक्षेपकान् विहाय चूलिकाव्याख्यानं करोति इति—

परु जाणंतु वि परम-मुणि पर-संसग्गु चयंति ।
पर-संगइँ परमप्पयहँ लक्खहँ जेण चलंति ॥१०८॥

परं जानन्तोऽपि परममुनय. परसंसर्गं त्यजन्ति ।
परसंगेन परमात्मनः लक्ष्यस्य येन चलन्ति ॥१०८॥

परु जाणंतु वि इत्यादि पदखण्डनारूपेण व्याख्यानं क्रियते । परु जाणंतु वि परद्रव्यं जानन्तोऽपि । के ते । परममुणि वीतरागस्वसंवेदनज्ञानरताः परममुनयः । किं कुर्वन्ति ।

कोई एक शिवमयी कहते हैं। यहाँपर शिष्यने प्रश्न किया, कि तुम भी जीवोंको परब्रह्म मानते हो, तथा परमविष्णु परमशिव मानते हो, तो अन्यमतवालोको क्यों दूषण देते हो ? उसका समाधान—हम तो पूर्वोक्त नयविभागकर केवलज्ञानादि गुणकी अपेक्षा वीतराग सर्वज्ञप्रणीत मार्गसे जीवोंको ऐसा मानते हैं, तो दूषण नहीं है। इस तरह वे नहीं मानते है, वे एक कोई पुरुष जगत्का कर्त्ता हर्त्ता मानते हैं। इसलिये उनको दूषण दिया जाता है, क्योंकि जो कोई एक शुद्ध बुद्ध नित्य मुक्त है, उस शुद्ध बुद्धको कर्त्ता हर्त्तापना हो ही नहीं सकता, और इच्छा है वह मोहकी प्रकृति है। भगवान् मोहसे रहित हैं, इसलिये कर्त्ता हर्त्ता नहीं हो सकते। कर्त्ता हर्त्ता मानना प्रत्यक्ष विरोध है। हम तो जीव-राशिको परमब्रह्म मानते हैं, उसी जीवराशिसे लोक भरा हुआ है। अन्यमती ऐसा मानते हैं, कि एक ही ब्रह्म अनतरूप हो रहा है। जो वही एक सबरूप हो रहा होवे, तो नरक निगोद स्थानको कौन भोगे ? इसलिये जीव अनंत है। इन जीवोंको ही परमब्रह्म परमशिव कहते है, ऐसा तू निश्चयसे जान ॥ १०७ ॥ इस प्रकार सोलहवानीके सोनेके दृष्टान्तद्वारा केवलज्ञानादि लक्षणसे सब जीव समान हैं, इस व्याख्यानकी मुख्यतासे तेरह दोहा-सूत्र कहे। इस तरह मोक्ष-मार्ग मोक्ष-फल, और मोक्ष इन तीनोंको कहनेवाले दूसरे महाधिकारमें चार अन्तरस्थलोंका इकतालीस दोहोंका महास्थल समाप्त हुआ। इसमें शुद्धोपयोग, वीतरागस्वसंवेदनज्ञान, परिग्रह त्याग, और सब जीव समान हैं, ये कथन किया।

आगे 'पर जाणंतु वि' इत्यादि एकसौ सात दोहा पर्यंत तीसरा महाधिकार कहते हैं, उसीमें ग्रंथको समाप्त करते हैं-[परममुनयः] परममुनि [परं जानंतोऽपि] उत्कृष्ट आत्मद्रव्यको जानते हुए भी [परसंसर्गं] परद्रव्य जो द्रव्यकर्म भावकर्म, जो कर्म उसके सम्बन्धको [त्यजंति] छोड़ देते है। [येन]

परसंसग्गु चयंति **परसंसर्गं त्यजन्ति निश्चयेनाभ्यन्तरे रागादिभावकर्म-ज्ञानावरणादि-द्रव्यकर्मशरीरादिनोकर्म च बहिर्विषये मिथ्यात्वरागादिपरिणतासंवृतनोऽपि परद्रव्यं भण्यते । तत्संसर्गं परिहरन्ति ।** यतः **कारणात्** परसंसग्गइ [?] **पूर्वोक्तबाह्याभ्यन्तर परद्रव्यसंसर्गेण** परमप्पयहं **वीतरागनित्यानन्दैकस्वभावपरमसमरसीभावपरिणत-परमात्मतत्त्वस्य । कथंभूतस्य ।** लक्खहं **लक्ष्यस्य ध्येयभूतस्य धनुर्विद्याभ्यासप्रस्तावे लक्ष्यरूपस्यैव** जेण चलंति **येन कारणेन चलन्ति त्रिगुप्तिसमाधेः सकाशात् च्युता** भवन्तीति । अत्र **परमध्यानविघातकत्वान्मिथ्यात्वरागादिपरिणामस्तत्परिणतः पुरुषरूपो वा परसंसर्गस्त्यजनीय इति भावार्थः ॥१०८॥**

अथ तमेव परद्रव्यसंसर्गत्यागं कथयति—

जो सम-भावहँ बाहिरउ तिं सहुं मं करि संगु ।
जोइय देहु परिच्चयहि देहु ण भल्लउ होइ ।
देह-विभिण्णउ णाणमउ सो तुहुं अप्पा जोइ ॥१५२॥

योगिन् देहं परित्यज देहो न भद्रः भवति ।
देहविभिन्नं ज्ञानमयं तं त्वं आत्मानं पश्य ॥१५२॥

जोइय इत्यादि । जोइय हे योगिन् देहु परिच्चयहि शुचिदेहान्नित्यानन्दैकस्वभावात् शुद्धात्मद्रव्याद्विलक्षणं देहं परित्यज । कस्मात् । देहु ण भल्लउ होइ देहो भद्रः समीचीनो न भवति । तर्हि किं करोमीति प्रश्ने कृते प्रत्युत्तरं ददाति । देह-विभिण्णउ देहविभिन्नं णाणमउ ज्ञानेन निर्वृत्तं ज्ञानमयं केवलज्ञानाविनाभूतानन्तगुणमयं सो तुहुं अप्पा जोइ तं पूर्वोक्तलक्षणमात्मानं त्वं कर्ता पश्येति । अयमत्र भावार्थः । "चंडो ण मुयइ वेरं भंडणसीलो य धम्मदयरहिओ । दुट्ठो ण य एदि वसं लक्खणमेयं तु किण्हस्स ॥" इति गाथाकथितलक्षणा कृष्णलेश्या, धनधान्यादितीव्रमूर्च्छाविषयाकांक्षाविरूपा नीललेश्या, रणे मरणं प्रार्थयति स्तूयमानः संतोषं करोतीत्यादिलक्षणा कापोतलेश्या च, एवं लेश्यात्रयप्रभृतिसमस्तविभावत्यागेन देहाद्भिन्नमात्मानं भावय इति ॥१५२॥

अथ—

दुक्खहँ कारणु मुणिवि मणि देहु वि एहु चयंति ।
जित्थु ण पावहिँ परमसुहु तित्थु कि संत वसंति ॥१५३॥

[ज्ञानमयं] ज्ञानादि गुणमय [तं आत्मानं] ऐसे आत्माको [त्वं] तू [पश्य] देख ॥ भावार्थ— नित्यानंद अखंड स्वभाव जो शुद्धात्मा उससे जुदा और दुःखका मूल तथा महान् अशुद्ध जो शरीर उससे भिन्न आत्माको पहचान, और कृष्ण नील कापोत इन तीन अशुभ लेश्याओंको आदि लेकर सब विभावभावोंको त्यागकर, निजस्वरूपका ध्यान कर । ऐसा कथन सुनकर शिष्यने पूछा, कि हे प्रभो, इन खोटी लेश्याओंका क्या स्वरूप है ? तब श्रीगुरु कहते हैं-कृष्णलेश्याका धारक वह है, जो अधिक क्रोधी होवे, कभी बैर न छोड़े, उसका बैर पत्थरको लकीरको तरह हो, महा विषयी हो, परजीवोंकी हँसी उड़ानेमें जिसके शंका न हो, अपनी हँसी होनेका जिसका भय न हो, जिसका स्वभाव लज्जा रहित हो, दया-धर्मसे रहित हो, और अपनेसे बलवान्के वशमें हो, गरीबको सतानेवाला हो, ऐसा कृष्ण-लेश्यावालेका लक्षण कहा । नीललेश्यावालेके लक्षण कहते हैं, सो सुनो—जिसके धन-धान्यादिकको अति ममता हो, और महा विषयाभिलाषी हो, इन्द्रियोंके विषय सेवता हुआ तृप्त न हो । कापोत-लेश्याका धारक रणमें मरना चाहता है, स्तुति करनेसे अति प्रसन्न होता है । ये तीनों कुलेश्याके लक्षण कहे गये हैं, इनको छोड़कर पवित्र भावोंसे देहसे जुदे जीवको जानकर अपने स्वरूपका ध्यान कर । यही कल्याणका कारण है ॥१५२॥

आगे फिर भी देहको दुःखका कारण दिखलाते हैं—[दुःखस्य कारणं] नरकादि दुःखका कारण [इमं देहमपि] इस देहको [मनसि] मनमें [मत्वा] जानकर ज्ञानोजीव [त्यजंति] इस का ममत्व

दुःखस्य कारणं मत्वा मनसि देहमपि इमं त्यजन्ति ।
यत्र न प्राप्नुवन्ति परमसुखं तत्र किं सन्तः वसन्ति ॥१५३॥

दुक्खहं इत्यादि । दुक्खहं कारणु **वीतरागतात्त्विकानन्दरूपात् शुद्धात्मसुखाद्वि-लक्षणस्य नारकादिदुःखस्य कारणं** मुणिवि **मत्वा । क्व ।** मणि **मनसि । कम् ।** देहु वि **देहमपि** एहु **इमं प्रत्यक्षीभूतं** चयंति **देहममत्वं शुद्धात्मनि स्थित्वा त्यजन्ति** जित्थु ण पावहिं **यत्र देहे न प्राप्नुवन्ति । किम् ।** परमसुहु **पञ्चेन्द्रियविषयातीतं शुद्धात्मानु-भूतिसंपन्नं परमसुखं** तित्थु कि संत वसंति **तत्र देहे सन्तः सत्पुरुषाः किं वसन्ति शुद्धात्मसुखसंतोषं मुक्त्वा तत्र किं रतिं कुर्वन्ति इति भावार्थः ॥१५३॥**

अथात्मायत्तसुखे रतिं कुर्विति दर्शयति—

अप्पायत्तउ जं जि सुहु तेण जि करि संतोसु ।
पर सुहु वढ चिंतंताहँ हियइ ण फिट्टइ सोसु ॥१५४॥

आत्मायत्तं यदेव सुखं तेनैव कुरु संतोषम् ।
परं सुखं वत्स चिन्तयतां हृदये न नश्यति शोषः ॥१५४॥

अप्पायत्तउ इत्यादि । अप्पायत्तउ **अन्यद्रव्यनिरपेक्षत्वेनात्माधीनं** जं जि सुहु **यदेव शुद्धात्मसंवित्तिसमुत्पन्नं सुखं** तेण जि करि संतोसु **तेनैव तदनुभवेनैव संतोषं** कुरु पर सुहु वढ चिंतंताहं **इन्द्रियाधीनं परसुखं चिन्तयतां वत्स मित्र** हियइ ण

छोड देते हैं, क्योंकि [**यत्र**] जिस देहमें [**परमसुखं**] उत्तम सुख [**न प्राप्नुवंति**] नहीं पाते, [**तत्र**] उसमे [**संतः**] सत्पुरुष [**किं वसंति**] कैसे रह सकते है ? ॥ **भावार्थ**—वीतराग परमानंदरूप जो आत्म-सुख उससे विपरोत नरकादिके दुःख, उनका कारण यह शरीर, उसको बुरा समझकर ज्ञानी जोव देहकी ममता छोड़ देते हैं, और शुद्धात्मस्वरूपका सेवन करते हैं, निजस्वरूपमें ठहरकर देहादि पदार्थोंमें प्रीति छोड़ देते हैं । इस देहमें कभी सुख नहीं पाते, सदा आधि-व्याधिसे पीड़ित ही रहते हैं । पंचेन्द्रियोंके विषयोंसे रहित जो शुद्धात्मानुभूतिरूप परमसुख वह देहके ममत्व करनेसे कभी नहीं मिल सकता । महा दुःखके कारण इस शरीरमें सत्पुरुष कभी नहीं रह सकते । देहसे उदास होके संसारकी आशा छोड़ सुखका निवास जो सिद्धपद उसको प्राप्त होते हैं । और जो आत्म-भावनाको छोड़कर संतोषसे रहित होके देहादिकमें राग करते हैं, वे अनंत भव धारण करते हैं, संसारमे भटकते फिरते हैं ॥ १५३ ॥

आगे यह उपदेश करते हैं, कि तू आत्म-सुखमें प्रीतिकर—[**वत्स**] हे शिष्य, [**यदेव**] जो [**आत्मायत्तं सुखं**] परद्रव्यसे रहित आत्माधीन सुख है, [**तेनैव**] उसीमें [**संतोषं**] संतोष [**कुरु**] कर, [**परंसुखं**] इन्द्रियाधीन सुखको [**चिंतयतां**] चिन्तवन करनेवालोंके [**हृदये**] चित्तका [**शोषः**] दाह [**न नश्यति**] नहीं मिटता ॥ **भावार्थ**—आत्माधीन सुख आत्माके जाननेसे उत्पन्न होता है, इसलिये तू आत्माके अनुभवसे संतोष कर, भोगोंकी वांछा करनेसे चित्त शान्त नहीं होता । जो अध्यात्मकी प्रीति है, वह स्वाधीनता है, इसमें कोई विघ्न नहीं है, और भोगोंका अनुराग वह पराधीनता है । भोगोंको

फिट्टइ सोमु हृदये न नश्यति शोषोऽन्तर्दाह इति । अत्राध्यात्मरतिः स्वाधीना विच्छेदविघ्नौघरहिता च, भोगरतिस्तु पराधीना वह्नेरिन्धनैरिव समुद्रस्य नदीसहस्रैरिवातृप्तिकरा च । एवं ज्ञात्वा भोगसुखं त्यक्त्वा "एदम्हि रदो णिच्चं संतुट्ठो होदि णिच्चमेदम्हि । एदेण होहि तित्तो होहदि उत्तम सुक्खं ।" इति गाथाकथितलक्षणे अध्यात्मसुखे स्थित्वा च भावना कर्तव्येति तात्पर्यम् । तथा चोक्तम्—"तिणकट्ठेण व अग्गी लवणसमुद्दो णदीसहस्सेहि । ण इमो जीवो सक्को तिप्पेदुं कामभोगेहि ॥ ।" अध्यात्मशब्दस्य व्युत्पत्तिः क्रियते—मिथ्यात्वविषयकषायादिबहिर्द्रव्ये निरालम्बनत्वेनात्मन्यनुष्ठानमध्यात्मम् ॥१५४॥

अथात्मनो ज्ञानस्वभावं दर्शयति—

अप्पहँ णाणु परिच्चयवि अण्णु ण अत्थि सहाउ ।
इउ जाणेविणु जोइयहु परहँ म बंधउ राउ ॥१५५॥

आत्मनः ज्ञानं परित्यज्य अन्यो न अस्ति स्वभावः ।
इदं ज्ञात्वा योगिन् परस्मिन् मा बधान रागम् ॥१५५॥

अप्पहं इत्यादि । अप्पहं [1]शुद्धात्मनः णाणु परिच्चयवि वीतरागस्वसंवेदनज्ञानं त्यक्त्वा अण्णु ण अत्थि सहाउ अन्यो ज्ञानाद्विभिन्नः स्वभावो नास्ति इउ जणेविणु इदमात्मनः शुद्धात्मज्ञानस्व भावं ज्ञात्वा जोइयहु म योगिन् परहं बधउ राउ परस्मिन् शुद्धात्मनो विलक्षणे देहे रागादिकं मा कुरु तस्मात् । अत्रात्मनः शुद्धात्मज्ञानस्वरूपं ज्ञात्वा रागादिक त्यक्त्वा च निरन्तरं भावना कर्तव्येत्यभिप्रायः ॥१५५॥

भोगसे कभी तृप्ति नहीं होती । जैसे अग्नि ईंधनसे तृप्त नहीं होती, और सैकड़ों नदियोंसे समुद्र तृप्त नहीं होता है । ऐसा ही समयसारमें कहा है, कि हस (जीव) तू इस आत्मस्वरूपमें ही सदा लीन हो और सदा इसीमें संतुष्ट हो । इसीसे तू तृप्त होगा और इसीसे ही तुझे उत्तम सुखकी प्राप्ति होगी,। इस कथनसे अध्यात्म-सुखमें ठहरकर निजस्वरूपकी भावना करनी चाहिये, और कामभोगोंसे कभी तृप्ति नहीं हो सकती । ऐसा कहा भी है, कि जैसे तृण, काठ आदि ईंधनसे अग्नि तृप्त नहीं होती, और हजारों नदियोंसे लवणसमुद्र तृप्त नहीं होता, उसी तरह यह जीव काम भोगोंसे तृप्त नहीं होता । इसलिये विषय-सुखोंको छोड़कर अध्यात्म-सुखका सेवन करना चाहिये । आत्म-सुखका शब्दार्थ करते हैं—मिथ्यात्व विषय कषाय आदि बाह्य पदार्थोंका अवलम्बन (सहारा) छोड़ना और आत्मामें तल्लीन होना वह अध्यात्म है ॥ १५४ ॥

आगे आत्माका ज्ञानस्वभाव दिखलाते हैं–[आत्मनः] आत्माका निजस्वभाव [ज्ञानं परित्यज्य] वीतराग स्वसंवेदनज्ञानके सिवाय [अन्यः स्वभावः] दूसरा स्वभाव [न अस्ति] नहीं है, आत्मा केवलज्ञानस्वभाव है, [इति ज्ञात्वा] ऐसा जानकर [योगिन्] हे योगी, [परस्मिन्] परवस्तुसे [रागं] प्रीति [मा बधान] मत बाँध ॥ भावार्थ—पर जो शुद्धात्मासे भिन्न देहादिक उनमें राग मत कर,

---

1. पाठान्तर :—शुद्धात्मनः = स्वशुद्धात्मनः ।

अथ स्वात्मोपलम्भनिमित्तं चित्तस्थिरीकरणरूपेण परमोपदेशं पञ्चकलेन दर्शयति—

विसय-कसायहिँ मण-सलिलु णवि डहुलिज्जइ जासु ।
अप्पा णिम्मलु होइ लहु वढ पच्चक्खु वि तासु ।।१५६।।

विषयकषायैः मनःसलिलं नैव क्षुभ्यति यस्य ।
आत्मा निर्मलो भवति लघु वत्स प्रत्यक्षोऽपि तस्य ।।१५६।।

विसय इत्यादि । विसयकसायहिं मणसलिलु **ज्ञानावरणाद्यष्टकर्मजलचराकीर्णसंसारसागरे निर्विषयकषायरूपात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतैर्विषयकषायमहावातैर्मनः प्रचुरसलिलं** णवि डहुलिज्जइ **नैव क्षुभ्यति** जासु **यस्य भव्यवरपुण्डरीकस्य** अप्पा णिम्मलु होइ लहु **आत्मा रत्नविशेषोऽनादिकालरूपमहापाताले पतितः सन् रागादिमलपरिहारेण लघु शीघ्रं निर्मलो भवति । वढ वत्स । न केवलं निर्मलो भवति** पच्चक्खु वि **शुद्धात्मा परम इत्युच्यते तस्य परमस्य कला अनुभूतिः परमकला एव दृष्टिः परमकलादृष्टिः तया परमकलादृष्ट्या यावदवलोकनं सूक्ष्मनिरीक्षणं तेन प्रत्यक्षोऽपि स्वसंवेदनग्राह्योऽपि भवति । कस्य ।** तासु **यस्य पूर्वोक्तप्रकारेण निर्मलं मनस्तस्येति भावार्थः ।।१५६।।**

अथ—

अप्पा परहँ ण मेलविउ मणु मारिवि सहसत्ति ।
सो वढ जोएँ किं करइ जासु ण एही सत्ति ।।१५७।।

आत्मा परस्य न मेलितः मनो मारयित्वा सहसेति ।
स वत्स योगेन किं करोति यस्य न ईदृशी शक्तिः ।।१५७।।

आत्माका ज्ञानस्वरूप जानकर रागादिक छोड़के निरंतर आत्माकी भावना करनी चाहिये ।।१५५।।

आगे आत्माकी प्राप्तिके लिये चित्तको स्थिर करता, ऐसा परम उपदेश श्रीगुरु दिखलाते हैं—[**यस्य**] जिसका [**मन सलिलं**] मनरूपी जल [**विषयकषायैः**] विषयकषायरूप प्रचंड पवनसे [**नैव क्षुभ्यते**] नहीं चलायमान होता है, [**तस्य**] उसी भव्य जीवकी [**आत्मा**] आत्मा [**वत्स**] हे बच्चे, [**निर्मलो भवति**] निर्मल होती है, और [**लघु**] शीघ्र ही [**प्रत्यक्षोऽपि**] प्रत्यक्ष हो जाती है ।। **भावार्थ**—ज्ञानावरणादि अष्ट कर्मरूपी जलचर मगर-मच्छादि जलके जीव उनसे भरा जो संसार-सागर उसमें विषयकषायरूप प्रचंड पवन जो कि शुद्धात्मतत्त्वसे सदा पराङ्मुख हैं, उसी प्रचंड पवनसे जिसका चित्त चलायमान नहीं हुआ, उसीका आत्मा निर्मल होता है। आत्मा रत्नके समान है, अनादिकालका अज्ञानरूपी पातालमें पड़ा है, सो रागादि मलके छोड़नेसे शीघ्र ही निर्मल हो जाता है, हे बच्चे, आत्मा उन भव्य जीवोंका निर्मल होता है, और प्रत्यक्ष उनको आत्माका दर्शन होता है। परमकला जो आत्माकी अनुभूति वही हुई निश्चयदृष्टि उससे आत्मस्वरूपका अवलोकन होता है। आत्मा स्वसंवेदनज्ञान करके ही ग्रहण करने योग्य है। जिसका मन विषयसे चंचल न हो, उसीको आत्माका दर्शन होता है ।।१५६।।

अप्पा इत्यादि । अप्पा अयं प्रत्यक्षीभूतः सविकल्प **आत्मा** परहं **ख्याति-पूजालाभप्रभृतिसमस्तमनोरथरूपविकल्पजालरहितस्य विशुद्धज्ञानदर्शनस्वभावस्य पर-मात्मनः** ण मेलविउ **न योजितः । किं कृत्वा ।** मणु मारिवि **मिथ्यात्वविषयकषाया-दिविकल्पसमूहपरिणतं मनो वीतरागनिर्विकल्पसमाधिशस्त्रेण मारयित्वा** सहस त्ति **झटिति** सो वढ जोएं किं करइ **स पुरुषः वत्स योगेन किं करोति । स कः ।** जासु ण एही सत्ति **यस्येदृशी मनोमारणशक्तिर्नास्तीति तात्पर्यम्** ॥१५७॥

अथ—

अप्पा मेल्लिवि णाणमउ अण्णु जे झायहिँ झाणु ।
वढ अण्णाण-वियंभियहँ कउ तहँ केवल-णाणु ॥१५८॥

आत्मानं मुक्त्वा ज्ञानमयं अन्यद् ये ध्यायन्ति ध्यानम् ।
वत्स अज्ञानविजृम्भितानां कुतः तेषां केवलज्ञानम् ॥१५८॥

अप्पा इत्यादि । अप्पा **स्वशुद्धात्मानं** मेल्लिवि **मुक्त्वा । कथंभूतमात्मानम् ।** णाणमउ **सकलविमलकेवलज्ञानाद्यनन्तगुणनिर्वृत्तं** अण्णु **अन्यद्बहिर्द्रव्यालम्बनं** जे **ये केचन** झायहिं **ध्यायन्ति । किम् । झाणु ध्यानं वढ वत्स मित्र** अण्णाणवियंभियहं

आगे यह कहते हे, कि जिसने शीघ्र ही मनको वशकर आत्माको परमात्मासे नही मिलाया, जिसमे ऐसी शक्ति नहीं है, वह योगसे क्या कर सकता है ? कुछ भी नहीं कर सकता—[**सहसा मन मारयित्वा**] जिसने शीघ्र ही मनको वशमें करके [**आत्मा**] यह आत्मा [**परस्य न मेलित.**] परमात्मामे नही मिलाया, [**वत्स**] हे शिष्य, [**यस्य** [जिसकी [**ईदृशी**] ऐसो [**शक्तिः**] शक्ति [**न**] नहीं है, [**सः**] वह [**योगेन**] योगसे [**किं करोति**] क्या कर सकता है ? ॥ **भावार्थ**—यह प्रत्यक्षरूप संसारी जीव विकल्प सहित है दशा जिसको, उसको समस्त विकल्प-जाल रहित निर्मल ज्ञान दर्शन स्वभाव परमात्मासे नही मिलाया । मिथ्यात्व विषय कषायादि विकल्पोंके समूहकर परि-णत हुआ जो मन उसको वीतराग निर्विकल्प समाधिरूप शस्त्रसे शीघ्र ही मारकर आत्माको परमात्मासे नहीं मिलाया, वह योगी योगसे क्या कर सकता है ? कुछ भी नही कर सकता । जिसमें मन मारने-की शक्ति नहीं है, वह योगी कैसा ? योगी तो उसे कहते हैं, कि जो बड़ाई पूजा (अपनी महिमा) और लाभ आदि सब मनोरथरूप विकल्प-जालोंसे रहित निर्मल ज्ञान दर्शनमयी परमात्माको देखे जाने अनुभव करे । सो ऐसा मनके मारे बिना नही हो सकता, यह निश्चय जानना ॥१५७॥

आगे ज्ञानमयी आत्माको छोड़कर जो अन्य पदार्थका ध्यान करते हैं, वे अज्ञानी हैं, उनको केवलज्ञान कैसे उत्पन्न हो सकता है, ऐसा निरूपण करते हैं—[**ज्ञानमयं**] जो महा निर्मल केवल-ज्ञानादि अनंतगुणरूप [**आत्मानं**] आत्मद्रव्यको [**मुक्त्वा**] छोड़कर [**अन्यद्**] जड़ पदार्थ पर-द्रव्य उनका [**ये ध्यानं ध्यायंति**] ध्यान लगाते हैं, [**वत्स**] हे वत्स, वे अज्ञानी हैं, [**तेषां अज्ञान-**

शुद्धात्मानुभूतिविलक्षणाज्ञानविजृम्भितानां परिणतानां कउ तहं केवलणाणु कथं तेषां केवलज्ञानं किंतु नैवेति । अत्र यद्यपि प्राथमिकानां सविकल्पावस्थायां चित्तस्थितिकरणार्थं विषयकषायरूपदुर्ध्यानवञ्चनार्थं च जिनप्रतिमाक्षरादिकं ध्येयं भवतीति तथापि निश्चयध्यानकाले स्वशुद्धात्मैव ध्येय इति भावार्थः ॥१५८॥

अथ—

सुण्णउँ पउँ झायंताहँ वलि वलि जोइयडाहँ ।
समरसि-भाउ परेण सहु पुण्णु वि पाउ ण जाहँ ॥१५९॥

शून्यं पदं ध्यायतां पुनः पुनः (?) योगिनाम् ।
समरसीभावं परेण सह पुण्यमपि पापं न येषाम् ॥१५९॥

सुण्णउं पउं इत्यादि । सुण्णउ शुभाशुभमनोवचनकायव्यापारैः शून्यं पउ वीतरागपरमानन्दैकसुखामृतरसास्वादरूपा स्वसंवित्तिमयी या सा परमकला तया भरितावस्थापदं निजशुद्धात्मस्वरूपं झायंताहं वीतरागत्रिगुप्तिसमाधिबलेन ध्यायतां वलि वलि जोइयडाहं श्रीयोगीन्द्रदेवाः स्वकीयाभ्यन्तरगुणानुरागं प्रकटयन्ति, बलि क्रियेऽहमिति परमयोगिनां प्रशंसां कुर्वन्ति । येषां किम् । समरसिभाउ वीतरागपरमाह्लादसुखेन परमसमरसीभावम् । केन सह । परेण साहु स्वसंवेद्यमानपरमात्मना

[विजृंभितानां] उन शुद्धात्माके ज्ञानसे विमुख कुमति कुश्रुत कुअवधिरूप अज्ञानसे परिणत हुए जोवोंको [केवलज्ञानं कुत] केवलज्ञानकी प्राप्ति कैसे हो सकती ? कभी नही हो सकती ॥ **भावार्थ**—यद्यपि विकल्प सहित अवस्थामे शुभोपयोगियोंको चित्तकी स्थिरताके लिये और विषय कषायरूप खोटे ध्यानके रोकनेके लिये जिनप्रतिमा तथा नमोकारमंत्रके अक्षर ध्यावने योग्य हैं, तो भी निश्चय ध्यानके समय शुद्ध आत्मा ही ध्यावने योग्य है, अन्य नहीं ॥१५८॥

आगे शुभाशुभ विकल्पसे रहित जो निर्विकल्प (शून्य) ध्यान उसको जो ध्याते हैं, उन योगियोंको मैं बलिहारो करता हूँ, ऐसा कहते है—[**शून्यं पदं ध्यायतां**] विकल्प रहित ब्रह्मपदको ध्यावनेवाले [**योगिनां**] योगियोंको मैं [**बलि बलि**] बार बार मस्तक नमाकर पूजा करता हूं, [**येषां**] जिन योगियोंके [**परेण सह**] अन्य पदार्थोंके साथ [**समरसीभावं**] समरसीभाव है, और [**पुण्यं पापं अपि न**] जिनके पुण्य और पाप दोनों ही उपादेय नही हैं ॥ **भावार्थ**—शुभ-अशुभ मन, वचन, कायके व्यापार रहित जो वीतराग परमआनंदमयी सुखामृत-रसका आस्वाद वही उसका स्वरूप है, ऐसी आत्मज्ञानमयी परमकलाकर भरपूर जो ब्रह्मपद-शून्यपद-निज शुद्धात्मस्वरूप उसको ध्यानी राग रहित तीन गुप्तिरूप समाधिके बलसे ध्यावते हैं, उन ध्यानी योगियोंको मैं बार बार बलिहारो करता हूँ, ऐसे श्रीयोगींद्रदेव अपना अन्तरंगका धर्मानुराग प्रगट करते हैं, और परम योगीश्वरोंके परम स्वसंवेदनज्ञान सहित महा समरसीभाव है । समरसोभावका लक्षण ऐसा है, कि जिनके इन्द्र और कीट दोनों समान, चिंतामणिरत्न और कंकड़ दोनों समान हों । अथवा ज्ञानादि गुण और गुणी निज शुद्धात्म द्रव्य इन दोनोंका एकीभावरूप परिणमन वह समरसीभाव है, उस कर सहित हैं, जिनके पुण्य पाप दोनों ही नहीं हैं । ये दोनों शुद्ध बुद्ध चैतन्य स्वभाव परमात्मासे भिन्न हैं, सो जिन मुनियों

सह । पुनरपि किं येषाम् । पुण्णु वि पाउ ण जाहं शुद्धबुद्धैकस्वभावपरमात्मनो विलक्षणं पुण्यपापद्वयमिति न येषामित्यभिप्रायः ॥१५९॥

अथ—

उव्वस वसिया जो करइ वसिया करइ जु सुण्णु ।
बलि किज्जउँ तसु जोइयहिँ जासु ण पाउ ण पुण्णु ॥१६०॥

उद्वसान् वसितान् यः करोति वसितान् करोति यः शून्यान् ।
बलि कुर्वेऽहं तस्य योगिनः यस्य न पापं न पुण्यम् ॥१६०॥

उव्वस इत्यादि । उव्वस उद्वसान् शून्यान् । कान् । वीतरागतात्त्विकचिदानन्दोच्छलननिर्भरानन्दशुद्धात्मानुभूतिपरिणामान् परमानन्दनिर्विकल्पस्वसंवेदनज्ञानबलेनेदानीं विशिष्टज्ञानकाले वसिया करइ तेनैव स्वसंवेदनज्ञानेन वसितान् भरितावस्थान् करोति जो यः परमयोगी सुण्णु निश्चयनयेन शुद्धचैतन्यनिश्चयप्राणस्य हिंसकत्वान्मिथ्यात्वविकल्पजालमेव निश्चयहिंसा तत्प्रभृतिसमस्तविभावपरिणामान् स्वसंवेदनज्ञानलाभात्पूर्वं वसितानिदानीं शून्यान् करोतीति बलि किज्जउं तसु जोइयहिं बलिर्मस्तकस्योपरितनभागेनावतारणं क्रियेऽहमिति तस्य योगिनः । एवं श्रीयोगीन्द्रदेवाः गुणप्रशंसां कुर्वन्ति । पुनरपि किं यस्य योगिनः । जासु ण यस्य न । किम् । पाउ ण पुण्णु वीतरागशुद्धात्मतत्त्वाद्विपरीतं न पुण्यपापद्वयमिति तात्पर्यम् ॥१६०॥

अथैक सूत्रेण प्रश्नं कृत्वा सूत्रचतुष्टयेनोत्तरं दत्वा च तमेव पूर्वसूत्रपञ्चकेनोक्तं

ने दोनोंको हेय समझ लिया है, परमध्यानमें आरूढ़ है, उनकी मैं बार बार बलिहारी जाता हूँ ॥१५९॥

आगे फिर भी योगीश्वरोंकी प्रशंसा करते हैं—[यः] जो [उद्वसान्] ऊजड़ है, अर्थात् पहले कभी नहीं हुए ऐसे शुद्धोपयोगरूप परिणामोंको [वसितान्] स्वसंवेदनज्ञानके बलसे बसाता है, अर्थात् अपने हृदयमें स्थापन करता है, और [यः] जो [वसितान्] पहलेके बसे हुए मिथ्यात्वादि परिणाम हैं, उनको [शून्यान्] ऊजड़ करता है, उनको निकाल देता है, [तस्य योगिनः] उस योगीकी [अहं] मैं [बलिं] पूजा [कुर्वे] करता हूँ, [यस्य] जिसके [न पापं न पुण्यं] न तो पाप है और न पुण्य है ॥ **भावार्थ**—जो प्रगटरूप नहीं बसते हैं, अनादिकालके वीतराग चिदानंदस्वरूप शुद्धात्मानुभूतिरूप शुद्धोपयोग परिणाम उनको अब निर्विकल्प स्वसंवेदनज्ञानके बलसे बसाता है, निज स्वादनरूप स्वाभाविक ज्ञानकर शुद्ध परिणामोंकी बस्ती निज घटरूपी नगरमें भरपूर करता है। और अनादिकालके जो शुद्ध चैतन्यरूप निश्चयप्राणोंके घातक ऐसे मिथ्यात्व रागादिरूप विकल्पजाल हैं, उनको निज स्वरूप नगरसे निकाल देता है, उनको ऊजड़ कर देता है, ऐसे परमयोगीकी मैं बलिहारी हूँ, अर्थात् उसके मस्तकपर मैं अपनेको वारता हूँ। इस प्रकार श्रीयोगीन्द्रदेव परमयोगियोंकी प्रशंसा करते हैं। जिन योगियोंके वीतराग शुद्धात्मा तत्त्वसे विपरीत पुण्य-पाप दोनों ही नहीं हैं ॥१६०॥

निर्विकल्पसमाधिरूपं परमोपदेशं पुनरपि विवृणोति पञ्चकलेन—

तुट्टइ मोहु तडित्ति जहिँ मणु अत्थवणहँ जाइ।
सो सामइ उवएसु कहि अण्णे देविं काइँ॥१६१॥

त्रुट्यति मोहः झटिति यत्र मनः अस्तमनं याति।
तं स्वामिन् उपदेशं कथय अन्येन देवेन किम्॥१६१॥

तुट्टइ इत्यादि। तुट्टइ **नश्यति। कोऽसौ।** मोहु **निर्मोहशुद्धात्मद्रव्यप्रतिपक्षभूतो मोहः** तडित्ति **झटिति** जहिं **मोहोदयोत्पन्नसमस्तविकल्परहिते यत्र परमात्मपदार्थे। पुनरपि किं यत्र।** मणु अत्थवणहं जाइ **निर्विकल्पात् शुद्धात्मस्वभावाद्विपरीतं नानाविकल्पजालरूपं मनोवास्तं गच्छति** सो सामिय उवएसु कहि **हे स्वामिन् तदुपदेशं कथयेति** प्रभाकरभट्टः श्रीयोगीन्द्रदेवान् **पृच्छति।** अण्णें देविं काइं **निर्दोषिपरमात्मनः परमाराध्यात्सकाशादन्येन देवेन किं प्रयोजनमित्यर्थः॥१६१॥ इति प्रभाकरभट्टप्रश्नसूत्रमेकं गतम्।**

अथोत्तरम्—

णास-विणिग्गउ सासडा अंबरि जेत्थु विलाइ।
तुट्टइ मोहु तड त्ति तहिँ मणु अत्थवणहँ जाइ॥१६२॥

नासाविनिर्गतः श्वासः अम्बरे यत्र विलीयते।
त्रुट्यति मोहः झटिति तत्र मनः अस्तं याति॥१६२॥

णासविणिग्गउ इत्यादि। णासविणिग्गउ **नासिकाविनिर्गतः** सासडा **उच्छ्वासः** अंबरि **मिथ्यात्वरागादिविकल्पजालरहिते शून्ये अम्बरशब्दवाच्ये** जित्थु **यत्र तात्त्विक-**

आगे एक दोहेमें शिष्यका प्रश्न और चार दोहोंमें प्रश्नका उत्तर देकर निर्विकल्पसमाधिरूप परम उपदेशको फिर भी विस्तारसे कहते हैं—[**स्वामिन्**] हे स्वामी, मुझे [**तं उपदेशं**] उस उपदेशको [**कथय**] कहो [**यत्र**] जिससे [**मोहः**] मोह [**झटिति**] शीघ्र [**त्रुट्यति**] छूट जावे, [**मनः**] और चंचल मन [**अस्तमनं**] स्थिरताको [**याति**] प्राप्त हो जावे, [**अन्येन देवेन किं**] दूसरे देवताओंसे क्या प्रयोजन है?॥ **भावार्थ—**प्रभाकरभट्ट श्रीयोगींद्रदेवसे प्रश्न करते हैं, कि हे स्वामी, वह उपदेश कहो कि जिससे निर्मोह शुद्धात्मद्रव्यसे पराङ्मुख मोह शीघ्र जुदा हो जावे, अर्थात् मोहके उदयसे उत्पन्न समस्त विकल्प-जालोंसे रहित जो परमात्म पदार्थ उसमें मोह-जालका लेश भी न रहे, और निर्विकल्प शुद्धात्म भावनासे विपरीत नाना विकल्पजालरूपी चंचल मन वह अस्त हो जावे। हे स्वामी निर्दोष परमाराध्य जो परमात्मा उससे अन्य जो मिथ्याती देव उनसे मेरा क्या मतलब है? ऐसा शिष्यने श्रीगुरुसे प्रश्न किया उसका एक दोहा-सूत्र कहा॥१६१॥

आगे श्रीगुरु उत्तर देते हैं—[**नासाविनिर्गतः श्वासः**] नाकसे निकला जो श्वास वह [**यत्र**] जिस [**अंबरे**] निर्विकल्पसमाधिमें [**विलीयते**] मिल जावे, [**तत्र**] उसी जगह [**मोहः**] मोह

परमानन्दभरितावस्थे निर्विकल्पसमाधौ विलाइ पूर्वोक्तः श्वासो विलयं गच्छति नासिकाद्वारं विहाय तालुरन्ध्रेण गच्छतीत्यर्थः । तुट्टइ त्रुट्यति नश्यति । कोऽसौ । मोहु मोहोदयेनोत्पन्नरागादिविकल्पजालः तड त्ति झटिति तर्हि तत्र बहिर्बोधशून्ये निर्विकल्पसमाधौ मणु मनः पूर्वोक्तरागादिविकल्पाधारभूतं तन्मयं वा अत्थवणहं जाइ अस्तं विनाशं गच्छति स्वस्वभावेन तिष्ठति इति । अत्र यदायं जीवो रागादिपरभावशून्यनिर्विकल्पसमाधौ तिष्ठति तदायमुच्छ्वासरूपो वायुर्नासिकाछिद्रद्वयं वर्जयित्वा स्वयमेवानीहितवृत्त्या तालुप्रदेशे यत् केशात् शेषाष्टमभागप्रमाणं छिद्रं तिष्ठति तेन क्षणमात्रं दशमद्वारेण तदनन्तरं क्षणमात्रं नासिकया तदनन्तरं रन्ध्रेण कृत्वा निर्गच्छतीति । न च परकल्पितवायुधारणारूपेण श्वासनाशो ग्राह्यः । कस्मादिति चेत् वायुधारणा तावदीहापूर्विका, ईहा च मोहकार्यरूपो विकल्पः । स च मोहकारणं न भवतीति न च परकल्पितवायुः । किं च । कुम्भकपूरकरेचकादिसंज्ञा वायुधारणा क्षणमात्रं

[झटिति] शीघ्र [त्रुट्यति] नष्ट हो जाता है, [मनः] और मन [अस्तं याति] स्थिर हो जाता है ॥ **भावार्थ**—नासिकासे निकले जो श्वासोच्छ्वास है, वे अम्बर अर्थात् आकाशके समान निर्मल मिथ्यात्व विकल्प-जाल रहित शुद्ध भावोंमें विलीन हो जाते हैं, अर्थात् तत्त्वस्वरूप परमानदकर पूर्ण निर्विकल्पसमाधिमें स्थिर चित्त हो जाता है, तब श्वासोच्छ्वासरूप पवन रुक जाती है, नासिकाके द्वारको छोड़कर तालुवा रंध्ररूपी दशवें द्वारम होके निकले, तब मोह टूटता है, उसी समय मोहके उदयकर उत्पन्न हुए रागादि विकल्प-जाल नाश हो जाते हैं, बाह्य ज्ञानसे शून्य निर्विकल्पसमाधिमें विकल्पोंका आधारभूत जो मन वह अस्त हो जाता है, अर्थात् निजस्वभावमे मनकी चंचलता नहीं रहती। जब यह जीव रागादि परभावोंसे शून्य निर्विकल्पसमाधिमें होता है, तब यह श्वासोच्छ्वासरूप पवन नासिकाके दोनों छिद्रोंको छोड़कर स्वयमेव अवांछीक वृत्तिसे तालुवाके बालकी अनीके आठवें भाग प्रमाण अति सूक्ष्म छिद्रमें (दशवें द्वारमे होकर बारीक निकलती है, नासाके छेदको छोड़कर तालुरंध्रमे (छेदमें) होकर निकलती है। और पातंजलिमतवाले वायुधारणारूप श्वासोच्छ्वास मानते हैं, वह ठीक नही हैं, क्योंकि वायुधारणा वांछापूवक होती है, और वांछा है, वह मोहसे उत्पन्न विकल्परूप है, वांछाका कारण मोह है। वह संयमीके वायुका निरोध वाछापूर्वक नही होता है, स्वाभाविक ही होता है। जिनशासनमे ऐसा कहा है, कि कुंभक (पवनको खेंचना) पूरक (पवनको थाँभना) रेचक (पवनको निकालना) ये तीन भेद प्राणायामके है इसीको वायुधारणा कहते हैं। यह क्षणमात्र होती है, परंतु अभ्यासके वशसे घड़ी पहर दिवस आदितक भी होती है। उस वायुधारणाका फल ऐसा कहा है, कि देह आरोग्य होती है, देहके सब रोग मिट जाते हैं, शरीर हलका हो जाता है, परंतु मुक्ति इस वायुधारणासे नहीं होती, क्योंकि वायुधारणा शरीरका धर्म है, आत्माका स्वभाव नही है। शुद्धोपयोगियोंके सहज ही विना यत्नके मन भी रुक जाता है, और श्वास भी स्थिर हो जाते हैं। शुभोपयोगियोंके मनके रोकनेके लिये प्राणायामका अभ्यास है, मनके अचल होनेपर कुछ प्रयोजन नही है। जो आत्मस्वरूप है, वह केवल चेतनामयी ज्ञान दर्शनस्वरूप है, सो शुद्धोपयोगी तो स्वरूपमे अतिलीन हैं, और शुभोपयोगी

भवत्येवात्र किंतु अभ्यासवशेन घटिकाप्रहरदिवसादिष्वपि भवति तस्य वायुधारणस्य च कार्यं देहारोगत्वलघुत्वादिकं न च मुक्तिरिति । यदि मुक्तिरपि भवति तर्हि वायुधारणाकारकाणामिदानीन्तनपुरुषाणां मोक्षो किं न भवतीति भावार्थः ॥१६२॥

अथ—

मोहु विलिज्जइ मणु मरइ तुट्टइ सासु-णिसासु ।
केवल-णाणु वि परिणमइ अंबरि जाहँ णिवासु ॥१६३॥

मोहो विलीयते मनो म्रियते त्रुटयति श्वासोच्छ्‌वासः ।
केवलज्ञानमपि परिणमति अम्बरे येषां निवासः ॥१६३॥

मोहु विलिज्जइ इत्यादि । मोहु मोहो ममत्वादिविकल्पजालं विलिज्जइ विलयं गच्छति मणु मरइ इहलोकपरलोकाशाप्रभृतिविकल्पजालरूपं मनो म्रियते । तुट्टइ नश्यति । कोऽसौ । सासुणिसासु अनीहितवृत्त्या नासिकाद्वारं विहाय क्षणमात्रं तालुरन्ध्रेण गच्छति पुनरप्यन्तरं नासिकया कृत्वा निर्गच्छति पुनरपि रन्ध्रेणेत्युच्छ्‌वासनिःश्वासलक्षणो वायुः । पुनरपि किं भवति । केवलणाणु वि परिणमइ केवलज्ञानमपि परिणमति समुत्पद्यते । येषां किम् । अंबरि जाहं णिवासु रागद्वेषमोहरूपविकल्पजालशून्यं अम्बरे अम्बरशब्दवाच्ये शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपे निर्विकल्पत्रि-

---

कुछ एक मनकी चपलतासे आनंदघनमें अडोल अवस्थाको नहीं पाते, तबतक मनके वश करनेके लिए श्रीपंचपरमेष्ठीका ध्यान स्मरण करते हैं, ओंकारादि मंत्रोंका ध्यान करते हैं और प्राणायामका अभ्यासकर मनको रोकके चिद्रूपमें लगाते हैं, जब वह लग गया, तब मन और पवन सब स्थिर हो जाते हैं। शुभोपयोगियोंकी दृष्टि एक शुद्धोपयोगपर है, पातंजलिमतकी तरह थोथी वायुधारणा नहीं है। जो वायुधारणासे ही शक्ति होवे, तो वायुधारणाके करनेवालोंको इस दुःषमकालमें मोक्ष क्यों न होवे ? कभी नही होता। मोक्ष तो केवल स्वभावमयी है ॥१६२॥

आगे फिर भी परमसमाधिका कथन करते हैं—[**येषां**] जिन मुनिश्वरोंका [**अंबरे**] परमसमाधिमे [**निवासः**] निवास है, उनका [**मोहः**] मोह [**विलीयते**] नाशको प्राप्त हो जाता है, [**मनः**] मन [**म्रियते**] मर जाता है, [**श्वासोच्छ्‌वासः**] श्वासोच्छ्‌वास [**त्रुटयति**] रुक जाता है, [**अपि**] और [**केवलज्ञानं**] केवलज्ञान [**परिणमति**] उत्पन्न होता है ॥ **भावार्थ**—दर्शनमोह और चारित्रमोह आदि कल्पना-जाल सब विलय हो जाते हैं, इस लोक परलोक आदिकी वांछा आदि विकल्प जालरूप मन स्थिर हो जाता है, और श्वासोच्छ्‌वासरूप वायु रुक जाती है, श्वासोच्छ्‌वास अवाछीकपनेसे नासिकाके द्वारको छोड़कर तालुछिद्रमें होकर निकलते है, तथा कुछ देरके बाद नासिकासे निकलते हैं। इस प्रकार श्वासोच्छ्‌वासरूप पवन वश हो जाता है। चाहे जिस द्वारसे निकालो। केवलज्ञान भी शीघ्र ही उन ध्यानी मुनियोंके उत्पन्न होता है, कि जिन मुनियोंका राग द्वेष मोहरूप विकल्प-जालसे रहित शुद्धात्माका सम्यक् श्रद्धान ज्ञान आचरणरूप निर्विकल्प त्रिगुप्तिमयी परमसमाधिमें निवास है। यहाँ अम्बर नाम आकाशका अर्थ नहीं समझना, किन्तु

गुप्तिगुप्तपरमसमाधौ येषां निवास इति । अयमत्र भावार्थः, अम्बरशब्देन शुद्धाकाशं न ग्राह्यं किंतु विषयकषायविकल्पशून्य परमसमाधिर्ग्राह्यः, वायुशब्देन च कुम्भकरेचकपूरकादिरूपो वायुनिरोधो न ग्राह्यः किंतु स्वयमनीहितवृत्त्या निर्विकल्पसमाधिबलेन दशमद्वारसंज्ञेन ब्रह्मरन्ध्रसंज्ञेन सूक्ष्माभिधानरूपेण च तालुरन्ध्रेण योऽसौ गच्छति स एव ग्राह्यः तत्र । यदुक्तं केनापि--"मणु मरइ पवणु जहिं खयहं जाइ । सव्वंगइ तिहुवणु तहिं जि ठाइ । मूढा अंतरालु परियाणहि । तुट्टइ मोहजालु जइ जाणहि ।" अत्र पूर्वोक्तलक्षणमेव मनोमरणं ग्राह्यं पवनक्षयोऽपि पूर्वोक्तलक्षण एव त्रिभुवनप्रकाशक आत्मा तत्रैव निर्विकल्पसमाधौ तिष्ठतीत्यर्थः । अन्तरालशब्देन तु रागादिपरभावशून्यत्वं ग्राह्यं न चाकाशे ज्ञाते सति मोहजालं नश्यति न चान्यादृशं परकल्पितं ग्राह्यमित्यभिप्रायः ॥१६३॥

अथ--

जो आयासइ मणु धरइ लोयालोय-पमाणु ।
तुट्टइ मोहु तडत्ति तसु पावइ परहँ पवाणु ॥१६४॥

यः आकाशे मनो धरति लोकालोकप्रमाणम् ।
त्रुटयति मोहो झटिति तस्य प्राप्नोति परस्य प्रमाणम् ॥१६४॥

जो इत्यादि । जो यो ध्याता पुरुषः आयासइ मणु धरइ यथा परद्रव्यसंबन्धरहि-

---

समस्त विषय कषायरूप विकल्प-जालोंसे शून्य परमसमाधि लेना । और यहाँ वायु शब्दसे कुंभक पूरक रेचकादिरूप वांछापूर्वक वायुनिरोध न लेना, किन्तु स्वयमेव अवांछीक वृत्तिपर निर्विकल्पसमाधिके बलसे ब्रह्मद्वार नामा सूक्ष्म छिद्र जिसको तालुवेका रंध्र कहते हैं, उसके द्वारा अवांछीक वृत्तिसे पवन निकलता है, वह लेना । ध्यानी मुनियोंके पवन रोकनेका यत्न नहीं होता है, विना ही यत्नके सहज ही पवन रुक जाता है, और मन भी अचल हो जाता है, ऐसा समाधिका प्रभाव है । ऐसा दूसरी जगह भी कहा है, कि जो मूढ़ है, वे तो अम्बरका अर्थ आकाशको जानते हैं, और जो ज्ञानीजन हैं, वे अम्बरका अर्थ परमसमाधिरूप निर्विकल्प जानते हैं । सो निर्विकल्प ध्यानमें मन मर जाता है, पवनका सहज ही विरोध होता है, और सब अंग तीन भुवनके समान हो जाता है । जो परमसमाधिको जाने, तो मोह टूट जावे । मनके विकल्पोंका मिटना वही मनका मरना है, और वही श्वासका रुकना है, जो कि सब द्वारोंसे रुककर दशवें द्वारमेंसे होकर निकले । तीन लोकका प्रकाशक आत्माको निर्विकल्पसमाधिमें स्थापित करता है । अंतराल शब्दका अर्थ रागादि भावोंसे शून्यदशा लेना आकाशका अर्थ न लेना । आकाशके जाननेसे मोह-जाल नहीं मिटता, आत्मस्वरूपके जाननेसे मोह-जाल मिटता है । जो पातञ्जलि आदि परसमयमें शून्यरूप समाधि कही है, वह अभिप्राय नहीं लेना, क्योंकि जब विभावोंको शून्यता हो जावेगी तब वस्तुका ही अभाव हो जायगा ॥ १६३ ॥

आगे फिर भी निर्विकल्पसमाधिका कथन करते हैं—[यः] जो ध्यानी पुरुष [आकाशे] निर्विकल्पसमाधिमें [मनः] मन [धरति] स्थिर करता है, [तस्य] उसीका [मोहः] मोह

तत्वे नाकाशमम्बरशब्दवाच्यं शून्यमित्युच्यते तथा वीतरागचिदानन्दैकस्वभावेन भरितावस्थोऽपि मिथ्यात्वरागादिपरभावरहितत्वान्निर्विकल्पसमाधिराकाशमम्बरशब्द-वाच्यं शून्यमित्युच्यते । तत्राकाशसंज्ञे निर्विकल्पसमाधौ मनो धरति स्थिरं करोति । कथंभूतं मनः । लोयालोयपमाणु लोकालोकप्रमाणं लोकालोकव्याप्तिरूपं अथवा प्रसिद्धलोकालोकाकाशे व्यवहारेण ज्ञानापेक्षया न च प्रदेशापेक्षया लोकालोकप्रमाणं मनो मानसं[1] धरति तुट्टइ मोहु तड त्ति तसु त्रुटयति नश्यति । कोऽसौ । मोहु मोहः । कथम् । झटिति तस्य ध्यानात् । न केवलं मोहो नश्यति । पावइ प्राप्नोति । किम् । परहं पवाणु परस्य परमात्मस्वरूपस्य प्रमाणम् । कीदृशं तत्प्रमाणमिति चेत् । व्यवहारेण रूपग्रहणविषये चक्षुरिव सर्वगतः । यदि पुनर्निश्चयेन सर्वगतो भवति तर्हि चक्षुषो अग्निस्पर्शात् दाहं प्राप्नोति न च तथा । तथात्मनोऽपि परकीयसुखदुःखविषये तन्मयपरिणामत्वेन परकीयसुखदुःखानुभवं प्राप्नोति न च तथा । निश्चयेन पुनर्लोक-मात्रासंख्येयप्रदेशोऽपि सन् व्यवहारेण पुनः शरीरकृतोपसंहारविस्तारवशाद्विवक्षित-भाजनस्थप्रदीपवत् देहमात्र इति भावार्थः ।।१६४।।

[झटिति] शीघ्र [त्रुटयति] टूट जाता है, और ज्ञान करके [परस्य प्रमाणं] लोकालोकप्रमाण आत्माको [प्राप्नोति] प्राप्त हो जाता है ।। **भावार्थ**—आकाश अर्थात् वीतराग चिदानंद स्वभाव अनंत गुणरूप और मिथ्यात्व रागादि परभाव रहित स्वरूप निर्विकल्पसमाधि यहाँ समझना । जैसे आकाशद्रव्य सब द्रव्योंसे भरा हुआ है, परंतु सबसे शून्य अपने स्वरूप है, उसी प्रकार चिद्रूप आत्मा रागादि सब उपाधियोंसे रहित है, शून्यरूप है, इसलिये आकाश शब्दका अर्थ यहाँ शुद्धात्मस्वरूप लेना । व्यवहारनयकर ज्ञान लोकालोकका प्रकाशक है, और निश्चयनयकर अपने स्वरूपका प्रकाशक है । आत्माका केवलज्ञान लोकालोकको जानता है, इस कारण ज्ञानकी अपेक्षा लोकालोकप्रमाण कहा जाता है, प्रदेशोंकी अपेक्षा लोकालोकप्रमाण नहीं है । ज्ञानगुण लोकालोकमें व्याप्त है; परन्तु परद्रव्योसे भिन्न है । परवस्तुसे जो तन्मयी हो जावे, तो वस्तुका अभाव हो जावे । इसलिये यह निश्चय हुआ, कि ज्ञान गुणकर लोकालोकप्रमाण जो आत्मा उसे आकाश भी कहते है, उसमे जो मन लगावें, तब जगत्से मोह दूर हो और परमात्माको पावे । व्यवहारनयकर आत्मा ज्ञानकर सबको जानता है, इसलिये सब जगत्‌मे है । जेसे व्यवहारनयकर नेत्र रूपी पदार्थको जानता है; परन्तु उन पदार्थोंसे भिन्न है । जो निश्चयकर सर्वगत होवे, तो परपदार्थोंसे तन्मयी हो जावे, जो उसे तन्मयी होवे तो नेत्रोंको अग्निका दाह होना चाहिये, इस कारण तन्मयी नही है । उसी प्रकार आत्मा जो पदार्थोंको तन्मयी होके जाने, तो परके सुख दुःखसे तन्मयी होनेसे इसको भी दूसरेका सुख दुःख मालूम होना चाहिये, पर ऐसा होता नही है । इसलिये निश्चयसे आत्मा असर्वगत है, और व्यवहारनयसे सर्वगत है, प्रदेशोंकी अपेक्षा निश्चयसे लोकप्रमाण असंख्यातप्रदेशी है, और व्यवहारनयकर पात्रमें रखे हुए दीपककी तरह देहप्रमाण है, जेसा शरीर-धारण करे, वैसा प्रदेशोंका संकोच विस्तार हो जाता है ।। १६४ ।।

१. पाठान्तर :—मानसं = मानसं ज्ञानं ।

अथ—

देहि वसंतु वि णवि मुणिउ अप्पा देउ अणंतु ।
अंबरि समरसि मणु धरिवि सामिय णट्ठु णिभंतु ॥१६५॥
देहे वसन्नपि नैव मतः आत्मा देवः अनन्तः ।
अम्बरे समरसे मनः धृत्वा स्वामिन् नष्टः निर्भ्रान्तः ॥१६५॥

देहि वसंतु वि इत्यादि । देहि वसंतु वि **व्यवहारेण देहे वसन्नपि** णवि मुणिउ **नैव ज्ञातः । कोऽसौ ।** अप्पा **निजशुद्धात्मा । किंविशिष्टः । देउ आराधनायोग्यः केवलज्ञानाद्यनन्तगुणाधारत्वेन देवः परमाराध्यः । पुनरपि किंविशिष्टः ।** अणंतु **अनन्तपदार्थपरिच्छित्तिकारणत्वादविनश्वरत्वादनन्तः । किं कृत्वा ।** मणु धरिवि **मनो धृत्वा । क्व ।** अंबरि **अम्बरशब्दवाच्ये पूर्वोक्तलक्षणे रागादिशून्ये निर्विकल्पसमाधौ । कथंभूते ।** समरसि **वीतरागतात्त्विकमनोहरानन्दस्यन्दिनि समरसीभावे साध्ये ।** सामिय **हे स्वामिन् ।** प्रभाकरभट्टः **पश्चात्तापमनुशयं कुर्वन्नाह । किं ब्रूते ।** णट्ठु णिभंतु **इयन्तं कालमित्थं भूतं परमात्मोपदेशमलभमानः सन् निर्भ्रान्तो नष्टोऽहमित्यभिप्रायः ॥१६५॥ एवं परमोपदेशकथनमुख्यत्वेन सूत्रदशकं गतम् ।**

अथ परमोपशमभावसहितेन सर्वसंगपरित्यागेन संसारविच्छेदं भवतीति युग्मेन निश्चिनोति—

सयल वि संग ण मिल्लिया णवि किउ उवसम-भाउ ।
सिव-पय-मग्गु वि मुणिउ णवि जहिं जोइहिँ अणुराउ ॥१६६॥
घोरु ण चिण्णउ तव-चरणु जं णिय-बोहहँ सारु ।
पुण्णु वि पाउ वि दड्ढु णवि किमु छिज्जइ संसारु ॥१६७॥

आगे फिर भी शिष्य प्रश्न करता है—[**स्वामिन्**] हे स्वामी, [**देह वसन्नपि**] व्यवहारनयकर देहमें रहता हुआ भी [**आत्मा देवः**] आराधने योग्य आत्मा [**अनंतः**] अनंत गुणोंका आधार [**नैव मतः**] मैंने अज्ञानतासे नहीं जाना । क्या करके [**समरसे**] समान भावरूप **अंबरे**] निर्विकल्पसमाधिमें [**मनः धृत्वा**] मन लगा कर । इसलिये अबतक [**नष्टो निर्भ्रान्तः**] निस्संदेह नष्ट हुआ ॥ **भावार्थ**—प्रभाकरभट्ट पछताता हुआ श्रीयोगींद्रदेवसे विनती करता है, कि हे स्वामिन् मैंने अबतक रागादि विभाव रहित निर्विकल्पसमाधिमें मन लगाकर आत्म-देव नहीं जाना, इसलिये इतने कालतक संसारमें भटका निजस्वरूपकी प्राप्तिके बिना मैं नष्ट हुआ । अब ऐसा उपदेश करें कि जिससे भ्रम मिट जावे ॥१६५॥ इस प्रकार परमोपदेशके कथनकी मुख्यतासे दस दोहे कहे हैं ।

आगे परमोपदेश भाव सहित सब परिग्रहका त्याग करनेसे संसारका विच्छेद होता है, ऐसा दो दोहोंमें निश्चय करते हैं—[**सकला अपि संगाः**] सब परिग्रह भी [**न मुक्ताः**] नहीं छोड़े,

सकला अपि संगा न मुक्ताः नेव कृत उपशमभावः।
शिवपदमार्गोऽपि मतो नेव यत्र योगिनां अनुरागः ॥१६६॥
घोरं न चीर्णं तपश्चरणं यत् निजबोधस्य सारम्।
पुण्यमपि पापमपि दग्धं नेव किं छिद्यते संसारः ॥१६७॥

सयल वि इत्यादि । सयल वि **समस्ता अपि** संग **मिथ्यात्वादिचतुर्दशभेदभिन्ना आभ्यन्तराः क्षेत्रवास्त्वादिबहुभेदभिन्ना बाह्या** अपि संगाः **परिग्रहाः** ण मिल्लिया **न मुक्ताः । पुनरपि किं न कृतम् ।** णवि किउ उवसमभाउ **जीवितमरणलाभालाभसुखदुःखादिसमताभावलक्षणो नैव कृतः उपशमभावः । पुनश्च किं न कृतम् ।** सिवपयमग्गु वि मुणिउ णवि **"शिवं परमकल्याणं निर्वाणं शान्तमक्षयम् । प्राप्तं मुक्तिपदं येन स शिवः परिकीर्तितः ॥" इति वचनात् शिवशब्दवाच्यो योऽसौ मोक्षस्तस्य मार्गोऽपि न ज्ञातः । कथंभूतो मार्गः । स्वशुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपः । यत्र मार्गे किम् ।** जहिं जोइहिं अणराउ **यत्र निश्चयमोक्षमार्गे परमयोगिनामनुरागस्तात्पर्यम् । न केवलं मोक्षमार्गोऽपि न ज्ञातः ।** घोरु ण चिण्णउ तवचरणु **घोरं दुर्धरं परीषहोपसर्गजयरूपं नैव चीर्णं न कृतम् । किं तत् ।** अनशनादिद्वादशविधं तपश्चरणम् । **यत्कथंभूतम् ।** जं णियबोहहं सारु **यत्तपश्चरणं वीतरागनिर्विकल्पस्वसंवेदनलक्षणेन निजबोधेन सारभूतम् । पुनश्च किं न कृतम् ।** पुण्णु वि पाउ वि **निश्चयनयेन शुभाशुभनिगलद्वयरहितस्य संसारिजीवस्य व्यवहारेण सुवर्णलोहनिगलद्वयसदृशं पुण्यपापद्वयमपि** दड्ढु णवि **शुद्धात्मद्रव्यानुभवरूपेण ध्यानाग्निना दग्धं नैव ।** किमु

[**उपशमभावः नैव कृतः**] समभाव भी नहीं किया । **यत्र योगिनां अनुरागः**] और जहाँ योगीश्वरोंका प्रेम है, ऐसा [**शिवमार्गोऽपि**] मोक्ष-पद भी [**नैव मतः**] नहीं जाना, [**घोर तपश्चरणं**] महा दुर्धर तप [**न चीर्णं**] नहीं किया, [**यत्**] जो कि [**निजबोधेन सारं**] आत्मज्ञानकर शोभायमान है, [**पुण्यमपि पापमपि**] और पुण्य तथा पाप ये दोनों [**नैव दग्धं**] नहीं भस्म किये, तो [**संसारः**] संसार [**किं छिद्यते**] कैसे छूट सकता है ? ॥ **भावार्थ**—मिथ्यात्व (अतत्त्व श्रद्धान) राग (प्रीतिभाव दोष) दोष (वैरभाव) वेद (स्त्री पुरुष नपुंसक) क्रोध मानमाया लोभरूप चार कषाय, और हास्य रति अरति शोक भय ग्लानि—ये चौदह अंतरंग परिग्रह, क्षेत्र (ग्रामादिक) वास्तु (गृहादिक) हिरण्य (रुपया पैसा मुहर आदि) सुवर्ण (गहने आदि) धन (हाथी घोड़ा आदि) धान्य (अन्नादि) दासी, दास, कुप्य (वस्त्र तथा सुगंधादिक), भांड (वर्तन आदि) ये दस तरहके बाहरके परिग्रह, इस प्रकार बाह्य अभ्यंतर परिग्रहके चौबीस भेद हुए, इनको नहीं छोड़ा । जीवित, मरण, सुख, दुःख, लाभ, अलाभादिमे समान भाव कभी नहीं किया, कल्याणरूप मोक्षका मार्ग सम्यग्दर्शन ज्ञान चारित्र भी नहीं जाने । निजस्वरूपका श्रद्धान, निजस्वरूपका ज्ञान, और निजस्वरूपका आचरणरूप निश्चयरत्नत्रय तथा नव पदार्थोंका श्रद्धान, नव पदार्थोंका ज्ञान, और अशुभ क्रियाका त्यागरूप व्यवहाररत्नत्रय—ये दोनो ही मोक्षके मार्ग हैं, इन दोनोंमेसे निश्चयरत्नत्रय तो साक्षात् मोक्षका मार्ग है, और व्यवहाररत्नत्रय परम्पराय मोक्षका मार्ग है । ये

छिज्जइ संसारु कथं छिद्यते संसार इति । अत्रेदं व्याख्यानं ज्ञात्वा निरन्तरं शुद्धात्मद्रव्यभावना कर्तव्येति तात्पर्यम् ॥१६६-६७॥

अथ दानपूजापञ्चपरमेष्ठिवन्दनादिरूपं परंपरया मुक्तिकारणं श्रावकधर्मं कथयति—

दाणु ण दिण्णउ मुणिवरहँ ण वि पुज्जिउ जिण-णाहु ।
पंच ण वंदिय परम-गुरू किमु होसइ सिव-लाहु ॥१६८॥

दानं न दत्तं मुनिवरेभ्यः नापि पूजितः जिननाथः ।
पञ्च न वन्दिताः परमगुरवः किं भविष्यति शिवलाभः ॥१६८॥

दाणु इत्यादि । दाणु ण दिण्णउ आहाराभयभैषज्यशास्त्रभेदेन चतुर्विधदानं भक्तिपूर्वकं न दत्तम् । केषाम् । मुणिवरहं निश्चयव्यवहाररत्नत्रयाराधकानां मुनिवरादिचतुर्विधसंघस्थितानां पात्राणां ण वि पुज्जिउ जलधारया सह गन्धाक्षतपुष्पाद्यष्टविधपूजया न पूजितः । कोऽसौ । जिणणाहु देवेन्द्रधरणेन्द्रनरेन्द्रपूजितः केवलज्ञानाद्यनन्तगुणपरिपूर्णः पूज्यपदस्थितो जिननाथः पंच ण वंदिय पञ्च न वन्दिताः । के ते । परमगुरू त्रिभुवनाधीशवन्द्यपदस्थिता अर्हत्सिद्धाः त्रिभुवनेशवन्द्यमोक्षपदाराधकाः आचार्योपाध्यायसाधवश्चेति पञ्च गुरवः, किमु होसइ सिवलाहु शिवशब्दवाच्यमोक्षपदस्थितानां तदाराधकानामाचार्यादीनां च यथायोग्यं दानपूजावन्दनादिकं न कृतम्, कथं शिवशब्दवाच्यमोक्षसुखस्य लाभो भविष्यति न कथमपीति । अत्रेदं व्याख्यानं

दोनों मैंने कभी नहीं जाने, संसारका ही मार्ग जाना । अनशनादि बारह प्रकारका तप नहीं किया, बाईस परीषह नहीं सहन की । तथा पुण्य सुवर्णकी बेडी, पाप लोहेकी बेड़ी, ये दोनों बंधन निर्मल आत्मध्यानरूपी अग्निमें भस्म नहीं किये । इन बातोंके बिना किये संसारका विच्छेद नहीं होता, संसारसे मुक्त होनेके ये ही कारण हैं। ऐसा व्याख्यान जानकर सदैव शुद्धात्मस्वरूपकी भावना करनी चाहिये ॥१६६—१६७॥

आगे दान पूजा और पंचपरमेष्ठीकी वंदना, आदि परम्परा मुक्तिका कारण जो श्रावकधर्म उसे कहते हैं—[दानं] आहारादि दान [मुनिवराणां] मुनीश्वर आदि पात्रोंको [न दत्तं] नहीं दिया, [जिननाथः] जिनेन्द्रभगवानको भी [नापि पूजितः] नहीं पूजा, [पंच परमगुरवः] अरहंत आदिक पाँचपरमेष्ठी [न वंदिताः] भी नहीं पूजे तब [शिवलाभः] मोक्षकी प्राप्ति [किं भविष्यति] कैसे हो सकती है ? भावार्थ—आहार औषध, शास्त्र और अभयदान—ये चार प्रकारके दान भक्तिपूर्वक पात्रोंको नहीं दिये, अर्थात् निश्चय व्यवहाररत्नत्रयके आराधक जो यती आदिक चार प्रकार संघ उनको चार प्रकारका दान भक्तिकर नहीं दिया, और भूखे जीवोंको करुणाभावसे दान नहीं दिया । इंद्र, नागेंद्र, नरेन्द्र आदिकर पूज्य केवलज्ञानादि अनंतगुणोंकर पूर्ण जिननाथकी पूजा नहीं की; जल, चन्दन, अक्षत, पुष्प, नैवेद्य, दीप, धूप, फलसे पूजा नहीं की; और तीन लोककर वंदने योग्य ऐसे अरहंत सिद्ध, आचार्य, उपाध्याय, साधु इन पाँचपरमेष्ठियोंकी आराधना नहीं की । सो

ज्ञात्वा उपासकाध्याख्यानं ज्ञात्वा उपासकाध्ययनशास्त्रकथितमार्गेण विधिद्रव्यदातृ-पात्रलक्षणविधानेन दानं दातव्यं पूजावन्दनादिकं च कर्तव्यमिति भावार्थः ॥१६८॥

अथ निश्चयेन चिन्तारहितध्यानमेव मुक्तिकारणमिति प्रतिपादयति चतुष्कलेन—

अद्धुम्मीलिय-लोयणिहिँ जोउ कि झंपियएहिँ ।
एमुइ लब्भइ परम-गइ णिच्चिंतिं ठियएहिँ ॥१६९॥

अर्धोन्मीलितलोचनाभ्यां योगः किं झंपिताभ्याम् ।
एवमेव लभ्यते परमगतिः निश्चिन्तं स्थितैः ॥१६९॥

अद्धुम्मीलियलोयणिहिं अर्धोन्मीलितलोचनपुटाभ्यां जोउ किं योगो ध्यानं किं भवति अपि तु नैव । न केवलमर्धोन्मीलिताभ्याम् । झंपियएहिं झंपिताभ्यामपि लोचनाभ्यां नैवेति । तर्हि कथं लभ्यते । एमुइ लब्भइ एवमेव लभ्यते लोचनपुटनिमीलनोन्मीलननिरपेक्षैः । का लभ्यते । परमगइ केवलज्ञानादिपरमगुणयोगात्परमगति-र्मोक्षगतिः । कैः लभ्यते । णिच्चिंतिं ठियएहिं ख्यातिपूजालाभप्रभृतिसमस्तचिन्ता जालरहितैः पुरुषैश्चिन्तारहितैः स्वशुद्धात्मरूपस्थितैश्चेत्यभिप्रायः ॥१६९॥

अथ—

जोइय मिल्लहि चिन्त जइ तो तुट्टइ संसारु ।
चिंतासत्तउ जिणवरु वि लहइ ण हंसाचारु ॥१७०॥

योगिन् मुञ्चसि चिन्तां यदि ततः त्रुट्यति संसारः ।
चिन्तासक्तो जिनवरोऽपि लभते न हंसचारम् ॥१७०॥

जोइय इत्यादि । जोइय हे योगिन् मिल्लहि मुञ्चसि । काम् । चिन्तारहि-

---

हे जीव, इन कार्योंके बिना तुझे मुक्तिका लाभ कैसे होगा ? क्योंकि मोक्षकी प्राप्तिके ये ही उपाय हैं । जिनपूजा, पंचपरमेष्ठीकी वंदना, और चार संघको चार प्रकार दान, इन विना मुक्ति नहीं हो सकती । ऐसा व्याख्यान जानकर सातवें उपासकाध्ययन अंगमें कही गई जो दान पूजा वंदनादिककी विधि वही करने योग्य है । शुभ विधिसे न्यायकर उपार्जन किया अच्छा द्रव्य वह दातारके अच्छे गुणोंको धारणकर विधिसे पात्रको देना, जिनराजको पूजा करना, और पंचपरमेष्ठीकी वंदना करना, ये ही व्यवहारनयकर कल्याणके उपाय हैं ॥१६८॥

आगे निश्चयसे चिन्ता रहित ध्यान ही मुक्तिका कारण है, ऐसा कहते हैं—[अर्धोन्मीलितलोचनाभ्यां] आधे उघडे हुए नेत्रोंसे अथवा [झंपिताभ्यां] बंद हुए नेत्रोंसे [किं] क्या [योग] ध्यानकी सिद्धि होती है, कभी नहीं । [निश्चिन्तं स्थितैः] जो चिन्ता रहित एकाग्रमें स्थित है, उनको [एवमेव] इसी तरह [लभ्यते परमगतिः] स्वयमेव परमगति (मोक्ष) मिलती है ॥ भावार्थ—ख्याति (बड़ाई) पूजा (अपनी प्रतिष्ठा) और लाभ इनको आदि लेकर समस्त चिन्ताओंसे रहित जो निश्चित पुरुष हैं, वे ही शुद्धात्मस्वरूपमें स्थिरता पाते हैं, उन्हींके ध्यानकी सिद्धि है, और वे ही परमगतिके पात्र है ॥१६९॥

आगे फिर भी चिन्ताका ही त्याग बतलाते है—[योगिन्] हे योगी, [यदि] जो तू [चिंतां

तादिशुद्धज्ञानदर्शनस्वभावात्परमात्मपदार्थाद्विलक्षणां चिन्तां जइ यदि चेत् तो तत-श्चिन्ताभावात् । किं भवति । तुट्टइ नश्यति । स कः । संसारु निःसंसारात् शुद्धात्म-द्रव्याद् विलक्षणो द्रव्यक्षेत्रकालादिभेदभिन्नः पञ्चप्रकारः संसारः । यतः कारणात् । चिंतासत्तउ जिणवरु वि छद्मस्थावस्थायां शुभाशुभचिन्तासक्तो जिनवरोऽपि लहइ ण लभते न । कम् । हंसाचारु संशयविभ्रमविमोहरहितानन्तज्ञानादिनिर्मलगुणयोगेन हंस इव हंसः परमात्मा तस्य आचारं रागादिरहितं शुद्धात्मपरिणाममिति । अत्रेदं व्याख्यानं ज्ञात्वा दृष्टश्रुतानुभूतभोगाकांक्षाप्रभृतिसमस्तचिन्ताजालं त्यक्त्वापि चिन्ता-रहिते शुद्धात्मतत्त्वे सर्वतात्पर्येण भावना कर्तव्येति तात्पर्यम् ॥१७०॥

अथ—

जोइय दुम्मइ कवुण तुहुँ भवकारणि ववहारि ।
बंभु पवंचहिँ जो रहिउ सो जाणिवि मणु मारि ॥१७१॥

योगिन् दुर्मतिः का तव भावकारणे व्यवहारे ।
ब्रह्म प्रपंचैर्यद् रहितं तत् ज्ञात्वा मनो मारय ॥१७१॥

जोइय इत्यादि । जोइय हे योगिन् दुम्मइ कवुण तुहं दुर्मतिः का तवेयं भवकारणि ववहारि भवरहितात् शुभाशुभमनोवचनकायव्यापाररूपव्यवहारविलक्षणा-च्च स्वशुद्धात्मद्रव्यात्प्रतिपक्षभूते पञ्चप्रकारसंसारकारणे व्यवहारे । तर्हि किं करोमीति चेत् । बंभु ब्रह्मशब्दवाच्यं स्वशुद्धात्मानं ज्ञात्वा । कथंभूतं यत् । पवंचहिं जो रहिउ

मुंचति] चिन्ताओंको छोड़ेगा [तत] तो [संसारः] संसारका भ्रमण [त्रुटयति] छूट जायगा, क्योंकि [चिंतासक्तः] चिन्तामे लगे हुए [जिनवरोऽपि] छद्मस्थ अवस्थावाले तीर्थंकरदेव भी [हंसचारं न लभते] परमात्माका आचरणरूप शुद्ध भावोंको नहीं पाते ॥ भावार्थ—हे योगी, निर्मल ज्ञान दर्शन स्वभाव परमात्मपदार्थसे पराङ्मुख जो चिता-जाल उसे छोड़ेगा, तभी चिताके अभावसे संसार भ्रमण टूटेगा । शुद्धात्मद्रव्यसे विमुख द्रव्य क्षेत्र काल भव भावरूप पाँच प्रकारके संसारसे तू मुक्त होगा । जबतक चितावान् है, तबतक निर्विकल्प ध्यानकी सिद्धि नहीं हो सकती । दूसरोंकी तो क्या बात है, जो तीर्थंकरदेव भी केवल अवस्थाके पहले जब तक कुछ शुभाशुभ चिन्ताकर सहित हैं, तबतक वे भी रागादि रहित शुद्धोपयोग परिणामोको नही पा सकते । संशय विमोह विभ्रम रहित अनंत ज्ञानादि निर्मलगुण सहित हंसके समान उज्ज्वल परमात्माके शुद्ध भाव हैं, वे चिताके बिना छोड़े नहीं होते । तीर्थंकरदेव भी मुनि होके निश्चित व्रत धारण करते है, तभी परमहंस दशा पाते हैं, ऐसा व्याख्यान जानकर देखे सुने भोगे हुए भोगोंकी वांछा आदि समस्त चिन्ता-जालको छोड़कर परम निश्चित हो, शुद्धात्मको भावना करना योग्य है ॥१७०॥

आगे श्रीगुरु मुनियोंको उपदेश देते हैं, कि मनको मारकर परब्रह्मका ध्यान करो— [योगिन्] हे योगी, [तव का दुर्मतिः] तेरो क्या खोटी बुद्धि है, जो तू [भवकारणे व्यवहारे] संसारके कारण उद्यमरूप व्यवहार करता है । अब तू [प्रपंचैः रहितं] मायाजालरूप पाखंडोंसे रहित [यत् ब्रह्म] जो

प्रपंचैर्मायापाखण्डैः यद्रहितम् । सो जाणिवि तं निजशुद्धात्मानं वीतरागस्वसंवेदनज्ञानेन ज्ञात्वा । पश्चात्किं कुरु । मणु मारि अनेकमानसविकल्पजालरहिते परमात्मनि स्थित्वा शुभाशुभविकल्पजालरूपं मनो मारय विनाशयेति भावार्थः ॥१७१॥

अथ—

सव्वहिँ रायहिँ छहिँ रसहिँ पंचहिँ रूवहिँ जंतु ।
चित्तु णिवारिवि झाहि तुहुँ अप्पा देउ अणंतु ॥१७२॥

सर्वैः रागैः षड्भिः रसैः पञ्चभिः रूपैः गच्छत् ।
चित्तं निवार्य ध्याय त्वं आत्मानं देवमनन्तम् ॥१७२॥

सव्वहिं इत्यादि । झाहि ध्याय चिन्तय तुहुँ त्वं हे प्रभाकरभट्ट । कम् । अप्पा स्वशुद्धात्मानम् । कथंभूतम् । देउ वीतरागपरमानन्दसुखेन दीव्यति क्रीडति इति देवस्तं देवम् । पुनरपि कथंभूतम् । अणंतु केवलज्ञानाद्यनन्तगुणाधारत्वादनन्तसुखास्पदत्वादविनश्वरत्वाच्चानन्तस्तमनन्तम् । किं कृत्वा पूर्वम् । चित्तु णिवारिवि चित्तं निवार्य व्यावृत्य । किं कुर्वन् सन् । जंतु गच्छत्परिणममानं सत् । कैः करणभूतैः सव्वहिं रायहिं वीतरागात्स्वशुद्धात्मद्रव्याद्विलक्षणैः सर्वशुभाशुभरागैः । न केवलं रागैः । छहिं रसहिं रसरहिताद्वीतरागसदानन्दैकरसपरिणतादात्मनो विपरीतैः गुडलवणदधिदुग्धतैलघृतषड्रसैः । पुनरपि कैः । पंचहिं रूवहिं अरूपात् शुद्धात्मतत्त्वात्प्रतिपक्षभूतैः कृष्णनीलरक्तश्वेतपीतपञ्चरूपैरिति तात्पर्यम् ॥१७२॥

अथ येन स्वरूपेण चिन्त्यते परमात्मा तेनैव परिणमतीति निश्चिनोति—

शुद्धात्मा है, [तत् ज्ञात्वा] उसको जानकर [मनो मारय] विकल्प-जालरूपी मनको मार ॥ भावार्थ—वीतराग स्वसंवेदनज्ञानसे शुद्धात्माको जानकर शुभाशुभ विकल्प-जालरूप मनको मारो । मनके विना वश किये निर्विकल्पध्यानकी सिद्धि नहीं होती । मनके अनेक विकल्प-जालोंसे जो शुद्ध आत्मा उसमें निश्चलता तभी होती है, जब कि मनको मारके निर्विकल्प दशाको प्राप्त होवे । इसलिये सकल शुभाशुभ व्यवहारको छोड़के शुद्धात्माको जानो ॥१७१॥

आगे यहां कहते हैं, कि सब विषयोंको छोड़कर आत्मदेवको ध्यावो—हे प्रभाकर भट्ट, [त्वं] तू [सर्वैः रागैः] सब शुभाशुभ रागोंसे [षड्भिः रसैः] छहों रसोंसे [पंचभिः रसैः] पाँच रसोंसे [गच्छत् चित्तं] चलायमान चित्तको [निवार्य] रोककर [अनंतं] अनंतगुणवाले [आत्मानं देवं] आत्मदेवका [ध्याय] चिंतवन कर ॥ भावार्थ—वीतराग, परम आनंद सुखमें क्रीड़ा करनेवाले केवलज्ञानादि अनंतगुणवाले अविनाशी शुद्ध आत्माका एकाग्र चित्त होकर ध्यान कर । क्या करके ? वीतराग शुद्धात्मद्रव्यसे विमुख जो समस्त शुभाशुभ राग, निजरससे विपरीत जो दधि, दुग्ध, तेल, घी, नोंन, मिस्री, ये छह रस और जो अरूप शुद्धात्मद्रव्यसे भिन्न काले, सफेद, हरे, पीले, लाल, पाँचतरहके रूप इनमें निरन्तर चित्त जाता है, उसको रोककर आत्मदेवकी आराधना कर ॥१७२॥

आगे आत्माको जिसरूपसे ध्यावो, उसीरूप परिणमता है, जैसे स्फटिकमणिके नीचे जैसा डंक

जेण सरूविं झाइयइ अप्पा एहु अणंतु ।
तेण सरूविं परिणवइ जह फलिहउ-मणि मंतु ॥१७३॥
येन स्वरूपेण ध्यायते आत्मा एषः अनन्तः ।
तेन स्वरूपेण परिणमति यथा स्फटिकमणिः मन्त्रः ॥१७३॥

जेण इत्यादि । तेण सरूवि परिणवइ **तेन स्वरूपेण** परिणमति । **कोऽसौ कर्ता** । अप्पा **आत्मा** एहु एष **प्रत्यक्षीभूतः** । **पुनरपि किंविशिष्टः** । अणंतु **वीतरागानाकुलत्वलक्षणानन्तसुखाद्यनन्तशक्ति परिणतत्वादनन्तः** । **तेन केन** । जेण सरूविं झाइयइ **येन शुभाशुभशुद्धोपयोगरूपेण ध्यायते चिन्त्यते** । दृष्टान्तमाह । जह फलिहउमणि मतु **यथा स्फटिकमणिः जपापुष्पाद्युपाधिपरिणतः गारुडादिमन्त्रो वेति** । **अत्र विशेषव्याख्यानं तु--"येन येन स्वरूपेण युज्यते यन्त्रवाहकः । तेन तन्मयतां याति विश्वरूपो मणिर्यथा ॥" इति श्लोकार्थकथितदृष्टान्तेन ध्यातव्यः । इदमत्र तात्पर्यम् । अयमात्मा येन येन स्वरूपेण चिन्त्यते तेन तेन परिणमतीति ज्ञात्वा शुद्धात्मपदप्राप्त्यर्थिभिः समस्तरागादिविकल्पसमूहं त्यक्त्वा शुद्धरूपेणैव ध्यातव्य इति ॥१७३॥**

अथ चतुष्पादिकां कथयति--

एहु जु अप्पा सो परमप्पा कम्म-विसेसें जायउ जप्पा ।
जामइँ जाणइ अप्पें अप्पा तामइँ सो जि देउ परमप्पा ॥१७४॥
एष यः आत्मा स परमात्मा कर्मविशेषेण जातः जाप्य ।
यदा जानाति आत्मना आत्मानं तदा स एव देव परमात्मा ॥१७४॥

दिया जाये, वैसा ही रंग भासता है, ऐसा कहते है—[**एषः**] यह प्रत्यक्षरूप [**अनंत.**] अविनाशी [**आत्मा**] आत्मा [**येन स्वरूपेण**] जिस स्वरूपसे [**ध्यायते**] ध्याया जाता है, [**तेन स्वरूपेण**] उसी स्वरूप [**परिणमति**] परिणमता है, [**यथा स्फटिकमणिः मंत्रः**] जैसे स्फटिकमणि और गारुड़ी आदि मंत्र है ॥ **भावार्थ**—यह आत्मा शुभ, अशुभ, शुद्ध इन तीन उपयोगरूप परिणमता है । जो अशुभोपयोगका ध्यान करे, तो पापरूप परिणवे, शुभोपयोगका ध्यान करे, तो पुण्यरूप परिणवे, और जो शुद्धोपयोगको ध्यावे, तो परमशुद्धरूप परिणमन करता है । जैसे स्फटिकमणिके नीचे जैसा डंक लगाओ, अर्थात् श्याम हरा पीला लालमेंसे जैसा लगाओ, उसी रूप स्फटिकमणि परिणमता है, हरे डंकसे हरा और लालसे लाल भासता है । उसी तरह जीवद्रव्य जिस उपयोग रूप परिणमता है, उसीरूप भासता है । और गारुड़ी आदि मन्त्रोंमेंसे गारुड़ीमंत्र गरुड़रूप भासता है, जिससे कि सर्प डर जाता है । ऐसा ही कथन अन्य ग्रन्थोंमें भी कहा है, कि जिस जिस रूपसे आत्मा परिणमता है, उस उस रूपसे आत्मा तन्मयी हो जाता है, जैसे स्फटिकमणि उज्ज्वल है, उसके नीचे जैसा डंक लगाओ, वैसा ही भासता है । ऐसा जानकर आत्माका स्वरूप जानना चाहिये । जो शुद्धात्मपदकी प्राप्तिके चाहनेवाले हैं, उनको यही योग्य है, कि समस्त रागादिक विकल्पोंके समूहको छोड़कर आत्माके शुद्ध रूपको ध्यावें और विकारोंपर दृष्टि न रक्खें ॥१७३॥

एहु इत्यादि । एहु जु एष यः प्रत्यक्षीभूतः अप्पा स्वसंवेदनप्रत्यक्ष आत्मा । स कथंभूतः । सो परमप्पा शुद्धनिश्चयेनानन्तचतुष्टयस्वरूपः क्षुधाद्यष्टादशदोषरहितः स निर्दोषिपरमात्मा कम्मविसेसें जायउ जप्पा व्यवहारनयेनानादिकर्मबन्धनविशेषेण स्वकीयबुद्धिदोषेण जात उत्पन्नः कथंभूतो जातः जाप्यः पराधीनः जामइं जाणइ यदा काले जानाति । केन कम् । अप्पें अप्पा वीतरागनिर्विकल्पस्वसंवेदनज्ञानपरिणतेनात्मना निजशुद्धात्मानं तामइं तस्मिन् स्वशुद्धात्मानुभूतिकाले सो जि स एवात्मा देउ निजशुद्धात्मभावनोत्थवीतरागसुखानुभवेन दीव्यति क्रीडतीति देवः परमाराध्यः । किंविशिष्टो देवः । परमप्पा शुद्धनिश्चयेन मुक्तिगतपरमात्मसमानः । अयमत्र भावार्थः । यद्येवंभूतः परमात्मा शक्तिरूपेण देहमध्ये नास्ति तर्हि केवलज्ञानोत्पत्तिकाले कथं व्यक्तीभविष्यतीति ॥१७४॥

अथ तमेवार्थं व्यक्तीकरोति—

जो परमप्पा णाणमउ सो हउँ देउ अणंतु ।
जो हउँ सो परमप्पु परु एहउ भावि णिभंतु ॥१७५॥

यः परमात्मा ज्ञानमयः स अहं देवः अनन्तः ।
यः अहं स परमात्मा परः इत्थं भावय निर्भ्रान्तः ॥१७५॥

जो परमप्पा इत्यादि । जो परमप्पा यः कश्चित् प्रसिद्धः परमात्मा सर्वोत्कृष्टानन्तज्ञानादिरूपा मा लक्ष्मीर्यस्य स भवति परमश्चासावात्मा च परमात्मा णाणमउ ज्ञानेन निवृत्तः ज्ञानमयः सो हउं यद्यपि व्यवहारेण कर्मावृतस्तिष्ठामि

आगे चतुष्पदछंदमे आत्माके शुद्ध स्वरूपको कहते है—[एष य आत्मा] यह प्रत्यक्षीभूत स्वसंवेदनज्ञानकर प्रत्यक्ष जो आत्मा [स परमात्मा] वही शुद्धनिश्चयनयकर अनंत चतुष्टयस्वरूप क्षुधादि अठारह दोष रहित निर्दोष परमात्मा है, वह व्यवहारनयकर [कर्मविशेषेण] अनादि कर्मबंधके विशेषसे [जाप्य. जातः] पराधीन हुआ दूसरेका जाप करता है; परंतु [यदा] जिस समय [आत्मना] वीतराग निर्विकल्प स्वसवेदनज्ञानकर [आत्मानं] अपनेको [जानाति] जानता है, [तदा] उस समय [स एव] यह आत्मा ही [परमात्मा] परमात्मा देव है ॥ भावार्थ—निज शुद्धात्माकी भावनासे उत्पन्न हुआ जो परम आनद उसके अनुभवमे क्रीडा करनेसे देव कहा जाता है, यही आराधने योग्य है । जो आत्मदेव शुद्ध निश्चयनयकर भगवान् केवलीके समान है । ऐसा परमात्मदेव शक्तिरूपसे देहमे है, जो देहमें न होवे, तो केवलज्ञानके समय कैसे प्रगट होवे ॥१७४॥

आगे इसी अर्थको प्रगटपनेसे दृढ़ करते हैं—[यः परमात्मा] जो परमात्मा [ज्ञानमय.] ज्ञानस्वरूप है, [स अहं] वह मैं ही हूँ, जो कि [अनंतः देवः] अविनाशी देवस्वरूप हूँ, [य अहं] जो मैं हूँ [सपरः परमात्मा] वही उत्कृष्ट परमात्मा है । [इत्थं] इस प्रकार [निर्भ्रांतः] निस्संदेह [भावय] तू भावना कर ॥ भावार्थ—जो कोई एक परमात्मा परम प्रसिद्ध सर्वोत्कृष्ट अनंतज्ञाना-

तथापि निश्चयेन स एवाहं पूर्वोक्तः परमात्मा । कथंभूतः । देउ परमाराध्यः । पुनरपि कथंभूतः । अणंतु अनन्तसुखादिगुणास्पदत्वादनन्तः । जो हउं सो परमप्पु योऽहं स्वदेहस्थो निश्चयेन परमात्मा स एव तत्सदृश एव मुक्तिगतपरमात्मा । कथंभूतः । परु परमगुणयोगात् पर उत्कृष्टः एहउ भावि इत्थंभूतं परमात्मानं भावय । हे प्रभाकरभट्ट । कथंभूतः सन् । णिभंतु भ्रान्तिरहितः संशयरहितः सन्निति । अत्र स्वदेहेऽपि शुद्धात्मास्तीति निश्चयं कृत्वा मिथ्यात्वाद्युपशमवशेन केवलज्ञानाद्युत्पत्तिबीजभूतां कारणसमयसाराख्यामागमभाषया वीतरागसम्यक्त्वादिरूपां शुद्धात्मैकदेशव्यक्ति लब्ध्वा सर्वतात्पर्येण भावना कर्तव्येत्यभिप्रायः ॥१७५॥

अथामुमेवार्थं दृष्टान्तदार्ष्टान्ताभ्यां समर्थयति—

णिम्मल-फलिहहँ जेम जिय भिण्णउ परकिय-भाउ ।
अप्प-सहावहँ तेम मुणि सयलु वि कम्म-सहाउ ॥१७६॥

निर्मलस्फटिकाद् यथा जीव भिन्नः परकृतभावः ।
आत्मस्वभावात् तथा मन्यस्व सकलमपि कर्मस्वभावम् ॥१७६॥

भिण्णउ भिन्नो भवति जिय हे जीव जेम यथा । कोऽसौ कर्ता । परकियभाउ जपापुष्पाद्युपाधिरूपः परकृतभावः । कस्मात्सकाशात् । णिम्मलफलिहहं निर्मलस्फटिकात् तेम तथा भिन्नं मुणि मन्यस्व जानीहि । कम् । सयलु वि कम्मसहाउ समस्तमपि भावकर्मद्रव्यकर्मनोकर्मस्वभावम् कस्मात् । सकाशात् । अप्पसहावहं अनन्तज्ञानादिगुणस्वभावात् परमात्मन इति भावार्थः ॥१७६॥

दिरूप लक्ष्मीका निवास है, ज्ञानमयी है, वैसा ही मैं हूँ । यद्यपि व्यवहारनयकर मैं कर्मोंसे बंधा हुआ हूँ, तो भी निश्चयनयकर मेरे बंध मोक्ष नहीं है, जैसा भगवान्‌का स्वरूप है, वैसा ही मेरा स्वरूप है । जो आत्मदेव महामुनियोंकर परम आराधने योग्य है, और अनंत सुख आदि गुणोंका निवास है । इससे यह निश्चय हुआ कि जैसा परमात्मा वैसा यह आत्मा और जैसा यह आत्मा है, वैसा ही परमात्मा है । जो परमात्मा है । वह मैं हूँ, और जो मैं हूँ, वही परमात्मा है । अहं यह शब्द देहमें स्थित आत्माको कहता है । और सः यह शब्द मुक्ति प्राप्त परमात्मामें लगाना । जो परमात्मा वह मैं हूँ, और मैं हूँ सो परमात्मा—यही ध्यान हमेशा करना । वह परमात्मा परमगुणके संबंधसे उत्कृष्ट है । श्रीयोगीन्द्राचार्य प्रभाकरभट्टसे कहते हैं, कि हे प्रभाकर भट्ट, तू सब विकल्पोंको छोड़कर केवल परमात्माका ध्यान कर । निस्संदेह होके इस देहमें शुद्धात्मा है, ऐसा निश्चय कर । मिथ्यात्वादि सब विभावोंकी उपशमताके वशसे केवलज्ञानादि उत्पत्तिका जो कारण समयसार (निज आत्मा) उसीकी निरन्तर भावना करनी चाहिये । वीतराग सम्यक्त्वादिरूप शुद्ध आत्माका एकदेश प्रगटपनेको पाकर सब तरहसे ज्ञानको भावना योग्य है ॥१७५॥

आगे इसी अर्थको दृष्टान्त दार्ष्टान्तसे पुष्ट करते हैं—[जीव] हे जीव [यथा] जैसे [परकृतभावः] नीचेके सब डंक [निर्मलस्फटिकात्] महा निर्मल स्फटिकमणिसे [भिन्नः] जुदे हैं, [तथा]

अथ तामेव देहात्मनोर्भेदभावनां द्रढयति—

जेम सहावि णिम्मलउ फलिहउ तेम सहाउ।
भंतिए मइलु म मण्णि जिय मइलउ देक्खवि काउ ॥१७७॥

यथा स्वभावेन निर्मलः स्फटिकः तथा स्वभावः।
भ्रान्त्या मलिनं मा मन्यस्व जीव मलिनं दृष्ट्वा कायम् ॥१७७॥

जेम इत्यादि। जेम सहावि णिम्मलउ **यथा स्वभावेन निर्मलो भवति। कोऽसौ।** फलिहउ **स्फटिकमणिः** तेम **तथा निर्मलो भवति। कोऽसौ कर्ता।** सहाउ **विशुद्धज्ञानरूपस्य परमात्मनः स्वभावः** भंतिए मइलु म मण्णि **पूर्वोक्तमात्मस्वभावं कर्मतापन्नं भ्रान्त्या मलिनं मा मन्यस्व** जिय **हे जीव। किं कृत्वा।** मइलउ देक्खवि **मलिनं दृष्ट्वा। कम्** काउ **निर्मलशुद्धबुद्धैकस्वभावपरमात्मपदार्थाद्विलक्षणं कायमित्यभिप्रायः ॥१७७॥**

अथ पूर्वोक्तभेदभावनां रक्तादिवस्त्रदृष्टान्तेन व्यक्तिकरोति चतुष्कलेन—

रत्तेँ वत्थेँ जेम बुहु देहु ण मण्णइ रत्तु।
देहिं रत्तिं णाणि तहँ अप्पु ण मण्णइ रत्तु ॥१७८॥
जिण्णिं वत्थिं जेम बुहु देहु ण मण्णइ जिण्णु।
देहिं जिण्णिं णाणि तहँ अप्पु ण मण्णइ जिण्णु ॥१७९॥

रक्तेन वस्त्रेन यथा बुधः देहं न मन्यते रक्तम्।
देहेन रक्तेन ज्ञानी तथा आत्मानं न मन्यते रक्तम् ॥१७८॥
जीर्णेन वस्त्रेण तथा बुधः देहं न मन्यते जीर्णम्।
देहेन जीर्णेन ज्ञानी तथा आत्मानं न मन्यते जीर्णम् ॥१७९॥

उसी तरह **[आत्मस्वभावात्]** आत्मस्वभावसे **[सकलमपि]** सब **[कर्मस्वभावं]** शुभाशुभ कर्म **[मन्यस्व]** भिन्न जानो॥ **भावार्थ—**आत्मस्वभाव महानिर्मल है, भावकर्म, द्रव्यकर्म, नोकर्म ये सब जड़ हैं, आत्मा चिद्रूप है। अनन्त ज्ञानादि गुणरूप जो चिदानन्द उससे तू सकल प्रपंच भिन्न मान ॥१७६॥

आगे देह और आत्मा जुदे-जुदे हैं, यह भेद-भावना दृढ़ करते हैं—**[यथा]** जैसे **[स्फटिकः]** स्फटिकमणि **[स्वभावेन]** स्वभावसे **[निर्मलः]** निर्मल है, **[तथा]** उसी तरह **[स्वभावः]** आत्मा ज्ञान दर्शनरूप निर्मल है। ऐसे आत्मस्वभावको **[जीव]** हे जीव, **[कायं मलिनं]** शरीरकी मलिनता **[दृष्ट्वा]** देखकर **[भ्रांत्या]** भ्रमसे **[मलिनं]** मैला **[मा मन्यस्व]** मत मान॥ **भावार्थ—**यह काय शुद्ध बुद्ध परमात्मपदार्थसे भिन्न है, काय मैली है, आत्मा निर्मल है ॥१७७॥

आगे पूर्वकथित भेदविज्ञानकी भावना रक्त पीतादि वस्त्रके दृष्टांतसे चार दोहोंमें प्रगट करते हैं—**[यथा]** जैसे **[बुधः]** कोई बुद्धिमान् पुरुष **[रक्ते वस्त्रे]** लाल वस्त्रसे **[देहं रक्तं]** शरीरको लाल **[न मन्यते]** नहीं मानता, **[तथा]** उसी तरह **[ज्ञानी]** वीतराग निर्विकल्प स्वसंवेदनज्ञानी

वत्थु पणट्ठइ जेम बुहु देहु ण मण्णइ णट्ठु ।
णट्ठे देहे णाणि तहँ अप्पु ण मण्णइ णट्ठु ॥१८०॥
भिण्णउ वत्थु जि जेम जिय देहहँ मण्णइ णाणि ।
देहु वि भिण्णउँ णाणि तहँ अप्पहँ मण्णइ जाणि ॥१८१॥

वस्त्रे प्रणष्टे यथा बुधः देहं न मन्यते नष्टम् ।
नष्टे देहे ज्ञानी तथा आत्मानं न मन्यते नष्टम् ॥१८०॥
भिन्नं वस्त्रमेव यथा जीव देहात् मन्यते ज्ञानी ।
देहमपि भिन्नं ज्ञानी तथा आत्मनः मन्यते जानीहि ॥१८१॥

यथा कोऽपि व्यवहारज्ञानी रक्ते वस्त्रे जीर्णे वस्त्रे नष्टेऽपि स्वकीयवस्त्रे स्वकीयं देहं रक्तं जीर्णं नष्टं न मन्यते तथा वीतरागनिर्विकल्पस्वसंवेदनज्ञानी देहे रक्ते जीर्णे नष्टेऽपि सति व्यवहारेण देहस्थमपि वीतरागचिदानन्दैकपरमात्मानं शुद्धनिश्चयनयेन देहाद्भिन्नं रक्तं जीर्णं नष्टं न मन्यते इति भावार्थः । अथ मण्णइ **मन्यते । कोऽसौ ।** णाणि **देहवस्त्रविषये भेदज्ञानी । किं मन्यते ।** भिण्णउ **भिन्नम् । किम् ।** वत्थु जि **वस्त्रमेव** जेम **यथा** जिय **हे जीव । कस्माद्भिन्नं मन्यते ।** देहहं **स्वकीयदेहात् । दृष्टान्तमाह ।** मण्णइ **मन्यते । कोऽसौ ।** णाणि **देहात्मनोर्भेदज्ञानी** तहं **तथा भिन्नं मन्यते । कमपि ।** देहु वि **देहमपि । कस्मात् ।** अप्पहं **निश्चयेन देहविलक्षणाद् व्यवहारेण देहस्थात्सहजशुद्धपरमानन्दैकस्वभावान्निजपरमात्मनः** जाणि **जानीहीति भावार्थः ॥१७८-८१॥**

[**देह रक्ते**] शरीरके लाल होनेसे [**आत्मानं**] आत्माको [**रक्तं न मन्यते**] लाल नहीं मानता । [**यथा बुधः**] जैसे कोई बुद्धिमान् [**वस्त्रे जीर्णे**] कपड़ेके जीर्ण (पुराने) होनेपर [**देह जीर्णं**] शरीरको जीर्ण [**न मन्यते**] नहीं मानता, [**तथा ज्ञानी**] उसी तरह ज्ञानी [**देहे जीर्णे**] शरीरके जीर्ण होनेसे [**आत्मानं जीर्णं न मन्यते**] आत्माको जीर्ण नहीं मानता, [**यथा बुधः**] जैसे कोई बुद्धिमान् [**वस्त्रे प्रणष्टे**] वस्त्रके नाश होनेसे [**देह नष्टं**] देहका नाश [**न मन्यते**] नहीं मानता, [**तथा ज्ञानी**] उसी तरह ज्ञानी [**देहे नष्टे**] देहका नाश होनेसे [**आत्मानं**] आत्माका [**नष्टं न मन्यते**] नाश नहीं मानता, [**जीव**] हे जीव, [**यथा ज्ञानी**] जैसे ज्ञानी [**देहाद् भिन्नं एव**] देहसे भिन्न ही [**वस्त्रं मन्यते**] कपड़ेको मानता है, [**तथा ज्ञानी**] उसी तरह ज्ञानी [**देहमपि**] शरीरको भी [**आत्मनः भिन्नं**] आत्मासे जुदा [**मन्यते**] मानता है ऐसा [**जानीहि**] तुम जानो ॥ **भावार्थ—जैसे** वस्त्र **और** शरीर मिले हुए भासते है, परन्तु शरीरसे वस्त्र जुदा **है,** उसी तरह आत्मा **और** शरीर मिले **हुए** दिखते हैं, परन्तु जुदा है । शरीरकी रक्ततासे, जीर्णतासे, और विनाशसे आत्माकी रक्तता जीर्णता और विनाश नहीं होता । यह निसन्देह जानो । यह आत्मा व्यवहारनयकर देहमें स्थित **है, तो भी** सहज शुद्ध परमानन्दरूप निजस्वभावकर जुदा ही है, देहके सुख-दुःख जीवमें नहीं हैं ॥१७८-८१॥

अथ दुःखजनकदेहघातकं शत्रुमपि मित्रं जानीहीति दर्शयति—

इहु तणु जीवड तुज्झ रिउ दुक्खइँ जेण जणेइ ।
सो परु जाणहि मित्तु तुहुँ जो तणु एहु हणेइ ॥१८२॥

इयं तनुः जीव तव रिपुः दुःखानि येन जनयति ।
त परं जानीहि मित्रं त्वं यः तनुमेतां हन्ति ॥१८२॥

रिउ रिपुर्भवति । का । इहु तणु इयं तनुः कर्त्री जीवड हे जीव तुज्झ तव । कस्मात् । दुक्खइं जेण जणेइ येन कारणेन दुःखानि जनयति सो परु तं परजनं जाणहि जानीहि । किम् । मित्तु परममित्रं तुहुं त्वं कर्ता । यः परः किं करोति । जो तणु एहु हणेइ यः कर्ता तनुमिमां प्रत्यक्षीभूतां हन्तीति । अत्र यदा वैरी देहविनाशं करोति तदा वीतरागचिदानन्दैकस्वभावपरमात्मतत्त्वभावनोत्पन्नसुखामृतसमरसीभावे स्थित्वा शरीरघातकस्योपरि यथा पाण्डवैः कौरवकुमारस्योपरि द्वेषो न कृतस्तथान्यतपोधनैरपि न कर्तव्य इत्यभिप्रायः ॥१८२॥

अथ उदयागते पापकर्मणि स्वस्वभावो न त्याज्य इति मनसि संप्रधार्य सूत्रमिदं कथयति—

उदयहँ आणिवि कम्मु मइँ जं भुंजेवउ होइ ।
तं सइ आविउ खविउ मइँ सो पर लाहु जि कोइ ॥१८३॥

उदयमानीय कर्म मया यद् भोक्तव्यं भवति ।
तत् स्वयमागतं क्षपितं मया स परं लाभ एव कश्चित् ॥१८३॥

जं यत् भुंजेवउ होइ भोक्तव्यं भवति । किं कृत्वा । उदयहं आणिवि विशिष्टात्मभावनाबलेनोदयमानीय । किम् । कम्मु चिरसंचितं । कर्म । केन । मइं मया तं

आगे दुःख उत्पन्न करनेवाला शत्रुरूप यह देह है, उसको तू मित्र मत समझ, ऐसा कहते हैं—[जीव] हे जीव, [इयं तनुः] यह शरीर [तव रिपुः] तेरा शत्रु है, [येन] क्योंकि [दुःखानि] दुःखोंको [जनयति] उत्पन्न करता है, [यः] जो [इमां तनुं] इस शरीरका [हंति] घात करे, [तं] उसको [त्वं] तुम [परं मित्रं] परममित्र [जानीहि] जानो ॥ भावार्थ—यह शरीर तेरा शत्रु होनेसे दुःख उत्पन्न करता है, इससे तू अनुराग मत कर और जो तेरे शरीरकी सेवा करता है, उससे भी राग मत कर, तथा जो तेरे शरीरका घात कर देवे, उसका शत्रु मत जान । जब कोई तेरे शरीरका विनाश करे, तब वीतराग चिदानंद ज्ञानस्वभाव परमात्मतत्त्वको भावनासे उत्पन्न जो परम समरसीभाव, उसमें लीन होकर शरीरके घातकपर द्वेष मत कर। जैसे महा धर्मस्वरूप युधिष्ठिर पांडव आदि पाँचों भाइयों ने दुर्योधनादिपर द्वेष नहो किया। उसी तरह सभी साधुओंका यही स्वभाव है, कि अपने शरीरका जो घात करे, उससे द्वेष नहीं करते, सबके मित्र ही रहते हैं ॥ १८२ ॥

आगे पूर्वोपार्जित पापके उदयसे दुःख अवस्था आजावे उसमें अपना धीरपना आदि स्वभाव न छोड़े, ऐसा अभिप्राय मनमें रखकर व्याख्यान करते हैं—[यत्] जो [मया] मैं [कर्म] कर्मको [उदयं

तत् पूर्वोक्तं कर्म मइ आविउ दुर्धरपरीषहोपसर्गवशेन स्वयमुदयमागतं सत् खविउ मइं निजपरमात्मतत्त्वभावनोत्पन्नवीतरागसहजानन्दैकसुखरसास्वादद्रवीभूतेन परिणतेन मनसा क्षपितं मया सो स परं नियमेन लाहु जि लाभ एव कोइ कश्चिदपूर्व इति। अत्र केचन महापुरुषा दुर्धरानुष्ठानं कृत्वा वीतरागनिर्विकल्पसमाधौ स्थित्वा च कर्मोदयमानीय तमनुभवन्ति, अस्माकं पुनः स्वयमेवोदयागतमिति मत्वा संतोषः कर्तव्य इति तात्पर्यम् ॥१८३॥

अथ इदानीं पुरुषवचनं सोढुं न याति तदा निर्विकल्पात्मतत्त्वभावना कर्तव्येति प्रतिपादयति—

णिट्ठुर-वयणु सुणेवि जिय जइ मणि सहण ण जाइ।
तो लहु भावहि बंभु परु जिं मणु झत्ति विलाइ ॥१८४॥

निष्ठुरवचनं श्रुत्वा जीव यदि मनसि सोढुं न याति।
ततो लघु भावय ब्रह्म परं येन मनो झटिति विलीयते ॥१८४॥

जइ यदि चेत् सहण ण जाइ सोढुं न याति। क्व मणि मनसि जिय हे मूढ जीव। किं कृत्वा। सुणेवि श्रुत्वा। किम् णिट्ठुरवयणु निष्ठुरं हृदयकर्णशूलवचनं तो तद्वचनश्रवणानन्तरं लहु शीघ्रं भावहि वीतरागपरमानन्दैकलक्षणनिर्विकल्पसमाधौ स्थित्वा भावय कम्। बंभु ब्रह्मशब्दवाच्यनिजदेहस्थपरमात्मानम्। कथंभूतम्। परु परमानन्तज्ञानादि गुणाधारत्वात् परमुत्कृष्टं जि येन परमात्मध्यानेन। किं भवति।

आनीय] उदयमें लाकर [भोक्तव्यं भवति] भोगने चाहता था, [तत्] वह कर्म [स्वय आगतं] आप ही आगया, [मया क्षपितं] इसमें मैं शान्त चित्तसे फल सहनकर क्षय करूँ, [स कश्चित्] यह कोई [परं लाभः] महान् ही लाभ हुआ॥ भावार्थ—जो महामुनि मुक्तिके अधिकारी है, उदयमें वे नहीं आये हुए कर्मोंको परम आत्म ज्ञानकी भावनाके बलसे उदयमे लाकर उसका फल भोगकर शीघ्र निर्जरा कर देते हैं। और जो वे पूर्वकर्म बिना उपायके सहज ही बाईस परीषह तथा उपसर्गके वशसे उदयमे आये हों, तो विषाद न करना बहुत लाभ समझना। मनमें यह मानना कि हम तो उदीरणासे इन कर्मोंको उदयमे लाकर क्षय करते, परंतु ये सहज ही उदयमे आये, यह तो बड़ा ही लाभ है। जैसे कोई बड़ा व्यापारी अपने ऊपरका कर्ज लोगोका बुला बुलाके देता है, यदि कोई बिना बुलाये सहज ही लेने आया हो, तो बडा ही लाभ है। उसी तरह कोई महापुरुष महान दुर्धर तप करके कर्मोंको उदयमें लाके क्षय करते हैं, लेकिन वे कर्म अपने स्वयमेव उदयमें आये है, तो इनके समान दूसरा क्या है, ऐसा संतोष धारणकर ज्ञानीजन उदय आये हुए कर्मोंको भोगते है, परन्तु राग द्वेष नहीं करते॥ १८३॥

आगे यह कहते हैं कि जो कोई कर्कश (कठोर) वचन कहे, और यह न कह सकता हो तो अपने कषायभाव रोकनेके लिये निर्विकल्प आत्म-तत्वको भावना करनी चाहिए—[जीव] हे जीव, [निष्ठुरवचनं श्रुत्वा] जो कोई अविवेकी किसीको कठोर वचन कहे, उसको सुनकर [यदि] जो [न सोढुं याति] न सह सके, [ततः] तो कषाय दूर करनेके लिए [परं ब्रह्म] परमानदस्वरूप इस

मणु झत्ति विलाइ वीतरागनिर्विकल्पसमाधिसमुत्पन्नपरमानन्दैकरूपसुखामृतास्वादेन मनो झटिति शीघ्रं विलयं याति द्रवीभूतं भवतीति भावार्थः ॥१८४॥

अथ जीव. कर्मवशेन जातिभेदभिन्नो भवतीति निश्चिनोति—

लोउ विलक्खणु कम्म-वसु इत्थु भवंतरि एइ ।
चुज्जु कि जइ इहु अप्पि ठिउ इत्थु जि भवि ण पडेइ ॥१८५॥
लोक. विलक्षणः कर्मवशः अत्र भवान्तरे आयाति ।
आश्चर्यं किं यदि अयं आत्मनि स्थितः अत्रैव भवे न पतति ॥१८५॥

लोउ इत्यादि । विलक्खणु षोडशवर्णिकासुवर्णवत्केवलज्ञानादिगुणसदृशो न सर्वजीवराशिसदृशात्[1] परमात्मतत्त्वाद्विलक्षणो विसदृशो भवति । केन । ब्राह्मणक्षत्रियवैश्यशूद्रादिजातिभेदेन । कोऽसौ । लोउ लोको जनः । कथंभूतः सन् । कम्मवसु कर्मरहितशुद्धात्मानुभूतिभावनारहितेन यदुपार्जितं कर्म तस्य कर्मण अधीनः कर्मवशः । इत्थंभूतः सन् किं करोति । इत्थु भवंतरि एइ पञ्चप्रकारभवरहिताद्वीतरागपरमानन्दैकस्वभावात् शुद्धात्मद्रव्याद्विसदृशे अस्मिन् भवान्तरे संसारे समायाति चुज्जु कि इदं किमाश्चर्यं किंतु नैव, जइ इहु अप्पि ठिउ यदि चेदयं जीवः स्वशुद्धात्मनि स्थितो भवति तर्हि इत्थु जि भवि ण पडेइ अत्रैव भवे न पततीति इदमप्याश्चर्यं न भवतीति । अत्रेदं व्याख्यानं ज्ञात्वा संसारभयभीतेन भव्येन भवकारणमिथ्यात्वादिपञ्चास्रवान् मुक्त्वा द्रव्यभावास्रवरहिते परमात्मभावे स्थित्वा च निरन्तरं भावना कर्तव्येति तात्पर्यम् ॥१८५॥

देहमे विराजमान परमब्रह्मका [**मनसि**] मनमे [**लघु**] शीघ्र [**भावय**] ध्यान करो। जो ब्रह्म अनन्त ज्ञानादि गुणोका आधार है, सर्वोत्कृष्ट है, [**येन**] जिसके ध्यान करनेसे [**मनः**] मनका विकार [**झटिति**] शीघ्र ही [**विलीयते**] विलीन हो जाता है ॥१८४॥

आगे जीवके कर्मके वशसे भिन्न-भिन्न स्वरूप जाति-भेदसे होते हैं, ऐसा निश्चय करते है— [**विलक्षणः**] सोलहवानीके सुवर्णकी तरह केवलज्ञानादि गुणकर समान जो परमात्मतत्त्व उससे भिन्न जो [**लोकः**] ब्राह्मण, क्षत्रिय, वैश्य, शूद्र आदि जाति-भेदरूप जीव-राशि वह [**कर्मवशः**] कर्मसे उत्पन्न है, अर्थात् जाति-भेद कर्मके निमित्तसे हुआ है, और वे कर्म आत्म-ज्ञानकी भावनासे रहित अज्ञानी जीवने उपार्जन किये हैं, उन कर्मोंके अधीन जाति-भेद है, जबतक कर्मोंका उपार्जन है, तबतक [**अत्र भवांतरे आयाति**] इस संसारमें अनेक जाति धारण करता है, [**अयं यदि**] जो यह जीव [**आत्मनि स्थितः**] आत्मस्वरूपमें लगे, तो [**अत्रैव भवे**] इसी भवमे [**न पतति**] नही पड़े-भ्रमण नही करे, [**किं आश्चर्यं**] इसमें क्या आश्चर्य है, कुछ भी नहीं ॥ **भावार्थ**—जबतक आत्मामें चित्त नहीं लगता, तबतक संसारमें भ्रमण करता है, अनेक भव धारण करता है, लेकिन

---

१. सर्वजीवराशिसदृशात् = सर्वजीवराशिः सदृशात् ।

अथ परेण दोषग्रहणे कृते कोपो न कर्तव्य इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति—

अवगुण-गहणइँ महुतणइँ जइ जीवहँ संतोसु ।
तो तहँ सोक्खहँ हेउ हउँ इउ मण्णिवि चइ रोसु ।।१८६।।
अवगुणग्रहणेन मदीयेन यदि जीवानां संतोषः ।
ततः तेषां सुखस्य हेतुरहं इति मत्वा त्यज रोषम् ।।१८६।।

जइ जीवहं संतोसु यदि चेदज्ञानिजीवानां संतोषो भवति । केन । अवगुणगहणइं निर्दोषिपरमात्मनो विलक्षणा ये दोषा अवगुणास्तेषां ग्रहणेन । कथंभूतेन महुतणइं मदीयेन तो तहं सोक्खहं हेउ हउं यतः कारणान्मदीयदोषग्रहणेन तेषां सुखं जातं ततस्तेषामहं सुखस्य हेतुर्जातः इउ मण्णिवि चइ रोसु केचन परोपकारनिरताः परेषां द्रव्यादिकं दत्त्वा सुखं कुर्वन्ति मया पुनर्द्रव्यादिकं मुक्त्वापि तेषां सुखं कृतमिति मत्वा रोषं त्यज । अथवा मदीया अनन्तज्ञानादिगुणा न गृहीतास्तैः किंतु दोषा एव गृहीता इति मत्वा च कोपं त्यज, अथवा ममैते दोषाः सन्ति सत्यमिदमस्य वचनं तथापि रोषं त्यज, अथवा ममैते दोषा न सन्ति तस्य वचनेन किमहं दोषी

जब यह आत्मदर्शी हुआ तब कर्मोंको नहीं उपार्जन करता और भवमें भी नहीं भटकता । इसमें आश्चर्य नहीं है । संसार शरीर भोगोसे उदास और जिसको भव-भ्रमणका भय उत्पन्न हो गया है, ऐसा भव्य जीव उसको मिथ्यात्व, अव्रत, कषाय, प्रमाद, योग, इन पाँचों आस्रवोंको छोड़कर परमात्मतत्त्वमें सदैव भावना करनी चाहिये । जो इसके आत्म-भावना होवे तो भव-भ्रमण नही हो सकता ।।१८५।।

आगे जो कोई अपने दोष ग्रहण करे तो उसपर क्रोध नहीं करना, क्षमा करना, यह अभि-प्राय मनमें रखकर व्याख्यान करते हैं—[मदीयेन अवगुणग्रहणेन] अज्ञानी जीवोंको परके दोष ग्रहण करनेसे हर्ष होता है, मेरे दोष ग्रहण करके [यदि जीवानां सन्तोषः] जिन जीवोंको हर्ष होता है, [ततः] तो मुझे यही लाभ है, कि [अहं] मैं [तेषां सुखस्य हेतुः] उनको सुखका कारण हुआ, [इति मत्वा] ऐसा मनमें विचारकर [रोषं त्यज] गुस्सा छोड़ो ।। भावार्थ—ज्ञानी गुस्सा नहीं करते, ऐसा विचारते हैं, कि जो कोई परका उपकार करनेवाले परजीवोंको द्रव्यादि देकर सुखी करते हैं, मैंने कुछ द्रव्य नहीं दिया, उपकार नहीं किया, मेरे अवगुण ही से सुखी हो गये, तो इसके समान दूसरी क्या बात है ? ऐसा जानकर हे भव्य, तू रोष छोड़ । अथवा ऐसा विचारे, कि मेरे अनंत ज्ञानादि गुण तो उसने नहीं लिये, दोष लिये वो निस्संक लो । जैसे घरमें कोई चोर आया, और उसने रत्न सुवर्णादि नही लिये माटी पत्थर लिये तो लो, तुच्छ वस्तुके लेनेवालेपर क्या क्रोध करना, ऐसा जान रोष छोड़ना । अथवा ऐसा विचारे, कि जो यह दोष कहता है, वे सच कहता है, तो सत्यवादीसे क्या द्वेष करना । अथवा ये दोष मुझमें नहीं हुआ वह वृथा कहता है, तो उसके वृथा कहनेसे क्या मैं दोषी हो गया, बिलकुल नहीं हुआ । ऐसा जानकर क्रोध छोड़ क्षमाभाव धारण करना चाहिये ।

जातस्तथापि, क्षमितव्यम्, अथवा परोक्षे दोषग्रहणं करोति न च प्रत्यक्षे समीचीनोऽसौ तथापि क्षमितव्यम्, अथवा वचनमात्रेणैव दोषग्रहणं करोति न च शरीरबाधां करोति तथापि क्षमितव्यम्, अथवा शरीरबाधामेव करोति न च प्राणविनाशं तथापि क्षमितव्यम्, अथवा प्राणविनाशमेव करोति न च भेदाभेदरत्नत्रय भावनाविनाशं चेति मत्वा सर्वतात्पर्येण क्षमा कर्तव्येत्यभिप्रायः ॥१८६॥

अथ सर्वचिन्तां निषेधयति युग्मेन—

जोइय चिंति म किं पि तुहुँ जइ बीहउ दुक्खस्स ।
तिल-तुस-मित्तु वि सल्लडा वेयण करइ अवस्स ॥१८७॥

योगिन् चिन्तय मा किमपि त्वं यदि भीतः दुःखस्य ।
तिलतुषमात्रमपि शल्यं वेदनां करोत्यवश्यम् ॥१८७॥

चिंति म चिन्तां मा कार्षीः किं पि तुहुं कामपि त्वं जोइय हे योगिन् । यदि किम् । जइ बीहउ यदि बिभेषि । कस्य । दुक्खस्स वीतरागतात्त्विकानन्दैकरूपात् पारमार्थिकसुखात्प्रतिपक्षभूतस्य नारकादिदुःखस्य । यतः कारणात् तिलतुसमित्तु वि सल्लडा तिलतुष मात्रमपि शल्यं वेयण करइ अवस्स वेदनां बाधां करोत्यवश्यं नियमेन । अत्र चिन्तारहितात्परमात्मनः सकाशाद्विलक्षणा या विषयकषायादिचिन्ता सा न कर्तव्या । काण्डादिशल्यमिव दुःखकारणत्वादिति भावार्थ ॥१८७॥

अथवा यह विचारो कि वह मेरे मुँहके आगे नहीं कहता, लेकिन पीठ पीछे कहता है, सो पीठ पीछे तो राजाओंको भी बुरा कहते है, ऐसा जानकर उससे क्षमा करना कि प्रत्यक्ष तो मेरा मानभंग नहीं करता है, परोक्षकी बात क्या है। अथवा कदाचित् कोई प्रत्यक्ष मुँह आगे दोष कहे, तो तू यह विचार कि वचनमात्रसे मेरे दोष ग्रहण करता है, शरीरको तो बाधा नहीं करता, यह गुण है, ऐसा जान क्षमा ही कर। अथवा जो कोई शरीरको भी बाधा करे, तो तू ऐसा विचार, कि मेरे प्राण तो नहीं हरता, यह गुण है। जो कभी कोई पापी प्राण ही हर ले, तो यह विचार कि ये प्राण तो विनाशक हैं, विनाशीक वस्तुके चले जानेकी क्या बात है। मेरा ज्ञानभाव अविनश्वर है, उसको तो कोई हर नहीं सकता, इसने तो मेरे बाह्य प्राण हर लिये है; परंतु भेदाभेदरत्नत्रयकी भावनाका विनाश नहीं किया। ऐसा जानकर सर्वथा क्षमा ही करना चाहिये ॥१८६॥

आगे सब चिन्ताओंका निषेध करते हैं—[योगिन्] हे योगी, [त्वं] तू [यदि] जो [दुःखस्य] वीतराग परम आनन्दके शत्रु जो नरकादि चारों गतियोंके दुःख उनसे [भीतः] डर गया है, तो तू निश्चित होकर परलोकका साधन कर, इस लोककी [किमपि मा चिंतय] कुछ भी चिंता मत कर। क्योंकि [तिलतुषमात्रमपि शल्यं] तिलके भूसे मात्र भी शल्य [वेदनां] मनको वेदना [अवश्यं करोति] निश्चयसे करती है ॥ [भावार्थ]—चिन्ता रहित आत्म-ज्ञानसे उलटे जो विषय कषाय आदि विकल्पजाल उनकी चिन्ता कुछ भी नहीं करना। यह चिन्ता दुःखका ही कारण है, जैसे बाण आदिको तृणप्रमाण भी सलाई महा दुःखका कारण है, जब वह शल्य निकले, तभी सुख होता है ॥ १८७ ॥

किंच—

मोक्खु म चिंतहि जोइया मोक्खु ण चिंतिउ होइ ।
जेण णिबद्धउ जीवडउ मोक्खु करेसइ सोइ ॥१८८॥
मोक्षं मा चिन्तय योगिन् मोक्षो न चिन्तितो भवति ।
येन निबद्धो जीवः मोक्षं करिष्यति तदेव ॥१८८॥

मोक्खु इत्यादि । मोक्खु म चिंतहि **मोक्षचिन्तां मा कार्षीस्त्वं** जोइया **हे योगिन् । यतः कारणात्** मोक्खु ण चिंतिउ होइ **रागादिचिन्ताजालरहितः केवलज्ञानाद्यनन्तगुणव्यक्तिसहितो मोक्षः चिन्तितो न भवति । तर्हि कथं भवति ।** जेण णिबद्धउ जीवडउ **येन मिथ्यात्वरागादिचिन्ताजालोपार्जितेन कर्मणा बद्धो जीवः** सोइ **तदेव कर्म शुभाशुभविकल्पसमूहरहिते शुद्धात्मतत्त्वस्वरूपे स्थितानां परमयोगिनां** मोक्खु करेसइ **अनन्तज्ञानादिगुणोपलम्भरूपं मोक्षं करिष्यतीति । अत्र यद्यपि सविकल्पावस्थायां विषयकषायाद्यपध्यानवञ्चनार्थं मोक्षमार्गे भावनादृढीकरणार्थं च "दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुण संपत्ती होउ मज्झं" इत्यादि भावना कर्तव्या तथापि वीतरागनिर्विकल्पपरमसमाधिकाले न कर्तव्येति भावार्थः ॥१८८॥**

अथ चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमसमाधिव्याख्यानमुख्यत्वेन सूत्रषट्कमन्तरस्थलं कथ्यते । तद्यथा—

आगे मोक्षकी भी चिन्ता नहीं करना, ऐसा कहते हैं— [**योगिन्**] हे योगी, अन्य चिन्ताकी तो बात क्या रही, [**मोक्षं मा चिंतय**] मोक्षकी भी चिन्ता मत कर, [**मोक्षः**] क्योंकि मोक्ष [**चिंतितो न भवति**] चिन्ता करनेसे नहीं होता, वांछाके त्यागसे ही होता है, रागादि चिन्ताजालसे रहित केवलज्ञानादि अनंतगुणोंको प्रगटता सहित जो मोक्ष है, वह चिन्ताके त्यागसे होता है । यही कहते हैं—[**येन**] जिन मिथ्यात्व-रागादि चिन्ता-जालोंसे उपार्जन किये कर्मोंसे [**जीवः**] यह जीव [**निबद्धः**] बँधा हुआ है, [**तदेव**] वे कर्म ही [**मोक्षं**] शुभाशुभ विकल्पसे समूहसे रहित जो शुद्धात्मतत्त्वका स्वरूप उसमें लीन हुए परमयोगियोंकी मोक्ष [**करिष्यति**] करेंगे ॥ **भावार्थ—** वह चिन्ताका त्याग ही तुझको निस्संदेह मोक्ष करेगा । अनंत ज्ञानादि गुणोंकी प्रगटता वह मोक्ष है । यद्यपि विकल्प सहित जो प्रथम अवस्था उसमे विषय कषायादि खोटे ध्यानके निवारण करनेके लिये और मोक्ष-मार्गमे परिणाम दृढ़ करनेके लिये ज्ञानीजन ऐसी भावना करते हैं, कि चतुर्गतिके दुःखोंका क्षय हो, अष्ट कर्मोंका क्षय हो, ज्ञानका लाभ हो, पंचमगतिमें गमन हो, समाधि मरण हो, और जिनराजके गुणोंकी सम्पत्ति मुझको हो । यह भावना चौथे पाँचवें छट्ठे गुणस्थानमें करने योग्य है, तो भी ऊपरके गुणस्थानोंमें वीतराग निर्विकल्पसमाधिके समय नहीं होती ॥ १८८ ॥

आगे चौबीस दोहोंके स्थलमे परमसमाधिके व्याख्यानकी मुख्यतासे छह दोहा-सूत्र कहते हैं—

परम-समाहि-महा-सरहिँ जे बुड्डहिँ पइसेवि ।
अप्पा थक्कइ विमलु तहँ भव-मल जंति वहेवि ॥१८९॥
परमसमाधिमहासरसि ये मज्जन्ति प्रविश्य ।
आत्मा तिष्ठति विमलः तेषां भवमलानि यान्ति ऊढ्वा ॥१८९॥

जे बुड्डहिं **ये केचना पुरुषा मग्ना भवन्ति । क्व ।** परमसमाहिमहासरहिं **परमसमाधिमहासरोवरे । किं कृत्वा मग्ना भवन्ति ।** पइसेवि **प्रविश्य सर्वात्मप्रदेशैरवगाह्य** अप्पा थक्कइ **चिदानन्दैकस्वभावः परमात्मा तिष्ठति । कथंभूतः ।** विमलु **द्रव्यकर्मनोकर्ममतिज्ञानादिविभावगुणनरनारकादिविभावपर्यायमलरहितः** तहं **तेषां परमसमाधिरतपुरुषाणां** भवमल जंति **भवरहितात् शुद्धात्मद्रव्याद्विलक्षणानि यानि कर्माणि भवमलकारणभूतानि गच्छन्ति । किं कृत्वा ।** वहेवि **शुद्धपरिणामनीरप्रवाहेण ऊढ्वेति भावार्थः ॥१९१॥**

अथ—

सयल-वियप्पहँ जो विलउ परम-समाहि भणंति ।
तेण सुहासुह-भावडा मुणि सयलवि मेल्लंति ॥१९०॥
सकलविकल्पानां यः विलयः (तं) परमसमाधि भणन्ति ।
तेन शुभाशुभभावान् मुनयः सकलानपि मुञ्चन्ति ॥१९०॥

भणंति कथयन्ति । के ते । वीतरागसर्वज्ञाः । कं भणन्ति । परमसमाहि **वीतरागपरमसामायिकरूपं परमसमाधिकं** जो विलउ **यं विलयं विनाशम् । केषाम् ।** सयलवियप्पहं **निर्विकल्पात्परमात्मस्वरूपात्प्रतिकूलानां समस्तविकल्पानां** तेण **तेन कारणेन** मेल्लंति **मुञ्चन्ति । के कर्तारः ।** मुणि **परमाराध्यध्यानरतास्तपोधनाः । कान् मुञ्चन्ति ।** सुहासुहभावडा **शुभाशुभमनोवचनकायव्यापाररहितान् शुद्धात्मद्रव्याद्वि-**

[**ये**] जो कोई महान् पुरुष [**परमसमाधिमहासरसि**] परमसमाधिरूप सरोवरमे [**प्रविश्य**] घुसकर [**मज्जन्ति**] मग्न होते हैं, उनके सब प्रदेश समाधिरसमे भीग जाते हैं, [**आत्मा तिष्ठति**] उन्हींके चिदानंद अखण्ड स्वभाव आत्माका ध्यान स्थिर होता है। जो कि आत्मा [**विमलः**] द्रव्यकर्म भावकर्म नोकर्मसे रहित महा निर्मल है, [**तेषां**] जो योगी परमसमाधिमे रत हैं, उन्हीं पुरुषोंके [**भवमलानि**] शुद्धात्मद्रव्यसे विपरीत अशुद्ध भावके कारण जो कर्म है, वे सब [**बहिस्त्वा यांति**] शुद्धात्म परिणामरूप जो जलका प्रवाह उसमे बह जाते हैं॥ **भावार्थ—**जहाँ जलका प्रवाह आवे, वहाँ मल कैसे रह सकता है, कभी नही रहता॥ १८९॥

आगे परमसमाधिका लक्षण कहते हैं—[**यः**] जो [**सकलविकल्पानां**] निर्विकल्पपरमात्मस्वरूपसे विपरीत रागादि समस्त विकल्पोका [**विलयः**] नाश होना, उसको [**परमसमाधि भणंति**] परमसमाधि कहते हैं, [**तेन**] इस परमसमाधिसे [**मुनयः**] मुनिराज [**सकलानपि**] सभी [**शुभाशुभविकल्पान्**] शुभ अशुभ भावोंको [**मुंचंति**] छोड़ देते हैं॥ **भावार्थ—**परम आराध्य जो आत्मस्वरूप उसके

परीतान् शुभाशुभभावान् परिणामान् । कतिसंख्योपेतान् । सयल वि समस्तानपि । अयं भावार्थः । समस्तपरद्रव्याशारहितात् स्वशुद्धात्मस्वभावाद्विपरीता या आशा-पीहलोकपरलोकाशा यावत्तिष्ठति मनसि तावद् दुःखी जीव इति ज्ञात्वा सर्वपरद्रव्या-शारहितशुद्धात्मद्रव्यभावना कर्तव्येति । तथा चोक्तम्—"आसापिसायगहिओ जीवो पावेइ दारुणं दुक्खं । आसा जाहं णियत्ता ताहं णियत्ताइं सयलदुक्खाइं ।।" ।।१९०।।

अथ—

घोरु करंतु वि तव-चरणु सयल वि सत्थ मुणंतु ।
परम-समाहि-विवज्जियउ णवि देक्खइ सिउ संतु ।।१९१।।
घोरं कुर्वन् अपि तपश्चरणं सकलान्यपि शास्त्राणि जानन् ।
परमसमाधिविवर्जितः नैव पश्यति शिवं शान्तम् ।।१९१।।

करंतु वि कुर्वाणोऽपि । किम् । तवचरणु समस्तपरद्रव्येच्छावर्जितं शुद्धात्मानु-भूतिरहितं तपश्चरणम् । कथंभूतम् । घोरु घोरं दुर्धरं वृक्षमूलातापनादिरूपम् । न केवलं तपश्चरणं कुर्वन् । सयल वि सत्थ मुणंतु शास्त्रजनितविकल्पतात्पर्यरहितात् परमात्मस्वरूपात् प्रतिपक्षभूतानि सर्वशास्त्राण्यपि जानन् । इत्थंभूतोऽपि सन् परम-समाहिविवज्जयउ यदि चेद्रागादिविकल्परहितपरमसमाधिविवर्जितो भवति तर्हि णवि देक्खइ न पश्यति । कम् । सिउ शिवं शिवशब्दवाच्यं विशुद्धज्ञानदर्शनस्वभावं स्वदेह-

---

ध्यानमें लीन जो तपोधन वे शुभ अशुभ मन वचन कायके व्यापारसे रहित जो शुद्धात्मद्रव्य उससे विपरीत जो अच्छे बुरे भाव उन सबको छोड़ देते हैं, समस्त परद्रव्यकी आशासे रहित जो निज शुद्धात्म स्वभाव उससे विपरीत जो इस लोक परलोककी आशा, वह जबतक मनमे स्थित है, तब-तक यह जीव दुःखी है । ऐसा जानकर सब परद्रव्यकी आशासे रहित जो शुद्धात्मद्रव्य उसकी भावना करनी चाहिये । ऐसा ही कथन अन्य जगह भी है—आशारूप पिशाचसे घिरा हुआ यह जीव महान् भयंकर दुःख पाता है, जिन मुनियोंने आशा छोड़ी, उन्होंने सब दुःख दूर किये, क्योंकि दुःखका मूल आशा ही है ।।१९०।।

आगे ऐसा कहते हैं कि जो परमसमाधिके बिना शुद्ध आत्माको नहीं देख सकता—[घोरं तपश्चरणं कुर्वन् अपि] जो मुनि महा दुर्धर तपश्चरण करता हुआ भी और [सकलानि शास्त्राणि] सब शास्त्रोंको [जानन्] जानता हुआ भी [परमसमाधिविवर्जितः] जो परमसमाधिसे रहित है, वह [शांतं शिवं] शांतरूप शुद्धात्माको [नैव पश्यति] नहीं देख सकता ।। भावार्थ—तप उसे कहते हैं, कि जिसमें किसी वस्तुकी इच्छा न हो । सो इच्छाका अभाव तो हुआ नहीं परंतु कायक्लेश करता है, शीतकालमें नदीके तीर, ग्रीष्मकालमें पर्वतके शिखरपर, वर्षाकालमें वृक्षकी मूलमें महान् दुर्धर तप करता है । केवल तप ही नहीं करता शास्त्र भी पढ़ता है, सकल शास्त्रोंके प्रबंधसे रहित जो निर्विकल्प परमात्मस्वरूप उससे रहित हुआ सीखता है, शास्त्रोंका रहस्य जानता है, परंतु परम-

हत्वमपि च परमात्मानम् । कथंभूतम् । संतं रागद्वेषमोहरहितत्वेन शान्तं परमोपशमरूपमिति । इदमत्र तात्पर्यम् । यदि निजशुद्धात्मैवोपादेय इति मत्वा तत्साधकत्वेन तदनुकूलं तपश्चरणं करोति तत्परिज्ञानसाधकं च पठति तदा परंपरया मोक्षसाधकं भवति, नो चेत् पुण्यबन्धकारणं तमेवेति । निर्विकल्पसमाधिरहिताः सन्तः आत्मरूपं न पश्यन्ति । तथा चोक्तम्--"आनन्दं ब्रह्मणो रूपं निजदेहे व्यवस्थितम् । ध्यानहीना न पश्यन्ति जात्यन्धा इव भास्करम् ॥" ॥१९१॥

अथ---

विसय-कसाय वि णिद्दलिवि जे ण समाहि करंति ।
ते परमप्पहँ जोइया णवि आराहय होंति ॥१९२॥
विषयकषायानपि निर्दल्य ये न समाधिं कुर्वन्ति ।
ते परमात्मनः योगिन् नैव आराधका भवन्ति ॥१९२॥

जे ये केचन ण करंति न कुर्वन्ति । कम् । समाहि त्रिगुप्तिगुप्तपरमसमाधिम् । किं कृत्वा पूर्वम् । णिद्दलिवि निर्मूल्य । कानपि विसयकसाय वि निर्विषयकषायात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतान् विषयकषायानपि ते णवि आराहय होंति ते नैवाराधका भवन्ति जोइया हे योगिन् । कस्याराधका न भवन्ति । परमप्पहं निर्दोषिपरमात्मन

समाधिसे रहित है, अर्थात् रागादि विकल्पसे रहित समाधि जिसके प्रगट न हुई, तो वह परमसमाधिके बिना तप करता हुआ और श्रुत पढता हुआ भी निर्मल ज्ञान दर्शनरूप तथा इस देहमें विराजमान ऐसे निज परमात्माको नही देख सकता । जो आत्मस्वरूप राग द्वेष मोह रहित परमशांत है । परमसमाधिके बिना तप और श्रुतसे भी शुद्धात्माको नही देख सकता । जो निज शुद्धात्माको उपादेय जानकर ज्ञानका साधक तप करता है, और ज्ञानकी प्राप्तिका उपाय जो जैनशास्त्र उनको पढ़ता है, तो परम्परा मोक्षका साधक है । और जो आत्माके श्रद्धान बिना कायक्लेशरूप तप ही करे, तथा शब्दरूप ही श्रुत पढ़े, तो मोक्षका कारण नहीं है, पुण्यबंधके कारण होते हैं । ऐसा ही परमानंदस्तोत्रमें कहा है, कि जो निर्विकल्प समाधि रहित जीव हैं, वे आत्मस्वरूपको नहीं देख सकते । ब्रह्मका रूप आनंद है, वह ब्रह्म निज देहमें मौजूद है, परंतु ध्यानसे रहित जीव ब्रह्मको नहीं देख सकते, जैसे जन्मका अन्धा सूर्यको नहीं देख सकता है ॥१९१॥

आगे विषय कषायोंका निषेध करते हैं---[ये] जो [विषयकषायानपि] समाधिको धारणकर विषय कषायोंको [निर्दल्य] मूलमे उखाड़कर [समाधिं] तीन गुप्तिरूप परमसमाधिको [न कुर्वन्ति] नहीं धारण करते, [ते] वे [योगिन्] हे योगी, [परमात्माराधकाः] परमात्माके आराधक [नैव भवंति] नहीं हैं ॥ भावार्थ---ये विषय कषाय शुद्धात्मतत्त्वके शत्रु हैं, जो इनका नाश न करे, वह स्वरूपका आराधक कैसा ? स्वरूपको वही आराधता है, जिसके विषय कषायका प्रसंग न हो, सब दोषोंसे रहित जो निज परमात्मा उसकी आराधनाके घातक विषय कषायके सिवाय दूसरा कोई भी नहीं है । विषय कषायकी निवृत्तिरूप शुद्धात्माकी अनुभूति वह वैराग्यसे ही देखी जाती है ।

इति । तथाहि । विषयकषायनिवृत्तिरूपं शुद्धात्मानुभूतिस्वभावं वैराग्यं, शुद्धात्मोपलब्धिरूपं तत्त्वविज्ञानं, बाह्याभ्यन्तरपरिग्रहपरित्यागरूपं नैर्ग्रन्थ्यं, निश्चिन्तात्मानुभूतिरूपा वशचित्तता, वीतरागनिर्विकल्पसमाधिबहिरङ्गसहकारिभूतं जितपरीषहत्वं चेति पञ्चैतान् ध्यानहेतून् ज्ञात्वा भावयित्वा च ध्यानं कर्तव्यमिति भावार्थः । तथा चोक्तम्—"वैराग्यं तत्त्वविज्ञानं नैर्ग्रन्थ्यं वशचित्तता । जितपरीषहत्वं च पञ्चैते ध्यानहेतवः ॥" ॥१९२॥

अथ—

परम-समाहि धरेवि मुणि जे परबंभु ण जंति ।
ते भव-दुक्खइँ बहुविहइँ कालु अणंतु सहंति ॥१९३॥
परमसमाधिं धृत्वापि मुनयः ये परब्रह्म न यान्ति ।
ते भवदुःखानि बहुविधानि कालं अनन्तं सहन्ते ॥१९३॥

जे ये केचन मुणि मुनयः ण जंति न गच्छन्ति । कं कर्मतापन्नम् । परबंभु परमब्रह्म परब्रह्मशब्दवाच्यं निजदेहस्थं केवलज्ञानाद्यनन्तगुणस्वभावं परमात्मस्वरूपम् । किं कृत्वा पूर्वम् । परमसमाहि धरेवि वीतरागतात्त्विकचिदानन्दैकानुभूतिरूपं परमसमाधिं धृत्वा ते पूर्वोक्तशुद्धात्मभावनारहिताः पुरुषाः सहंति सहन्ते । कानि कर्मतापन्नानि । भवदुक्खइं वीतरागपरमाह्लादरूपात् पारमार्थिकसुखात् प्रतिपक्षभूतानि नरनारकादिभवदुःखानि । कतिसंख्योपेतानि । बहुविहइं शारीरमानसादिभेदेन

इसलिये ध्यानका मुख्य कारण वैराग्य है। जब वैराग्य हो तब तत्त्वज्ञान निर्मल हो, सो वैराग्य और तत्त्वज्ञान ये दोनों परस्परमें मित्र हैं। ये ही ध्यानके कारण है, और बाह्याभ्यन्तर परिग्रहके त्यागरूप निर्ग्रन्थपना वह ध्यानका कारण है। निश्चित आत्मानुभूति ही है स्वरूप जिसका ऐसे जो मनका वश होना, वह वीतराग निर्विकल्पसमाधिका सहकारी है, और बाईस परोषहोंका जीतना, वह भी ध्यानका कारण है। ये पांच ध्यानके कारण जानकर ध्यान करना चाहिये। ऐसा दूसरी जगह भी कहा है, कि संसार शरीरभोगोंसे विरक्तता, तत्त्वविज्ञान, सकल परिग्रहका त्याग, मनका वश करना, और बाईस परीषहोंका जीतना—ये पाँच आत्म-ध्यानके कारण हैं ॥१९२॥

आगे परमसमाधिकी महिमा कहते है—[ये मुनयः] जो कोई मुनि [परमसमाधिं] परमसमाधिको [धृत्वापि] धारण करके भी [परब्रह्म] निज देहमें ठहरे हुए केवलज्ञानादि अनंतगुणरूप निज आत्माको [न यांति] नही जानते हैं, [ते] वे शुद्धात्मभावनासे रहित पुरुष [बहुविधानि] अनेक प्रकारके [भवदुःखानि] नारकादि भवदुःख आधि व्याधिरूप [अनंतं कालं] अनंतकालतक [सहंते] भोगते हैं ॥ भावार्थ—मनके दुःखको आधि कहते हैं, और तनुसंबधी दुःखोंको व्याधि कहते हैं, नाना प्रकारके दुःखोंको अज्ञानी जीव भोगता है। ये दुःख वीतराग परम आह्लादरूप जो पारमार्थिक-सुख उससे विमुख हैं। यह जीव अनन्तकाल तक निजस्वरूपके ज्ञान बिना चारों गतियोंके

बहुविधानि । कियन्तं कालम् । कालु अणंतु अनन्तकालपर्यन्तमिति । अत्रेदं व्याख्यानं ज्ञात्वा निजशुद्धात्मनि स्थित्वा रागद्वेषादिसमस्तविभावत्यागेन भावना कर्तव्येति तात्पर्यम् ॥१९३॥

अथ—

जामु सुहासुह-भावडा णवि सयल वि तुट्टंति ।
परम—समाहि ण तामु केवुलि एमु भणंति ॥१९४॥

यावत् शुभाशुभभावाः नैव सकला अपि त्रुटयन्ति ।
परमसमाधिर्न तावत् मनसि केवलिन एवं भणन्ति ॥१९४॥

जामु इत्यादि । जामु यावत्कालं णवि तुट्टंति नैव नश्यन्ति । के कर्तारः । सुहासुहभावडा शुभाशुभविकल्पजालरहितात् परमात्मद्रव्याद्विपरीताः शुभाशुभभावाः । परिणामा कतिसंख्योपेता अपि । सयल वि समस्ता अपि तामु ण तावत्कालं न । कोऽसौ । परमसमाहि शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपः शुद्धोपयोगलक्षणः परमसमाधिः । क्व । मणि रागादिविकल्परहितत्वेन शुद्धचेतसि केवुलि एमु भणंति केवलिनो वीतरागसर्वज्ञा एवं कथयन्तीति भावार्थः ॥१९४॥ इति चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमसमाधिप्रतिपादकसूत्रषट्केन प्रथममन्तरस्थलं गतम् ।

तदनन्तरमर्हत्पदमिति भावमोक्ष इति जीवन्मोक्ष इति केवलज्ञानोत्पत्तिरित्येकोऽर्थः तस्य चतुर्विधनामाभिधेयस्यार्हत्पदस्य प्रतिपादनमुख्यत्वेन सूत्रत्रयपर्यन्तं व्याख्यानं करोति । तद्यथा—

सयल-वियप्पहँ तुट्टाहँ सिव-पय-मग्गि वसंतु ।
कम्म-चउक्कइ विलउ गइ अप्पा हुइ अरहंतु ॥१९५॥

नाना प्रकारके दुःख भोग रहा है । ऐसा व्याख्यान जानकर निज शुद्धात्ममें स्थिर होके राग द्वेषादि समस्त विभावोंका त्यागकर निज स्वरूपकी ही भावना करनी चाहिये ॥१९३॥

आगे यह कहते है कि जबतक इस जीवके शुभाशुभ भाव सब दूर न हो, तबतक परमसमाधि नहीं हो सकती—[यावत्] जबतक [सकला अपि] समस्त [शुभाशुभभावाः] सकल विकल्प—जालसे रहित जो परमात्मा उससे विपरीत शुभाशुभ परिणाम [नैव त्रुटयंति] दूर न हो-मिटें नहीं, [तावत्] तबतक [मनसि] रागादि विकल्प रहित शुद्ध चित्तमें [परमसमाधिः न] सम्यग्दर्शन ज्ञान चारित्ररूप शुद्धोपयोग जिसका लक्षण है, ऐसी परमसमाधि इस जीवके नहीं हो सकती [एवं] ऐसा [केवलिनः] केवलीभगवान् [भणंति] कहते हैं ॥ भावार्थ—शुभाशुभ विकल्प जब मिटें, तभी परमसमाधि होवे, ऐसी जिनेश्वरदेवकी आज्ञा है ॥ १९४ ॥ इस प्रकार चौबीस दोहोंके महास्थलमें परमसमाधिके कथनरूप छह दोहोंका अन्तरस्थल हुआ ।

आगे तीन दोहोंमें अरहंतपदका व्याख्यान करते हैं, अरहंतपद कहो या भावमोक्ष कहो, अथवा जीवन्मोक्ष कहो, या केवलज्ञानकी उत्पत्ति कहो—ये चारों अर्थ एकको ही सूचित करते हैं,

सकलविकल्पानां त्रुट्यतां शिवपदमार्गे वसन् ।
कर्मचतुष्के विलयं गते आत्मा भवति अर्हन् ॥१९५॥

हुइ भवति । कोऽसौ । अप्पा आत्मा । कथंभूतो भवति । अरहंतु अरिर्मोहनीयं कर्म तस्य हननात् रजसी ज्ञानदृगावरणे तयोरपि हननात् रहस्यशब्देनान्तरायस्तदभावाच्च देवेन्द्रादिविनिर्मितामतिशयवर्ती पूजामर्हतीत्यर्हन् । कस्मिन् सति । कम्मचउक्कइ विलउ गइ घातिकर्मचतुष्के विलयं गते सति । किं कुर्वन् सन् पूर्वम् । सिवपयमग्गि वसंतु शिवशब्दवाच्यं यन्मोक्षपदं तस्य योऽसौ सम्यग्दर्शनज्ञानचारित्रत्रितयैकलक्षणो मार्गस्तस्मिन् वसन् सन् । केषां सताम् । सयलवियप्पहं तुट्टाहं समस्तविकल्पानां नष्टानां समस्तरागादिविकल्पविनाशादनन्तरं भवतीति भावार्थः ॥

अथ—

केवल-णाणिं अणवरउ लोयालोउ मुणंतु ।
णियमें परमाणंदमउ अप्पा हुइ अरहंतु ॥१९६॥
केवलज्ञानेनानवरतं लोकालोकं जानन् ।
नियमेन परमानन्दमयः आत्मा भवति अर्हन् ॥१९६॥

हुइ भवति । कोऽसौ । अप्पा आत्मा । कथंभूतो भवति । अरहंतु पूर्वोक्तलक्षणो अर्हन् । किं कुर्वन् । लोयालोउ मुणंतु क्रमकरणव्यवधानरहितत्वेन कालत्रयविषयं लोकालोकं वस्तु वस्तुस्वरूपेण युगपत् जानन् सन् । केन । केवलणाणिं लोकालोक-

---

अर्थात् चारों शब्दोका अर्थ एक ही है— [कर्मचतुष्के विलयं गते] ज्ञानावरणी, दर्शनावरणी, मोहनी, और अन्तराय इन चार घातियाकर्मोंके नाश होनेसे [आत्मा] यह जीव [अर्हन् भवति] अर्हंत होता है, अर्थात् जब घातियाकर्म विलय हो जाते हैं, तब अरहंतपद पाता है, देवेंद्रादिकर पूजाके योग्य हो वह अरहंत है, क्योंकि पूजायोग्यको ही अर्हंत कहते हैं । पहले तो महामुनि हुआ [शिवपदमार्गे वसन्] मोक्षपदके मार्गरूप सम्यग्दर्शन ज्ञान चारित्रमें ठहरता हुआ [सकलविकल्पानां] समस्त रागादि विकल्पोंका [त्रुट्यतां] नाश करता है, अर्थात् जब समस्त रागादि विकल्पोंका नाश हो जावे, तब निर्विकल्प ध्यानके प्रसादसे केवलज्ञान होता है । केवलज्ञानीका नाम अर्हंत है, चाहे उसे जीवन्मुक्त कहो । जब अरहंत हुआ, तब भावमोक्ष हुआ, पीछे चार अघातियाकर्मोंको नाशकर सिद्ध हो जाता है । सिद्धको विदेहमोक्ष कहते हैं । यही मोक्ष होनेका उपाय है ॥१९५॥

अब केवलज्ञानकी ही महिमा कहते हैं—[केवलज्ञानेन] केवलज्ञानसे [लोकालोकं] लोक अलोकको [अनवरतं] निरन्तर [जानन्] जानता हुआ [नियमेन] निश्चयसे [परमानंदमयः] परम आनंदमयी [आत्मा] यह आत्मा ही रत्नत्रयके प्रसादसे [अर्हन्] अरहंत [भवति) होता है । भावार्थ—समस्त लोकालोकको एक ही समयमें केवलज्ञानसे जानता हुआ अरहंत कहलाता है ।

प्रकाशकसकलविमलकेवलज्ञानेन । **कथम्** । अणवरउ निरन्तरम् । **किंविशिष्टो भवति भगवान्** । परमाणंदमउ **वीतरागपरमसमरसीभावलक्षणतात्त्विकपरमानन्दमयः** । **केम** । णियमें **निश्चयेन अत्र संदेहो न कर्तव्य इत्यभिप्रायः** ।।१९६।।

अथ—

जो जिणु केवल-णाणमउ परमाणंद-सहाउ ।
सो परमप्पउ परम-परु सो जिय अप्प-सहाउ ।।१९७।।
यः जिनः केवलज्ञानमयः परमानन्दस्वभावः ।
सः परमात्मा परमपरः स जीव आत्मस्वभाव ।।१९७।।

जो इत्यादि । **जो यः** जिणु **अनेकभवगहनव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिनः** । **कथंभूतः** । केवलणाणमउ **केवलज्ञानाविनाभूतानन्तगुणमयः** । **पुनरपि कथंभूतः** । परमाणंदसहाउ **इन्द्रियविषयातीतः स्वात्मोत्थः रागादिविकल्परहितः परमानन्दस्वभावः** सो परमप्पउ **स पूर्वोक्तोऽर्हन्नेव परमात्मा** परमपरु **प्रकृष्टानन्तज्ञानादिगुणरूपा मा लक्ष्मीर्यस्य स भवति परमः संसारिभ्यः पर उत्कृष्टः इत्युच्यते परमश्चासौ परश्च परमपरः** सो **स पूर्वोक्तो वीतरागः सर्वज्ञः** जिय **हे जीव** अप्पसहाउ **आत्मस्वभाव इति** । **अत्र योऽसौ पूर्वोक्तभणितो भगवान् स एव संसारावस्थायां निश्चयनयेन शक्तिरूपेण जिन इत्युच्यते** । **केवलज्ञानावस्थायां व्यक्तिरूपेण च** ।

जिसका ज्ञान जाननेके क्रमसे रहित है। एक ही समयमें समस्त लोकालोकको प्रत्यक्ष जानता है, आगे पीछे नहीं जानता। सब क्षेत्र, सब काल, सब भावको निरंतर प्रत्यक्ष जानता है। जो केवली-भगवान् परम आनंदमयी हैं। वीतराग परमसमरसीभावरूप जो परम आनंद अतीन्द्रिय अविनाशी सुख वही जिसका लक्षण है। निश्चयसे ज्ञानानंदस्वरूप है, इसमें संदेह नहीं है ।। १९६ ।।

आगे ऐसा कहते हैं, कि केवलज्ञान ही आत्माका निजस्वभाव है, और केवलीको ही परमात्मा कहते हैं—[**यः जिनः**] जो अनंत संसाररूपी वनके भ्रमणके कारण ज्ञानावरणादि आठ कर्मरूपी वैरी उनका जीतनेवाला वह [**केवलज्ञानमयः**] केवलज्ञानादि अनंत गुणमयी है [**परमानंदस्वभावः**] और इंद्रिय विषयसे रहित आत्मीक रागादि विकल्पोंसे रहित परमानंद ही जिसका स्वभाव है, ऐसा जिनेश्वर केवलज्ञानमयी अरहंतदेव [**सः**] वही [**परमात्मा**] उत्कृष्ट अनंत ज्ञानादि गुणरूप लक्ष्मीवाला आत्मा परमात्मा है। उसीको वीतराग सर्वज्ञ कहते है, [**जीव**] हे जीव, वही [**परमपरः**] संसारियोंसे उत्कृष्ट है, ऐसा जो भगवान् वह तो व्यक्तिरूप है, और [**स आत्मस्वभावः**] वह आत्मा का ही स्वभाव है ।। **भावार्थ**—संसार अवस्थामें निश्चयनयकर शक्तिरूप विराजमान है, इसलिये संसारीको शक्तिरूप जिन कहते हैं, और केवलीको व्यक्तिरूप कहते हैं। द्रव्यार्थिकनयकर जैसे भगवान् हैं, वैसे ही सब जोव है, इस तरह निश्चयनयकर जीवको परब्रह्म कहो, परमशिव कहो, जितने भगवान्के नाम हैं, उतने ही निश्चयनयकर विचारो तो सब जीवोंके हैं, सभी जीव जिनसमान

तथैव च परमब्रह्मादिशब्दवाच्यः स एव तदग्रे स्वयमेव कथयति । निश्चयनयेन सर्वे जीवा जिनस्वरूपाः जिनोऽपि सर्वजीवस्वरूप इति भावार्थः । तथा चोक्तम्—"जीवा जिणवर जो मुणइ जिणवर जीव मुणेइ । सो समभावि परिट्ठियउ लहु णिव्वाणु लहेइ ॥" ॥१९७॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये अर्हदवस्थाकथनमुख्यत्वेन सूत्रत्रयेण द्वितीयमन्तरस्थलं गतम् ।

अत ऊर्ध्वं परमात्मप्रकाशशब्दस्यार्थकथनमुख्यत्वेन सूत्रत्रयपर्यन्तं व्याख्यानं करोति । तद्यथा—

सयलहँ कम्महँ दोसहँ वि जो जिणु देउ विभिण्णु ।
सो परमप्प-पयासु तुहुँ जोइय णियमेँ मण्णु ॥१९८॥
सकलेभ्यः कर्मभ्यः दोषेभ्यः अपि यो जिनः देवः विभिन्नः ।
तं परमात्मप्रकाशं त्वं योगिन् नियमेन मन्यस्व ॥१९८॥

सो तं परमप्पपयासु परमात्मप्रकाशसंज्ञं तुहुं त्वं कर्ता मण्णु मन्यस्व जानीहि जोइय हे योगिन् णियमे निश्चयेन । स कः । जो जिणु देउ यो जिनदेवः । किंविशिष्टः । विभिण्णु विशेषेण भिन्नः । केभ्यः । सयलह कम्महं रागादिरहितचिदानन्दैकस्वभावपरमात्मनो यानि भिन्नानि सर्वकर्माणि तेभ्यः । न केवलं कर्मभ्यो भिन्नः । दोसहं वि टङ्कोत्कीर्णज्ञायकैकस्वभावस्य परमात्मनो येऽनन्तज्ञानसुखादिगुणास्तत्प्रच्छादका ये दोषास्तेभ्योऽपि भिन्न इत्यभिप्रायः ॥१९८॥

हैं, और जिनराज भी जीवोंके समान है, ऐसा जानना । ऐसा दूसरी जगह भी कहा है । जो सम्यग्दृष्टि जीवोंको जिनवर जाने, और जिनवरको जीव जाने, जो जीवोंकी जाति है, वही जिनवर की जाति है, और जो जिनवरकी जाति है, वही जीवोंकी जाति है, ऐसे महामुनि द्रव्यार्थिकनयकर जीव और जिनवरमें जातिभेद नहीं मानते, वे मोक्ष पाते हैं ॥ १९७ ॥ इस प्रकार चौबीस दोहोंके महास्थलमें अरहंतदेवके कथनकी मुख्यतासे तीन दोहोंमें दूसरा अंतरस्थल कहा ।

आगे परमात्मप्रकाश शब्दके अर्थके कथनकी मुख्यतासे तीन दोहा कहते हैं—[सकलेभ्यः कर्मभ्यः] ज्ञानावरणादि अष्टकर्मोंसे [दोषेभ्यः अपि] और सब क्षुधादि अठारह दोषोंसे [विभिन्नः] रहित [यः जिनदेवः] जो जिनेश्वरदेव है, [तं] उसको [योगिन् त्वं] हे योगी, तू [परमात्मप्रकाशं] परमात्मप्रकाश [नियमेन] निश्चयसे [मन्यस्व] मान । अर्थात् जो निर्दोष जिनेन्द्रदेव है, वही परमात्मप्रकाश हैं ॥ भावार्थ—रागादि रहित चिदानंदस्वभाव परमात्मासे भिन्न जो सब कर्म वे ही संसारके मूल हैं । जगतके जीव तो कर्मोंकर सहित हैं, और भगवान् जिनराज इनसे मुक्त हैं, और सब दोषोंसे रहित हैं । वे दोष संसारी-जीवोंके लग रहे हैं, ज्ञायकस्वभाव आत्माके अनंतज्ञान सुखादि गुणोंके आच्छादक हैं । उन दोषोंसे रहित जो सर्वज्ञ वही परमात्मप्रकाश हैं, योगीश्वरोंके मनमें ऐसा ही निश्चय है । श्रीगुरु शिष्यसे कहते हैं कि हे योगिन्, तू निश्चयसे ऐसा ही मान यही सत्पुरुषोंका अभिप्राय है ॥१९८॥

अथ—

केवल-दंसणु णाणु सुहु वीरिउ जो जि अणंतु ।
सो जिण-देउ वि परम-मुणि परम-पयासु मुणंतु ॥१९९॥

केवलदर्शनं ज्ञानं सुखं वीर्यं य एव अनन्तम् ।
स जिनदेवोऽपि परममुनिः परमप्रकाशं जानन् ॥१९९॥

सो जिणदेउ वि **स जिनदेवोऽपि एवं भवति । न केवलं जिनदेवो भवति ।** परममुणि **परम उत्कृष्टो मुनिः प्रत्यक्षज्ञानी । किं कुर्वन् सन् ।** मुणंतु **मन्यमानो जानन् सन् । कम्** परमपयासु **परममुत्कृष्टं लोकालोकप्रकाशकं केवलज्ञानं यस्य स भवति परमप्रकाशस्तं परमप्रकाशम् । स कः ।** केवलदसणु णाणु सुहु वीरिउ जो जि **केवलज्ञानदर्शनसुखवीर्यस्वरूपं य एव । कथंभूतं तत् केवलज्ञानादिचतुष्टयम् ।** अणंतु ***युगपदनन्तद्रव्यक्षेत्रकालभावपरिच्छेदकत्वादविनश्वरत्वाच्चानन्तमिति भावार्थः*** ॥१९९॥

जो परमप्पउ परम-पउ हरि हरु बंभु वि बुद्धु ।
परम पयासु भणंति मुणि सो जिण-देउ विसुद्धु ॥२००॥

यः परमात्मा परमपदं हरिः हरः ब्रह्मापि बुद्धः ।
परमप्रकाशः भणन्ति मुनयः स जिनदेवो विशुद्धः ॥२००॥

भणंति **कथयन्ति । के ते** मुणि **मुनयः** प्रत्यक्षज्ञानिनः । **कथंभूतं भणन्ति** परमपयासु **परमप्रकाशः । यः कथंभूतः ।** जो परमप्पउ **यः परमात्मा । पुनरपि कथंभूतः ।** परमपउ **परमानन्तज्ञानादिगुणाधारत्वेन परमपदस्वभावः । किंविशिष्टः ।** हरि **हरिसंज्ञः** हरु **महेश्वराभिधानः** बम्भु वि **परमब्रह्माभिधानोऽपि** बुद्धु **बुद्धः सुगत-**

फिर भी इसी कथनको दृढ करते हैं—[**केवलदर्शनं ज्ञानं सुखं वीर्यं**] केवलदर्शन, केवलज्ञान, अनंतसुख, अनंतवीर्य [**यदेव अनंतं**] ये अनंतचतुष्टय जिसके हों [**स जिनदेवः**] वही जिनदेव है, [**परममुनिः**] वही परममुनि अर्थात् प्रत्यक्ष ज्ञानी है । क्या करता संता । [**परमप्रकाशं जानन्**] उत्कृष्ट लोकालोकका प्रकाशक जो केवलज्ञान वही जिसके परमप्रकाश है, उससे सकल द्रव्य, क्षेत्र, काल, भव, भावको जाना हुआ परमप्रकाशक है । ये केवलज्ञानादि अनंतचतुष्टय एक ही समयमें अनंतद्रव्य अनंतक्षेत्र, अनंतकाल और अनंतभावोंको जानते हैं, इसलिये अनंत हैं, अविनश्वर हैं, इनका अन्त नहीं है, ऐसा जानना ॥१९९॥

आगे जिनदेवके ही अनेक नाम हैं, ऐसा निश्चय करते हैं—[**यः**] जिस [**परमात्मा**] परमात्माको [**मुनयः**] मुनि [**परमपदः**] परमपद [**हरिः हरः ब्रह्मा अपि**] हरि महादेव ब्रह्मा [**बुद्धः परमप्रकाशः भणंति**] बुद्ध और परमप्रकाश नामसे कहते है, [**सः**] वह [**विशुद्धः जिनदेवः**] रागादि रहित शुद्ध जिनदेव ही है, उसीके ये सब नाम हैं ॥ **भावार्थ**—प्रत्यक्षज्ञानी उसे परमानंद

संज्ञः सो जिणदेउ स एव पूर्वोक्तः परमात्मा जिनदेवः । किंविशिष्टः । विसुद्धु समस्तरागादिदोषपरिहारेण शुद्ध इति । अत्र य एव परमात्मप्रकाशसंज्ञो निर्दोषि-परमात्मा व्याख्यातः स एव परमात्मा, स एव परमपदः, स एव विष्णुसंज्ञः, स एवेश्वराभिधानः, स एव ब्रह्मशब्दवाच्यः, स एव सुगतशब्दाभिधेयः, स एव जिनेश्वरः, स एव विशुद्ध इत्याद्यष्टाधिकसहस्रनामाभिधेयो भवति । नानारुचीनां जनानां तु कस्यापि केनापि विवक्षितेन नाम्नाराध्यः स्यादिति भावार्थः । तथा चोक्तम्—"नामाष्टकसहस्रेण युक्तं मोक्षपुरेश्वरम्" इत्यादि ॥२००॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमात्मप्रकाशशब्दार्थकथनमुख्यत्वेन सूत्रत्रयेण तृतीयमन्तरस्थलं गतम् ।

तदनन्तरं सिद्धस्वरूपकथनमुख्यत्वेन सूत्रत्रयपर्यन्तं व्याख्यानं करोति तद्यथा—

झाणेँ कम्म-क्खउ करिवि मुक्कउ होइ अणंतु ।
जिणवरदेवइँ सो जि जिय पभणिउ सिद्ध महंतु ॥२०१॥

ध्यानेन कर्मक्षयं कृत्वा मुक्तो भवति अनन्तः ।
जिनवरदेवेन स एव जीव प्रभणितः सिद्धो महान् ॥२०१॥

पभणिउ प्रभणितः कथितः । केन कर्तृभूतेन । जिणवरदेवइं जिनवरदेवेन । कोऽसौ भणितः । सिद्धः सिद्धः । कथंभूतः । महंतु महापुरुषाराधितत्वात् केवलज्ञानादिमहागुणाधारत्वाच्च महान् । क एव । सो जि स एव । स कः योऽसौ मुक्कउ होइ ज्ञानावरणादिभिः कर्मभिर्मुक्तो रहितः सम्यक्त्वाद्यष्टगुणसहितश्च जिय हे जीव ।

ज्ञानादि गुणोंका आधार होनेसे परमपद कहते हैं । वही विष्णु है, वही महादेव है, उसीका नाम परब्रह्म है, सबका ज्ञायक होनेसे बुद्ध है, सबमे व्यापक ऐसा जिनदेव देवाधिदेव परमात्मा अनेक नामोंसे गाया जाता है । समस्त रागादिक दोषके न होनेसे निर्मल है, ऐसा जो अरहंतदेव वही परमात्म परमपद, वही विष्णु, वही ईश्वर, वही ब्रह्मा, वही शिव, वही सुगत, वही जिनेश्वर और वही विशुद्ध—इत्यादि एक हजार आठ नामोंसे गाया जाता है । नाना रुचिके धारक ये संसारी जीव वे नाना प्रकारके नामोंसे जिनराजको आराधते हैं । ये नाम जिनराजके सिवाय दूसरेके नहीं हैं । ऐसा ही दूसरे ग्रंथोमे भी कहा है – एक हजार आठ नामों सहित वह मोक्षपुरका स्वामी उसकी आराधना सब करते हैं । उसके अनंत नाम और अनंतरूप हैं । वास्तवमे नामसे रहित रूपसे रहित ऐसे भगवान् देवको हे प्राणियो, तुम आराधो ॥२००॥ इस प्रकार चौबीस दोहोंके महास्थलमें परमात्मप्रकाश शब्दके अर्थकी मुख्यतासे तीन दोहोंमें तीसरा अन्तरस्थल कहा ।

आगे सिद्धस्वरूपके कथनकी मुख्यतासे तीन दोहोंमें व्याख्यान करते हैं—[ध्यानेन] शुक्लध्यानसे [कर्मक्षयं] कर्मोंका क्षय [कृत्वा] करके [मुक्तः भवति] जो मुक्त होता है, [अनंतः] और अविनाशी है, [जीव] हे जीव, [स एव] उसे ही [जिनवरदेवेन] जिनवरदेवने [महान् सिद्धः प्रभणितः] सबसे महान् सिद्ध भगवान् कहा है ॥ भावार्थ—अरहंतपरमेष्ठी सकल सिद्धान्तोके

कथंभूतः । अणंतु न **विद्यतेऽन्तो** विनाशो यस्य स भवत्यनन्तः । किं कृत्वा पूर्वं **मुक्तो भवति** । कम्मक्खउ करिवि **विशुद्धज्ञानदर्शनस्वभावादात्मद्रव्याद्विलक्षणं यदार्तरौद्रध्या-नद्वयं तेनोपार्जितं यत्कर्म तस्य क्षयः कर्मक्षयस्तं कृत्वा** । **केन** । झाणें रागादिविकल्प-**रहितस्वसंवेदनज्ञानलक्षणेन ध्यानेनेति तात्पर्यम्** ॥२०१॥

अथ—

अण्णु वि बंधु वि तिहुयणहँ सासय-सुक्ख-सहाउ।
तित्थु जि सयलु वि कालु जिय णिवसइ लद्ध-सहाउ ॥२०२।
अन्यदपि बन्धुरपि त्रिभुवनस्य शाश्वतसौख्यस्वभावः।
तत्रैव सकलमपि कालं जीव निवसति लब्धस्वभावः ॥२०२॥

अण्णु वि इत्यादि । अण्णु वि **अन्यदपि** पुनरपि स **पूर्वोक्तः** सिद्धः । **कथं-भूतः** । **बन्धु वि बन्धुरेव** । **कस्य** । तिहुयणहं **त्रिभुवनस्थभव्यजनस्य** । **पुनरपि किं विशिष्टः** । सासयसुक्खसहाउ **रागादिरहिताव्याबाधशाश्वतसुखस्वभावः** । **एवंगुण-विशिष्टः सन् किं करोति स भगवान्** । तित्थु जि **तत्रैव मोक्षपदे** णिवसइ **निवसति** । **कथंभूतः सन्** । लद्धसहाउ **लब्धशुद्धात्मस्वभावः कियत्कालं निवसति** । सयलु वि **समस्तमप्यनन्तानन्तकालपर्यन्तं** जिय हे जीव **इति** । **अत्रानेन समस्तकालग्रहणेन किमुक्तं भवति** । **ये केचन वदन्ति मुक्तानां पुनरपि संसारे पतनं भवति तन्मतं निरस्तमिति** भावार्थः ॥२०२॥

